श्रीरत्नशेखरसूरिविरचितम्

# श्राद्धविधिप्रकरणम्







संपादक

## मुनिश्री वैराग्यरतिविजयजी
## मुनिश्री प्रशमरतिविजयजी

श्री विजयदान-प्रेम-रामचन्द्रसूरिग्रन्थमाला-३

तपोगच्छगगननभोमणि-श्रीरत्नशेखरसूरि-विरचितम्

# श्राद्धविधिप्रकरणम्

॥ लाभार्थी ॥

**श्री तपगच्छ अमर जैन शाला,**

टेकरी, खंभात,

गुजरात

श्री विजयदान-प्रेम-रामचन्द्रसूरिग्रन्थमाला-३

| | | |
|---|---|---|
| ग्रन्थनाम | : | **श्राद्धविधिप्रकरणम्** |
| कर्ता | : | **आ. श्री रत्नशेखर सूरिजी म.** |
| प्रस्तावना | : | **मुनिश्री रामविजयजी म. ( पू. आ. श्रीविजयरामचन्द्रसूरिजी म. )** |
| प्रथमावृत्ति | : | **वि. सं. १९७४,** संशोधक **: पू. आ. श्रीविजयदानसूरिजी म.** |
| प्रकाशक | : | **श्री जैन आत्मानंद सभा - भावनगर** |
| द्वितीयावृत्ति | : | **वि. सं. १९८०,** सम्पादक **: पं. श्रीविक्रमविजयजी म., पं. श्री भास्करविजयजी म.** |
| प्रकाशक | : | **श्री देवचंद लालभाई जैन पुस्तकोद्धार फंड, सुरत** |
| तृतीयावृत्ति | : | **वि. सं. २०६१,** पुन:सम्पादक **: मुनिवैराग्यरतिविजय, मुनिप्रशमरतिविजय** |
| प्रकाशक | : | **प्रवचन प्रकाशन, पूना** |
| **मूल्य** | : | **रु. २५०.००** |
| © | : | PRAVACHAN PRAKASHAN, 2005 |

**प्राप्तिस्थान**

| | | |
|---|---|---|
| पूना | : | **प्रवचन प्रकाशन,** ४८८, रविवार पेठ, पूना-४११००२, फोन : ०२०-२४४५३०४४, ३०९२२०६९ मो. ९८९००५५३१० |
| अहमदाबाद | : | **सरस्वती पुस्तक भंडार,** हाथीखाना, रतनपोल, अहमदाबाद-३८०००१, फोन : २५३५६६९२ |
| | | **अशोकभाई घेलाभाई शाह,** २०१, ओएसीस, अंकुर स्कूल सामे, पालडी, अहमदाबाद-७ |
| | | फोन : ०७९-२६६३३०८५ मो. ०७९-९३२७००७५७९ |
| मुंबई | : | **हिन्दी ग्रंथ कार्यालय,** हीराबाग, सी. पी. टेंक, मुंबई-४०००४, फोन : २३८२६७३९ |
| | | Website - www.hindibooks.8m.com Jain and Indology@yahoogroups.com |
| अक्षरांकन | : | **विरति ग्राफिक्स,** अहमदाबाद, फोन : ०७९-२२६८४०३२ |

## પ્રકાશન-કથા

આપણાં સૌનાં જીવન પર પ્રભાવ પાથરનારી શાસ્ત્રપરંપરાનાં ત્રણ વહેણ જોવા મળે છે. પદાર્થલક્ષી શાસ્ત્રો, ભાવનાલક્ષી શાસ્ત્રો અને આચારલક્ષી શાસ્ત્રો. ચાર પ્રકરણ, ત્રણ ભાષ્ય, છ કર્મગ્રંથ, તત્ત્વાર્થ, કર્મપ્રકૃતિ, પંચસંગ્રહ, લોકપ્રકાશ જેવા શાસ્ત્રોમાં પદાર્થ વ્યવસ્થાની મુખ્યતા જોવા મળે છે. શાંતસુધારસ, અધ્યાત્મકલ્પદ્રુમ, ઉપદેશમાળા, સંવેગરંગ શાલા, ઉપમિતિભવપ્રપંચા, વૈરાગ્યશતક, કર્પૂરપ્રકર જેવાં શાસ્ત્રોમાં આપણી ભાવનાઓની કેળવણી મુખ્ય રહી છે. તો શ્રાદ્ધદિનકૃત્ય, ધર્મસંગ્રહ, શ્રાદ્ધવિધિ, આચારદિનકર, નવપદપ્રકરણ, ધર્મબિંદુ જેવા ગ્રંથોમાં જીવનચર્યાને સ્પર્શતા આચારોની પ્રરૂપણા મુખ્યતા પામે છે.

ગૃહસ્થો અને શ્રાવકોને અનિવાર્ય પણે પાળવા યોગ્ય સદ્આચારોનો ઉપદેશ શ્રાદ્ધવિધિનો મુખ્ય વિષય છે ધર્મબિંદુ અને ધર્મસંગ્રહ જેવા સર્વાંગસ્પર્શી ગ્રંથોની હાજરીમાં પણ શ્રાદ્ધવિધિ ગ્રંથે પોતાની અસ્મિતાને નોખી રીતે જીવંત રાખી છે તે જ આ ગ્રંથની આદરણીય મહત્તા પૂરવાર કરે છે. દરેક સંસ્કૃતગ્રંથો સાથે બને છે તેમ આ ગ્રંથ માત્ર સંયમી વર્ગનાં વાંચનપૂરતો સીમિત રહ્યો છે. જો કે, આનો અનુવાદ છે. તેની ઘણી આવૃત્તિઓ પ્રકટ થઈ રહી છે તે દ્વારા આપણે સમજી શકીએ છીએ કે આ ગ્રંથનો વ્યાપ ખૂબ છે પરંતુ મૂળ સંસ્કૃત ગ્રંથ તો સંયમી મહાત્માઓ પૂરતો જ વાંચનપાત્ર રહ્યો છે. અપવાદ હોય તો થોડા પંડિતોએ વાંચ્યો હશે તેનો.

આ ગ્રંથને નવેસરથી સંપાદિત કરવાની ભાવના થઈ તેનું મુખ્ય કારણ ભાવનાત્મક હતું. ચોવીશ વરસની વયે ધગધગતી અહિંસા ખુમારીથી પચાસહજાર માણસોની હાજરી ખડી કરીને અમદાવાદમાં ભદ્રકાળી મંદિરમાં થનારો બોકડાનો વધ હંમેશ માટે અટકાવનારા પૂ. મુનિમહારાજશ્રી **રામવિજયજી મ.ના** હાથે આ જ દિવસોમાં લખાયેલી સંસ્કૃત પ્રસ્તાવના, શ્રાદ્ધવિધિગ્રંથની મુદ્રિત આવૃત્તિને મળી હતી તે ઇતિહાસને તાજો કરવાની ઇચ્છા હતી. શ્રાદ્ધવિધિ ગ્રંથની પ્રથમ આવૃત્તિ પછીનાં ૮૯ વરસ પછી નવી છબી અને નવી છવિ ધારણ કરીને આ ત્રીજી આવૃત્તિ પ્રકાશિત થઈ રહી છે. ત્યારે મુનિ **રામ** નામનો ઉગતો સિતારો, સૂરિ **રામચંદ્ર** તરીકે જાજરમાન સૂરજ જેવું પ્રભાવશાળી

નામ બની ચૂક્યો છે.

કલ્પકિરણાવલી, બંધશતક અને શ્રાદ્ધવિધિ આ ત્રણ ગ્રંથોને નવસંપાદિત કરવાની ધારણા સાથે શ્રીદાન-પ્રેમ-રામચંદ્રસૂરિ ગ્રંથમાળાના અન્વયે ત્રણ પ્રતોનો સંપુટ સંઘ સમક્ષ પ્રસ્તુત થઈ રહ્યો છે. સમાનતા એ છે કે ત્રણેય ગ્રંથને પૂ. મુનિશ્રી **રામવિજયજીમ.**ની પ્રસ્તાવનાએ ગૌરવ બક્ષ્યું છે.

શ્રાદ્ધવિધિ ગ્રંથનાં પુનઃસંપાદન સમયે જૂની આવૃત્તિના પાઠોથી સંતોષ થતો ન હોવાથી હસ્તપ્રતનો આધાર લીધો છે. **શ્રી કૈલાસસાગરસૂરિજી** જ્ઞાનમંદિર-કોબાની હસ્તપ્રતની ઝેરોક્સના સથવારે આશરે અઢીસોથી વધુ સ્થાનોમાં પાઠશુદ્ધિ કરવામાં આવી છે. આ અર્થમાં આ પુનઃ સંપાદન નહીં બલ્કે નવસંપાદન છે.

શ્રાદ્ધવિધિગ્રંથના કથા વિભાગને બાદ કરીને કેવળ મૂળગ્રંથ અને તેના વિવરણને ગ્રંથાકારે પ્રકાશિત કરવાની અમો ભાવના સેવીએ છીએ. નજીકનાં ભવિષ્યમાં તે શ્રાદ્ધવિધિસંક્ષેપ તરીકે પ્રકાશિત થશે.

પ્રવચન પ્રકાશને - ગુજરાતી સાહિત્ય અને સંસ્કૃત સાહિત્યને ગુણવત્તા સાથે પ્રકટ કરતા રહેવાનો સંકલ્પ કર્યો છે. તપાગચ્છાધિરાજ પૂજ્યપાદ આચાર્ય ભગવંત **શ્રીમદ્વિજયરામચંદ્રસૂરીશ્વરજી** મહારાજાના વિદ્વાન્ શિષ્યરત્નો પ્રવચનકાર બંધુબેલડી **પૂ. મુનિરાજશ્રી વૈરાગ્યરતિવિજયજીમ., પૂ. મુનિરાજશ્રી પ્રશમરતિવિજયજીમ.**ના માર્ગદર્શનતળે અમે સાહિત્ય સેવાનો યત્કિંચિત્ લાભ પામીએ છીએ તેનો અમને અત્યંત આનંદ છે.

પરમ શ્રદ્ધેય ગચ્છાધિપતિ પૂજ્યપાદ આચાર્યદેવ **શ્રીમદ્વિજયહેમભૂષણસૂરીશ્વરજી** મહારાજાની મંગલપ્રેરણાથી **શ્રી તપગચ્છ અમર જૈન શાળા, ટેકરી ખંભાત, (ગુજરાત)**ના શ્રીસંઘે જ્ઞાનદ્રવ્યનો સદુપયોગ કરી આ ગ્રંથને પ્રકાશિત કરવાનો લાભ લીધો છે અમે તેની અનુમોદના કરીએ છીએ.

— **પ્રવચન પ્રકાશન** પૂના

# નવસંપાદનની વેળાએ....

શ્રાદ્ધવિધિ ગ્રંથ તેની ટીકા સાથે અનેકવાર મુદ્રિત થયો છે. સર્વપ્રથમ તેનું સંપાદન સકલાગમરહસ્યવેદી પૂજ્યપાદ આચાર્યદેવ **શ્રીમદ્‌વિજયદાનસૂરીશ્વરજી** મહારાજાના વરદહસ્તે સંપન્ન થયું હતું. જેની પ્રસ્તાવના તેઓશ્રીમદ્‌ના પ્રશિષ્ય પૂજ્યપાદ તપાગચ્છાધિરાજ આચાર્યદેવ **શ્રીમદ્‌વિજયરામચંદ્રસૂરીશ્વરજી** મહારાજાએ (તે વખતે પૂ. મુનિરાજશ્રી **રામવિજયજી મ.**) આલેખી હતી. આ સંપાદનના આધારે જ પૂજ્યપાદ આચાર્યદેવશ્રી **મદ્‌વિજયલબ્ધિસૂરીશ્વરજી મ.**ના શિષ્યરત્નો પૂજ્ય મુનિપ્રવરશ્રી **વિક્રમવિજયજી મ.** અને પૂ. **મુનિપ્રવરશ્રી ભાસ્કરવિજય મ.** એ તેનું પુનઃ સંપાદન કર્યું. જૂનું સંપાદન નવસંપાદન કરતાં વધુ શુદ્ધ છે.

પ્રસ્તુત સંપાદન પણ પ્રથમ સંપાદનનું નવસંસ્કરણ જ છે. કેવળ તેને **શ્રીકૈલાસસાગરસૂરિ જ્ઞાનમંદિર**-કોબા સ્થિત હસ્તપ્રત સાથે સરખાવવામાં આવ્યું છે. જ્યાં મહત્ત્વપૂર્ણ પાઠભેદ જણાયા છે તે ટિપ્પણીમાં को. ह. प्र. पाठः લખીને સમાવ્યા છે. કોબાની આ હસ્તપ્રતમાં કેટલાંક પત્રો ખૂટે છે. શ્રાદ્ધવિધિ અને તેની ટીકા એક પ્રચલિત વ્યાખ્યાન ગ્રંથ છે. તેની અનેક હસ્તપ્રતો લખાઈ છે. સમય અને સંસાધનની મર્યાદાને કારણે પાઠભેદ-પાઠશુદ્ધિ જેવા મહત્ત્વપૂર્ણ અંગો આ સંપાદનમાં સચવાયા નથી. સાથે જ એક સમૃદ્ધ સંપાદનમાં અપેક્ષિત પરિશિષ્ટ વિ.ની સંકલના પણ શક્ય બની નથી તે માટે વિદ્વાનો અમને દરગુજર કરશે એવી અપેક્ષા છે.

**– સંપાદકો**

વિ. સં. ૨૦૬૧, કા.વ. ૩/૧

# પ્રાસ્તાવિક

**'શ્રાદ્ધવિધિપ્રકરણ'** અને તેની **'શ્રાદ્ધવિધિકૌમુદી'** નામક સ્વોપજ્ઞ વિસ્તૃત વૃત્તિના આ પ્રકાશનને શાસ્ત્રાભ્યાસરસિક વિદ્વાન્ વાચકવર્ગના કરકમલમાં સાદર કરતાં અત્યન્ત આનંદ થાય છે. પ્રસ્તુત શ્રી શ્રાદ્ધવિધિપ્રકરણના ગુજરાતી અનુવાદના પ્રકાશન સમયે લખેલી પ્રસ્તાવનામાંથી થોડોક અંશ આ નીચે આપીએ છીએ.

**શ્રાદ્ધવિધિપ્રકરણ અને તેની સ્વોપજ્ઞ ટીકા :**

શ્રાવકધર્મને અંગે વિધિવાદનું નિરુપણ કરતા ગ્રંથરત્નોમાં **શ્રાદ્ધવિધિપ્રકરણ** મહત્ત્વનું સ્થાન ધરાવે છે. તેની રચના પ્રાકૃત ભાષામાં થયેલી છે. તેની સત્તર ગાથાઓ છે. આ સત્તર ગાથાઓમાં પણ ગ્રન્થકારે, પ્રતિપાદ્ય વિષયોને અતિ સંક્ષેપથી છતાં સુસ્પષ્ટપણે સમાવી દીધા છે.

આ પ્રકરણ ઉપર ગ્રંથકારે પોતે જ છ હજાર સાતસો એકસઠ શ્લોક (૬૭૬૧) પ્રમાણ **'શ્રાદ્ધવિધિકૌમુદી'** નામક અતિ વિસ્તૃત વૃત્તિ સંસ્કૃતમાં રચી છે. મૂલપ્રકરણમાં નિર્દિષ્ટ વિષયો અને પ્રસંગાનુસાર પ્રાપ્ત થતા અનેકાનેક અન્ય વિષયોને, વૃત્તિમાં વિસ્તૃત રીતિએ વિવેચવામાં આવ્યા છે. **૧ દિનકૃત્ય ૨ રાત્રિકૃત્ય ૩ પર્વકૃત્ય ૪ ચાતુર્માસિકકૃત્ય ૫ વર્ષકૃત્ય અને ૬ જન્મકૃત્ય,** એમ છ વિભાગો પાડી શ્રાવકની કરણીય ધર્મક્રિયાઓનો અને તેને લગતાં વિધિવિધાનોનો સમાવેશ કરવામાં આવ્યો છે. ક્રિયાઓ આદિને યથાર્થ રીતે સમજાવવા માટે, શંકાઓ ઉપસ્થિત કરી, તે તે શંકાઓના શાસ્ત્રાનુસારી યુક્તિપ્રચુર સમાધાનો નિરુપિત કરી કથયિતવ્યોને દૃઢતર બનાવ્યાં છે. ધર્મવિધિઓ બતાવવાનો જ મુખ્ય ઉદ્દેશ હોવા છતાં, પ્રસંગે પ્રસંગે, વ્યાપારાદિ કેમ કરવાં ? સગાંસંબંધીઓ,

મિત્રો, સ્ત્રીપુત્રાદિ પરિવાર, માતાપિતા તથા બંધુઓ અને નગરજનો આદિ સાથે કેમ વર્તવું ? ભોજન કેમ લેવું ? મલમૂત્રાદિ ક્યાં, ક્યારે અને કેવી રીતે કરવાં ? સ્વપ્નફલવર્ણન, સ્વરોદયજ્ઞાન ઇત્યાદિ વિવિધ વ્યાવહારિક વિષયો પણ, પરિણામે ધર્મમાર્ગનાં સહાયક હોવાથી પ્રરુપ્યાં છે. સ્થળે સ્થળે નીતિવચનો અને વ્યવહારવચનોનો ઉલ્લેખ કરી, કથયિતવ્ય બલવત્તર બનાવવાનો મહાન પ્રયત્ન ગ્રંથકારે કર્યો છે. યથાવસર જિનાગમાદિ પંચાંગી, પૂર્વાચાર્યો કૃત પ્રકરણાદિ ગ્રંથો, તથા વેદ, સ્મૃતિ, પુરાણ આદિ અનેકાનેક ગ્રંથોના પ્રમાણો આપી પોતાની બહુશ્રુતતા, વિદ્વત્તા તથા સ્વપરશાસ્ત્રવેદિતાનો પરિચય પણ કરાવ્યો છે. સાથે સાથે તે તે ગ્રંથોનાં મૂલપાઠોને ઉદ્ધૃત કરી પ્રતિપાદ્ય વિષયોના પ્રામાણ્ય પ્રત્યે શંકાશીલ બનતા વાંચકોને નિઃશંક બનાવી દીધા છે.

આ **'શ્રાદ્ધવિધિકૌમુદી'** નામક અતિ વિસ્તૃત વૃત્તિની રચના વિ. સં. ૧૫૦૬માં કરવામાં આવી છે. રચનાસ્થળનો નિર્દેશ ગ્રંથકારે કર્યો નથી. મૂલના રચના સમયનો નિર્દેશ પણ મળતો નથી. વૃત્તિની રચના પૂર્ણ કરતાં એકાદ વર્ષનો સમય ગણીએ તો મૂલનો રચનાસમય વિ. સં. ૧૫૦૪ અથવા વિ. સં. ૧૫૦૫ અનુમાની શકાય. એ પણ સંભવિત છે કે - મૂલની રચના ઘણાં વર્ષો અગાઉ થઈ હોય અને વૃત્તિ પાછલથી રચવામાં આવી હોય. વૃત્તિના સંશોધનાદિકમાં **શ્રીજિનહંસગણિ** આદિએ સહાય કર્યાનું ગ્રંથકારે પોતે જ અંતિમ પ્રશસ્તિમાં ઉલ્લિખિત કર્યું છે.

**ગ્રંથકારમહર્ષિ શ્રીરત્નશેખરસૂરિજી :**

આ ગ્રંથરત્નના કર્તા તપાગચ્છીય વિદ્વાન આચાર્ય શ્રીરત્નશેખરસૂરિજી મહારાજ છે. તેઓશ્રીએ પોતાના પુનિત જન્મથી કયા નગર કે ગ્રામને પવિત્ર કર્યું હતું ? કયા માતાપિતાના કુલ-વંશને અલંકૃત કર્યા હતા ? તેમના માતાપિતાનું પુણ્યાભિધાન તથા તેમનું સંસારાવસ્થાનું શુભાભિધાન શું હતું ? તે વગેરે કશો જ ઉલ્લેખ ગ્રંથકારે કર્યો નથી. **શ્રીધર્મસાગરોપાધ્યાય**કૃત સ્વોપજ્ઞવૃત્તિ

સહિત 'તપાગચ્છ-પટ્ટાવલી' આદિ જે સાધનો પ્રાપ્ત થાય છે તેના ઉપર જ સંતોષ માનવો પડે છે.

તેઓશ્રીનો જન્મ વિ. સં. ૧૪૫૭માં થયો હતો.[1] વિ. સં.૧૪૬૩માં દીક્ષા અંગીકાર કરી હતી. વિ. સં. ૧૪૮૩માં પંડિતપદ, વિ. સં. ૧૪૯૩માં ઉપાધ્યાયપદ અને વિ. સં. ૧૫૦૨માં સૂરિપદ પ્રાપ્ત થયું હતું તેઓશ્રીનો કાલધર્મ (સ્વર્ગગમન) વિ. સં. ૧૫૧૭ના પોષ વદિ છઠના દિવસે થયો હતો[2] આથી એ ફલિત થાય છે કે, છ વર્ષની બાલ્યવયે તેઓશ્રીએ દીક્ષા અંગીકાર કરી હતી. ૨૬ વર્ષની વયે પંડિતપદ મલ્યું હતું. ૩૬ વર્ષની વયે ઉપાધ્યાયપદ અને ૪૫ વર્ષની વયે સૂરિપદારોપણ થયું હતું. તેઓશ્રીનો સમગ્ર જીવનકાલ ૬૦ વર્ષનો હતો.

સ્તંભતીર્થ (ખંભાત)માં બામ્બી નામના ભટ્ટે તેમને 'બાલસરસ્વતી' એવું બિરુદ અર્પ્યું હતું.[3]

---

૧. 'તપાગચ્છ પટ્ટાવલી'માં તેઓના જન્મસમયને અંગે બે મત દર્શાવાયા છે. ૧૪૫૭ અને ૧૪૫૨. તેમાંથી ૧૪૫૭ વાલો મત અધિક પ્રચલિત હોય તેમ લાગે છે. કારણ તે પછીના પટ્ટાવલીકારોએ ઉક્ત બે મતોમાંથી ૧૪૫૭ના એક જ મતનો ઉલ્લેખ કર્યો છે. જુઓ ઉપાધ્યાય શ્રીવીરવર્ધનગણિકૃત પટ્ટાવલી સારોદ્ધાર-(પટ્ટાવલી સમુચ્ચય ભા. ૧, પૃ. ૧૫૬) અને અજ્ઞાતકર્તૃક શ્રીગુરુપટ્ટાવલી (પટ્ટાવલી સમુચ્ચય બા. ૧, પૃ. ૧૭૨).

૨. તેમણે કરાવેલ પ્રતિષ્ઠાનો લેખ વિ. સં. ૧૫૧૭ ચૈત્ર સુદિ ૧૩નો મળે છે. તો તે પણ વિચારણીય છે. ચૈત્રાદિ હિંદી કે કાર્તિકાદિ ગુજરાતી વર્ષ ગણનાને લીધે જે ફરક પડે છે, તેને લીધે પણ આમ બનવા યોગ્ય છે પ્રતિષ્ઠાના લેખનો સંવત હિન્દી અને સ્વર્ગવાસનો સંવત ગુજરાતી માનીએ તો કશી જ હરકત આવતી નથી.

૩. આ ઉલ્લેખનું સમર્થન શ્રીદેવવિમલગણિએ 'હીરસૌભાગ્ય કાવ્ય' સર્ગ ૪, શ્લોક ૧૨૮માં કર્યું છે.

બેદરપુર (દક્ષિણ)માં મહાન બ્રાહ્મણ ભટ્ટને તેઓશ્રીએ પરાજિત કર્યો હતો.[1]

સૌમસૌભાગ્યકાવ્યમાં લખ્યું છે કે-તેમને આચાર્યપદ દેવગિરિ (દોલતાબાદ)ના વ્યાપારી મહાદેવે અપાવ્યું હતું. તેમણે સૂરિપદ-પંડિતપદ-મુનિપદ આપવાના, જિનમંદિરોની પ્રતિષ્ઠાના માલારોપણના તથા યોગવિધિ કરાવવા આદિ અનેક શુભ કાર્યો કર્યાં હતાં.

તેઓ યુગપ્રધાન **શ્રીસોમસુંદરસૂરિજી**ના શિષ્ય હતા.[2] 'સંતિકર' સ્તોત્રના કર્તા સહસ્રાવધાની પરમપ્રભાવક **શ્રીમુનિસુંદરસૂરિજી**ના પટ્ટધર બન્યા હતા. **શ્રીભુવનસુંદરસૂરિજી** પાસે તેમણે જ્ઞાનાભ્યાસ કર્યો હતો. **શ્રીસાધુરત્નસૂરિજી**ના સદુપદેશથી તેમને વૈરાગ્યરંગ લાગ્યો હતો.

તેમના અસ્તિસમય દરમિયાન વિ. સં. ૧૫૦૮માં જિનપ્રતિમા આદિનું ઉત્થાપન કરનાર લુંકામત પ્રવર્ત્યો હતો. લુંકામતમાં પ્રથમ વેષધારી વિ. સં. ૧૫૩૩માં ભાણા નામક થયા હતા.

પ્રસ્તુત શ્રીરત્નશેખરસૂરિજી સિવાય બીજા પણ ત્રણ સમાનનામક આચાર્યો થયા છે. ૧ **શ્રીપાલચરિત્ર** પ્રાકૃત તથા **ગુણસ્થાન ક્રમારોહ** ઇત્યાદિ ગ્રંથોના કર્તા, **હેમતલિકસૂરિ**-શિષ્ય બૃહદ્ગચ્છીય **શ્રીરત્નશેખરસૂરિ,** ૩ **પીપ્પલગચ્છીય** શ્રી**રત્નશેખર**સૂરિ.

૧. જુઓ સોમસૌભાગ્ય કાવ્ય સર્ગ-૧૦ તથા ગુરુગુણરત્નાકરકાવ્યસર્ગ-૧.

૨. શ્રીરત્નશેખરસૂરિજી એ, પોતાના ગુરુ તરીકે, શ્રાદ્ધવિધિપ્રકરણમાં સોમસુંદરસૂરિજીનો તથા શ્રાદ્ધપ્રતિક્રમણસૂત્રવૃત્તિમાં ભુવનસુંદરસૂરિજીનો નામોલ્લેખ કર્યો છે. એમણે કરાવેલ પ્રતિષ્ઠાના અનેક લેખોમાં 'શ્રીસોમસુંદરસૂરિશિષ્ય શ્રીરત્નશેખરસૂરિ' એવા ઉલ્લેખ પ્રાપ્ત થતો હોવાથી તેમના ગુરુ તરીકે અમે શ્રી સોમસુંદરસૂરિજીનો ઉલ્લેખ કર્યો છે.

**પ્રસ્તુત સંસ્કરણ :**

વાચકોના કરકમલમાં સાદર થયેલું આ પ્રકાશન, આ ગ્રંથરત્નનું દ્વિતીય સંસ્કરણ છે. પ્રથમ સંસ્કરણ, પૂજ્યપાદ પરમગુરુદેવ આચાર્ય શ્રીમદ્ **વિજયકમલસૂરીશ્વરજી**મહારાજસાહેબના સદુપદેશથી ભાવનગરની **શ્રીજૈનઆત્માનન્દસભા** દ્વારા વિ. સં. ૧૯૭૪માં પ્રકાશિત થયું હતું. પ્રથમ સંસ્કરણ ઘણા સમયથી અપ્રાપ્ય થયેલું હોવાથી, આ ગ્રંથનું પુનર્મુદ્રણ **શેઠ દેવચંદ લાલભાઈ જૈન પુસ્તકોદ્ધાર ફંડ**-સુરત તરફથી તેના ટ્રસ્ટીઓ પ્રકાશિત કરે છે.

પ્રસ્તુત સંસ્કરણના સંશોધનમાં કોઈ મહત્ત્વનો ફેરફાર અમે કરી શક્યા નથી. કેટલીક વાર પ્રસંગો અને સંયોગો એવા ઉપસ્થિત થાય છે કે-ધારેલી ધારણાઓ નિષ્ફળ થાય છે. પ્રસ્તુતસંસ્કરણના સંશોધન અંગે પણ કાંઈક આવું જ બન્યું છે. જે પદ્ધતિએ અમે આનું સંશોધન કરવા ધારેલું તે અમે કરી શક્યા નથી. છતાં જેવું છે તેવું પણ સ્વાધ્યાયપ્રેમી ધર્મારાધકોને ઉપયોગી થશે તો અમે અમારા પ્રયત્નને સફલ માનીશું. પ્રથમ સંસ્કરણમાં મુદ્રિત થયેલી અને પૂ. **મુનિરાજ શ્રીરામવિજયજી** (વર્તમાનમાં **આચાર્ય શ્રીવિજયરામચન્દ્રસૂરિજી**) મહારાજે લખેલી પ્રસ્તાવના ઉપયોગી હોવાથી આ સાથે આપીએ છીએ.

પૂજ્યપાદ ગુરુદેવ શ્રીમદ્ **વિજયલબ્ધિસૂરીશ્વરજી** મહારાજની મંગલમયી કૃપાના યોગથી યત્કિંચિત્ શ્રુતસેવા કરી શકીએ છીએ તેઓશ્રીમદ્નાં અગણિત ઉપકારોનું સ્મરણ આવા પ્રસંગે થાય તે સ્વાભાવિક છે. અન્ય સહાયકોના પણ અમે આભારી છીએ.

આમાં રહેલ અપૂર્ણતા અને અશુદ્ધિઓનું પરિમાર્જન કરી, વિરતિધર્મની યથાર્થ આરાધના દ્વારા ભવ્યાત્માઓ અનંત અને અવ્યાબાધ સુખના ભોક્તા બનો એ જ શુભાભિલાષા સાથે વિરમીએ છીએ.

મુંબઈ
માર્ગશીર્ષ શુક્લ પંચમી, વિ. સં. ૨૦૧૬
શુક્રવાર, તા. ૪-૧૨-૫૯.

પૂ. આચાર્યદેવશ્રીમદ્વિજય-લબ્ધિસૂરીશ્વર-ચરણચઞ્ચરિક
**પં. શ્રી વિક્રમવિજયગણિ.**
**મુનિ ભાસ્કરવિજય**

अर्हम्

न्यायाम्भोनिधि-श्रीमद्विजयानन्दसूरीश्वरपादपद्मेभ्यो नमः ।

# । प्रस्तावना ।

सुप्रसिद्धं ह्येतत् परिज्ञातपूतपारमेश्वरप्रवचनपरमार्थानां पण्डितप्रवराणाम् यदुत मुख्यतयाऽधिकारिद्वैविध्येन प्रकाशितवन्तः साधुधर्मं श्राद्धधर्मं च अपारेऽस्मिन् संसारनीराकरे निमज्जज्जन्तुजातस्य बोहित्थकल्पा धर्मवरसार्वभौमाः श्रीमत्तीर्थाधिपतयः । संदृब्धवन्तश्च सूत्रतया समवाप्योत्पादव्ययध्रौव्यात्मिकां त्रिपदीं द्वादशाङ्ग्या निर्मातारः श्रीमद्गणभृत्पादाः ।

तदनुसारेण निर्मितोऽयं श्रीजिननिकेतन-प्रतिकृति-सपर्या-तन्निरूपिताणुव्रतादिरूपश्राद्धधर्मप्रतिपादकः सतशतैकषठ्यधिक-षट्सहस्र-सङ्ख्यात्मिकया स्वोपज्ञविधिकौमुद्याख्यवृत्त्योपेतः सप्तदशमूलगाथात्मकः श्राद्धविधिनामा निबन्धो भव्याम्भोजभासनभानुभिः सुविहितनामधेयैः श्रीमद्रत्नशेखरसूरिवरैः ।

एते पूज्यप्रवराः केषां विनेयावतंसाः ? कस्मिंश्च शुभसमये समासादितवन्तो जन्मदीक्षादिकं ? काँस्काँश्च निर्मितवन्तो निबन्धान् ? कदा च ग्रथितोऽयं ग्रन्थः ? इत्येतत् जिज्ञासवः–

**श्रीदेवसुन्दरगुरोः, पट्टे श्रीसोमसुन्दरगणेन्द्राः । युगवरपदवीं प्राप्तास्तेषां शिष्याश्च पञ्चैते ॥१॥** ११

**मारीत्यवमनिराकृतिसहस्रनामस्मृतिप्रभृतिकृत्यैः । श्रीमुनिसुन्दरगुरवश्चिरन्तनाचार्यमहिमभृतः ॥२॥**

**श्रीजयचन्द्रगणेन्द्रा निस्तन्द्राः सङ्घकार्येषु । श्रीभुवनसुन्दरसूरिवरा दूरविहारैर्गणोपकृतः ॥३॥**

**विषममहाविद्यातद्विडम्बनाब्धौ तरीव वृत्तिर्यैः । विदधे यज्ज्ञाननिधिं मदादिशिष्या उपाजीवन् ॥४॥**

**एकाङ्गा अप्येकादशाङ्गिनश्च जिनसुन्दराचार्याः । निर्ग्रन्था ग्रन्थकृतः श्रीमज्जिनकीर्तिगुरवश्च ॥५॥**

**एषां श्रीगुरूणां प्रसादतः षट्खतिथिवर्षे । श्राद्धविधिसूत्रवृत्तिं व्यधत्त श्रीरत्नशेखरसूरिः ॥६॥**

**विधिकौमुदीति वृत्तावस्यां विलोकितैर्वर्णैः । श्लोकाः सहस्रषट्कं सप्तशती चैकषष्ट्याधिकाः ॥७॥** (श्रा. वि. प्रशस्ति)

**''श्रीमुनिसुन्दरसूरिपट्टे चतुःपञ्चाशत्तमः श्रीरत्नशेखरसूरिस्तस्य विक्रमसप्तपञ्चाशदधिके जन्म, त्रिषष्ठ्याधिके व्रतम्, त्र्यशीत्यधिके पण्डितपदम्, त्रिनवत्यधिके वाचकपदम्, द्व्युत्तरे पञ्चदशशतवर्षे सूरिपदम्, सप्तदशाधिके पौषकृष्णषष्ठीदिने स्वर्गभाक्, स्तम्भतीर्थे बांबीनाम्ना भट्टेन बालसरस्वतीति नाम दत्तं, तत्कृता ग्रन्थाः श्राद्धप्रतिक्रमणवृत्तिः श्राद्धविधिसूत्रवृत्तिराचारप्रदीपश्चेति''** । (पट्टावली)

एत्येतद् ग्रन्थप्रान्तप्रथितश्लोकसप्तकेन पाठकपदपरिभूषितश्रीमद्धर्मसागरगणिविरचितपट्टावल्या च स्पष्टतया स्वयमावेदयिष्यन्तीत्यतो विरम्यते तदुल्लेखात् ।

एतेन क्षेत्रसमास-गुणस्थानक्रमारोह-श्रीपालचरित्रादिप्रबन्धप्रणेतारः श्रीमद्रत्नशेखरसूरयस्तु बृहत्तपागच्छेशश्रीमद्धेमतिलक-सूर्यन्तेवासित्वे-नैतत्प्रबन्धप्रणेतृसमकालीना न तु त एवेति स्पष्टमवसीयते ।

दिनकृत्य-रात्रिकृत्य-पर्वकृत्य-चातुर्मासिककृत्य-वार्षिककृत्य-जन्मकृत्यादिषट्कृत्यप्रकाशात्मकेऽस्मिन् प्रबन्धे दिनकृत्यनामकप्रथम-प्रकाशे श्राद्धानां माध्यस्थ्यादिचतुर्गुणोपवर्णनम्, उपलक्षणेनैकविंशतिगुणवर्णनम्, श्रीशत्रुञ्जयतीर्थस्य सान्वर्थनामसंस्थापकम् श्रीशुकराजचरित्रं तदन्तर्गतं श्रीदत्तकेवलिनः चन्द्रशेखरस्य च चरित्रम्, नाम-स्थापना-द्रव्य-भावभेदैः श्राद्धस्वरूपम्, श्रीजिनप्रतिकृतेः सविग्रहसपर्यायाश्च स्वरूपम्, सुपात्रदान-परिग्रहपरिमाणनियमपालने च रत्नसारकुमारचरित्रं च न्यवर्णि ।

न च वक्तव्यमत्र जिनप्रतिमाप्रतिपादनं विफलम्, जिननामतोऽपि तस्यास्तत्तद्गुणानां स्मृतिजनकत्वेन प्रकृष्टशुभाध्यवसायजनकत्वात्, कथञ्चिद्भावजिनस्वरूपत्वाच्च । तत्तद्गुणानां स्मृतिजनकत्वं च तस्याः समालोकितसंपूर्णशुभाङ्गसुन्दर्या मोहवतां मोहजनकत्वमिव, कामासनस्य कामिनां कामादिजनकत्वमिव, योगसनस्य योगिनां योगासनाभ्यासशेमुषीजनकत्वमिव, भूगोललोकनालिकानन्दीश्वरद्वीपपुट-लङ्कापुटादीनां निध्यानवतां प्रतिपाद्यत्वेन तद्गतपदार्थज्ञानजनकत्वमिव अनुभवसिद्धम् । यदाह—

**यथा हि संपूर्णशुभाङ्गपुत्रिका, दृष्टा सती तादृशमोहहेतुः । कामासनस्थापनतश्च कामकेलीविकारान्कलयन्ति कामिनः ॥१॥**

**योगासनालोकनतो हि योगिनां, योगासनाभ्यासमतिः परिष्यात् । भूगोलतस्तद्गतवस्तुबुद्धिः, स्याल्लोकनालेरिह लोकसंस्थितिः ॥२॥**

**नन्दीश्वरद्वीपपुटात्तया च लङ्कापुटात्तद्गतवस्तुचिन्ता । एवं जिनेशप्रतिमापि दृष्टा तत्तद्गुणानां स्मृतिकारणं स्यात् ॥३॥** [ ]

अत एव जिनप्रतिमा नात्यन्तजडस्वरूपा न वा मिथ्यात्वगुणस्थानवर्तिनी, येन नमस्कारादिकर्तृणां सर्वविरत्यादीनां बाधः स्यात् । एतेन जिनप्रतिकृतिः नमस्काराद्यानर्हा, जडत्वात्, प्रस्तरगोवत्, प्रथमगुणस्थावर्तित्वाद्वा, मृदादिवत्, इत्यप्यपास्तमवसातव्यम् । न च जिनप्रतिमैकान्तेन तत्तद्गुणस्मृतिजनकत्वेन प्रकृष्टशुभभावजनिकैव न किन्तु प्रत्युत केषाञ्चित् द्वेषवतां प्रकृष्टाशुभभावजनिकापीति वाच्यम्, अभव्यानां तीर्थपतिवाक्यवत् भवादृशानां भवाभिनन्दिनां तथात्वेऽपि अपुनर्बन्धकादीनां तथाऽभावात् । यद्वा प्रद्वेषवतां भावजिनाध्यारोपाभावेन तत्र स्थापनाजिनस्याप्यभावात् । न च स्थापनानिक्षेपे भावजिनत्वमसिद्धमिति प्रलपितव्यम्, भावजिनाध्यारोपेणैव स्थापनानिक्षेपस्य स्वीकृतत्वात् । न चाशङ्कनीयं विकल्पविषयत्वेनाध्यारोपस्यावस्तुत्वम्, कथञ्चित् अध्यारोपस्यापि वस्तुविषयत्वस्वीकारात् । अन्यथा तवापि माताभगिन्यादिषु स्त्रीत्वसाम्येन स्वभार्यायामिव प्रवृत्तिप्रसङ्गः संपत्स्यते । किञ्च भरतसार्वभौमनिष्पादिताष्टापदगिरिचतुर्विंशतिजिनस्यातीतचतुर्विंशतिकायां ब्रह्मेन्द्रकृतश्रीनमिजिनस्य, आषाढिश्राद्धकारितश्रीशङ्खेश्वरपार्श्वनाथस्य, श्रीभरतनरेशमुद्रिकागतकुल्यपाकतीर्थस्थमाणिक्यस्वामिनः, स्तम्भन-पार्श्वनाथस्य, चैत्यादिविद्यमानबिंबानामावश्यकादिशास्त्रेषु स्पष्टपाठस्य निर्वर्णनात् । पञ्चमारकेऽपि मौर्यवंशमूर्धन्यपरमार्हतश्रीसंप्रतिमहाराजेन, चौलुक्यवंशचूडामणिश्रीकुमारपालभूपालादिना च निर्मापितानामनेकजिनबिम्बानां विद्यमानत्वाच्च नमस्काराद्यर्हत्वेन मान्या । यदि मूलावश्यके तादृशोल्लेखाभावेन निर्युक्तक्यादीनामप्रामाण्यत्वेनाधुनिकबिम्बानां त्वनभिमतत्वेन च न भवतां कापीष्टसिद्धिरिति चेत् ? न, त्वदभिमतसूत्रकृताङ्ग-स्थानाङ्ग-विवाहप्रज्ञप्ति-ज्ञाताधर्मकथाङ्ग-उपासकदशाङ्ग-औपपातिक-राजप्रश्नीय-जीवाभिगम-जम्बूद्वीपप्रज्ञप्त्यादि-समयरत्नाकरेषु निरूपितत्वात् । आप्तत्वव्याहतिप्रसङ्गेनाप्तप्रवृत्तिः नैव संभाव्यते निष्प्रयोजिका । न च सिद्धान्ते नित्या प्रतिकृतिरेव प्रतिपादिता, ज्ञातादिषु द्रौपद्यधिकारे अनित्याया अपि प्रतिपादनात् । तस्या नियतस्थाने एव वर्तित्वात् साऽपि नित्यैवेति कल्पना नाञ्चति सामञ्जस्यम् । कृतनिदानत्वेन तस्या मिथ्यादृष्टित्वात् उद्वाहप्रसङ्गाच्च यक्षप्रतिमैव तत्र सम्भाव्यत इति विचारोऽपि न क्षोदक्षमः, अन्यथा

सर्वेषामर्द्धचक्रवर्तिनां मिथ्यादृष्टित्वप्रसङ्गात्, तत्समये सुरूपवतां भर्तृणां याच्ञाप्रसङ्गाच्च । न च तया तथा याञ्चा कृता, अपि तु शक्रस्तवेन जिनस्तुतिरेव कृता । अस्तु नाम प्रतिमाप्रतिपादनं परं अप्कायादिजीवोपमर्दनत्वेन हिंसासंभवात् हिंसायाश्च ''**सव्व पाणा सव्वे भूआ**'' इत्यादौ हिंसात्वावच्छेदेनानिष्टसाधनत्वप्रतिपादनात्, प्रतिमापूजाप्रतिपादनं नावहति सौष्ठवमिति नैव नोदनीयं, एवं सति दानादिक्रियाया अप्यभावापत्तेः, तस्मात् जिनाज्ञैवान्वेषणीया । अपि च यतनया क्रियमाणा जिनार्चा न पापप्रयोजिका, प्रत्युत चित्तशुद्धिफलकत्वेन पुण्यादिप्रयोजिका । अर्चायां दानादाविव स्वरूपहिंसासम्भवेऽपि अनुबन्धहिंसाया असम्भवात् । यद्यप्ययतनया क्रियमाणा हिंसान्तर्भूतत्वेन पापप्रयोजिका तथापि भक्त्याऽविधिनापि विधीयमाना न तथा, भक्तिगुणेनाविधिदोषस्यापि निरनुबन्धिकृत्वात् । किञ्च आगमेऽपि सूर्याभदेवाद्यधिकारे सुमादिभिर्जिनार्चायाः प्रतिपादनान्नैवाशोभनं प्रतिमार्चाप्रतिपादनम् । न च विकुर्वीतकुसुमैरर्चा कृतेति वाच्यम्, राजप्रश्नीयसूत्रे जलस्थलसमुद्भुतकुसुमानां प्रोक्तत्वात् । देवानां तथाकल्पत्वेन भवनिबन्धनं तदाचरणं न तु देशविरतादीनामत एव देवा अधार्मिका इति प्रोच्यन्ते इति वाक्पटुता नैव प्रकटनीया, एवं सति तत्र संयमादेरपि भवनिबन्धनत्वं स्यात् । अर्चायां विराधनासम्भवात् भवत्येतत्, अत्र तु तस्या असम्भवात् नैतत् सम्भवतीत्यप्यलीकं, तत्रापि गमनागमनक्रियासु वायुकायादीनां विराधनासम्भवात् । विबुधानामधार्मिकत्वकथनेन सूत्राशातनां मा विधेह्यन्यथा भवान्तरे बोधिरपि दुर्लभा भविष्यति, तेषु श्रुतधर्मादीनां विद्यमानत्वात्, किं बहुनाऽसंयतत्वविद्यमानेऽपि निष्ठुरवचनत्वेन देवानामसंयतत्वव्यपदेशस्यापि निरस्तत्वात् । तथा चोक्तं पञ्चमशतके चतुर्थोद्देशे ''**देवाणं भंते ! संजय त्ति वत्तव्वं सिया ? गोयमा ! नो इणट्ठे समट्ठे अब्भखाणमेयं देवाणं । देवाणं भंते ! असंजय त्ति वत्तव्वं सिया ? नो इणट्ठे समट्ठे निट्ठुरवयणमेयं देवाणं । देवाणं भंते ! संजयाऽसंजय त्ति वत्तव्वं सिया ! गोयमा ! नो इणट्ठे समट्ठे असब्भुअमेयं**

**देवाणं । से किं खाइएणं भंते ! देव त्ति वत्तव्वं सिया ? गोयमा ! देवाणं नो संजय त्ति वत्तव्वं सिया ।''** (व्याख्याप्रज्ञप्ति) यत्तु देवानामधार्मिकत्वमुक्तं तत्तु संयमधर्मापेक्षया प्रत्येतव्यम्, तस्मात् आगमोपदिष्टकूपज्ञातेन सुव्यवस्थितं सफलत्वमित्यलमतिपल्लवितेन ।

अस्मिन् विषयेऽधिकजिज्ञासुभिस्तु समवलोकनीया वादिद्विरदपञ्चाननश्रीमद्यशोविजयवाचकवरविरचितप्रतिमाशतकादिप्रबन्धाः ।

श्रीजिनप्रतिकृतिसपर्यानिषेधकस्तु साम्प्रतसमये विद्यमानजैनाभासढुंढकस्य लुम्पकनामाऽऽदिपुरुषोऽस्य निबन्धस्य निर्मातरि भगवति विद्यमाने प्रादुरभूत् । एतद्वृत्तान्तस्तु कुमतमततितिरस्करणतरणितुल्यश्रीमद्धर्मसागरवाचकानां **''तदानीं च लुम्पकाख्यलेखकात् विक्रमाष्टाधिकपञ्चदशशते १५०८ वर्षे जिनप्रतिमोत्थापनपरं लुंपकमतं प्रवृत्तम् । तद्वेषधरास्तु विक्रमीयत्रयस्त्रिंशदधिकपञ्चदशशतवर्षे जातास्तत्र प्रथमो वेषधारी भाणाख्यो अरहटवाडावास्यभूदिति ।''** एतदुल्लेखेन स्पष्टमवसीयते इति ।

रात्रिकृत्यनामकद्वितीयप्रकाशे दैवसिक-रात्रिक-पाक्षिक-चातुर्मासिक-सांवत्सरिकप्रतिक्रमणाद्यनेकविधयो विहिताः । पर्वकृत्याख्यतृतीयप्रकाशे पर्वतिथि-अष्टाह्निक-पौषधविध्यादिस्वरूपं समदर्शि । चातुर्मासिककृत्यनामकचतुर्थप्रकाशे चातुर्मासिकनियमाणुव्रतादिस्वरूपं सङ्कलितम् । वर्षकृत्यनामकपञ्चमप्रकाशे-सङ्घार्चन-साधर्मिकवात्सल्य-श्रीजिनस्य रथयात्रादिकृत्यानि कथितानि सन्ति । जन्मकृत्यनामकषष्ठप्रकाशे वासस्थान-विद्याग्रहण-विवाहविधि-श्रीजिनचैत्यकारापणाद्यनेककृत्यानि प्रतिपादितानि ।

ग्रन्थस्यास्य मुद्रापणार्थं तपगच्छगगनाङ्गणगगनमणि-न्यायाम्भोनिधि-**श्रीमद्विजयानन्द सूरीश्वर ( आत्मारामजी )** पट्टविराजित-**श्रीमद्विजयकमलसूरीश्वर**सदुपदेशामृतसिक्तेन 'गोधा'निवासिना श्रेष्ठिवरेण-**जयचन्द्र-तनुजन्मना श्रीमज्जीवनचन्द्रेण** द्रव्यसाहाय्यं दत्तम् ।

शुद्धिविषये चास्य सुज्ञातसमयसारैर्वाचकवर्य**श्रीमद्वीरविजय**चरणसरोरुहसेवाहेवाकिभिरस्मद्गुरुगुरुवर्य-अनुयोगाचार्य**श्रीमद्दानविजय-गणिभिः** कृतेऽपि यथाशक्ति प्रयासे ''मनुष्यसहभुवो भ्रान्तयो दुनिर्वाराः'' इति नियमेन याः काश्चन च्युतयः स्थिता भवेयुः शीसकाक्षर-योजकदोषेण यन्त्रेशदौर्लक्ष्येण च बह्व्यो जाताः ताः कृपालुतां विधाय स्वभावसुन्दराः सुहृदः संशोधयन्तु ।

लिखिता चेयं लघ्वी प्रस्तावना म्हेसाणाग्रामसंस्थितेन **श्रीमद्विजयकमलसूरीश्वर**सुसाम्राज्ये प्रवर्त्तमानेनानुयोगाचार्य**श्रीमद्दानविजय**-पादपद्मपरिचर्यापरायण**मुनिश्रीप्रेमविजया**न्तेवासिना **मुनिरामविजयेन** (वर्तमान पू. आ. भ. **श्रीविजयरामचन्द्रसूरिभिः**) वैक्रमीये १९७४ संवत्सरे ज्येष्ठमासस्य कृष्णत्रयोदश्याम् ।

# विषयानुक्रमः


| विषयाः | पत्राङ्कः |
|---|---|
| मङ्गलाचरणम् | १ |
| दिनकृत्यादिद्वारनामानि | ३ |
| श्राद्धत्वयोग्यगुणाः | ३ |
| शुकराजकथा | ६ |
| श्राद्धस्य नामादिभेदाः | ९० |
| भावश्राद्धस्य भेदाः | ९१ |
| व्रतश्राद्धे सुरसुंदरकुमारभार्याज्ञातम् | ९१ |
| श्रीस्थानाङ्गोक्ते श्राद्धानां चतुर्भङ्गिके | ९२ |
| श्राद्धशब्दस्यार्थः | ९३ |
| निद्रात्यागसमयः | ९५ |
| निद्रात्यागे द्रव्याद्युपयोगविधिः | ९५ |
| रात्रौ उच्चैः स्वरं शब्दकासितखुंकारहुङ्कारादि न कार्यम् | ९६ |
| चन्द्रसूर्यनाड्योः पृथिव्यादितत्वानां च स्वरूपं शुभाशुभत्वं च | ९७ |
| नमस्कारमन्त्रादिजापस्य विधिः फलं च | ९९ |
| नमस्कारमन्त्रस्यैहिकफले शिवकुमारज्ञातम् | १०३ |
| नमस्कारस्यामुष्मिकफले शबलिकादृष्टान्तः | १०३ |
| धर्मजागर्या | १०४ |
| कुस्वप्नदुःखस्वप्नकायोत्सर्गः | १०४ |
| स्वप्नविचारः | १०५ |
| नियमस्वरूपम् | १०७ |
| सचित्ताचित्तमिश्रवस्तुस्वरूपम् | ११० |
| शाल्यादिधान्यानां सचित्तकालः | ११३ |
| पिष्टस्य मिश्रकालः | ११४ |
| सक्तुयतना | ११५ |
| पक्वान्नकालनियमः | ११६ |
| द्विदलस्वरूपम् | ११६ |

| | |
|---|---|
| अभक्ष्यानन्तकायस्य वर्ज्यत्वम् | ११६ |
| प्रासुकजलस्वरूपम् | ११७ |
| सचित्तस्य नियमग्रहणम् | ११९ |
| सर्वसचित्तत्यागेऽम्बडपरिव्राजकसप्तशतीशिष्यज्ञातम् | १२१ |
| चतुर्दशनियमाः | १२१ |
| प्रत्याख्यानस्य ग्रहणवेला फलं च | १२२ |
| अशनादिचतुर्विधाहारस्वरूपम् | १२४ |
| अनाहारवस्तुनामानि | १२६ |
| प्रत्याख्यानस्य पञ्चस्थानानि | १२७ |
| लघुनीतिवडीनीत्यादीनामुत्सर्गविधिः | १२९ |
| दन्तधावनविधिः | १३१ |
| स्नानविधिः | १३३ |
| अशौचे भूपतितपुष्पैश्च पूजायां मातङ्गकथा | १३७ |
| पूजायां वस्त्रधारणविधिः | १३७ |
| पूजायां नूतनवस्त्रपरिधाने श्रीकुमारपालनृपज्ञातम् | १३८ |
| पूजायै द्रव्यभावशुद्धिः | १३९ |
| जिनालयम्प्रतिगमनविधिः | १४० |
| दशार्णभद्रनृपदृष्टान्तः | १४० |
| द्वात्रिंशद्बद्धनाटकनामानि | १४३ |
| पञ्चविधाभिगमस्वरूपम् | १४५ |
| प्रदक्षिणाविधिः | १४५ |
| चैत्यबहिर्भागे दिक्त्रयस्थितबिम्बविधिः | १४६ |
| जलाभिषेकवालककुञ्चिकाव्यापाराङ्गरूक्षण-पूर्वकाङ्गपूजाविधिः | १४६ |
| निर्माल्यलक्षणम् | १४७ |
| अङ्गपूजाविधिः | १४८ |
| पूजायां संज्ञाकरणे पापं तत्र जिनहाकदृष्टान्तः | १४९ |
| सर्वेभ्यः प्रथमं मूलनायकस्य पूजा कार्या | १५० |
| व्यक्त्याख्याक्षेत्राख्यादिप्रतिमास्वरूपम् | १५३ |
| अग्रपूजा | १५४ |
| भावपूजा | १५६ |
| त्रिविधचैत्यवन्दनम् | १५७ |
| प्रत्यहं सप्त चैत्यवन्दना | १५७ |

| | |
|---|---|
| जिनस्यावस्थात्रिकभावना | १५८ |
| पूजायाः पञ्चोपचारादिभेदाः | १५९ |
| एकविंशतिभेदपूजादिविधिः | १६० |
| पुष्पस्वरूपम् | १६२ |
| स्नात्रविधिः | १६३ |
| आरात्रिकमङ्गलप्रदीपपूजा | १६६ |
| गुरुकारितादिप्रतिमानिर्णयः | १६८ |
| निश्राकृतादिचैत्ये स्तुतिनिर्णयः | १६८ |
| जिनालयसम्मार्जनविधिः | १६९ |
| अनृद्धिमता श्राद्धेन सामायिकं मुक्त्वा-<br>पुष्पग्रथनादि कर्तव्यम् | १६९ |
| विध्यविध्योश्चित्रकारदृष्टान्तः | १७१ |
| अविधेरल्पफले दृष्टान्तः | १७२ |
| अङ्गादिपूजात्रिकफलम् | १७३ |
| परकृतजिनार्चाद्विषे कुन्तलाराज्ञीज्ञातम् | १७४ |
| जिनाज्ञापालनरूपभावस्तवस्वरूपम् | १७५ |
| द्रव्यस्तवभावस्तवयोः फलम् | १७६ |
| द्रव्यस्तवे कूपखननदृष्टान्तः | १७६ |
| जिनगृहगमनमनोरथादिफलम् | १७७ |
| पूजायां विधबहुमानयोश्चतुर्भङ्गी | १७८ |
| प्रीतिभक्तिवचनासङ्गानुष्ठानचतुष्कस्वरूपम् | १८० |
| पूजायां विधिबहुमानयोर्धर्मदत्तनृपकथा | १८१ |
| चैत्योचितचिन्ता | १९४ |
| ज्ञानस्य जघन्यमध्यमोत्कृष्टाशातनाः | १९५ |
| जिनस्य जघन्या दशाशातनाः | १९६ |
| जिनस्य चत्वारिंशत् मध्यमाशातनाः | १९६ |
| जिनस्योत्कृष्टाष्टाश्चतुरशीतिराशातनाः | १९६ |
| बृहद्भाष्योक्ताः पञ्चाशातनाः | १९९ |
| गुरोस्त्रयस्त्रिंशदाशातनाः | २०० |
| गुरोराशातनाया जघन्यादिभेदाः | २०१ |
| स्थापनाचार्याशातना | २०१ |
| उत्सूत्रभाषणार्हद्गुर्वाद्यवज्ञादिर्महत्याशातना | २०२ |

| | |
|---|---|
| देवज्ञानसाधारणादिद्रव्याणां विनाशे-<br>उपेक्षायां च महत्याशातना | २०२ |
| देवद्रव्यरक्षणे साधोरधिकारः | २०३ |
| देवद्रव्यवृद्धेस्तीर्थकरत्वफलम् | २०४ |
| देवद्रव्यवृद्धिः कर्मादानादिरहितसद्-<br>व्यवहारविधिनैव कार्या | २०४ |
| देवद्रव्यरक्षणभक्षणादौ सागरश्रेष्ठिज्ञातम् | २०५ |
| ज्ञानसाधारणद्रव्ययोः कर्मसारपुण्यसारज्ञातम् | २०८ |
| देवदेयविलंबकरणे ऋषभदत्तदृष्टान्तः | २१२ |
| देवज्ञानसाधारणसम्बन्धिगृहाट्टक्षेत्रपाषाणेष्टिकाकाष्ठ-<br>वंशकवेल्लुछुकमृत्सुधादिकं स्वकार्ये न व्यापार्यम् | २१३ |
| देवदीपेन गृहाकार्यारम्भे क्रमेलकीदृष्टान्तः | २१४ |
| देवज्ञानसत्कं गृहाट्टादिकं भाटकेनापि श्राद्धेन न व्यापार्यम् | २१५ |
| देवसत्कोपकरणं निजकार्ये विना निष्क्रयं न व्यापार्यम् | २१५ |
| उद्यापनादौ स्तोकनिष्क्रये लक्ष्मीवतीज्ञातम् | २१६ |
| गृहचैत्येऽर्पिततण्डुलादीनां व्यवस्था | २१७ |
| परद्रव्यस्य साधारणद्रव्यस्य च यात्रादौ व्यये नियमः | २१८ |
| अन्त्यावस्थायां पित्रादीनां मानितद्रव्यस्य व्यवस्था | २१८ |
| सस्वेभ्यो निःस्वसाधर्मिकाणां दर्शनमोदकलम्भनादौ-<br>विशिष्टमेवार्पयितुं युक्तम् | २१९ |
| यात्रादौ मानितद्रव्यस्य व्यवस्था | २१९ |
| गुरोर्द्वादशावर्तवन्दनादिविधिः | २२१ |
| गुरोर्देशनाश्रवणविधिः | २२४ |
| धर्मोपदेशश्रवणे प्रदेशिनृपदृष्टान्तः | २२४ |
| धर्मोपदेशश्रवणे थावच्चापुत्रदृष्टान्तः | २२६ |
| क्रियाज्ञानयोर्विवेकः | २२७ |
| साधूनां सुखप्रश्नादि दाननिमन्त्रणञ्च | २२८ |
| दाननिमन्त्रणे जीर्णश्रेष्ठिज्ञातम् | २२९ |
| ग्लानयतिपरिचर्यायां महत्फलम् | २३० |
| यतीनामुपाश्रयदाने फलम् | २३० |
| जैनधर्मस्य साधूनाञ्च निन्दकानां शिक्षादानम् | २३१ |
| साध्वीनां सुखप्रश्नादि | २३१ |

| | |
|---|---|
| गुरोः पार्श्वेऽध्ययनम् | २३१ |
| न्याये यशोवर्मनृपज्ञातम् | २३२ |
| आजीविकाया वाणिज्यं विद्या कृषिः पाशुपाल्यं शिल्पं-सेवा शिक्षा चेति सप्तोपायाः | २३४ |
| सेवाया भेदास्तेषां स्वरूपञ्च | २३८ |
| भिक्षाया भेदास्तेषां स्वरूपञ्च | २४२ |
| वाणिज्यविधिः | २४४ |
| वाणिज्ये द्रव्यक्षेत्रकालभावभेदतः चतुर्विधा-व्यवहारशुद्धिः | २४५ |
| उद्धारके कस्मैचिदपि न देयम् | २४७ |
| पुत्रशिक्षायां मुग्धकदृष्टान्तः | २४७ |
| ऋणच्छेदे कालक्षेपो न कार्यः | २४७ |
| ऋणसम्बन्धे श्रेष्ठिभावस्य ज्ञातम् | २४८ |
| उद्यमाल्लक्ष्मीप्राप्तिः | २४९ |
| गतधनावाप्तावाभडश्रेष्ठिज्ञातम् | २५० |
| भाग्यवतो दायादस्य भाग्येनापि लाभः | २५१ |
| भूरिधनागमेऽपि गर्वो न कार्यः | २५२ |
| कलहो न कार्यः | २५३ |
| दन्तकलहोऽपि त्याज्यः | २५३ |
| न्यायकरणे श्रेष्ठिपुत्रीदृष्टान्तः | २५४ |
| मत्सरत्यागः | २५४ |
| कूटमाने दोषः | २५५ |
| मनोमालिन्ये मित्रव्यवहारिणोर्ज्ञातम् | २५६ |
| व्यवहारशुद्ध्या लाभे हेलाकश्रेष्ठिज्ञातम् | २५६ |
| विश्वस्तवञ्चने विसेमिराज्ञातम् | २५७ |
| पापभेदाः | २५९ |
| पुण्यानुबन्धिपुण्यादिकर्मचतुर्भङ्गी | २६० |
| सत्ये महणसिंहदृष्टान्तः | २६१ |
| सत्ये भीमसौवर्णिकदृष्टान्तः | २६२ |
| मित्रकरणम् | २६२ |
| प्रीतिस्थाने लाभदाने त्याज्ये | २६३ |
| साक्षिणं विना स्थापनिका न स्थाप्या | २६४ |

| | |
|---|---|
| असाक्षिन्यासकर्तृधनेश्वरश्रेष्ठिदृष्टान्तः | २६४ |
| यादृशि तादृशि साक्षिण्यपि लाभ एव | २६४ |
| देवगुर्वादिविषयं शपथं न कार्यम् | २६६ |
| परदेशे व्यापारसम्बन्धः | २६६ |
| भाग्यवतां सह विघ्नाभावे दृष्टान्तः | २६७ |
| परदेशगमनादिनीतयः | २६८ |
| ऋद्धिभेदाः | २७० |
| पापद्र्धौ दृष्टान्तः | २७० |
| अतिलोभो न कार्यः | २७२ |
| यथाऽवसरं त्रिवर्गसंसाधनम् | २७२ |
| लोभिविवेकिनोः परीक्षायां नववधूदृष्टान्तः | २७५ |
| धर्मकरणे बहुधनागमे विद्यापतिश्रेष्ठिज्ञातम् | २७५ |
| न्यायान्यायधने देवयशोमित्रद्वयदृष्टान्तः | २७६ |
| न्यायोपात्तवित्ते लौकिकदृष्टान्तः | २७७ |
| न्यायार्जितवित्तसुपात्रविनियोगाभ्यां चतुर्भङ्गी | २७८ |
| अन्यायोपार्जितवित्ते रङ्कश्रेष्ठिज्ञातम् | २७९ |
| व्यवहारशुद्धिर्धर्मस्य मूलम् | २८१ |
| देशकालनृपलोकधर्मादिविरुद्धत्यागः | २८२ |
| पितर्यौचित्यम् | २८६ |
| मातर्यौचित्यम् | २८९ |
| सहोदराणामौचित्यम् | २८९ |
| स्त्रिय औचित्यम् | २९१ |
| पुत्रौचित्यम् | २९५ |
| स्वजनौचित्यम् | २९८ |
| गुरोरौचित्यम् | ३०० |
| पौराणामौचित्यम् | ३०२ |
| परतीर्थिकौचित्यम् | ३०४ |
| समयोचितवचनेऽम्बडमन्त्रिज्ञातम् | ३०५ |
| मूर्खशतकम् | ३०६ |
| अपलक्षणानि | ३०८ |
| नीतिवाक्यानि | ३१० |
| व्यवहारशुद्ध्यादिना द्रव्योपार्जने धनमित्रज्ञातम् | ३१६ |

| | |
|---|---|
| सुपात्रदानस्वरूपम् | ३१८ |
| सुपात्रदाने परिग्रहपरिमाणे च रत्नसारकुमारकथा | ३२१ |
| भोजनसमये दयानुकम्पादाने | ३८३ |
| दयादाने श्रीमालजगडुदृष्टान्तः | ३८४ |
| भोजनविधिः | ३८५ |
| रजनीभोजनव्रताख्याने एडकाक्षवृत्तम् | ३९१ |

## द्वितीयः प्रकाशः

| | |
|---|---|
| श्राद्धानां प्रतिक्रमणसिद्धिः | ३९३ |
| पञ्चानां प्रतिक्रमणानां कालनैयत्यम् | ३९५ |
| प्रतिक्रमणविधिः | ३९७ |
| साधूनां विश्रामणा | ४०० |
| उपदेशमालाकर्मग्रन्थादिपरावर्त्तनस्वरूपस्वाध्यायः | ४०१ |
| शीलाङ्गादिरथस्वरूपम् | ४०१ |
| नमस्कारानानुपूर्व्यादिगणने फलम् | ४०१ |
| स्वाध्यायकरणे धर्मदासश्राद्धदृष्टान्तः | ४०२ |
| कलत्रपुत्रमित्रादीनां धर्मदेशनाकरणम् | ४०३ |
| नीतिशास्त्रानुसारेण निद्राविधिः | ४०४ |
| आगमानुसारेण निद्राविधिः | ४०६ |
| कामजयार्थ स्त्रीतनोरशुचित्वादिचिन्तनम् | ४०८ |
| कषायादिदोषजये उपायः | ४०९ |
| चतुर्गतौ भवस्थितेरत्यन्तदुःस्थता | ४१० |

## तृतीयः प्रकाशः

| | |
|---|---|
| पौषधादिपर्वकृत्यम् | ४१२ |
| पर्वतिथयस्तेषां फलञ्च | ४१३ |
| सचित्ताहारादित्यागः | ४१३ |
| शाश्वताशाश्वताष्टाह्निका | ४१४ |
| तिथिनिर्णयः | ४१५ |
| एकादश्याराधने श्रीकृष्णज्ञातम् | ४१६ |

पर्वतिथौ धर्मानुष्ठाने फलम् ४१६
पौषधविधिः ४१७
पौषधे धनेश्वरश्रेष्ठिज्ञातम् ४२३

चतुर्थः प्रकाशः

चातुर्मासिककृत्यम् ४२७
असद्वस्तुत्यागे द्रमकमुनिदृष्टान्तः ४२८
चातुर्मास्यां द्वादशव्रताद्यभिग्रहः ४२९
चातुर्मासीनियमे विजयश्रीकुमारज्ञातम् ४३२
लौकिकाश्चातुर्मासिकनियमाः ४३४

पञ्चमः प्रकाशः

सङ्घार्चाद्येकादशद्वारनामानि ४३६
सङ्घार्चाविधिः ४३६
साधूपकरणसङ्ख्या ४३६
साधर्मिकत्वात्सख्यम् ४३८
श्रावकवच्छ्राविकाणामपि वात्सल्यम् ४३९
साधर्मिकवात्सल्यदार्ढ्ये दण्डवीर्यनृपदृष्टान्तः ४४१
साधर्मिकवात्सल्ये श्रीसम्भवनाथस्वामिदृष्टान्तः ४४१
जगत्सिंहाभुसङ्घपतिसारङ्गसाहादिदृष्टान्तः ४४२
रथयात्राविधिः ४४२
कुमारपालरथयात्रा ४४४
तीर्थयात्रास्वरूपम् ४४५
श्रीविक्रमादित्यकुमारपालमन्त्रिवस्तुपालादीनां-
तीर्थयात्रावर्णनम् ४४८
चैत्ये स्नात्रमहः ४४८
महापूजा रात्रिजागरणञ्च ४४८
देवद्रव्यवृद्धिः ४४९
श्रुतज्ञानपूजा ४४९
उद्यापनम् ४५०
तीर्थप्रभावनार्थं गुरोः प्रवेशमहोत्सवः ४५१
गुरोः प्रवेशमहोत्सवे साधुपेथडदृष्टान्तः ४५१
आलोचना ४५३

| | |
|---|---|
| आलोचनादातृगुरोर्गुणाः | ४५३ |
| आलोचकस्य दोषाः | ४५५ |
| सशल्यालोचनायां लक्ष्मणार्यादृष्टान्तः | ४५८ |


## षष्ठः प्रकाशः


| | |
|---|---|
| सुस्थाने वासः | ४६० |
| कुग्रामवासे दृष्टान्तः | ४६१ |
| गृहस्वरूपम् | ४६२ |
| लिखितपठितवाणिज्यधर्मादिकलानां ग्रहणम् | ४६८ |
| पाणिग्रहणविधिः | ४६९ |
| मित्रम् | ४७१ |
| चैत्यविधापनविधिः | ४७१ |
| जीर्णोद्धारः | ४७३ |
| मन्त्रिवाग्भटादिकारितश्रीशत्रुञ्जयाद्युद्धाराः | ४७३ |
| जीवत्स्वामिप्रतिमाया अधिकारः | ४७५ |
| श्रीजिनबिम्बविधिः | ४८० |
| अष्टापदचैत्यरैवताचलचैत्यप्रतिमायाः- माणिक्यस्वाम्यादिण्डवीर्यनृपसगरचक्रिहरिषेणचक्रि- सम्प्रतिनृपाऽऽमनृपकुमारपालनृपसाधुपेथडनरवाहन- नृपादिकारितचैत्यप्रतिमाधिकारः | ४८१ |
| प्रतिमानां प्रतिष्ठाविधिः | ४८३ |
| पुत्रादिनां प्रव्राजनाविधिः | ४८४ |
| आचार्यादिपदस्थापना | ४८५ |
| पुस्तकलेखने साधुपेथडमंत्रिवस्तुपालादीनामुदाहरणानि | ४८५ |
| पौषधशालाकारापणम् | ४८६ |
| सम्यक्त्वादिद्वाराणि | ४८७ |
| भावश्राद्धस्य सप्तदश गुणाः | ४८८ |
| श्राद्धप्रतिमा | ४९१ |
| अन्त्याराधना | ४९२ |
| दिनकृत्यादिफलम् | ४९४ |
| प्रशस्तिः | ४९५ |

# श्राद्धविधिप्रकरणम्

—: श्राद्धविधिकौमुदी :—

अर्हत्सिद्धगणीन्द्रवाचकमुनिप्रष्टाः प्रतिष्ठास्पदं, पंचश्रीपरमेष्ठिनः प्रददतां प्रोच्चैर्गरिष्ठात्मताम् ।
द्वैधान्पञ्च सुपर्वणां शिखरिणः प्रोद्दाममाहात्म्यतश्चेतश्चिन्तितदानतश्च कृतिनां ये स्मारयन्त्यन्वहम् ॥१॥
श्रीवीरं सगणधरं प्रणिपत्य श्रुतगिरं च सुगुरूंश्च । विवृणोमि स्वोपज्ञश्राद्धविधिप्रकरणं किञ्चित् ॥२॥
युगवरतपागणाधिपपूज्यश्रीसोमसुन्दरगुरूणाम् । वचनादधिगततत्त्वः सत्त्वहितार्थं प्रवर्त्तेऽहम् ॥३॥
तस्य चेयमाद्यगाथा—

सिरिवीरजिणं पणमिअ सुआओ साहेमि किमवि सड्ढविहीं ।
रायगिहे जगगुरुणा जह भणियं अभयपुट्ठेणं ॥१॥

**श्रिया** केवलालोकाशोकादिप्रातिहार्यपञ्चत्रिंशद्वचनगुणाद्यतिशायिलक्ष्म्या युक्तं **वीरजिनं** चरमतीर्थङ्करं कर्मविदारणाद्यन्वर्थाच्च वीरः । उक्तञ्च—

**विदारयति यत्कर्म तपसा च विराजते । तपोवीर्येण युक्तश्च तस्माद्वीर इति स्मृतः ॥**

रागाद्यरिजेतृत्वाच्च जिनः । वीरत्वं च दानयुद्धधर्मवीरभेदात् त्रिधा, यदाहुः—

**कृत्वा हाटककोटिभिर्जगदसद्दारिद्र्यमुद्राकषं हत्वा गर्भशयानपि स्फुरदरीन् मोहादिवंशोद्भवान् ।**
**तप्त्वा दुस्तपमस्पृहेण मनसा कैवल्यहेतुं तपस्त्रेधा वीरयशो दधद्विजयतां श्रीवीरतीर्थेश्वरः ॥**

एवं च श्रीवीरजिनमित्येतावतैवापायापगमज्ञानपूजावचनातिशयाश्चत्वारोऽप्यसूच्यन्त । **प्रणम्य**=प्रकर्षेण भावपूर्वकं मनोवाक्कायैर्नत्वा, **श्रुतात्**=सिद्धान्तात्पुनरावृत्तिव्याख्यानेन **श्रुताद्**=गुरूसम्प्रदायादेराकर्णिताच्च, **श्राद्धस्य**=श्रावकस्य वक्ष्यमाणान्वर्थस्य **विधिं**=सामाचारीं, केनोपदिष्टां ? **राजगृहे** नगरे समवसृतेन **जगद्गुरुणा** अर्थाद्वीरजिनेना**भयकुमार**पृष्टेन **यथा** =येन प्रकारेण भणितमुपदिष्टं तथाभूतं **किमपि** सङ्क्षेपेण **साहेमि**=कथयामीति योग इति प्रथमगाथार्थः ॥१॥

श्राद्धविधौ द्वाराण्याह —

**दिणरत्ति-पव्व-चउमासग-वच्छर-जम्मं किच्चदाराईं ।**
**सड्ढाणणुग्गहट्ठा सड्ढविहिए भणिज्जंति ॥२॥**

**दिनरात्रिपर्वचतुर्मासंवत्सरजन्मनां कृत्यानि**=कार्याणि तान्येव **द्वाराणि** । अयमर्थः-दिनकृत्य-रात्रिकृत्य-पर्वकृत्य-चातुर्मासकृत्य-वत्सरकृत्य-जन्मकृत्यरूपाणि षट् द्वाराणि श्राद्धानामनुग्रहार्थं **श्राद्धविधौ भण्यन्ते**=विव्रियन्ते इति द्वितीयगाथार्थः ॥२॥

एवं मङ्गलपूर्वकमभिधेयमभिधाय योग्यस्यैव विद्या राज्यं धर्मश्च देयानीति आदौ श्राद्धधर्मस्य योग्यमाह—

**सड्ढत्तणस्स जुग्गो भद्दगपगई विसेसनिउणमई ।**
**नयमग्गरई तह दढनिअवयणठिई विणिद्दिट्ठो ॥३॥**

ईदृग्गुणः **श्राद्धत्वस्य योग्यो विनिर्दिष्टः** सर्वज्ञैरिति शेषः । तत्र भद्रकप्रकृतिः=माध्यस्थ्यादिगुणोपेतो, न तु कदाग्रहग्रस्तहृदयादिः । उक्तञ्च—

**रत्तो दुट्ठो मूढो पुव्वं वुग्गाहिओ अ चत्तारि । एए धम्माणरिहा अरिहो पुण होइ मज्झत्थो ॥**

(१) **रक्तो**=दृष्टिरागी, यथा भुवनभानुकेवलिजीवः प्राग्भवे भूपभूर्विश्वसेनस्त्रिदण्डिभक्तोऽतिकृच्छ्रेण सद्गुरुभिर्बोधितः स्वीकृतदर्शने दृढीकृतोऽपि प्राक्परिचितत्रिदण्डिगिरा दृष्टिरागोल्लासाद्वान्तदर्शनो भ्रान्तोऽनन्तभवम् ।

(२) **द्विष्टो** भद्रबाहुबन्धुवराहमिहिरादिवत् ।

(३) **मूढो**=वचनभावार्थानभिज्ञो ग्रामेयककुलपुत्रकवत् । यथा स मात्रा राजसेवार्थं शिक्षितो 'विनयः कार्यः', स प्राह 'विनयः कः ?' तयोचे-'जोत्कारनीचैर्गतिच्छन्दानुवृत्त्यादिः' । स नृपसेवार्थं पुरं गच्छन्नन्तरा मृगवधार्थनिलीनव्याधानां महाशब्देन जोत्कारमकरोत् । मृगेषु नष्टेषु तैस्ताडितः उक्ते सद्भावे तैरुक्तम् 'ईदृक्कार्ये छन्नं गन्तव्यम्' । ततोऽग्रे रजकान् दृष्ट्वा स छन्नं गच्छन् प्राक् चौरहृतवस्त्रैस्तैश्चोरोऽयमीति बद्धः उक्तश्च 'शुद्धं भवत्विति वाच्यम्' । अग्रे बीजवापकानां तथोक्ते कुट्टयित्वा तैरुक्तो 'बहु बहु भवत्विति वाच्यम्' । अग्रे मृतकं दृष्ट्वा तथोक्ते तथैवोक्तस्तैरः 'ईदृग् माभूदिति वाच्यम्' । विवाहे तथोक्ते कुट्टितस्तच्छिक्षया निगडं बध्यमानं दण्डिकस्य शाश्वतमस्त्वित्युक्त्वा, तथैव तच्छिक्षया मैत्रीं कुर्वत्सु 'लघु मोक्षोऽस्तु' इत्युक्ते हतो मुक्तश्चैकं दण्डिकपुत्रं सेवते । अन्यदा दुर्भिक्षे तज्जायोक्त्या 'रब्बा सिद्धाऽस्ति इति सभान्तर्गाढमुक्ते लज्जितेन तेन गृहे कुट्टितः, उक्तश्च 'इदृक् छन्नं वाच्यम् । समये प्रदीपने तथोक्ते गृहे दग्धे शिक्षित 'ईदृशि लघु स्वयं कचवरजलादि क्षेप्यम्' अन्यदा केशान् धूपयतस्तस्य मूर्ध्नि धूमं दृष्ट्वा गोभक्तं क्षिप्तमिति ॥४॥

(४) पूर्वं व्युद्ग्राहितो गोशालकादिव्युद्ग्राहितनियतिवाद्यादिवत् ॥

एते धर्मस्यानर्हाः । अर्हस्तु मध्यस्थोऽरक्तद्विष्टो धर्मे आर्द्रकुमारादिवदित्युक्तं **भद्रकप्रकृतिः** । तथा **विशेषेण विशेषे** वा हेयोपादेयाद्यन्तररूपे; **निपुणा** न तु मूढा **मति**र्यस्य, एतावताऽनन्तरोक्तदृष्टान्तस्य मूढस्यार्हत्वं निरस्तं । तथा **न्यायमार्गे** वक्ष्यमाणव्यवहारशुद्ध्यादौ न त्वन्यायमार्गे **रति**र्यस्य । तथा **दृढा** न तु शिथिला **निजवचने स्थिति**र्यस्य दृढप्रतिज्ञः इत्यर्थः । एभिश्चतुर्भिर्गुणैरागमोक्ता एकविंशतिरपि श्राद्धगुणा आक्षिप्ताः । ते चैते —

**धम्मरयणस्स जुग्गो अक्खुद्दो रूववं पगइसोमो । लोगपिओ अक्कूरो भीरू असढो सदक्खिण्णो ॥**

**लज्जालुओ दयालू मज्झत्थो सोमदिट्ठि गुणरागी । सक्कहसुपक्खजुत्तो सुदीहदंसी विसेसन्नू ॥**

**वुड्ढाणुगो विणीओ कयण्णुओ परहिअत्थकारी अ । तह चेव लद्धलक्खो इगवीसगुणेहिं संपन्नो ॥** धर्म० ५-६-७

(१) अक्षुद्रोऽतुच्छहृदयः । (२) रूपवान् स्पष्टपञ्चेन्द्रियः । (३) प्रकृतिसोमः स्वभावतोऽपापकर्मा सुखसेव्यश्च । (४) लोकप्रियो दानविनयशीलवत्तया । (५) अक्रूरोऽक्लिष्टचित्तः । (६) भीरुः पापाऽयशोभ्यां बिभेति । (७) अशठः परावञ्चकः । (८) सदाक्षिण्यः प्रार्थनाभङ्गभीरुः । (९) लज्जालुरकार्यवर्जकः । (१०) दयालुः सत्त्वानुकम्पकः । (११) मध्यस्थो रागद्वेषरहितः, अत एव सोमदृष्टिः, स च यथावस्थितधर्मविचारवित्त्वाद् दूरं दोषत्यागी । (१२) गुणरागी गुणिपक्षपाती निर्गुणोपेक्षकश्च । (१३) सत्कथः सती धर्म्या कथाऽभीष्टा यस्य स तथा । (१४) सुपक्षयुक्तः सुपक्षेणसुशीलानुकूलेन परिवारेण युक्तः । (१५) सुदीर्घदर्शी सर्वत्राऽऽयतिदर्शित्वाद्बहुलाभाल्पक्लेशकार्यकर्त्ता । (१६) विशेषज्ञोऽपक्षपातित्वेन गुणदोषविशेषज्ञः ।

(१७) वृद्धानुगो वृत्तस्थज्ञानवयोवृद्धसेवकः । (१८) विनीतो गुणाधिके गौरवकृत् । (१९) कृतज्ञः परोपकाराऽविस्मारकः । (२०) परहितार्थकारी निरीहः सन् परार्थकृत् । (२१) लब्धलक्षो धर्मकृत्येषु सुशिक्षित इति । एते चैकविंशतिरपि भद्रकत्वादिचतुर्गुणसद्भावे प्रायः प्राप्यन्ते । तत्र भद्रकत्वेऽक्षुद्रत्व-प्रकृतिसौम्यत्वाक्रूरत्व-सदक्षिणत्व-दयालुत्व-मध्यस्थत्व-सोमदृष्टित्व-वृद्धानुगत्व-विनीतत्वानि, विशेषनिपुणमतित्वे स्पष्टपञ्चेन्द्रियत्व-रूपवत्त्व-सुदीर्घदर्शित्व-विशेषज्ञत्व-कृतज्ञत्व-परहितार्थकृत्त्व-लब्धलक्षत्वानि, नयमार्गरतित्वे भीरुत्वाशठत्व-लज्जालुत्व-गुणरागित्व-सत्कथत्वानि, दृढजिनवचनस्थितित्वे लोकप्रियत्व-सुपक्षयुक्तत्वे च प्रायो दृश्यन्ते इत्यत्र तच्चतुष्कमेवोक्तम् । एषु चतुर्ष्वाद्यगुणत्रयं विना कदाग्रह-ग्रस्तत्वान्मूढत्वाद्दुर्नयाऽऽसक्तत्वात् श्राद्धधर्मप्रतिपत्तिरेव न स्यात् । दृढप्रतिज्ञत्वाभावे तु प्रतिपन्नोऽपि श्राद्धधर्मो धूर्त्तमैत्र्यमिव ग्रहिलगृहीतसुवेष इव कपिकण्ठन्यस्तहार इव स्वल्पनिर्वाह एवेति । एवंविधगुण एव गृही सुभित्तिरिव चित्रन्यासम्, सुदृढपीठबन्ध इव प्रासादम्, सुघटितकाञ्चनमिव माणिक्यं **श्राद्धत्वमर्हति** श्राद्धधर्माधिकारी स्यात्, सम्यग्दर्शनादिकं चोल्लकादिदशदृष्टान्तैर्दुर्लभमपि गुर्वादियोगे लभते सम्यक्त्वं, निर्वहते प्राग्भवे शुकराज इवेति भाव इति तृतीयगाथार्थः ॥३॥

शुकराजकथा चेयम्-

**अत्रैव भरतक्षेत्रे क्षेत्रे सस्यैकसंपदाम् । क्षितिप्रतिष्ठितमिति ख्यातं पुरमभूत्पुरा ॥१॥**

यत्र निस्त्रिंशता[१] खड्गे लाङ्गले[२] च कुशीलता । जले च जडता पुष्पे बंधनं न पुनर्जने ॥२॥
मकरध्वजरूपश्रीः ऋतुध्वजनृपाङ्गजः । राजा मृगध्वजस्तत्र धूमध्वज[३] इव द्विषाम् ॥३॥
राज्यलक्ष्मीर्न्यायलक्ष्मीर्धर्मलक्ष्मीश्च निस्समाः । तिस्त्रोऽपि स्पर्धयेवोच्चैर्वव्रिरे यं स्वयंवराः ॥४॥
क्रीडारसमये सैष वसंतसमयेऽन्यदा । क्रीडोद्यानं ययौ क्रीडां कर्त्तुं सान्तःपुरः पुरः ॥५॥
जलक्रीडादिकाः क्रीडा विविधा वसुधाधवः । सावरोधो[४] व्यधात्तत्र करीव करिणीवृतः ॥६॥
सहकारं[५] सदाकारं तत्रैकं छत्रवद्भुवः । निर्वर्ण्य[६] वर्ण्यमुर्वीशः सकर्णोऽवर्णयद्यथा[७] ॥७॥
छाया कापि जगत्प्रिया दलततिर्दत्तेऽतुलं मंगलं, मञ्जर्युद्गम एष निस्तुलफलस्फातेर्निमित्तं[८] परम् ।
आकारश्च मनोहरस्तरुवरश्रेणीषु तन्मुख्यतां पृथ्व्याः कल्पतरो ! रसालफलद[९] ! ब्रूमस्तवैव ध्रुवम् ॥८॥
सर्वाङ्गीणपरोपकारककरणव्यग्रात्समस्ताङ्गिनां श्रीमन्नाम्रतरोऽपरोऽस्तु भवतः को नाम धाम स्तुतेः ।
धिग्धिक्तान्नितरांस्तरूनपि गुरून् धिग् दुःकवींस्तांश्च ये स्पर्धन्ते भवतापि पापिवचसो ये च प्रशंसन्त्यमून् ॥९॥
ततस्तच्छायमास्थाय स्वर्द्रुच्छायमिवामरः । अन्तःपुरपरीतः सन्निषसाद स सादरम् ॥१०॥

---

१. निर्दयता । २. हले । ३. अग्निः । ४. अन्तपुरसहितः । ५. आम्रम् । ६. दृष्ट्वा । ७. विद्वान् । ८. असाधारण० ९. आम्र०

उदारं सारशृङ्गारं शृङ्गारमिव जङ्गमम् । स्वं [1]शुद्धान्तं स निध्याय ध्यायति स्मेति विस्मयात् ॥११॥
अन्तःपुरं पुरन्ध्रीणां[2] सारोद्धार इवावनेः । मयैतत्प्राप्यते विधेः काऽप्यहो सुप्रसन्नता ॥१२॥
ईदृशः सुदृशः सन्ति नूनं नान्यस्य कस्यचित् । तारास्तारापतेरेव दाराः सर्वग्रहेषु वा ॥१३॥
इत्युच्चैः प्रौढिसुप्रापाद्यावद्दर्पान्नृपस्य हृद् । पूरादिव सरिद्वर्षासुप्रापात्प्लवते बहिः ॥१४॥
तावत्प्रस्तावववक्तेव पण्डितः पिण्डितः श्रिया । कश्चिदुच्चैः शुकः श्लोकं माकन्दस्थोऽब्रवीद्यथा[3] ॥१५॥
क्षुद्रस्यापि न कस्य स्याद् गर्वश्चित्तप्रकल्पितः । शेते पातभयाद् व्योम्नः पादावुत्क्षिप्य टिट्टिभः ॥१६॥
तं निशम्य नृपो दध्यावहो धृष्णुरयं शुकः । एवं गर्वं प्रकुर्वन्तं खर्वीकुर्वीत मां किमु ॥१७॥
यदि वाजाऽकृपाणीयात्काकतालीयतोऽथवा । घुणाक्षरीयात्खलति[4]बिल्वीयादथवा नयात् ॥१८॥
स्वभावेनैव [5]कीरोऽमुं पापठीत्यशठाशयः । ध्यायत्येवं नृपे कीरः पुनरन्योक्तिमुक्तवान् ॥१९॥ युग्मम् ॥

पक्षिन् ! प्राप्तः कुतस्त्वं ननु निजसरसः किंप्रमं तन्महीयः
किं मे धाम्नोऽपि कामं प्रलपसि किमरे मत्पुरः पाप ! मिथ्या ।

१. अन्तःपुरम् २. स्त्रीणाम् ३. आम्रस्थः । ४. खलवाट ५. शुकः ।

भेकः किञ्चित्ततोऽन्धौ स्थित इति शपते हंसमभ्यर्णगं धिग्
दृप्यत्यल्पेऽपि तुच्छः समुचितमिति वा तावदेवास्य बोद्धुः ॥२०॥

श्रुत्वेत्यचिन्तयद् भूपः कूपमण्डूककल्पता । कल्पिताऽनेन मे नूनमन्योक्तिं जल्पता सता ॥२१॥

तदयं शुककोटीरश्चित्रं ज्ञानी मुनीशवत् । इति ध्यायति धात्रीशे स एवं पुनरप्यवाक् ॥२२॥

ग्रामीणस्य जडाग्रिमस्य नितमां ग्रामीणता कापि यः, स्वं ग्रामं दिविषत्पुरीयति कुटीं मानी विमानीयति ।
स्वर्भक्ष्यीयति च स्वभक्ष्यमखिलं वेषं द्युवेषीयति, स्वं शक्रीयति चात्मनः परिजनं सर्वं सुपर्वीयति ॥२३॥

व्यधाद् बुधाग्रणीर्ग्राम्यसाम्यमप्येष मे ततः । इतोऽप्यन्तःपुरात्कापि परा रामास्ति किं परा ॥२४॥

इत्यन्तर्ध्यायिनं धात्र्याः स्वामिनं स शुकाग्रणाः । द्विधा मनोज्ञं प्राहेत्थं नाद्धोक्तिर्हि नृणां मुदे ॥२५॥ युग्मम् ॥

तावदेव स्वकीयं भो भूपतेऽन्तःपुरं परम् । मन्यसे प्रेक्षसे यावन्न गाङ्गलिऋषेः सुताम् ॥२६॥

सर्वाङ्गसुभगां विश्वत्रितयेऽप्यतिशायिनीम् । सृष्ट्वा यां सृष्टिकृत्सृष्टिश्रमस्य फलमाप्तवान् ॥२७॥

सा कन्या येन नो दृष्टा निष्फलं तस्य जीवितम् । दृष्टापि येन नाश्लिष्टा निष्फलं तस्य जीवितम् ॥२८॥

तां बालां दृष्टपूर्वी यस्तस्यान्यासु रतिः कथम् । रज्यतेऽन्यत्र किं कुत्राऽप्यलिर्व्यालोक्य मालतीम् ॥२९॥

बालां कमलमालां तां सुतामिव दिवस्पतेः । चेद्दिदृक्षुर्जिघृक्षुश्च समागच्छेस्तदा द्रुतम् ॥३०॥

एवमुक्त्वा समुड्डीने तूर्णं तत्र पतत्त्रिणि । अत्यौत्सुक्यं दधच्चित्तेऽभिधत्ते स्म मुहुर्नृपः ॥३१॥
भो भोः पवनवेगं मे हयं सत्याऽन्वयाह्वयम् । आनयध्वमानयध्वं प्रगुणीकृत्य भृत्यकाः ! ॥३२॥
भृत्यैरपि सपर्याण[1]मर्वाण[2]मुपढौकितम् । तमारूढः क्ष्मापकोटीकोटीरः कीरमन्वगात् ॥३३॥
राज्ञोऽन्येन हि केनापि सा च केनापि हेतुना । आसन्नेनापि नाश्रावि कीरोक्तिर्दूरगैरिव ॥३४॥
तेनाद्य राज्ञः किं जज्ञे क्व चोद्यातीति विह्वलाः । मन्त्र्यादयो न्यवर्त्तन्त कियन्मार्गेऽनुगम्य तम् ॥३५॥
शुकोऽग्रे पार्थिवः पश्चादित्युद्यान्तौ च तौ क्षणात् । योजनानां पंचशतीमतीयतुः समीरवत् ॥३६॥
किंचिद् दिव्यानुभावेन भूमीन्द्रोऽपि हयोऽपि सः । तावन्मार्गमतिक्रान्तौ न तु श्रान्तौ मनागपि ॥३७॥
कर्मणेवामुनाऽऽकृष्टः पक्षिणा विघ्नरक्षिणा । भवान्तरमिव प्राणी क्ष्मापः प्राप महाटवीम् ॥३८॥
कोऽप्यहो प्राग्भवाभ्यासव्यासवासः सतामपि । स्थानाद्यनिर्णयेऽप्यस्या यद्दधावेति भूधवः ॥३९॥
तस्यामटव्यां दिव्यांशु मेरुश्रृङ्गमिवागतम् । अस्ति स्वस्तिदमाद्यार्हच्चैत्यं स्वर्णमणीमयम् ॥४०॥
निविश्य तस्य कलशे कलगीस्तं जगौ शुकः । श्रीआदिदेवं वंदस्व राजन्नाजन्मशुद्धये ॥४१॥

१. पलाण । २. अश्वम् ।

राजापि कीरराजस्य गमनाऽऽरेकया रयात् । हयाधिरूढ एवोच्चैः प्रणनाम जिनाधिपम् ॥४२॥
विज्ञो विज्ञाय तत्पक्षी हितैषी क्षितिपस्य सः । अन्तश्चैत्यमुपागत्य कृत्यवित्प्राणमत्प्रभुम् ॥४३॥
राजाप्युत्तीर्य वाजीन्द्रादंतःप्रासादमासदत् । अनुकीरमनुज्ञानं सन्मनोऽन्तर्विवेकवत् ॥४४॥
मणीमयीमप्रतिमां प्रतिमां तत्र [१]चार्षभीम् । प्रणिपत्य नृपस्तुष्टस्तुष्टुवे सुष्ठुवागिति ॥४५॥
एकस्माद्रणरणकः[२] परस्माच्च न नैपुणम् । स्तोत्रे ते भक्त्यशक्तिभ्यां चेतो दोलायते मम ॥४६॥
तथापि त्वां यथाशक्ति नाथ ! स्तुतिपथं नये । मशकोऽपि किमु व्योम नोत्प्लवेत स्ववेगतः ॥४७॥
कथं तवाऽमितदातुर्मितदाः स्वर्द्रुमादयः । उपमामुपयान्तीति नोपमेयोऽसि केनचित् ॥४८॥
न प्रसीदसि कस्यापि न ददासि च किञ्चन । तदप्याराध्यसे सर्वैरहो ते रीतिरद्भुता ॥४९॥
निर्ममोऽपि जगत्राता निःसंगोऽपि जगत्प्रभुः । लोकोत्तरस्वरूपाय नीरूपाय नमोऽस्तु ते ॥५०॥ (इति जिनेन्द्रस्तवः)
अशृणोन्मसृणोद्गारां तामुदारां मुदा स्तुतिम् । महर्षिर्गाङ्गिलिः प्रत्यासन्नमाश्रममाश्रितः ॥५१॥

१. आदिदेवसत्कां । २. हत्खटत्कारः ।

**ततः कुतोऽपि सङ्केतात्प्राप्तः सोऽर्हन्निकेतनम् । जटाशाली वल्कवासाः [1]कृत्तिवासा इवापरः ॥५२॥**

**सोऽपि श्रीऋषभं भक्त्याभिवन्द्याऽनिन्द्यविद्यहृद् । हृद्यानवद्यसद्यस्क[2]गद्यैस्तुष्टाव तद्यथा ॥५३॥**

जय ! त्रिजगदेकनाथ ! विश्वत्रयोपकृतिप्रथासमर्थ ! सदनन्तातिशयश्रीसनाथ ! जय श्रीनाभिभूपालविपुलकुलकमल–समुल्लासहंस[3] ! त्रिभुवनजनस्तवनीय ! कमनीय ! श्रीमरुदेवास्वामिनीकुक्षिसरोवरराजहंस ! जय त्रैलोक्याऽस्तोकलोकमनः–[4]कोकनिःशोकताकरणसहस्रकर ! अपरसर्वदैवतगर्वसर्वंकष ! निस्तुषनिस्सीमनिस्समममहिमकमलाविलासकमलाकर ! जय स्वरसभक्तिरसप्रसरप्रस्फुरदहमहमिकाप्रणमदमरनरनिकरशिरःकोटिसण्टङ्किमाणिक्यकोटीरकान्तिनीरलहरिप्रक्षालितपदकमल ! विध्वस्तसमस्तरागद्वेषादिदोषमल ! जय प्रास्तापारसंसारपारावारनिमज्जज्जन्तुसमुत्तारमहायानपात्रप्रवर ! श्रीसिद्धवधूवर ! अजर! अमर ! अचर ! अदर ! अपर ! अपरम्पर ! परमेश्वर ! परमयोगीश्वर ! श्रीयुगादिजिनेश्वर ! नमस्ते ।

**स्तुत्वेति हारिहारीतगद्यरीत्या मुदा जिनम् । राजानं प्रति निर्व्याजं व्याजहार ऋषीश्वरः ॥५४॥**

**राजन् मृगध्वज ऋतुध्वजराजकुलध्वज ! । वत्सागच्छाश्रमे दिष्ट्याऽस्माकमाकस्मिकोऽतिथिः ॥५५॥**

**स्वोचितामातिथेयीं ते प्रथयामो यथा मुदा । भाग्यैरेवोपलभ्यन्तेऽतिथयो हि भवादृशाः ॥५६॥**

१. महादेवः । २. प्रत्यग्र० । ३. सूर्यः ! । ४. चक्रवाक० ।

कोऽयं महर्षिः कं हेतुं मामाह्वयति साग्रहम् । मामकीनाभिधानादि जानाति कथमेष वा ॥५७॥

इत्युच्चैर्विस्मितमतिः क्ष्मापतिर्यतिना समम् । जगामाश्रममार्या हि प्रार्थनाभङ्गभीरवः ॥५८॥

महस्विनस्तस्य पुनः प्रतिपत्तिं तपस्विनः । महातपस्विनस्तेनुः सर्वां शश्वद्यशस्विनः ॥५९॥

भूपतिं प्रति स प्रीततमः प्राह [1]महात्रऋषिः । अत्रागतेन भवता कृताऽस्माकं कृतार्थता ॥६०॥

अस्मत्कुलालङ्करणं [2]कार्मणं विश्वचक्षुषाम् । अस्माकं जीवितस्यापि जीवितं जङ्गमं किल ॥६१॥

कन्या कमलमालेयं पुष्पमालेव दैवती । अर्हा तवैव तत्पाणौ कुरुष्व स्वीकुरुष्व नः ॥६२॥ युग्मम् ॥

इष्टं वैद्योपदिष्टं च तन्मन्वानोऽपि भूपतिः । प्रापद्यताऽऽग्रहेणैव सतां हि स्थितिरीदृशी ॥६३॥

ततश्च स मुदा प्रादात्तस्मै विस्मेरयौवनाम् । कन्यां स्वामचिरात्को वा चिरयेदिष्टकर्मणि ॥६४॥

वल्कलाकल्पयाऽप्युच्चैरनया पिप्रिये नृपः । युक्ता वा राजहंसस्य प्रीतिः कमलमालया ॥६५॥

सानन्दतापसीवृन्दस्फूर्जद्धवलमङ्गलम् । स्वयं विधाप्यमानार्हनिःशेषविधिबन्धुरम् ॥६६॥

नृपेण परिणाय्यैनां स तस्मै करमोचने । पुत्रार्थं प्रददे मन्त्रं देयं वाऽन्यन्मुनेः किमु ॥६७॥ युग्मम् ॥

१. योगीश्वरः । २. वशीकरणम् ।

जाते विवाहे[1]स्माऽऽहेमं महर्षिं स महीशिता । राज्यं शून्यं विमुच्याऽहमिहायातोऽस्मि सत्वरम् ॥६८॥
सज्जिकां कारयध्वं तच्चलितुं तापसोऽप्यवक् । दिक्पटानामिवास्माकं भवेत्का नाम सज्जिका ॥६९॥
किंतु दिव्यं भवद्वेषं शौचवेषं च वाल्कलम् । दर्शं दर्शं दधात्येषा खेदमेदस्वलात्मताम् ॥७०॥
किञ्च सेचनमेवैषा वृक्षाणां कृतपूर्विणी । रीतिं तपस्विनामेव सर्वदा दृष्टपूर्विणी ॥७१॥
अस्या आजन्ममुग्धायाः स्निग्धायास्त्वयि निर्भरम् । मा भूत्कापि सपत्नीभ्यः पराभूतिस्ततः क्वचित् ॥७२॥
नृपोऽप्याह [2]परा भूतिरेवैतस्या विधास्यते । सर्वाङ्गीणाऽपि यौष्माकी न चोक्तिः खण्डयिष्यते ॥७३॥
छेकच्छेकोक्तितः प्रीतिं तापसाय विधाय सः । तापसीप्रभृतिप्रीत्यै स्फुटोक्त्येत्युक्तवान् पुनः ॥७४॥
सर्वान् स्वस्थानमाप्तोऽस्याः पूरयिष्ये मनोरथान् । कौतस्कुतमिदानीं तु वेषमात्राद्यपीह भोः ॥७५॥
ऋषिर्विषीदंस्त्ववदत्पुत्र्या वेषोऽपि धिङ् मया । निष्किञ्चनेन नो कर्त्तुं शक्यते नित्यनिःस्व[3]वत् ॥७६॥
तस्यैवं वदतः पेतुर्नेत्रतोऽश्रूणि दुःखतः । यावता तावता प्रत्यासन्नतः सहकारतः ॥७७॥
[4]अदूष्यदूष्याभरणश्रेणयस्तत्र तत्क्षणात् । स्पर्धयेवापतन् वारिधारा [5]धाराधरादिव ॥७८॥ युग्मम् ॥

---

१. आह स्मेत्यर्थः । २. उत्कृष्टा समृद्धिः । ३. दरिद्रवत् । ४. निर्मल० । ५. मेघादिव ।

सर्वेऽपि तद्वीक्ष्य चमच्चेक्रियाञ्चक्रिरेतराम् । निश्चिक्यिरे च कन्याया भाग्यवत्तामनुत्तराम् ॥७९॥

पतेत्फलादि फलदाज्जलादि जलदादिव । न तु दूष्याद्यहो पुण्यप्रागल्भ्ये किमु वाऽद्भुतम् ॥८०॥

यतः—पुण्यैः संभाव्यते पुंसामसंभाव्यमपि क्षितौ । तेरुर्मेरुसमाः शैलाः किं न रामस्य वारिधौ ॥८१॥

तेन प्रहर्षिणा क्षोणिपालः सह महर्षिणा । दत्तचित्तप्रसादं तं प्रासादं सप्रियोऽप्यगात् ॥८२॥

पुनः [१]क्षिप्रं प्रभो ! भूयाद्दर्शनं तव पावनम् । स्थिरीभूयाश्च मच्चित्ते समुत्कीर्ण इवाश्मनि ॥८३॥

उक्त्वेत्याद्यजिनं तत्र स प्रणंनम्य सप्रियः । प्राप्तो बहिर्जिनगृहान्मार्गं पप्रच्छ तापसम् ॥८४॥

तापसोऽप्याह नैवाहं वेद्मि मार्गाद्यथो नृपः । प्राह तर्हि कथं नाम मन्नामादि विवेदिथ ॥८५॥

ऋषिरेष बभाषेऽथ शृणु भो भूपतेऽन्यदा । मुदैनां चारुतारुण्यां कन्यां वीक्ष्येत्यचिन्तयम् ॥८६॥

अनुरूपो वरः कोऽस्या भविता तावता शुकः । सहकारस्थितोऽवोचच्चिन्तां मा भो कृथा वृथा ॥८७॥

ऋतुध्वजमहाराजाङ्गजं नाम्ना मृगध्वजम् । राजानमानयन्नस्म्यद्यैवास्मिन् देववेश्मनि ॥८८॥

तमेव विश्वप्रवरं वरं कन्येयमर्हति । कल्पवल्लीव कल्पद्रुं माऽर्थेऽस्मिन् संशयं कृथाः ॥८९॥

१. त्वरितम् ।

इत्युक्त्वा स गतस्त्वं चागतस्तत इमां मुदा । तुभ्यं देयमिव प्रादां नान्यज्जानामि किञ्चन ॥९०॥
इत्युदित्वा मुनौ मौनं नृपे चिन्तां च चकृषि । समयज्ञ इवोपेत्य स एवाशु शुको जगौ ॥९१॥
आगच्छाऽऽगच्छ भो भूप ! पन्थानं दर्शयामि ते । अहं विहङ्गमात्रोऽपि नोपेक्षे स्वाश्रितं जनम् ॥९२॥
क्षुद्रोऽपि किल नोपेक्ष्यः स्वाश्रितः किं पुनर्महान् । शशाङ्कः स्वाङ्कतः क्वापि मुञ्चति किं शशं शिशुम् ॥९३॥
व्यस्मार्षीर्मामकस्मात्त्वमार्यधुर्योऽप्यनार्यवत् । विस्मरेयमहं तु त्वां क्षुद्रोऽप्यक्षुद्रवत्कथम् ॥९४॥
ततश्चमत्कृतः पृथ्वीपतिर्यतिपतिं द्रुतम् । आपृच्छ्याऽऽरुह्य वाजीन्द्रं सप्रियः शुकमन्वगात् ॥९५॥
एवमागच्छतस्तस्योत्सुकस्य शुकपृष्ठतः । क्षितिप्रतिष्ठितपुरं किंचिद्दृग्गोचरेऽचरत् ॥९६॥
तावत्कीरः स्थिरस्तस्थावारुह्यैकं महीरुहम् । भूकान्तः शङ्कितस्वान्तः सोपरोधं तमभ्यधात् ॥९७॥
पुरः पुरस्य प्रासादवप्राद्यं यद्यपीक्ष्यते । तथापि हि पुरं दूरे किमस्थाः कीर ! रुष्टवत् ॥९८॥
हुंकृत्य विहगः प्राह महदत्रास्ति कारणम् ! । प्रेक्षावतां प्रवृत्तिर्हि नैव निर्हेतुका क्वचित् ॥९९॥
किं तदित्युदिते तेन संभ्रान्तेन महीभुजा । व्याजहार कीरराजः शृणु राजन् ! यथा ब्रुवे ॥१००॥
चन्द्रपुर्या अधीशस्य चन्द्रशेखरभूभुजः । स्वसा चन्द्रवतीत्यस्ति वल्लभा वल्लभा तव ॥१०१॥

सान्तर्दुष्टा मुखे मिष्टा गोमुखव्याघ्ररूपिणी । वारीणामिव नारीणां प्रायेण विषमा गतिः ॥१०२॥
त्वां विरक्तमिव त्यक्तराज्यं दूरगतं क्वचित् । विचिन्त्य लब्धछलया शाकिन्येव तया [1]रयात् ॥१०३॥
अज्ञाप्यत निजभ्रातुस्त्वद्राज्यग्रहणक्षणः । अबलानां स्वेष्टसिद्धयै छलमेवातुलं बलम् ॥१०४॥ युग्मम् ।
चतुरङ्गबलोपेतस्ततो द्राक् चन्द्रशेखरः । त्वद्राज्यग्रहणायाऽऽगात्कस्त्यजेद्राज्यमागतम् ॥१०५॥
मध्यस्थैः सुभटैस्तूर्णं त्वापुरं दत्तगोपुरम् । भोगेनेव निधिं भोगी चम्वाऽसौ पर्यवेष्टयत् ॥१०६॥
तवोद्भटाश्च सुभटाः पुरान्तः परितः स्थिताः । युध्यमानाः स्फुरद्वीराभिमानाः संति संप्रति ॥१०७॥
प्रत्यर्थिविजयस्तैस्तु कथं निर्नाथमानिभिः । लौकिकैरप्यभिहितं हतं सैन्यमनायकम् ॥१०८॥
हन्त गन्तव्यमावाभ्यामेवं सति कथं पुरे । इति हेतोरहं राजन्निह तस्थौ सुदुःखहृद् ॥१०९॥
इति व्यतिकरात्कीरोदितादंतर्भिदः श्रुतात् । जातमार्ग इव प्राप संतापः क्ष्मापतेर्मनः ॥११०॥
ततः क्षितिपतिश्चित्ते चिन्तयाञ्चकृवानिति । धिगहो दुश्चरित्रायाः स्त्रिया हृदयदुष्टताम् ॥१११॥
तस्याऽपि साहसमहो अहो निश्शङ्कचित्तता । स्वामिराज्येऽपि तृष्णाऽहो अहो दुर्नयनिष्ठता ॥११२॥

१. वेगात् ।

दोषः को वा तस्य शून्यं राज्यं को न जिघृक्षति । अरक्षकं क्षेत्रमपि ग्रस्यते शूकरैर्न किम् ॥११३॥

धिग् धिग् मामेव राभस्यकारिणं पारवश्यतः । अविवेकः कार्यविधावुद्रेकः[1]सकलापदाम् ॥११४॥

अविमृश्य कृतं न्यस्तं विश्वस्तं दत्तमादृतम् । उक्तं मुक्तं च भुक्तं च प्रायोऽनुशय[2]कृन्नृणाम् ॥११५॥

उक्तञ्च—

सगुणमपगुणं वा कुर्वता कार्यजातं परिणतिरवधार्या यत्नतः पण्डितेन ।
अतिरभसकृतानां कर्मणामाविपत्तेर्भवति हृदयदाही शल्यतुल्यो विपाकः ॥११६॥

इत्थं नृपं सानुशयं भ्रष्टराज्याशयं शुकः । सस्मयं स्माह नृश्रेष्ठानुशयिष्ठाः स्म मा मुधा ॥११७॥

मदुक्ते विहिते हन्त भवेत्कथमिवाशुभम् । प्रयोगे विज्ञवैद्योक्ते व्याधिः किं बाधते क्वचित् ? ॥११८॥

मा ज्ञासिष्ठा गतं राज्यं मुधा मे वसुधापते ! । त्वमद्यापि चिरं राज्यं प्राज्यं भोक्ष्यसि सौख्यभाक् ॥११९॥

तस्य नैमित्तिकस्येव तेन वाक्येन भूपतिः । स्वराज्यप्राप्तये जातप्रत्याशो यावताऽभवत् ॥१२०॥

तावद् दावमिवाद्राक्षीदातुरं चातुरङ्गिकम् । सैन्यं सन्नद्धमागच्छदध्यासीच्च सभीर्नृपः ॥१२१॥

१. आधिक्यम् । २. पश्चात्तापकृत् ।

येनाहमपि हा निन्ये दैन्यं सैन्यं रिपोरिदम् । ध्रुवं वधायाऽधाविष्ट विज्ञायाऽऽयातमत्र माम् ॥१२२॥
रक्षामि कथमेकाकी कान्तामेतामथो कथम् । युद्धे चेत्यादि किङ्कृत्यजडो यावद्भवेन्नृपः ॥१२३॥
तावज्जीव जय स्वामिन्नादिश स्वकसेवकान् । दिष्ट्याद्य देव ! दृष्टोऽसि हस्तभ्रष्टो निधिर्यथा ॥१२४॥
संभावय स्निग्धदृशा सेवकान् बालकानिव । इत्यादिवादिनीं सेनां स्वामेवेक्ष्य विसिष्मिये ॥१२५॥
हृष्टश्च पृष्टवान् सैन्यान् कथमत्राऽऽगताः स्थ भोः । तेऽप्यूचुः स्वमिहायातमेवावैक्षिष्महि प्रभो ! ॥१२६॥
न विद्मस्तु कथं केनाप्यानायिष्महि रंहसा । देव ! दिव्यानुभावोऽयं कोऽप्यभूद् भाग्ययोगतः ॥१२७॥
एतद् व्यतिकरादुच्चैर्विश्वविस्मयदायिनः । चमच्चेक्रियमाणः क्ष्माशक्रस्तर्कमिति व्यधात् ॥१२८॥
देवस्येवाविसंवादा कापि कीरस्य गीरहो । सम्मान्यस्तदयं नैकप्रकारैरुपकारकृत् ॥१२९॥
कथं प्रत्युपकुर्वेऽस्मै स्पृहयालुरयं तु किम् । न चानृणी स्यां प्रागस्योपकृतोऽपि बहूपकृत् ॥१३०॥
यदुक्तम्—प्रत्युपकुर्वन् बह्वपि न भवति पूर्वोपकारिणस्तुल्यः । एकोऽनुकरोति कृतं निष्कारणमेव कुरुतेऽन्यः ॥१३१॥
इति प्रीत्या शुकं प्रत्यालोकते यावता नृपः । तावद् बुधमिव प्रातर्नष्टं नैक्षिष्ट तं क्वचित् ॥१३२॥
अचिन्तयच्च नियतं दूरतः क्वाऽप्ययं ययौ । भीत्यैव प्रत्युपकृतेरुपकृत्यैव सत्तमः ॥१३३॥

यतः—इयमुच्चधियामलौकिकी महती क्वापि कठोरचित्तता । उपकृत्य भवन्ति दूरतः परतः प्रत्युपकारभीरवः ॥१३४॥
ईदृग्ज्ञाननिधिर्नित्यं यदि स्यात्सन्निधिस्थितः । तर्हि किं विषमं ज्ञानं ह्यशेषं सुप्रतिक्रियम् ॥१३५॥
ईदृक् सहाययोगो वा न प्रायः प्राप्यते क्वचित् । जातु प्राप्तोऽपि न चिरं स्थिरः स्यान्निःस्ववित्तवत् ॥१३६॥
किं च कोऽयं शुको ज्ञानी कथं मे वत्सलः कुतः । कुत आगादगात् क्वाऽस्या वृक्षाद् दूष्याद्यभूत्कथम् ॥१३७॥
[1]वरूथिनी कथं चैषाऽत्रायातेत्यादिसंशयः । गुहान्तर्ध्वान्तवद् ध्वंस्यः केन तं दीपकं विना ॥१३८॥
क्षोणीभृदग्रणीरेवं व्यग्रः सेवाविधायिनाम् । धुर्यैः पर्यनुयुक्तः सन्नुक्तवान् व्यक्तमेव तत् ॥१३९॥
आदितः कीरचरितं त्वरितं तदुदीरितम् । श्रुत्वा सर्वेऽपि तेऽप्युच्चैर्विस्मयं[2] स्मयमैयरुः ॥१४०॥
ऊचिरे चाचिरेणापि स ते सङ्गंस्यते क्वचित् । हिताकाङ्क्षी हि यो यस्याऽनपेक्षी नैव तस्य सः ॥१४१॥
संशयोऽप्येष निःशेषः सुपेषः शुष्कपर्णवत् । ज्ञानिपृच्छाप्रयोगेण ज्ञानिनां किमगोचरः ॥१४२॥
एतां चिन्तां ततस्त्यक्त्वा पवित्रय निजं पुरम् । मोरवत्पौरलोकोऽपि मोदतां देव[3]दर्शनात् ॥१४३॥
तेषामुक्तमिदं युक्तममन्यत महीपतिः । उक्तं कृतं च नो कस्य सम्मतं समयोचितम् ॥१४४॥

१. सेना । २. संशयं । ३. मोरपक्षे तु मेघदर्शनात् ।

प्रस्फूर्जत्तूर्यनिर्घोषैर्दिक्षु [1]सांराविणं क्षणम् । प्रथयन्नथ पृथ्वीशः प्रतस्थे स्वपुरं प्रति ॥१४५॥
आयान्तं तं तथोद्वीक्ष्य सपक्षमिव [2]तक्षकम् । बिलाद् दूरस्थोन्दुरवद् व्यद्रवच्चन्द्रशेखरः ॥१४६॥
प्रत्युत्पन्नमतिः सोऽथ [3]तदात्वोत्पन्नया धिया । भट्टं किञ्चिन्निसृष्टार्थं[4] व्यसृष्ट नृपतिं प्रति ॥१४७॥
आगत्याचष्ट भट्टोऽपि हे भट्टारक ! नः प्रभुः । देवपादान् प्रसादार्थं विज्ञाविज्ञापयत्यदः ॥१४८॥
त्वां धूर्त्तच्छलितमिव त्यक्त्वा राज्यं क्वचिद्गतम् । ज्ञात्वा त्वत्पुररक्षार्थमुपस्थितोऽस्मि सौस्थ्यकृत् ॥१४९॥
अजानानैर्भटैस्तावत्तावकीनैरुदायुधैः । सन्नद्धैर्योद्धुमारेभे विद्विषेव मया समम् ॥१५०॥
प्रहारानप्यहं सेहे रक्षन् द्विड्भ्यस्तु ते पुरम् । स हि किं सेवकः स्वामिकार्येऽप्येकमना न यः ॥१५१॥
पुत्रः पितुर्गुरोः शिष्यः स्वामिनोऽपि च सेवकः । पत्नी पत्युः पुनः कार्ये युक्तं प्राणांस्तृणीयति ॥१५२॥
श्रुत्वेति सत्यासत्यत्वे सन्दिहानोऽपि किञ्चन । तत्सत्यमेव दाक्षिण्यादिना भूमानमन्यत ॥१५३॥
बह्वमन्यत [5]चाह्वायाभ्यायातं चन्द्रशेखरम् । दाक्ष्यदाक्षिण्यगाम्भीर्यधुर्यता नृपतेरहो ॥१५४॥
ततः श्रियेव श्रीकान्तः समं कमलमालया । प्रविवेश विशामीशः स्वपुरं परमोत्सवैः ॥१५५॥

१. साम्राविणं इति मुद्रितम् । २. नागम् । ३. तात्कालिकोत्पन्नया । ४. कथनार्थम् । ५. त्वरितम् ।

उचितां दयितां तां च बालां चन्द्रकलामिव । देव्याः पट्टे भालपट्टे महेशः स न्यवीविशत् ॥१५६॥

धर्म एवात्मजाद्याप्तौ जयाप्ताविव पार्थिवः । हेतुर्मुख्यः सहायो स्यान्मन्त्राद्यपि तु पत्तिवत् ॥१५७॥

इत्यन्येद्युर्मुनिदत्तमन्त्रः पुत्रकृतेऽमुना । जेपे व्यपेतकम्पेन क्षितिपेन यथाविधि ॥१५८॥

सर्वासामथ राज्ञीनामेकैकोऽजनि नन्दनः । निमित्तानां हि संयोगे भवेन्नैमित्तिकोद्भवः ॥१५९॥

राज्ञो मान्यापि दाक्षिण्यात्पुत्रं चन्द्रावती पुनः । प्राक्चिन्तितपतिद्रोहपातकादेव नाप्नुषी ॥१६०॥

सुषुप्तया तदा रात्रौ राज्ञ्या कमलमालया । दिव्योपलम्भवल्लेभे स्वप्नो राज्ञे न्यवेदि च ॥१६१॥

प्राणेशाऽद्य निशाशेषे सुप्तजागरया मया । तत्राश्रमस्थिते चैत्ये प्रणेमे प्रथमो जिनः ॥१६२॥

तदा च सप्रसादेन प्रभुणाऽहमभाषि च । भद्रे ! कीरं गृहाणैनं हंसं दास्ये च तेऽन्यदा ॥१६३॥

इत्यादिशंस्तीर्थकरः करे कीरवरं मम । अर्पयामास सर्वाङ्गसुभगं दिव्यवस्तुवत् ॥१६४॥

तेन प्रभोः प्रसादेन प्राप्तैश्वर्येव सर्वतः । प्रोच्चैः प्रमुमुदे तुल्यक्षणं प्रबुबुधेऽप्यहम् ॥१६५॥

अचिन्तितोपलब्धस्य स्वप्नस्यास्य तरोरिव । का कान्त ! नः फलप्राप्तिसंपत् संपत्स्यतेतराम् ॥१६६॥

श्रुत्वाऽदः परमानन्दकन्द[1]कन्दलताम्बुदम् । जगाद [2]जगतीजानिर्जानन् स्वप्नविधेः फलम् ॥१६७॥
एवंविधस्य स्वप्नस्याऽप्य[3]स्वप्नस्येव दर्शनम् । दुर्लभं लभते भूरिभाग्यैः पूर्णफलं च तत् ॥१६८॥
दिव्यरूपस्वरूपौ ते दिव्यस्वप्नादतः प्रिये ! । चन्द्रार्काविव पूर्वस्यां भाविनौ नन्दनौ क्रमात् ॥१६९॥
श्रेष्ठौ पक्षिकुले कीरमरालौ सर्वथा यथा । तथा भविष्यतः सुभ्रु ! पुत्रौ नक्षत्रमण्डले ॥१७०॥ (युग्मम्)
प्रसाददानं भगवान् कृतवांस्तेन तौ सुतौ । भाविनौ भगवत्तुल्यौ प्रान्ते कान्ते ! न संशयः ॥१७१॥
श्रुत्वेत्यानन्दसन्दर्भं गता गर्भं बभार सा । रत्नगर्भेव सद्रत्नं [4]द्योरत्नं द्यौरिवाथवा ॥१७२॥
राज्ञा क्रमात्पूर्यमाणै रम्यैर्धर्म्यैः स दोहदैः । ववृधे सद्रसैर्मेरुक्ष्माऽन्तःकल्पद्रुकन्दवत् ॥१७३॥
दिने शुभे शुभे लग्ने लग्नांशेऽपि शुभेऽन्यदा । प्राचीव पार्वणं चन्द्रं सा प्रासूत सुतोत्तमम् ॥१७४॥
पट्टराज्ञ्यास्तनूजत्वात्तस्य जन्ममहोत्सवः । व्यधाय [5]सर्वातिशायी राज्ञा राज्ञामियं स्थितिः ॥१७५॥
ततस्तृतीये दिवसे दिवसेशनिशेशयोः । नरेशः कारयामास स्वसूनोर्दर्शनोत्सवम् ॥१७६॥
षष्ठे च दिवसे षष्ठीजागरं सागरं श्रियाम् । युक्तं प्रोल्लासयामास राजा स्फूर्जन्महः श्रिया ॥१७७॥

१. अंकुरित । २. जगत्पतिः । ३. देवस्य । ४. सूर्यम् । ५. सर्वातिशयीत्यपि पाठः ।

महीशस्तस्य सोत्साहमतुच्छोत्सवपूर्वकम् । शुभेऽह्नि शुकराजेति नाम स्वप्नानुगं व्यधात् ॥१७८॥
धात्रीभिः प्रेमधात्रीभिः पाल्यमानः स पञ्चभिः । श्रीसंयमः समितिभिरिव प्रववृधे क्रमात् ॥१७९॥
अन्नस्यास्वादनं पित्रादीनामाह्लादनं परम् । [१]रिंखणं प्रेक्षणं श्रीणां क्रमणं कारणं मुदाम् ॥१८०॥
जल्पस्तल्पः श्रियां चेलार्पणं चित्तैकतर्पणम् । बन्धश्च वत्सरग्रन्थेः प्रेमग्रन्थेरिवाङ्गवान् ॥१८१॥
इत्यादिकृत्स्नकृत्यानि क्रमेण निरमीमपत् । महामहैर्महीन्द्रो हि महतां रीतिरीदृशी ॥१८२॥ त्रिभिर्विशेषकम्
स क्रमाद्वर्धमानोऽभूद्वयसा नयसारधीः । पञ्चवर्षोऽपि सफलव्यापारः सहकारवत् ॥१८३॥
तं जयन्तं [२]जयन्तस्याप्यद्भुतां रूपसंपदाम् । स्पर्द्धयेवाऽऽश्रयं सार्द्धं सर्वाङ्गीणगुणश्रियः ॥१८४॥
वाचां चातुर्यमाधुर्यपाटवैरतिसौष्ठवैः । अबाल इव बालोऽपि रञ्जयामास सज्जनान् ॥१८५॥
[३]सुरभौ सुरभीभूतं पुष्पैरुद्यानमन्यदा । सुतेन तेन देव्या च साकं क्ष्मानायको ययौ ॥१८६॥
तस्यैव सहकारस्याऽऽसीनोऽसौ [४]निस्तुले तले । स्मृत्वा प्राग्वृत्त[५]वृत्तस्य प्रीतः प्रोचे प्रियां प्रति ॥१८७॥
आम्रः [६]कम्रः प्रिये ! सोऽयं यस्मिन् कीरोदितां तव । श्रुत्वाऽभिधां दधावेऽहं महावेगात्तमाश्रमम् ॥१८८॥

१. जानुभ्यां चलनम् । २. इन्द्रपुत्रस्य । ३. वसन्ते । ४. मनोहरे । ५. पूर्वभूतवृत्तान्तस्य । ६. मनोहरः ।

तत्र त्वां परिणिन्ये च स्वं निन्ये च कृतार्थताम् । इत्युदन्तं सुतोऽश्रौषीत्पितुरुत्सङ्गसङ्गतः ॥१८९॥
सद्यश्चातुच्छमूर्छासिशस्त्रच्छिन्न इवापतत् । बालकल्पद्रुमः सत्रा पित्रोर्हर्षोच्छ्रयेण सः ॥१९०॥
अत्यन्तमातुरौ मातापितरौ तौ वितेनतुः । निस्तुलं तुमुलं येन मिलति स्माखिलो जनः ॥१९१॥
आः ! किमेतदिति प्रोच्चैर्लोकोऽपि व्याकुलोऽभवत् । महतां सुखदुःखे हि सर्वसाधारणे यतः ॥१९२॥
शीतलैश्चान्दनजलैः कदलीदलमारुतैः । प्रचुरैरुपचारैश्च चिराच्चैतन्यमाप सः ॥१९३॥
नेत्रपत्रे पद्मपत्रे इवैतस्योन्मिमीलतुः । भास्वच्चैतन्ययोगेऽपि न पुनर्वदनाम्बुजम् ॥१९४॥
चक्षुर्भ्यां प्रेक्षत प्रेक्षापूर्वकं सर्वतोऽपि सः । न पुनर्वादितोऽप्युच्चैर्वदति स्म कथञ्चन ॥१९५॥
छद्मस्थे किल [1]सर्वज्ञे तस्मिन्मौनमुपेयुषि । नूनमस्य च्छलं जज्ञे दैवात्किञ्चित्त्वशाम्यत[2] ॥१९६॥
परं जिह्वा स्थितैवास्य हा दुर्दैववशेन नः । इति चिन्तातुरौ पुत्रं पितरौ वेश्म निन्यतुः ॥१९७॥
नानाप्रकारान् भूपोऽस्मिन्नुपचारानचीकरत् । ते त्वासन् विफला एवोपकारा इव दुर्जने ॥१९८॥
तथावस्थस्य तस्यासीत्षण्मासी न तु सोऽभ्यधात् । न च कश्चिज्जगौ सम्यङ्निदानं तदभाषणे ॥१९९॥

---

१. तीर्थंकरे । २. अशंशमीत् इत्यपि पाठः ।

शशी सलक्ष्मा तीक्ष्णोऽर्कः खं शून्यमनिलश्चलः । दृषद्देवमणिर्देवतरुर्दारु धरा रजः ॥२००॥
क्षारोऽब्धिरब्दः कृष्णास्योऽग्निर्दाही निम्नगं पयः । मेरुः कठोरः कर्पूरोऽस्थिरः कस्तूरिकाऽशितिः ॥२०१॥
निर्धनः सज्जनः श्रीमान्मूर्खः क्ष्मापश्च लोलुपः । ईदृक् पुत्रोऽपि मूकश्च रत्नदूषी हहा ! विधिः ॥२०२॥
शुशोचेत्युच्चकैस्तत्र लोकोऽस्तोकोऽपि सर्वतः । विरूपं महतां कस्य न हि खाट्कुरुते हृदि ॥२०३॥ चतुर्भिःकलापकम्
अथाऽगाज्जनता नेत्रकौमुदीकौमुदीमहः । यस्मिन्नुज्जागरः पुंसां स्यात्क्रीडारससागरः ॥२०४॥
तदा पुनस्तदुद्यानं प्राप्तः पुत्रप्रियायुतः । क्ष्मापस्तमाम्रं प्रेक्ष्याऽऽख्यत् खिन्नात्मा प्रेयसीं प्रति ॥२०५॥
देवि ! दूरतरं त्याज्यस्तरुरेष विषद्रुवत् । अत्र स्वपुत्ररत्नस्य जज्ञे [1]वैशसमीदृशम् ॥२०६॥
इत्युक्त्वा पुरतो यावद्याति तावत्प्रमोदकृत् । तले चूतस्य तस्यैव दिव्योऽभूद् दुन्दुभिध्वनिः ॥२०७॥
पृष्टश्च कश्चिदाचष्ट श्रीदत्तस्याधुना मुनेः । केवलज्ञानमुत्पेदे तन्महं तन्वतेऽमराः ॥२०८॥
सुतस्वरूपं पृच्छामीत्युत्सुकः सपरिच्छदः । तत्र गत्वा मुनिं नत्वा ससूनुः स निविष्टवान् ॥२०९॥
तेनादेशि सुधादे[2]श्या देशना क्लेशनाशिनी । पार्थिवोऽथाऽब्रवीन्नाथाऽस्थात्कुतोऽस्याऽङ्गजस्य गीः ॥२१०॥

१. बाधकः । २. कल्पा ।

ऋषिमुख्यो बभाषे भो ! बालोऽयं भाषयिष्यते । दूषितः क्षितिपोऽप्याख्यत् प्रेक्ष्यते किं हि तर्हि नः ॥२११॥
मुनिनाऽवादि वन्दस्व विधिना शुकराज ! नः । तमवन्दत सोऽप्युच्चैः सूत्रोच्चारपुरस्सरम् ॥२१२॥
अहो महीयान् महिमा महर्षेर्यदयं शिशुः । द्रागेव स्फुटवाग् मन्त्रतन्त्राद्यपि विनाऽजनि ॥२१३॥
इति चित्तचमत्काराद्वैते जाते सभासदाम् । किमेतदिति भूपेनाऽनुयुक्तः प्रोक्तवान् प्रभुः ॥२१४॥
[1]सकर्णाऽऽकर्णयाऽत्रार्थे कारणं प्राग्भवोद्भवम् । आसीन्मलयदेशान्तः श्रीभद्दिलपुरं पुरा ॥२१५॥
तत्र चित्रचरित्रश्च जितारिरिति भूपतिः । [2]अलङ्काराश्रितांश्चक्रेऽर्थिनः प्रत्यर्थिनश्च यः ॥२१६॥
चातुर्यौदार्यशौर्यादिगुणानां स्थानमन्यदा । आस्थानस्थं तमुर्वीशमेवं वेत्री[3] व्यजिज्ञपत् ॥२१७॥
राज्ञो विजयदेवस्य देव ! देवदिदृक्षया । दूतः पूतहृदाकूतस्तिष्ठति द्वारि वारितः ॥२१८॥
प्रवेशयेति राज्ञोक्ते तेन सोऽन्तःप्रवेशितः । नृपं प्रणम्य सत्योक्तिः कृत्यवित् कृत्यमित्यवक् ॥२१९॥
देव ! देवपुरं नाम साक्षाद्देवपुरं परम् । राजा विजयदेवश्चास्मिंस्त्रिविक्रमविक्रमः[4] ॥२२०॥
पट्टप्रतिष्ठिता तस्य प्रिया प्रीतिमती सती । सा सन्नीतिरिवोपायान् प्रासूत चतुरः सुतान् ॥२२१॥

१. हे विद्वन् ! त्वं श्रृणु । २. याचकान् भूषणाश्रितान् शत्रून् परिपूर्णतया कारागृहपतितान् चक्रे । ३. द्वारपालः । ४. विष्णुः ।

तेषामुपरि तस्याश्च पुत्री पात्री श्रियोऽजनि । हंसी हंसीव विशदोभयपक्षा सुलक्षणा ॥२२२॥
स्वल्पमुच्चैः प्रियमिति पुत्रेभ्योऽपि प्रियाऽथ सा । वर्द्धमाना क्रमाद्यावदजनिष्टाऽष्टवत्सरा ॥२२३॥
तावत्तया द्वितीयापि प्रासूयत सुतोत्तमा । सारसी सारसीवोच्चैर्लावण्ये[१] सरसीजले ॥२२४॥
[२]रोदस्योः सारमादाय धात्रा ते निर्मिते ध्रुवम् । तयोरेव मिथो यस्मादुपमानोपमेयता ॥२२५॥
द्वयोरपि तयोः कापि प्रीतिः स्फीतिमगात्तथा । यथा ताभ्यां वपुर्भेदोऽप्युद्वेगकृदमन्यत ॥२२६॥
प्राप्तापि यौवनं क्रीडावनं मदनदन्तिनः । हंसी विवाहं नामंस्त तद्वियोगभियाऽऽतुरा ॥२२७॥
क्रमाच्च सारसी सापि कन्याऽभूद्यौवनोन्मुखी । ताभ्यां प्रीत्या प्रतिज्ञातमेक एव वरोऽस्तु नौ ॥२२८॥
ततस्तयोः स्वयं पित्रा स्वयंवरणमण्डपः । अमण्ड्यत मनोऽभीष्टवरप्राप्त्यै यथाविधि ॥२२९॥
तत्रासीन्मञ्चरचना वचनातिगवैभवा । तृणधान्यसमूहास्तु क्ष्माभृद्व्यूहा इवाबभुः ॥२३०॥
अङ्गबङ्गकलिङ्गान्ध्रा जालन्धरमरुस्थले । लाटभोटमहाभोटमेदपाटविराटकाः ॥२३१॥
गौडचौडमहाराष्ट्रसुराष्ट्रकुरुगुर्जराः । आभीरकीरकाश्मीरगौल्लपञ्चालमालवाः ॥२३२॥

१. लावण्यसरसीजले इत्यपि पाठः । २. आकाशपृथ्व्योः ।

हूणचीणमहाचीणकच्छकर्णाटकुङ्कणाः । सपादलक्षनेपालकन्यकुब्जककुन्तलाः ॥२३३॥

मगधा निषधाः सिन्धुर्विदर्भद्रविडोण्ड्रकाः । इत्याद्यनेकदेशानामाहूयन्त नृपा इह ॥२३४॥ चतुर्भिः कलापकम्

स्वामिन् ! मलयदेशेशः तवाह्वानाय नः प्रभुः । मां प्रैषीत्तेन तत्रैत्याऽलङ्कुरुष्व स्वयंवरम् ॥२३५॥

दूतेनेत्युदिते तत्र यातुं स्थातुं च तन्मनः । तत्प्राप्त्याशासंशयाभ्यां दोलाऽऽन्दोलिततां दधौ ॥२३६॥

पञ्चभिः सह गन्तव्यमिति ध्यायंश्च सोऽचलत् । प्रोत्साहितश्च विहगैर्द्राक् तत्रागात्परेऽपि च ॥२३७॥

उच्चैरावर्जिताः सर्वे भूपा भूपेन तत्र ते । मञ्चानुच्चानलञ्चक्रुर्विमानानिव नाकिनः ॥२३८॥

अथ स्नातानुलिप्ते ते शुचिवस्त्रविभूषणे । तस्मिन्सुखासनासीने ब्राह्मीलक्ष्म्याविवेयतुः ॥२३९॥

अहंपूर्विकयापि क्ष्मानायकैः [1]क्रायकैरिव । तयोर्वृत्तीप्सया[2]मूल्यमतुल्यं स्वस्वदङ्मनः ॥२४०॥

ततस्ते विवशाः सर्वेऽप्युर्वीशा विविधात्मभिः । चेष्टाभिः पर्यचेष्टन्त स्पष्टयन्त इवाशयम् ॥२४१॥

एष निःशेषराजानां राजा राजगृहेश्वरः । एष द्वेषिसुखध्वंसिकौशलः कौशलेश्वरः ॥२४२॥

अयं स्वयंवरश्रीभिः स्फूर्जन् गुर्जरराजभूः । अयं जयन्तजैत्रर्द्धिबन्धुरः सिन्धुराजसूः ॥२४३॥

---

१. क्रयकारकैरिव । २. वृत्तिप्राप्तीच्छया ।

असौ स शौर्यौदार्यश्रीरङ्गभूरङ्गभूपतिः । असौ सुसौम्यः कार्म्यर्द्धिकृतालिङ्गः कलिङ्गराट् ॥२४४॥
रूपेणायं द्विधानङ्गगर्वहृद् बङ्गपार्थिवः । निस्सीममा[1]लयोऽप्येष मालवेश इति श्रुतः ॥२४५॥
सैष नेपालभूपालः प्रजापालः कृपालयः । सोऽयं तत्तद्गुणोद्गीर्णगौरवः कौरवप्रभुः ॥२४६॥
भूषानिषेधी निषधाधीशोऽयं द्वेषियोषिताम् । यशःसौरभ्यमलयाचलोऽयं मलयाधिपः ॥२४७॥
सख्या प्रख्याप्यमानेषु नामग्राहं नृपेष्विति । वव्रे जितारिरेताभ्यामिन्दुमत्याऽजराजवत् ॥२४८॥ सप्तभिः कुलकम् ।
स्पृहोत्सुकत्वसन्देहदर्पानन्दविषादिताः । त्रपानुतापासूयाश्च तदान्येऽन्वभवन्नृपाः ॥२४९॥
स्वयंवरे नृपाः केऽपि केऽपि स्वागमने परे । स्वकदैवे भवेऽप्येके तदा निर्वेदमासदन् । २५०॥
उपायंस्त प्रशस्तेऽह्नि महेशस्ते महामहैः । धनसैन्यप्रदानाद्यैर्बहु सन्मानमाप च ॥२५१॥
पुण्यैर्विना मनोऽभीष्टप्राप्तिर्नेति सुनिश्चितम् । महान्तोऽपि हताशा यत्तत्रान्ये भूभुजोऽभवन् ॥२५२॥
ईर्ष्योत्कर्षाद् द्विषन्तोऽपि तं भूयांसोऽपि तेऽद्भुतम् । न किञ्चिद्विप्रचक्रुः क्व जितारेर्वा पराभवः ॥२५३॥
सरतिप्रीतिकन्दर्पं दर्पं चाऽपरभूभुजाम् । विडम्बयन्नयं ताभ्यां भ्राजिष्णुः स्वपुरं ययौ ॥२५४॥

१. निस्सीमलक्ष्म्यालयः ।

ततः कृताभिषेके ते देव्यौ दिव्याविवापरे । राज्ञोऽतिमान्ये जज्ञाते तुल्यमेव दृशाविव ॥२५५॥
किञ्चित्तथापि सापन्त्यात्ताभ्यां मेनेऽधिकोनता । एकद्रव्याभिलाषो हि प्रेमाऽस्थेमानमानयेत्[1] ॥२५६॥
हंसी च सरला नित्यं प्रकृत्या सारसी पुनः । किञ्चिन्मायाविनी मायां निर्माति स्माऽन्तरान्तरा ॥२५७॥
राजानं रञ्जयन्त्येवं दृढं स्त्रीकर्म निर्ममे । हंसी तु शिथिलीचक्रे राज्ञो मान्यैव चाजनि ॥२५८॥
अहो महीयसी मूढात्मता काऽपीह देहिनाम् । यन्मायया मुधाऽऽत्मानमधः कुर्वन्त्यमुत्र ते ॥२५९॥
नृपोऽन्यदाऽन्वितस्ताभ्यां वीक्षते स्म गवाक्षगः । नृसङ्घमनघं मार्गे सञ्चरन्तं पुराद्बहिः ॥२६०॥
अप्राक्षीच्च नरं ज्ञात्वा सोऽप्याख्यत् देव ! यात्ययम् । विमलाद्रिमहातीर्थं सङ्घः शङ्खपुरागतः ॥२६१॥
ततः कौतुकतः सङ्घमध्ये भूप उपेयिवान् । श्रुतसागरसूरींश्च तत्र दृष्ट्वाऽभ्यवन्दत ॥२६२॥
तान् पृष्टवांश्च शिष्टात्मा विमलाद्रिरिहास्ति कः ? । कं हेतुं तीर्थता तस्य माहात्म्यं किं नु तस्य च ॥२६३॥
क्षीराश्रवमहालब्धिपात्रं तेऽप्यादिशन्निदम् । धर्मादेवेष्टसिद्धिः स्याद्विश्वे सारः स एव तत् ॥२६४॥
धर्मेष्वप्यार्हतो धर्मस्तस्मिन्नपि सुदर्शनम् । यद्विना व्रतकष्टाद्यम[2]वकेशितरूयते ॥२६५॥

१. प्रेमास्थिरत्वम् । २. वन्ध्यवृक्षायते ।

तच्च तत्त्वत्रयीरूपं तस्यां मुख्यः पुनर्जिनः । जिनेष्वादिर्युगादीशस्तीर्थेऽतिमहिमाऽस्य च ॥२६६॥
विमलाद्रिश्च तीर्थानां प्रथमं तीर्थमीरितम् । तस्य नानाभिधानानि भिन्नभिन्नावदाततः ॥२६७॥
यदाहुः—सिद्धक्षेत्रं तीर्थराजो मरुदेवो भगीरथः । विमलाद्रिर्बाहुबली सहस्त्रकमलस्तथा ॥२६८॥
तालध्वजः कदम्बश्च शतपत्रो नगाधिराट् । अष्टोत्तरशतकूटः सहस्त्रपत्र इत्यपि ॥२६९॥
ढङ्को लौहित्यः कपर्दिनिवासः सिद्धिशेखरः । पुण्डरीकस्तथा मुक्तिनिलयः सिद्धिपर्वतः ॥२७०॥
शत्रुञ्जयश्चेति नामधेयानामेकविंशतिः । गीयते तस्य तीर्थस्य कृता सुरनरर्षिभिः ॥२७१॥ चतुर्भिः कलापकम् ॥
इत्यस्यामवसर्पिण्यां नामान्यस्यैकविंशतिः । कानिचित्तेषु भूतानि भावीन्यथ च कानिचित् ॥२७२॥
एषु शत्रुञ्जयेत्याख्या भवतैव भवान्तरे । निर्मास्यतेऽनुभूतार्थेत्यश्रौष्म ज्ञानिसन्निधौ ॥२७३॥
महाकल्पे श्रीसुधर्मस्वाम्युपज्ञे पुनः स्मृतम् । शतमष्टोत्तरं नाम्नामस्य तीर्थस्य तद्यथा ॥२७४॥
विमलाद्रिः सुरशैलः सिद्धिक्षेत्रं महाचलः । शत्रुञ्जयः पुण्डरीकः पुण्यराशिः श्रियःपदम् ॥२७५॥
सुभद्रः पर्वतेन्द्रश्च दृढशक्तिरकर्मकः । महापद्मः पुष्पदन्तः शाश्वतः सर्वकामदः ॥२७६॥
मुक्तिगेहं महातीर्थं पृथ्वीपीठं प्रभोः पदम् । पातालमूलः कैलाशः क्षितिमण्डलमण्डनम् ॥२७७॥ इत्यादि ॥

अस्यामेवावसर्पिण्यां चतुर्णामादितोऽर्हताम् । जाताऽत्र समवसृतिरद्याप्येकोनविंशतेः ॥२७८॥
भाविनी नेमिवर्जानामनन्तानां च सिद्धयः । भूता अपि भविन्त्यश्च सिद्धक्षेत्रमिदं ततः ॥२७९॥ युग्मम् ॥
अस्य सिद्धगिरेः श्लाघां विश्वश्लाघ्या जिना अपि । कुर्युर्महाविदेहस्था भव्याः शश्वत्स्मरन्ति च ॥२८०॥
तीर्थेऽत्र शाश्वतप्राये यात्रा स्नात्रार्चना तपः । दानादि चानन्तफलं सुस्थाने बीजवद्भवेत् ॥२८१॥
उक्तञ्च–पल्योपमसहस्रं च ध्यानाल्लक्षमभिग्रहात् । दुष्कर्म क्षीयते मार्गे सागरोपमसम्मितम् ॥२८२॥
शत्रुञ्जये जिने दृष्टे दुर्गतिद्वितयं क्षिपेत् । सागराणां सहस्रं च पूजास्नात्रविधानतः ॥२८३॥
एकैकस्मिन्पदे दत्ते पुण्डरीकगिरिं प्रति । भवकोटिकृतेभ्योऽपि पातकेभ्यः प्रमुच्यते ॥२८४॥
अन्यत्र पूर्वकोट्या यत् शुभध्यानेन शुद्धधीः । प्राणी बध्नाति सत्कर्म मुहूर्त्तादिह तद् ध्रुवम् ॥२८५॥
जं कोडीए पुण्णं कामिअआहारमोइआए उ । तं लहइ तित्थपुण्णं एगोवासेण सेत्तुंजे ॥२८६॥
जं किंचि नामतित्थं सग्गे पायालि माणुसे लोए । तं सव्वमेव दिट्ठं पुंडरिए वंदिए संते ॥२८७॥
पडिलंभंते संघं दिट्ठमदिट्ठे अ साहु सित्तुंजे । कोडिगुणं च अदिट्ठे दिट्ठे अणंतयं होइ ॥२८८॥
नवकारपोरिसीए पुरिमड्ढेगासणं च आयामं । पुंडरिअं च सरंतो फलकंखी कुणइ अभत्तट्ठं ॥२८९॥

छट्ठट्ठमदसमदुवालसाण मासद्धमासखमणाणं । तिगरणसुद्धो लहई सित्तुंजं संभरंतो अ ॥२९०॥

नवि तं सुवण्णभूमीभूसणदाणेण अन्नतित्थेसु । जं पावइ पुण्णफलं पुआण्हवणेण सित्तुंजे ॥२९१॥

धूवे पक्खुववासो मासक्खवणं कपूरधूवंमि । कत्तिअ मासक्खवणं साहू पडिलाभिए लहइ ॥२९२॥ इत्यादि ।

सर्वाण्यन्यानि तीर्थानि महातीर्थमिदं पुनः । पराणि स्युरपां स्थानान्यब्धिरेव त्वपांनिधिः ॥२९३॥

किं तस्य जन्मना जीवितव्येन च धनेन च । कुटुम्बेन च तत्तीर्थयात्रातः स्वार्थकृन्न यः ॥२९४॥

जातोऽप्यजातः स पुमान् जीवन्नपि न जीवति । अतिविज्ञोऽप्यविज्ञश्च तत्तीर्थं नतवान्न यः ॥२९५॥

दानशीलतपस्तीव्रक्रियादि यदि दुःशकम् । सुशकं तन्न किं कुर्युस्तीर्थवन्दनमादरात् ॥२९६॥

धन्या मान्याश्च जगतामपि ते स्वाङ्घ्रिचारतः । सिद्धक्षेत्रे सप्तयात्रा यथाविधि विधन्ति ये ॥२९७॥

आहुश्च छट्ठेणं भत्तेणं अपाणएणं तु सत्त जत्ताओ । जो कुणइ सित्तुंजे सो तइअभवे लहइ सिद्धिं ॥२९८॥

तस्यैता भद्रकत्वादिगुणवत्त्वाद् गुरोर्गिरः । हृदि कृष्णमृदि क्ष्मायां मार्दवं [१]वार्दवद् व्यधुः ॥२९९॥

जगन्मित्रगुरोर्युक्तं गोविलासैः सपद्यभूत् । क्ष्मापतिः क्षीणतमाः सम्यक्तत्त्वप्रकाशयुक् ॥३००॥

१. मेघवत् ।

तदाप्तसम्यक्सम्यक्त्वस्तद्यात्रोत्कण्ठया रयात् । मन्त्रिणः सोऽभ्यधाद् भो भोस्त्वर्यतां सज्जिकाविधौ ॥३०१॥
विमलाद्रौ युगादीशे वन्दितेऽन्नोदके मया । ग्राह्ये गम्यं चाङ्घ्रिचारेणैवेत्यभ्यग्रहीच्च सः ॥३०२॥
श्रुत्वेति हंसीसारस्यौ भूयांसोऽन्यजना अपि । तथैवाभि[१]जगृहिरे यथा राजा तथा प्रजाः ॥३०३॥
स किं भावो भवेद्यत्र कार्ये काऽपि विचारणा । न व्यचार्यत राजाद्यैरितीवाऽभिग्रहग्रहे ॥३०४॥
क्वेदं स्थानं क्वऽचात्यन्तं दूरे श्रीविमलाद्रिराट् । अहहा ! सहसा कोऽयमभिग्रहमहाग्रहः ॥३०५॥
इत्याद्यवादिषुर्मन्त्रिमुख्याः क्षितिपतिं प्रति । गुरवोऽप्यूचिरे राजन् ! विचार्यैवाभिगृह्यते ॥३०६॥
अविचार्यकृते कार्ये पश्चात्तापोऽपि जायते । तस्मिन्न कश्चिल्लाभश्च दुष्कृतं प्रत्युताऽऽर्त्तितः ॥३०७॥
महोत्साहो महीनेता प्रत्यवोचत हे प्रभो ! । अभिग्रहे गृहीते प्राक् का व्यर्थाऽथ विचारणा ॥३०८॥
पीतनीरस्य किं नाम मन्दिरादिकपृच्छया । कृतक्षौरस्य वा पुंसः किं नक्षत्रपरीक्षया ? ॥३०९॥
पश्चात्तापं विनैवाऽहं निर्वाहं स्वमभिग्रहम् । नेतर् ! नेताऽस्मि श्रीदेवगुरुपादप्रसादतः ॥३१०॥
व्योम्नोऽन्तमेति किं नार्कप्रसादादरुणोऽन्वहम् । इत्युक्त्वा सङ्घसार्थे द्राक् सबलोऽप्यचलन्नृपः ॥३११॥

१. अभिग्रहमकुर्वन् ।

कर्मवैरिष्ववस्कन्ददानायेव जवाद् व्रजन् । दिनैः कियद्भिः काश्मीरदेशान्तः प्राप सोऽटवीम् ॥३१२॥
क्षुत्तृट्चरणचारित्वमार्गखेदादिना तदा । राज्ञो राज्योश्च सञ्जाताऽत्यन्तिकी व्याकुलात्मता ॥३१३॥
ततश्चिन्तातुरः सिंहश्चतुरः सचिवेश्वरः । सूरीन् प्राह प्रभो ! युक्त्या नृपः पर्यवसाप्यताम् ॥३१४॥
धर्मस्थानेऽन्यदा नूनमुड्डा[1]हो भविता जने । गत्वा तेऽप्यभ्यधुर्भूप ! लाभालाभं विभावय ॥३१५॥
सहसा विहितं कार्यं न प्रायेण प्रमाण्यते । आकाराः सहसाकारादयः सर्वत्र हि स्मृताः ॥३१६॥
अतिक्लान्तोऽपि वपुषाऽनतिक्लान्तस्तु चेतसा । भूपोऽभ्यधात् प्रत्यशक्तमुपदेश्यमिदं प्रभो ! ॥३१७॥
अहं तु स्वोक्तनिर्वाहेऽलङ्कर्मीणैकविक्रमः । प्राणप्रहाणमप्यस्तु नान्यथाऽभिग्रहस्तु मे ॥३१८॥
उत्साहयन्त्यौ सोत्साहे तन्निर्वाहे निजं प्रियम् । वीरपत्न्यौ वीरपत्नीव्रतं ते अपि तेनतुः ॥३१९॥
अहो धर्मैकचित्तत्वमहो धर्मिकुटुम्बता । अहो सात्विकतेत्युच्चैस्तदाऽश्लाधि न कैर्नृपः ॥३२०॥
अथ किं भावि किं कृत्यमिति चिन्ताचिताकुलः । तत्र रात्रौ सिंहमन्त्री सुप्तस्तप्तहृदम्बुजः ॥३२१॥
विमलाद्रेरधिष्ठाता स्वप्नान्तर्यक्षगोमुखः । साक्षाद्भूयाऽऽचचक्षे तं चिन्तां मन्त्रीश ! मा कृथाः ॥३२२॥

१. निंदा ।

महीशसाहसाकृष्टस्तुष्टोऽहं दिव्यशक्तितः । विमलाद्रिमहातीर्थं प्रत्यासन्नं समानयम् ॥३२३॥
प्रातश्चलद्भिस्तद्यामसमये द्रक्ष्यते ध्रुवम् । तत्र नत्वा जिनं सर्वैः पूरणीया अभिग्रहाः ॥३२४॥
मन्त्रिणा स्वप्न एवोक्तं ज्ञापयेत्थं परानपि । यथा सर्वेऽपि मन्यन्तेऽन्येभ्यः स्वप्नान् ददेऽथ सः ॥३२५॥
तस्यामटव्यां नव्यं तत्तीर्थं तद्रूपमाशु सः । गिरेरुपरि चक्रे च किं वा देवैर्न सिध्यति ॥३२६॥
देवैर्विकुर्वितं पक्षमेवोत्कर्षेण तिष्ठति । कृतं तु चिरमप्यर्हन्मूर्त्तिवद्रैवतोपरि ॥३२७॥
जाते प्रभाते सूरीन्द्रनरेन्द्रसचिवादयः । अन्येऽपि सङ्घलोकाश्च स्वप्नान् प्राहुः परस्परम् ॥३२८॥
संवादसादराः सर्वे प्रस्थिताः पुरतस्ततः । तथैव तीर्थं तत्तत्र दृष्ट्वा मुमुदिरेतराम् ॥३२९॥
नत्वाऽर्चित्वा जिनं सर्वेऽभिग्रहान् स्वानपूपुरन् । देहं च हर्षरोमाञ्चैरात्मानं सुकृतामृतैः ॥३३०॥
तत्र स्नात्रध्वजारोपमालोद्घट्टनमुख्यकैः । कृत्यैः समग्रैः सर्वेऽपि धन्यंमन्यास्ततोऽचलन् ॥३३१॥
भगवद्गुणचूर्णैककार्मणात्किल पार्थिवः । चलितोऽपि पुनः पश्चाद् ववलेऽर्हन्नमस्यया ॥३३२॥
एहिरेयाहिरा एवं सप्तवारान् विनिर्ममे । स्वात्मनो रक्षणायेव सप्तदुर्गतिपाततः ॥३३३॥
किमेतदिति पृष्टश्च नृसिंहसिंहमन्त्रिणा । प्राह मोक्तुमशक्तोऽस्मि तीर्थमम्बामिवार्भकः ॥३३४॥
तदत्रैव पुरं नव्यं स्थाप्यतां स्थितये मम । जहाति कः सुधीर्लब्ध्वा स्थानमिष्टं निधानवत् ॥३३५॥

वास्तुरीत्या ततस्तत्र मन्त्री पुरमतिष्ठिपत् । स्वामिनोक्तं च युक्तं च न कः कुर्याद्विविक्तधीः ॥३३६॥
पुरे मुक्तकरे तत्र लोभतः स्वार्थतीर्थयोः । श्रीसङ्घ[1]सत्का अन्ये च भूयांसोऽप्यवसन् जनाः ॥३३७॥
नाम्ना श्रीविमलपुरं पुरं तच्च प्रतिष्ठितम् । तस्यैव नाम्नः प्रामाण्यं यस्य सार्थकता भवेत् ॥३३८॥
भुञ्जानः प्राज्यराज्यर्द्धिं श्रीजिनध्यानवासनः । राजा तत्र सुखं तस्थौ द्वारवत्यामिवाऽ[2]च्युतः ॥३३९॥
एकः शुकश्च तच्चैत्ये सुस्वरः कलहंसवत् । मनोविनोदकृत् क्रीडाभूमिर्भूमिभुजोऽभवत् ॥३४०॥
आसेदुषोऽपि प्रासादं तत्क्रीडारसतोऽस्य च । अर्हद्ध्यानं धूम्रमुच्चैर्धूमाच्चित्रमिवाभवत् ॥३४१॥
भूकान्तः प्रान्तसमये पुरः श्रीऋषभप्रभोः । प्रपेदेऽनशनं सोऽथ रीतिरेषा हि धर्मिणाम् ॥३४२॥
धीरस्वान्ते उभे कान्ते तस्य निर्यापनापरे । नमस्कृतीर्ददाते स्म समयज्ञा हि सद्धियः ॥३४३॥
तदा प्रासादशृङ्गाग्रेऽशब्दायत शुकः सकः । दैवादवनिपस्यापि ध्यानं तस्मिन्नुपेयिवान् ॥३४४॥
ध्यानाकृष्ट इवात्मापि शुकयोनौ प्रयातवान् । निजच्छायेव दुर्लङ्घ्या काऽप्यहो भवितव्यता ॥३४५॥
अन्ते हि या मतिः सैव गतिरित्युच्यते बुधैः । मुधैवेयं श्रुतिर्माभूदितीव स शुकोऽभवत् ॥३४६॥

१. श्रीसङ्घसम्बधिनः सङ्घस्था जना इत्यर्थः । २. कृष्णः ।

युक्तं शुकादिकक्रीडाऽनर्थहेतुः स्मृता जिनैः । तस्य सम्यग्दृशोऽप्यासीद्यत्तया तादृशी गतिः ॥३४७॥
तादृग् धर्म्यैकयोगेऽपि यदभूत्तस्य सा गतिः । तज्जीवगतिवैचित्र्यं स्याद्वादो वा स्फुटीकृतः ॥३४८॥
दुर्गतिद्वयदुष्कर्म प्राणी तीर्थेऽत्र यात्रया । क्षिपेत्परं पुनर्बन्धे तस्य भोगोऽपि सम्भवेत् ॥३४९॥
न चैवं तीर्थमाहात्म्यहानिर्यद् वैद्यसंश्रितः । भुक्त्वा कुपथ्यं चेन्मन्दी स्यात्तत्किं भिषजोऽयशः ॥३५०॥
प्राग्दुर्दैवोत्थदुर्ध्यानाद्यद्यप्येषोऽभवत्तथा । तथाऽऽप्याप्ता[1] द्रुतं सम्यक् सम्यक्त्वैकफलं महत् ॥३५१॥
प्रेत्यकृत्ये कृते राज्ञः प्रव्रज्य प्रथमद्यवि[2] । क्रमेण हंसीसारस्यौ देव्यौ दिव्ये बभूवतुः ॥३५२॥
ताभ्यामवधिनाऽप्रैक्षि प्रियजीवोऽस्ति कुत्र नौ । अदर्शि च शुकः खेदादागत्य प्रत्यबोधि च ॥३५३॥
तत्रैव तीर्थेऽनशनं ग्राहितश्च मृतस्ततः । सोऽभूद्देवस्तयोर्भर्त्ता उक्तं तस्येदृशं द्रुतम् ॥३५४॥
कालक्रमेण ते देव्यौ च्युते पूर्वं ततोऽन्यदा । देवेन केवली पृष्टोऽस्मि किं सुलभबोधिकः ॥३५५॥
प्रभो ! दुर्लभबोधिर्वा ? भवान् सुलभबोधिकः । इत्युक्ते ज्ञानिना तेनाऽप्यूचे कथमिदं पुनः ॥३५६॥
जजल्प केवली यत्ते च्युते देव्यावुभे पुरा । हंसीजीवस्तयोर्मध्यात्पुरे क्षितिप्रतिष्ठिते ॥३५७॥

१. प्राप्स्यति । २. प्रथमस्वर्गलोके ।

मृगध्वजाह्वयो राजा ऋतुध्वजनृपात्मजः । जातोऽस्ति सारसीजीवः पुनः स्थानात्ततश्च्युतः ॥३५८॥
उपकाश्मीरमध्यस्थविमलाचल आश्रमे । प्राक् क्लृप्तमायया पुत्री जाताऽस्ति गङ्गलेर्मुनेः ॥३५९॥
नाम्ना कमलमालेति तयोर्जातिस्मरः सुतः । त्वं भावीति सुरः श्रुत्वा शुकरूपः सदुक्तिभिः ॥३६०॥
त्वां तस्मिन्नाश्रमे निन्ये कन्यार्हालङ्कृतीर्ददे । पश्चादानीय सैन्येन त्वां संयोज्य दिवं ययौ ॥३६१॥ पञ्चभिः कुलकम् ॥
ततश्च्युत्वा पुनः सोऽयं युवयोस्तनयोऽजनि । स्ववृत्तं च तदा श्रुत्वा जातिं स्मृत्वा विमृष्टवान् ॥३६२॥
पितरौ प्रागभूतां मे पत्न्यौ तत्कथमेतयोः । तात मातरिति ब्रूयां मौनमेव वरं ततः ॥३६३॥
दोषं किञ्चिद्विनाऽप्येष जोषपोषं[१] व्यधादिति । अस्मद्वाक्यमनुल्लङ्घ्यं मन्वानस्त्वधुनाऽभ्यधात् ॥३६४॥
निश्चलं बालभावेऽपि प्राग्भवाभ्यस्तमस्य च । सम्यक्त्वाद्यं हि संस्कारः प्रागभ्यासवशः किल ॥३६५॥
शुकराजोऽपि निर्व्याजं व्याजहार तथैव तत् । तं ज्ञानी पुनरप्यूचे शुक ! किं ? चित्रमत्र भोः ॥३६६॥
भवनाटकमीदृक्षमेवास्ते यदनन्तशः । सर्वजीवैर्मिथः सर्वसम्बन्धा लब्धपूर्विणः ॥३६७॥
यतः—यः पिता स भवेत्पुत्रः यः पुत्रः स भवेत् पिता । या कान्ता सा भवेन्माता या माता साऽपि सा भवेत् ॥३६८॥

१. मौनपुष्टिम् ।

न सा जाई न सा जोणी न तं ठाणं न तं कुलं । न जाया न मुआ जत्थ सव्वे जीवा अणंतसो ॥३६९॥
तस्मान्न रागः कर्त्तव्यो नैव द्वेषश्च कुत्रचित् । व्यवहारोऽनुसर्त्तव्यः केवलं समताभृता ॥३७०॥
ममापीदृक्षसम्बन्धो वैराग्यैकनिबन्धनम् । विशेषेण यथा जज्ञे तथा सम्यग् निशम्यताम् ॥३७१॥
श्रीमन्दिरपुरे श्रीणां मन्दिरेऽस्ति नरेश्वरः । दुर्दान्तः सूरकान्तः स्त्रीलम्पटः कपटप्रियः ॥३७२॥
वदान्यस्तस्य मान्यश्च सोमः श्रेष्ठिधुरन्धरः । श्रीरूपजैत्ररूपश्रीः सोमश्रीस्तस्य च प्रिया ॥३७३॥
श्रीदत्तस्तु तयोः पुत्रः श्रीमती दयिताऽस्य च । तेषां चतुर्णां संयोगः पुण्ययोगादजायत ॥३७४॥
यतः—यस्य पुत्रा वशे भक्ता भार्या छन्दानुवर्तिनी । विभवेष्वपि संतोषस्तस्य स्वर्ग इहैव हि ॥३७५॥
समं सोमश्रिया सोमश्रेष्ठी क्रीडितुमन्यदा । उद्यानेऽगान्नृदेवोऽपि प्राप तत्रैव दैवतः ॥३७६॥
तां च सोमश्रियं प्रेक्ष्य प्रक्षुभ्यद्रागसागरः । [1]दुष्टस्वान्तः क्षणात् क्षोणिकान्तः स्वान्तःपुरेऽक्षिपत् ॥३७७॥
यतः—यौवनं धनसंपत्तिः प्रभुत्वमविवेकिता । एकैकमप्यनर्थाय किं पुनस्तच्चतुष्टयम् ॥३७८॥
राज्यलक्ष्मीलतायां हि दवाग्निर्दुर्नयः स्मृतः । तत्कथं राज्यवृद्ध्यर्थी कामयेताऽन्यकामिनीम् ॥३७९॥

१. दुष्टहृदयः ।

अन्यायतोऽन्ये राज्ञैव निवार्यन्ते जनाः सदा । स्वयं कुर्यात्स चेत्तं तन्मात्स्यो[1] न्यायः प्रवर्त्ततास् ॥३८०॥
श्रेष्ठिप्रणुन्नैर्मन्त्र्याद्यैरित्याद्युक्तः स युक्तिभिः । तान् प्रत्यमुञ्चद् दुर्वाक्यज्वालामालां न तां पुनः ॥३८१॥
धिगहो दुष्टचित्तत्वं युक्ता वा वह्निवर्षिता । प्रधानभानुगोयोगे सूरकान्तस्य[2] तत्क्षणात् ॥३८२॥
प्राहुर्मन्त्र्यादयः श्रेष्ठिन् ! कोऽप्युपायोऽत्र नेक्ष्यते । करी कर्णे कथं धार्यः कथं वार्यः प्रभुर्भुवः ॥३८३॥
रक्षार्थमेव विहिता चिर्भटान्यत्ति चेद् वृतिः । तदा तेषां कथं कार्या रक्षा दक्षाग्रगैरपि ॥३८४॥
लोकेऽप्युक्तं—माता यदि विषं दद्याद्विक्रीणीत पिता सुतम् । राजा हरति सर्वस्वं का तत्र परिदेवना ॥३८५॥
श्रेष्ठिमुख्यो विलक्षोऽथ पुत्रं प्राह महानहो । बभूव दुर्दैववशादसम्भाव्यः पराभवः ॥३८६॥
यतः—सह्यन्ते प्राणिभिर्बाढं पितृमातृपराभवाः । भार्यापरिभवं सोढुं तिर्यञ्चोऽपि न हि क्षमाः ॥३८७॥
येन केनाप्युपायेन युज्यतेऽत्र प्रतिक्रिया । उपायश्चैक एवास्ति द्रव्यव्ययमयः स तु ॥३८८॥
षड् द्रव्यलक्षाः नः सन्ति तन्मध्याल्लक्षपञ्चकम् । सार्द्धं [3]सार्द्धं गृहीत्वाऽहं यास्यामि क्वापि दूरतः ॥३८९॥

---

१. मत्स्यगलागलन्याय इत्यर्थः । २. सूर्यकान्तमणेः प्रधानभानुरश्मियोगेऽग्निवर्षणं युक्तम् तद्वत् सूरकान्तनृपस्य मन्त्रिवाग्योगे वाक्यज्वालामालावर्षणं युक्तम् । ३. सह ।

सेविष्ये कञ्चन प्रोच्चैर्भूपालं बलवत्तरम् । वालयिष्यामि तेऽम्बां च तद्बलात्तत्क्षणादपि ॥३९०॥
स्वयं प्रभुत्वं स्वकहस्तकं वा प्रभुं विना नो निजकार्यसिद्धिः ।
विहाय पोतं तदुपाश्रितं वा वारान्निधिं कः क्षमते तरीतुम् ? ॥३९१॥
इत्युक्त्वा द्रविणं नीत्वा श्रेष्ठी काञ्चिद् दिशं रहः । प्रययौ किं न वा कुर्युः पुमांसः प्रेयसीकृते ॥३९२॥
यतः—दुष्कराण्यपि कुर्वन्ति प्रियाः प्राणप्रियाकृते । किं नाब्धिं लङ्घयामासुः पाण्डवा द्रौपदीकृते ॥३९३॥
गृहे स्थितस्य जज्ञेऽथ श्रीदत्तस्य सुताजनुः[1] । अवाप्याऽवसरं प्रायः प्रभवेद्दैवमप्यहो ॥३९४॥
श्रीदत्तश्च तदा दध्यौ धिङ्मे दुःखपरम्पराम् । पित्रोर्वियोगः श्रीहानिर्द्वेषी राजाऽङ्गजाजनुः ॥३९५॥
परविघ्नैकसन्तोषि दैवमद्यापि कर्तृ किम् । इति खिन्नात्मनस्तस्य व्यतीयुर्दिवसा दश ॥३९६॥
श्रीदत्तः शङ्खदत्तेन सुहृदा वादितस्तदा । खिद्यस्व माऽऽत्मश्रीहेतोर्यात्रां यावो महाम्बुधौ ॥३९७॥
तवार्द्धं च ममार्द्धं च श्रीदत्तोऽपि प्रपद्य तत् । स्वभार्यां भालयित्वा च स्वेभ्यस्तां पुत्रिकामपि ॥३९८॥
सज्जीभूयाचटद्यानपात्रे मित्रेण संयुतः । सिंहलद्वीपमाप्तश्च नव वर्षाणि तस्थिवान् ॥३९९॥

१. पुत्रीजन्म ।

विभाव्य भूरिलाभं च कटाहद्वीपमप्यमुम् । जग्मतुस्तस्थतुश्च द्वे वर्षे हर्षेण वाणिजौ ॥४००॥
अर्जयामासतुश्चाष्टौ द्रव्यकोटीः क्रमेण तौ । कर्मोप[1]क्रमयोर्योगे किमाश्चर्यं धनार्जने ॥४०१॥
पण्यैः पुण्यैरिवागण्यैः करीन्द्रैश्च गिरीन्द्रवत् । भूरीन् प्रपूर्य तौ पोतान् प्रीतौ पश्चात्प्रचेलतुः ॥४०२॥
अट्टालकस्थौ मञ्जूषां तरन्तीमे[2]यतीं जले । दृष्ट्वाऽन्यदा नाविकैस्तौ ग्राहयामासतुर्द्रुतम् ॥४०३॥
ग्राह्यं मध्यस्थमर्द्धार्द्धमित्थं मध्यस्थसाक्षिकम् । उदजी[3]घटतां तां च यावत्तावदपश्यताम् ॥४०४॥
निम्बपत्रावृत्तां कन्यां नीलाङ्गीं गतचेतनाम् । सर्वैः किमेतदित्युक्तौ शङ्खदत्तोऽभ्यधत्त तान् ॥४०५॥ युग्मम् ।
दष्टां दुष्टाहिना ह्येतां कोऽपि प्रावीवहज्जले । इत्युक्त्वाऽऽछोट्य तां मन्त्राम्भोभिः स उदजीजिवत् ॥४०६॥
अवदच्च मुदा प्रत्युज्जीवितेयं मयैव भोः । एनां रूपश्रिया मेनां[4] परिणेष्येऽहमेव तत् ॥४०७॥
श्रीदत्तोऽपि तदाऽवादीन्मैवं वादीर्यदादितः । मयाऽर्द्धमूचे शेषार्द्धपदे त्वादत्स्व मे धनम् ॥४०८॥
एतां तु स्वीकरिष्येऽहमेवं विवदमानकौ । तौ प्रीतिं [5]मदनफलाभिलाषादपि वेमतुः ॥४०९॥

---

१. प्रारब्धोद्योगयोः योगे । २. आगच्छतीम् । ३. उद्घाटयामासतुः । ४. मेनां अप्सरसम् । ५. कामफलाभिषात् पक्षे मदनफलं 'मींढल' इति प्रसिद्धफलं तद्भक्षणात् वमनं भवति ।

उक्तञ्च—

रमणीं विहाय न भवति विसंहतिः स्निग्धबन्धुजनमनसाम् । यत्कुञ्चिका सुदृढमपि तालकबन्धं द्विधा कुरुते ॥४१०॥
विवादसादरौ वादिप्रतिवादिवदुर्द्धरौ । निर्यामकेण प्रोक्तौ तौ स्वस्थौ संप्रति तिष्ठतम्[१] ॥४११॥
सुवर्णकूलाख्यं वेलापुरं पोतः प्रयास्यति । दिनद्वयेन विज्ञैर्वा तत्र निर्णेष्यते ह्यदः ॥४१२॥
स्वस्थीभूते शङ्खदत्ते श्रीदत्तोऽथ व्यचिन्तयत् । प्रत्युज्जीवनतस्तैरप्येषाऽस्यैव हि दास्यते ॥४१३॥
जनागतं ततः किञ्चित्सूत्रयामीति मन्त्रयन् । दुराशयः स्वकं मित्रं भृशं विस्त्रम्भमानयत् ॥४१४॥
रात्रौ च यानपात्रस्याट्टालके स निविष्टवान् । मित्रमाचष्ट भोश्चित्रं पश्याऽष्टाऽऽस्यस्तिमिर्व्रजेत् ॥४१५॥
तत्रैत्य कौतुकाच्छङ्खदत्तोऽप्यैक्षिष्ट यावता । मित्रेणाऽमित्रवत्तावत्पयस्यपात्यताऽम्बुधौ ॥४१६॥
अद्रष्टव्यमुखीं धिग् धिक् सुमुखीमपि दुर्मुखीम् । यदर्थं मित्रद्रोहाद्यं कुर्युस्तद्भविका अपि ॥४१७॥
दुष्टधीरिष्टसिद्ध्या च हृष्टः कृत्रिमपूत्कृतिः । प्रातः प्राह सुहृन्मे हा हंहो धिक् क्वापि नेक्ष्यते ॥४१८॥
इत्यादिकपटाटोपं फटाटोपमिवाफलम् । फणीव निर्विषः कुर्वंस्तद्वेलापुरमाप सः ॥४१९॥

१. तिष्ठथः इति पाठः क्वचित्।

श्रीदत्तेन च दन्तीन्द्राः क्षितीन्द्राय डुढौकिरे । उत्तार्य सोत्सवं सोऽपि हृष्टस्तं बह्वमानयत् ॥४२०॥
ददे च दन्तिनां मूल्यं शुल्कं च मुमुचेऽखिलम् । भाण्डशालामुपादाय सोऽथ स्वैरं व्यवाहरत् ॥४२१॥
तत्कन्योद्वाहलग्नं च जगृहे स्वगृहे च सः । कुर्वन्समग्रां सामग्रीं याति भूपसभेऽन्वहम् ॥४२२॥
रूपश्रीहारिणीं वीक्ष्य राज्ञश्चामरहारिणीम् । तस्याः स्वरूपं चापृच्छत् कश्चित्प्रोवाच सोऽपि च ॥४२३॥
एषा सुवर्णरेखाप्तरेखा वेश्या नृपाश्रिता । धनलक्षार्थदानेन विना वार्त्तापि नाऽनया ॥४२४॥
इति श्रुत्वा प्रतिश्रुत्य तस्यै लक्षार्द्धमप्यसौ । रथेऽध्यारोप्य तां वेश्यां तां च कन्यां वनेऽव्रजत् ॥४२५॥
निष्कम्पश्चम्पकच्छायामाश्रितः पार्श्वयोर्द्वयोः । ते निवेश्य स निर्माति नर्मकर्मादि यावता ॥४२६॥
एकछेकतयाऽनेककपिभिः कपिपुङ्गवः । कामुकक्रीडया क्रीडंस्तत्रायाति स्म तावता ॥४२७॥
सोऽपि गाणिक्यमाणिक्यम[1]प्राक्षीत् प्रेक्ष्य तं तथा । किं स्वः स्युर्वानरस्यास्य वानर्योऽमूः प्रियायिताः ॥४२८॥
सुवर्णरेखाऽप्याचख्यौ पृच्छा तिर्यक्षु दक्ष ! का ? । काश्चिज्जनन्योऽप्येतस्य भगिन्योऽपि च काश्चन ॥४२९॥
काश्चिद् दुहितरः काश्चित्सम्भाव्यन्तेऽपरा अपि । विविक्तचित्तः श्रीदत्तोऽभ्यधत्तोदात्तगीस्ततः ॥४३०॥

१. गणिकागणरत्नम् ।

धिग् धिग् निन्द्यतमं जन्म पशूनामविवेकिनाम् । यत्र स्वमातृपुत्र्यादिविभागोऽपि न विद्यते ॥३३१॥
किं तेन जन्मना पापजन्मना जीवितेन च । कृत्याकृत्यविविक्तत्वोपलब्धौ यत्र मुग्धता ॥४३२॥
तदाकर्ण्य पराक्षिप्त इव वादी मदोद्धुरः । गच्छन्नपि कपिः पश्चाद्वलितः प्रत्युवाच तम् ॥४३३॥
रे रे दुष्ट ! दुराचार ! परदोषैकभाषक !! ज्वलत्पश्यसि शैलाग्रे न पुनः पादयोरधः ॥४३४॥
यतः—राईसरिसवमित्ताणि परच्छिद्दाणि गवेसए । अप्पणो बिल्लीमित्ताणि पासंतोवि न पासई ॥४३५॥
रे स्वपुत्रीं सवित्रीं च निवेश्यैवं स्वपार्श्वयोः । स्वमित्रमब्धौ क्षिप्त्वा च पाप ! मामिति निन्दसि ॥४३६॥
जल्पित्वेत्युल्लसन्नेव स स्वयूथे समीयिवान् । वज्राहत इवाऽत्यार्त्तः श्रीदत्तश्चेति दध्यिवान् ॥४३७॥
धिक् किमेतदनेनोक्तमसमञ्जसमञ्जसा । बालेयमम्बुधौ लब्धा पुत्रिका मामिका कथम् ॥४३८॥
एषा सुवर्णरेखाऽपि जनयित्री कुतो मम । सोमश्रीर्जनयित्री मे किञ्चिदुच्चैर्वपुश्च सा ॥४३९॥
किमपि श्यामलाङ्गी च सा न चैषा तु तादृशी । वयोवर्षानुमानात् स्याद् बालेयं जातु मे सुता ॥४४०॥
प्रसूरियं तु नैव स्यादिमां पृच्छामि चेति सा । पृष्टा स्पष्टमभाषिष्ट भोः कस्त्वामुपलक्षयेत् ॥४४१॥
पशुवाचा विभ्रमे किं पतितोऽसि मुधा बुध ! । तयेत्युक्तोऽपि साशङ्कचित्तः श्रीदत्त उत्थितः ॥४४२॥

न युक्ताऽनर्थशङ्कायां प्रवृत्तिः सुधियां क्वचित् । विशत्यनिश्चित[1]स्ताघे श्रेयस्कामः किमम्भसि ॥४४३॥
इतस्ततः स बम्भ्रम्यन्मुनिमेकमवैक्षत । नत्वेममूचे कपिना पातितोऽस्मि भ्रमोदधौ ॥४४४॥
ज्ञानेनोद्धर मां स्वामिन् ! मुनीन्द्रोऽप्याह मद्गुरुः । केवली देशमध्येऽस्ति भानुवद् भुवि बोधकृत् ॥४४५॥
ज्ञानेन जानेऽवधिनाऽधुनाहमपि वच्मि च । यथा भोः ! कपिना प्रोचे तत्तथैवाऽऽप्तवाक्यवत् ॥४४६॥
कथमित्थमिति प्रोक्तेऽमुना मुनिवरोऽप्यवक् । आकर्णय [2]सकर्ण ! प्राक् पुत्र्या व्यतिकरं ब्रुवे ॥४४७॥
त्वत्पिता स्वप्रियाहेतोः प्रच्छन्नं प्रस्थितस्तदा । समरं समरक्रूरं पल्लीपतिमुपास्थितः ॥४४८॥
ईदृगेवोचितोऽत्रेति तस्य तद्द्रव्यदानतः । अचीचलन्महासैन्यं श्रीमन्दिरपुरं प्रति ॥४४९॥
तस्माद् वार्द्धेरिवोद्वेलाः प्रबलास्तत्पुरप्रजाः । भीताः स्थानं शिवं गन्तुमीषुर्भव्या भवादिव ॥४५०॥
तदा त्वद्दयिता गङ्गातीरे सिंहपुरे पुरे । सुतायुता पितुर्वेश्म सुमुखी जग्मुषी जवात् ॥४५१॥
तत्रैषा बहुवर्षाणि तस्थौ स्वभ्रातृसन्निधौ । स्त्रीणां पत्याद्ययोगे हि पिता भ्रातैव वा गतिः ॥४५२॥
मासे कदाचिदाषाढे विषागाढेन सा सुता । अदंशि दन्दशूकेन धिग् दुष्कर्मदुरात्मताम् ॥४५३॥

१. अनिश्चितगाम्भीर्ये । २. हे विद्वन् ! ।

निश्चैतन्याऽथ सा कन्या जनन्याद्यैर्विधापितैः । प्रापोपचारैश्चैतन्यं न वन्ध्येव स्तनन्धयम् ॥४५४॥
सहसा वह्निसात्कर्त्तुमहिग्रस्तं हि नार्हति । आयुर्दार्ढ्यादिसंयोगे प्रोज्जीवत्यपि जातुचित् ॥४५५॥
इत्यन्तर्मञ्जुमञ्जूषं क्षिप्त्वा निम्बदलैर्वृताम् । ते त्यक्तरङ्गा गङ्गायाः प्रवाहे तामवाहयत् ॥४५६॥
तदाम्बुदमहावृष्ट्या गङ्गा पूरमुपेयुषी । दुर्नीतिरिव तीरद्रून् स्वाश्रितान् द्रागुपाद्रवत् ॥४५७॥
तेन पूरेण दूरेण प्रेरिता वायुनेव नौः । प्रापुषी मञ्जुमञ्जुषा साब्धौ लब्धा ततस्त्वया ॥४५८॥
पुरः सर्वं स्वयं वेत्ति सेयं पुत्री भवेत्तव । अथो मातुर्ब्रुवे वृत्तं चित्तं कृत्वा स्थिरं शृणु ॥४५९॥
तस्मात्पल्लीपतेः सैन्याद्दवादिव सुदुस्सहात् । निस्तेजाः सूरकान्तोऽभूद्युक्तमभ्यर्णमीयुषः ॥४६०॥
सज्जीचकार प्राकारं सोऽनुकारं गिरेस्ततः । पुरीं च पूरयामास [1]तृण्याधान्येन्धनादिभिः ॥४६१॥
मध्येदुर्गं च दुर्धर्षान् न्यधाद्योधानुदायुधान् । योऽभ्येत्य योद्धुमनलं बलं तस्येद्दगेव हि ॥४६२॥
सेनाऽथ पल्लिनाथस्याऽप्यक्रमेण प्रचक्रमे । कियदेतिकया[2] भेत्तुं दुर्गं दुष्कर्मवन्मुनिः ॥४६३॥
तत्सैन्याश्च तदा दुर्गोपरिस्थसुभटाशुगान्[3] । नाजीगणंस्तृणायापि द्विपा मत्ता इवाङ्कुशान् ॥४६४॥

१. तृण्या-तृणसमूहः । २. एतत् कियत् किंमात्रम् इति बुद्ध्या । ३. आशुगान् बाणान् ।

तेऽथ प्रतोलीं [1]द्रुघणैर्भङ्क्त्वा शीर्णामिव क्षणात् । प्राविक्षंस्तत्पुरान्तर्द्राक् सरित्पूरानुकारिणः ॥४६५॥
पुरः पुरं विशन् सोमः कान्तोत्कस्ते पिता तदा । ललाटलग्नबाणार्त्तः सद्य एव व्यपद्यत ॥४६६॥
अन्यथा चिन्त्यते कार्यं दैवेन क्रियतेऽन्यथा । प्रियकृते हि प्रारंभः स्वात्मघातकृतेऽभवत् ॥४६७॥
आह च कथासङ्ग्राहकगाथाकृत् –
अन्नं गयस्स हिअए, अन्नं वाहस्स अन्नमुरगस्स । अन्नं सियालहिअए अन्नं हिअए कयंतस्स ॥४६८॥
आत्यन्तिकभयभ्रान्तस्वान्तः कान्तः क्षितेस्ततः । सूरकान्तः प्रणश्याऽगात् कुतो वा पापिनां जयः ॥४६९॥
सोमश्रीश्च तदा कम्प्रा त्रस्यन्तीव कुरङ्गिका । द्राक् पल्लिभिल्लैर्जगृहे दुष्टैर्गोष्ठशुनैरिव ॥४७०॥
विलुण्ट्य नगरं स्वैरं स्वस्थानं प्रतिगच्छताम् । तेषां पार्श्वात् प्रणष्टा सा कथञ्चिद्दैवयोगतः ॥४७१॥
तयाऽरण्ये भ्रमन्त्या चाऽभक्षि किंचित्तरोः फलम् । ह्रस्वाङ्गी तदभूत्किञ्चिद् गौराङ्गी च विशिष्य सा ॥४७२॥
कोऽप्यचिन्त्यो मणिमन्त्रौषधीनां महिमाऽथ सा । वणिग्भिरध्वगैः कैश्चिद् दृष्टा पृष्टा च विस्मितैः ॥४७३॥
का त्वं देवाङ्गना नागाङ्गना वा वनदेवता । स्थलदेव्यम्बुदेवी वा मानवी तु न सर्वथा ॥४७४॥

---

१. द्रुघणैः मुद्गरैः ।

जगाद गद्गदं सापि कापि नैवास्मि देवता । मां मानवीमेव विदांकुर्वन्त्वेतां विदांवराः ! ॥४७५॥
दुःखकूपानुपातोऽस्माद्रूपादेवाभिरूपतः । ममाऽभवद्विधौ क्रुद्धे दोषायैव गुणोऽपि हि ॥४७६॥
सुखं नः सन्निधौ तिष्ठेत्युदित्वा मुदितास्ततः । तेऽप्यगोपायिषुर्गुप्तं तां रत्नमिव यत्नतः ॥४७७॥
तां तादृक्षगुणाक्रान्तां कान्तं कर्त्तुमथैषिषुः । प्रत्येकमपि ते भक्ष्यं प्रेक्ष्य को न बुभुक्षते ॥४७८॥
प्राप्ताः सुवर्णकुलेऽस्मिंस्ते क्रमात् सदुपक्रमात् । नानावस्तू★न्याददिरे तदर्थं हि तदागमः ॥४७९॥
समर्धीभूतमधिकं तदा त्वेकं क्रयाणकम् । तेऽजिघृक्षन्त साक्षेपं वणिग्रीतिरियं खलु ॥४८०॥
प्राच्यपुण्यर्द्धिवद् भोग्यफलभोगेन निष्ठिता । नैवाऽस्ति नीवि प्राग्वस्त्वादानेनोपतदं[1] तदा ॥४८१॥
तद् व्यक्रीणन्त तेऽप्येतां वेश्यास्थाने धनेच्छया । लोभ एवोद्भटः पुंसां विशिष्य वणिजां पुनः ॥४८२॥
वेश्या विभ्रमवत्याख्या द्रव्यलक्षार्पणान्मुदा । स्वीचक्रे तां च तज्जातेर्युवतिः किल कामधुक् ॥४८३॥
तस्याः सुवर्णरेखेति नव्याऽऽख्याऽख्याप्यताऽनया । गृहान्तरगतौ प्रायः स्त्रीणां नामान्तरं भवेत् ॥४८४॥
शिक्षादक्षा च साक्षेपं शिक्षयामास तामसौ । गीतनृत्यादिनैपुण्यं पण्यं पण्यमृगीदृशाम् ॥४८५॥

★ वस्तून् इति को० ह० प्र० पाठः । १. तदा इत्यव्ययस्याव्ययीभावसमासे उपतदम् ।

क्रमादाजन्मवेश्येव सापि तद्धर्ममीयुषी । वारि संपृच्यते येन तेन तन्मयतां श्रयेत् ॥४८६॥
धिग्धिक्कुसङ्गतिं सापि ययाऽन्येव बभूवुषी । तद्भवेऽपि भवेयुर्वा दुर्दैवाद् भूरयो भवाः ॥४८७॥
क्षोणीशं प्रीणयामास सा सर्वाङ्गीणनैपुणात् । तथा यथाऽमुना सैव चक्रे चामरहारिणी ॥४८८॥
सेयं तव सवित्री भो भवान्तरगतेव तु । रूपस्वरूपादिभिदा प्रत्यभ्यज्ञायि न त्वया ॥४८९॥
त्वां तु प्रत्यभिजज्ञौ सा ह्रिया लोभाच्च नाभ्यधात् । अहो लोभस्य साम्राज्यं सर्वाङ्गीणमभङ्गुरम् ॥४९०॥
धिग् धिक् पण्याङ्गनापापकर्म दुष्कर्मसीमगम् । मात्रा यत्राऽर्थमात्राऽर्थं पुत्रो ज्ञात्वापि काम्यते ॥४९१॥
निन्द्या निन्द्यादपि त्याज्यास्त्याज्यादपि पणस्त्रियः । स्थाने विज्ञैर्विनिर्दिष्टा यासां दुःशीलतेदृशी ॥४९२॥
विषादविस्मयायत्तचित्तस्तमवदत्ततः । [1]श्रीदत्तस्त्रिजगद्वेत्तर् ! एतद्वेत्ति कथं कपिः ॥४९३॥
साधो ! साधुरिवोद्धर्त्ताऽन्धकूपे पततः स मे । कथं च मानुषीं भाषां भाषतेऽथाऽभ्यधाद् ऋषिः ॥४९४॥
यस्तदा ते पिता सोमश्रियं ध्यायन् पुरं विशन् । अकाण्डकाण्डघातेन मृतः स व्यन्तरोऽभवत् ॥४९५॥
वनाद्वनं परिभ्राम्यन् भृङ्गवच्चित्तरङ्गवान् । दैवादत्रागतो मात्रासक्तं स त्वामवैक्षत ॥४९६॥

१. सर्वज्ञ ! ।

सोऽवतीर्य प्लवङ्गाङ्गो त्वां तथा प्रत्यबूबुधत् । सूनोः पिता हिताकाङ्क्षी भवान्तरगतोऽपि हि ॥४९७॥
स चैनां प्राग्भवप्रेम्णा कपिरूपेण साम्प्रतम् । यास्यत्यारोप्य पृष्ठे द्राक् तव पश्यत एव भोः ॥४९८॥
वदत्येवं यतिर्यावत्तावदेत्य स एव ताम् । सिंहोऽम्बिकामिवारोप्य पृष्ठे स्वेष्टं कपिर्ययौ ॥४९९॥
मोहविस्फूर्जितमहो अहो भवविडम्बना । ब्रुवन्नेवं शिरो धुन्वन् सोऽगान्नीत्वा गृहेऽङ्गजाम् ॥५००॥
तावत्सुवर्णरेखा क्वेत्यक्कया प्रश्निता जगुः । दास्योऽनुमत्य लक्षार्द्धं श्रीदत्तस्तां वनेऽनयत् ॥५०१॥
आह्वातुं तां तया दास्यः प्रहिताः क्वापि हट्टके । दृष्ट्वोपविष्टं श्रीदत्तं पृष्टवत्यः ससंभ्रमम् ॥५०२॥
सुवर्णरेखा कुत्रेति श्रीदत्तोऽप्यवदत्तदा । यो वेत्ति कुत्र यातेति तस्या अनुचरोऽस्मि किम् ॥५०३॥
गत्वाऽथ दौष्ट्यपेटीभिश्चेटीभिः कथिते तथा । रोषेण [1]राक्षसीदेश्या सा वेश्याऽग्रेनृपं ययौ ॥५०४॥
मुषिता मुषिताऽस्मीशेत्युच्चैः पूच्चक्रुषी[2] च सा । किमेतदिति राज्ञाऽथ पृष्टाऽभाषिष्ट कष्टभृत् ॥५०५॥
सुवर्णरेखां साक्षान्मे सुवर्णपुरुषं प्रभो ! । श्रीदत्तः क्वाऽप्यपाहार्षित् [3]पश्यतोहरशेखरः ॥५०६॥
तस्याश्चोरिकेयमुष्ट्रस्येवाऽतर्क्येति विस्मितः । ततः श्रीदत्तमाह्वाय प्रष्टव्यं पृष्टवान्नृपः ॥५०७॥

१. राक्षसीसदृशी । २. पूत्कारं कुर्वती । ३. चीरचूडामणिः ।

व्यक्तं तदानीं नादत्त श्रीदत्तः किञ्चिदुत्तरम् । न किञ्चित्सत्यमप्युक्तमियं मन्तेति चिन्तयन् ॥५०८॥
यतः—असम्भाव्यं न वक्तव्यं प्रत्यक्षं यदि दृश्यते । यथा वानरसङ्गीतं यथा तरति सा शिला ॥५०९॥
दुष्कर्मणेव नरके कारायां चिक्षिपेऽथ सः । राज्ञा रुष्टेन तद्भाण्डशाले मुद्राऽप्यदाप्यत ॥५१०॥
अक्षिप्यत च चेटीषु तत्पुत्री निजमन्दिरे । विधात्रेवावनीभर्त्रा सत्रा मित्रात्मता कुतः ॥५११॥
अनुक्त्या वात्ययेवाभूद्भूपकोपाग्निदीपना । यथार्थमेव तद् वच्मि जातु भद्रं भवेत्ततः ॥५१२॥
ध्यात्वेत्यारक्षकैर्विज्ञापितस्तेन तथा नृपः । चारात् कृष्ट्वा तमप्राक्षीत् सोऽप्याख्यत्तां कपिर्ललौ ॥५१३॥
ततः सर्वे हसन्ति स्म शंसन्ति स्म च विस्मिताः । सत्यं कीदृगहो प्रोक्तमहो दुष्टस्य धृष्टता ॥५१४॥
कोपकम्प्रेण च क्षिप्रं राज्ञाऽदिष्टो वधाय सः । रोषस्तोषश्च महतां तत्कालं हि फलेग्रहिः[१] ॥५१५॥
[२]शौनिकैरिव गौर्भूभृद्भटैरत्युद्भटैः स्फुटम् । वधस्थानं नीयमानः स चेत्यन्तरचिन्तयत् ॥५१६॥
[३]पुत्रीसवित्रीभोगेच्छामित्रद्रोहादिपातकम् । ध्रुवं मेऽत्रैव फलितं धिग् दुर्दैवदुरन्तताम् ॥५१७॥
किमिदं सत्यवादेऽपि निःसमं त्वसमञ्जसम् । विधिं विरुद्धं रोद्धुं वा कः क्षमः क्षुभिताब्धिवत् ॥५१८॥

१. सफलः । २. घातकैः । ३. माता ।

यतः—धारिज्जइ इंती जलणिही वि कल्लोलभिन्नकुलसेलो । णहु अण्णजम्मणिम्मिअसुहासुहो दिव्वपरिणामो ॥५१९॥

तस्य पुण्यैरिवाकृष्टो राष्ट्राऽन्तर्विहरंस्तदा । केवली मुनिचन्द्राह्वः पुनीते स्म वनान्तरम् ॥५२०॥

उद्यानपालविज्ञप्तः क्ष्मापालः सपरिच्छदः । गत्वा नत्वा ययाचे तं देशनां [1]प्रातराशवत् ॥५२१॥

गुरुर्जगौ जगद्बन्धुर्न धर्मो यस्य नो नयः । तस्य का देशना देश्या मणिमाला कपेरिव ॥५२२॥

संभ्रान्तः क्षोणिकान्तस्तं प्राहाऽहमनयी कुतः । तेनोक्तं सत्यवक्तुः श्रीदत्तस्य कुरुषे नु किम् ॥५२३॥

ततः श्रीदत्तमाह्वाय्य ह्रीणः क्षोणीन्दुरादरात् । निवेश्य स्वान्तिके यावत् प्रोचेऽसौ सत्यवाक् कथम् ॥५२४॥

वहन् सुवर्णरेखां स तावदागात् प्लवङ्गमः । तामुत्तार्य निविष्टश्च सर्वैर्दृष्टश्च कौतुकात् ॥५२५॥

श्रीदत्तः सत्यवादीति नृपाद्यैः श्लाघितस्ततः । पृष्टश्चाशेषवृत्तान्तः प्रभुणा प्रत्यपाद्यत ॥५२६॥

श्रीदत्तश्च ततः पृच्छां चक्रे वक्रेतराशयः । कुतः पुत्र्यां सवित्र्यां चानुरागोऽजनि मे प्रभो ! ॥५२७॥

गुरुः प्रोचे प्राच्यजन्मसम्बन्धात्तं पुनः शृणु । आसीत्पञ्चालदेशान्तः काम्पिल्यपुरपत्तनम् ॥५२८॥

अग्निशर्मा द्विजस्तत्र तत्पुत्रश्चैत्रनामभृत् । गौरीगङ्गाह्वये तस्य महेशस्येव वल्लभे ॥५२९॥

१. प्रभातभोजनवत् ।

नाम्ना मैत्रेण मित्रेण सत्रा चैत्रोऽन्यदा ययौ । याञ्चाऽर्थं कुङ्कणे देशे भिक्षेष्टा हि द्विजन्मनाम् ॥५३०॥
बम्भ्रम्यन्तौ बहु द्रव्यमर्जयामासतुश्च तौ । चैत्रे सुप्तेऽन्यदा मैत्रो व्यततर्क कुतर्कहृत् ॥५३१॥
सर्वं द्रव्यं निहत्यैनं गृह्णामीति क्षणादयम् । उत्तस्थौ हन्तुमप्येनं हा धिगर्थमनर्थदम् ॥५३२॥
विवेकसत्यसन्तोषत्रपाप्रेमकृपादिकान् । विध्वंसतेऽर्थलुब्धो द्राग् दुर्वायुरिव वारिदान् ॥५३३॥
तत्रैव दैवयोगाच्च विवेकार्कोदयादयम् । विध्वस्ताऽयुक्तलोभान्धतमसः समचिन्तयत् ॥५३४॥
विश्वस्तमित्रघातार्थं धिग् धिग् मामाततायिनम् । निन्द्यं निन्द्यतमेभ्योऽपि ध्यात्वेत्यस्थात्तथैव सः ॥५३५॥
लाभाल्लोभः श्रयेद् वृद्धिं कण्डूः कण्डूयनादिव । इति तौ लोभसंभ्रान्तौ बम्भ्रान्तः स्म पुनर्भुवि ॥५३६॥
अतिलोभो ह्यनर्थायाऽत्राऽपीत्येकपदेऽन्यदा । लोभाविष्टौ प्रविष्टौ तावन्तर्वैतरणीसरित् ॥५३७॥
लोभपूरे पुरा मग्नौ तस्याः पूरे तदा पुनः । मृतौ तौ प्राप्य तिर्यक्त्वं भ्रेमतुः कतिचिद् भवान् ॥५३८॥
भ्रान्त्वा च नृभवं प्राप्तौ युवां जातौ सुहृद्वरौ । तेन प्राक् त्वद्वधो ध्यातस्त्वयाऽब्धौ सोऽत्र पातितः ॥५३९॥
यद्यथा यादृशं कर्म क्रियते प्राक् तथा पुरः । अनुभूयेत तत्तादृग् वृद्धियुग्[१] लभ्यदेयवत् ॥५४०॥

१. व्याजवृद्धिसहिताधमर्णवत् ।

वियोगेन त्यक्तरङ्गे गौरीगङ्गे भवत्प्रिये । जाते मासोपवासिन्यौ ते तापस्यौ विरक्तितः ॥५४१॥
कुलस्त्रीणां हि वैधव्ये धर्म एवौचितीं श्रयेत् । द्वौ भवौ नृभवं प्राप्य हारयेत् कः कुधीर्मुधा ॥५४२॥
[1]उदग्रोदन्यया दैन्यमन्येद्युः प्रतिपादिता । गौरी नीरं मुहुः काञ्चिद्ययाचे परिचारिकाम् ॥५४३॥
तदा मध्यन्दिनोन्मुद्रनिद्रातन्द्रालुलोचना । सान्तर्हितस्थितिः प्रादादुर्विनीतेव नोत्तरम् ॥५४४॥
तस्यै ततोऽल्पकोपाऽपि चुकोपाऽनल्पमेव सा । तपस्विव्याधितक्षुत्तृट्क्षीणेषु सुलभाः क्रुधः ॥५४५॥
क्रुधाऽभ्यधाच्च सा किं रे भक्षिताऽत्युग्रभोगिना । तुच्छे ! दत्से मृतेवाऽद्य यन्न प्रतिवचोऽपि मे ॥५४६॥
इत्थं तया भर्त्सितया रयादुत्थाय सूक्तिभिः । अनुनीय समानीय सा पानीयमपाय्यत ॥५४७॥
परं दुर्वचसा गौर्या बद्धं दुष्कर्म दुस्सहम् । हास्येनाऽपि हि दुष्टं स्याद्दुर्वाक्यं किं पुनः क्रुधा ॥५४८॥
गङ्गाऽप्यगादीदा[2]देश्यामादेशावसरात्यये । जातु प्राप्तां स्ववैयग्र्यात् शठदासीमिव क्रुधा ॥५४९॥
बन्दे ! धृताऽभूः केनाऽपि किं रे येनाऽधुनाऽऽगमः । गौर्याः स्पर्द्धादिवाऽबध्नात्साऽप्येवं कर्म धिक् क्रुधम् ॥५५०॥
गङ्गा च गणिकामेकामनेकैः कामुकैः समम् । विलसन्तीं विलोक्योच्चैः कदाचिदिति दध्युषी ॥५५१॥

१. तीव्रतृषया । २. आदेश्यां=सेवाकारिणीम् ।

धन्येयं कामुकैः काम्या फुल्लन्मल्लीव षट्पदैः । निर्भाग्याभ्योऽपि निर्भाग्यां धिङ्मां भर्त्राऽपि वर्जिताम् ॥५५२॥
साऽबध्नादिति दुर्ध्यानात्पुनर्दुष्कर्म दुर्मतिः । प्रावृट्कालादिव मलं लोहं ही मौढ्यमङ्गिनः ॥५५३॥
क्रमान्मृते ते ज्योतिष्कदेवीभूयमुपेयतुः । ततश्च्युते पुनः पुत्रीसवित्र्यौ ते बभूवतुः ॥५५४॥
दुर्भाषितेन तेनाऽभूत्पुत्र्यास्ते व्यालविप्लवः । जनन्या आपि दैन्याप्तिकृद्धिल्लैर्बन्दविद्रवः ॥५५५॥
तव मातुश्च वेश्यात्वमासीद्वेश्याप्रशंसया । न सम्भवेदसम्भाव्यमपि किं प्राच्यकर्मणा ॥५५६॥
वाङ्मात्रेणाऽर्ज्यते कर्म मनोमात्रेण वाऽपि यत् । ही तदप्यप्रतिक्रान्तं कायेनैवानुभूयते ॥५५७॥
भवांश्च प्राग्भवाभ्यासात्कामयामास ते उभे । प्रादुर्भवेद्यथाभ्यासं संस्कारो हि भवान्तरे ॥५५८॥
भृशाभ्यासेऽपि संस्कारा धर्म्याः प्रेत्य न यान्त्यपि । मन्दा अमन्दास्त्वितरे यान्त्येवाऽग्रेसरा इव ॥५५९॥
श्रुत्वैवं भवनिर्वेदखेदमेदुरितोऽवदत् । श्रीदत्तस्तात ! संसारनिस्तारोपायमादिश ॥५६०॥
भवेद्यत्र भवे पुंसामीदृश्यपि विडम्बना । अप्रेतस्तत्र कः [1]प्रेतवनप्राये रतिं व्रजेत् ॥५६१॥
सोऽप्याहाऽपारसंसारकान्तारोत्तरणं भवेत् । चरणैकबलादेव तद्यतस्वाऽत्र सत्वरम् ॥५६२॥

१. श्मशानसदृशे ।

सोऽवक् प्रेष्टमिदं किंतु कन्या देयाऽस्ति कस्यचित् । भवाम्भोधिं तितीर्षोर्मे तच्चिन्ताऽश्मशिलायते ॥५६३॥

गुरुरूचे सुताचिन्ता त्वच्चित्ते बाधते मुधा । त्वन्मित्रं शङ्खदत्तो यत्त्वत्पुत्रीं परिणेष्यति ॥५६४॥

श्रीदत्तः खेदतोऽवादीत्सगद्गदमुदश्रुदृक् । मित्रं कुत्र जगन्मित्र ! पापिनो निष्कृपस्य मे ॥५६५॥

गुरुणाऽभाणि भो भद्र ! मा विषीद च सीद च । समाहूत इवाऽऽगन्ता संप्रत्येव सुहृत्तव ॥५६६॥

यावद्विस्मयविस्मेरीभावमावहतेऽथ सः । तं वयस्यं समायान्तं तावद् दूरान्निरैक्षत ॥५६७॥

श्रीदत्तं सोऽपि निर्वर्ण्य वैवर्ण्यं क्रोधतो दधत् । दधावे तद्वधायोच्चैः कृतान्त इव कोपनः ॥५६८॥

नृपत्यादीनुपतदं प्रेक्ष्य च क्षुभितः क्षणम् । तस्थौ स्तम्भितवद् यावत् तावत्साधुस्तमभ्यधात् ॥५६९॥

हे शङ्खदत्त ! चित्तस्य मुञ्च मुञ्च प्रकोपिताम् । कोपः कृशानुवत्तीव्रः स्वस्थानमपि निर्दहेत् ॥५७०॥

कोपः स्यात्किल चाण्डालस्तत्तस्याऽस्पृश्यतोचिता । स्पृष्टस्तु चित्रं नो गङ्गास्नानाद्यैरपि शुध्यति ॥५७१॥

श्रुत्वेति तात्त्विकीं वाचं वाचंयमशिरोमणेः । जाङ्गुलीमिव भोगीन्द्रः प्रशान्त इव सोऽभवत् ॥५७२॥

श्रीदत्तस्तं ततः प्रीत्यै बाहौ धृत्वा निजान्तिके । न्यवीविशद् वैमनस्यं दूरे स्यादेवमेव हि ॥५७३॥

ततः केवलिनां वर्यमार्यः पर्यन्वयुक्त सः । स्वामिन्नेष कथंकारमार[1] वारिनिधेरिह ॥५७४॥
सोऽप्यूचेऽसौ तदाऽम्भोधौ दैवात्फलकमाप्तवान् । क्षुधार्त्तः फलवन्नैव मृत्युरत्रुटितायुषः ॥५७५॥
कूलानुकूलपवनप्रेरिताच्च ततोऽतरत् । सप्ताहेन सुवैद्योक्ताद् वार्द्धि व्याधिमिवौषधात् ॥५७६॥
सोऽथ सारस्वतं नाम नगरं सागरान्तिके । सारस्वतं श्रान्त इव प्रवाहं प्राप्य पिप्रिये ॥५७७॥
तादृक्ष्यं वीक्ष्य वैलक्ष्याऽसंवरः संवराह्वयः । प्रेमातुलस्तमानिन्ये मातुलः स्वनिकेतनम् ॥५७८॥
सदौषधादिन्यासेन मासेन पुनरेनकम्[2] । पटूचक्रेऽब्धिदग्धाङ्गं मूर्खं शिष्यं गुरुर्यथा ॥५७९॥
शुद्धिं सुवर्णकूलादेर्ज्ञातुं मातुलमादृतः । तमसौ प्रश्नयामास कथयामास सोऽप्यथ ॥५८०॥
इतो विंशतियोजन्या तत्पुरं हन्त तत्र च । मया श्रुतं महेभानां महद्वाहनमागतम् ॥५८१॥
श्रुत्वेति तोषरोषाभ्यां नटवद्धावसङ्करम् । भजन्मातुलमापृच्छ्य पुरेऽत्रागच्छदाशु सः ॥५८२॥
[3]क्रुत्परीतः परीपृच्छन् त्वां पुनः प्रापिवानिह । संयोगाश्च वियोगाश्च कर्मयोगानुगाः किल ॥५८३॥
मुनिः पुनः प्राच्यजन्मसम्बन्धाख्यानपूर्वकम् । शङ्खदत्तं प्रति प्रोचे कारुण्यैकमहार्णवः ॥५८४॥

१. आजगाम । २. एनम् । ३. क्रोधातुरः ।

जिघांसितस्त्वयाऽयं प्राक् त्वमनेन च संप्रति । घातेन घातो ववले गालिर्गाल्येव भोः किल ॥५८५॥
अतः परं परां प्रीतिस्फीतिमातनुतं युवाम् । अत्राऽमुत्रापि मैत्र्येव ध्रुवं सर्वार्थसाधनी ॥५८६॥
मिथः क्षान्तापराधौ तौ ततः प्रीतिमुपेयतुः । आद्यमेघादिवामोघाद् गुरुवाक्यान्न किं भवेत् ॥५८७॥
दिदेशाऽथ गुरुर्धर्मं धर्मं भव्या ! विधत्त भोः । सम्यक्त्वाद्यं यद्वशात्स्युः सर्वाः स्वेष्टार्थसिद्धयः ॥५८८॥
यतः—धर्माः [1]परे परा[2] अप्याम्रादिकवत्फलन्ति नियतफलैः । जिनधर्मस्त्वखिलविधोऽप्यखिलफलैः कल्पफलद इव ॥५८९॥
श्रुत्वेति देशनां देशविरतिं प्रतिपेदिरे । सम्यक्त्वपूर्वमुर्वीशमुख्या मोक्षाभिलाषिणः ॥५९०॥
स व्यन्तरः स्वर्णरेखाऽप्यासेदतुः सुदर्शनम् । दिव्यौदारिकसंयोगोऽप्यभून्मोहात्तयोश्चिरम् ॥५९१॥
श्रीदत्तः स्वपदे प्राप्तः क्ष्मापेन बहु मानितः । वित्तस्याऽर्द्धं स्वपुत्रीं च शङ्खदत्ताय दत्तवान् ॥५९२॥
सप्तक्षेत्र्यां स्ववित्तं च वापं वापमपापधीः । प्रव्रज्य ज्ञानिपार्श्वेऽसौ प्राप्तवान् विहरन्निह ॥५९३॥
ज्ञेयो जित्वा महामोहं सोऽहं सञ्जातकेवलः । ममापि प्राक् प्रिये जाते शुकराजाम्बिकासुते ॥५९४॥
तस्मादस्मिन्न संसारे चित्रकृत्किञ्चिदप्यदः । व्यावहारिकसत्येन व्यवहार्यमतो बुधैः ॥५९५॥

१. अन्ये । २. उत्कृष्टा ।

उक्तञ्च सिद्धान्ते दशधा सत्यं । तथाहि—

**जणवय-संमय-ठवणा, नामे रूवे पडुच्चसच्चे अ । ववहारभावजोगे, दसमे उवम्मसच्चे अ ॥**

तत्र कुङ्कणादिषु पयः पिच्चं नीरमुदकमित्यादि जनपदसत्यं, कुमुदकुवलयादीनां तुल्येऽपि पङ्कप्रभवत्वे लोकस्याऽरविन्दमेव पङ्कजं सम्मतमिति सम्मतसत्यं, लेप्यादिष्वर्हदादिस्थापना एककाद्यङ्कविन्यासः कार्षापणादौ मुद्राविन्यासादि वा स्थापनासत्यं, कुलमवर्द्धयन्नपि कुलवर्द्धन इति नामसत्यं, लिङ्गमात्रधार्यपि व्रतीत्युच्यते तद्रूपसत्यं, प्रतीत्यसत्यं यथाऽनामिकाया इतरे अङ्गुल्यौ आश्रित्य दीर्घत्वं ह्रस्वत्वं च, तृणादौ दह्यमाने गिरिर्दह्यते-गलति भाजनं-अनुदरा कन्या-अलोमिका एडका इत्यादि व्यवहारसत्यं, वर्णादिरूपो भावस्तत्सत्यं यथा शुक्ला बलाकेति, सत्यपि हि पञ्चवर्णसम्भवे शुक्लवर्णस्योत्कटत्वात् दण्डयोगात् दण्डीति योगसत्यं समुद्रवत्तडाग इत्यौपम्यसत्यम् ।

**इत्याकर्ण्य सकर्णात्मा तात ! मातरिति स्फुटम् । वक्तुं शुकः प्रववृते सर्वे पिप्रियिरेऽपि च ॥५९६॥**

**प्राह भूपः प्रभो ! धन्या यूयं येषामभूदिति । वैराग्यं यौवनेऽप्येवं भावि मेऽपि कदाऽप्यदः ॥५९७॥**

**मुनीन्द्रचन्द्रः प्रोचे या तव चन्द्रवती प्रिया । तत्पुत्रे दृक्पथं प्राप्ते वैराग्यं भावि ते दृढम् ॥५९८॥**

**ज्ञान्युक्तमिति निश्चित्य ज्ञानिनं प्रणिपत्य च । स सोल्लासः स्वमावासमासदत्सपरिच्छदः ॥५९९॥**

**द्विधा सुदृक्सुधावर्षे दशवर्षे शुकेऽथ च । राज्ञ्याः कमलमालाया द्वितीयस्तनयोऽजनि ॥६००॥**

राजाऽस्य हंसराजेति सोत्सवं नाम निर्ममे । प्राक्शिष्टजननीदृष्टदिव्यस्वप्नानुसारतः ॥६०१॥
रूपादिभिरवर्द्धिष्ट प्रवर्द्धिष्णुसमृद्धिभिः । [1]वलक्षपक्षपीयूषमयूख इव सोऽन्वहम् ॥६०२॥
क्रमाच्च पञ्चवर्षोऽसौ हर्षोत्कर्षोत्सवो नृणाम् । शुकेन साकं चिक्रीड श्रीरामेणेव लक्ष्मणः ॥६०३॥
पुत्राभ्यामर्थकामाभ्यां सेव्यं धर्ममिवान्यदा । वेत्री धात्रीशमास्थानस्थास्नुमित्थं व्यजिज्ञपत् ॥६०४॥
द्वार्यागाद् गाङ्गलिर्गाङ्गश्रोतःसङ्ख्यसुशिष्ययुक्[2] । विस्मितोर्वीशनिर्देशात् सोऽन्तः प्रावेशि तेन च ॥६०५॥
भूपः स्वागतिकीभूयाऽऽसनाद्यैस्तमनन्दयत् । सोऽपि सौवस्तिकीभूयाऽऽशीर्वादेन पुनर्नृपम् ॥६०६॥
तीर्थे तथाऽऽश्रमे क्षेमप्रश्नपूर्वमथो मुनिम् । नृपोऽन्वयुङ्क्तेह यते ! कं हेतुं कथमागमः ॥६०७॥
आकार्य कमलमालां [3]प्रतिसीरान्तरे सुताम् । ऋषिराख्यद् गौमुखाख्ययक्षः स्वप्नेऽद्य मामवक् ॥६०८॥
मुख्यं श्रीविमलगिरिं गन्ताऽहं तीर्थमित्यथ । मयोक्तमेतत् कस्तीर्थं रक्षिता ? सोऽप्युवाच माम् ॥६०९॥
लोकोत्तरचरित्रौ हि दौहित्रौ हन्त ! यौ तव । भीमार्जुनाविव परौ शुकहंसाभिधाभृतौ ॥६१०॥
अनयोरानयेरेकमत्र भाव्यनुपद्रवम् । तन्माहात्म्येन महतां महिमा नहि मानयुक् ॥६११॥

१. शुक्लपक्षचन्द्रइव । २. त्रिसङ्ख्यसुशिष्यसहितः । ३. जवनिकान्तरे ।

क्षितिप्रतिष्ठनगरं ननु दूरतरं कथम् । तदाह्वानकृते यामि मयेत्युक्ते स उक्तवान् ॥६१२॥
गमागमौ तव मुने ! तत्र दूरेऽप्यदूरवत् । मध्ये मध्याह्नमह्नाय मत्प्रभावाद्भविष्यतः ॥६१३॥
इत्याख्याय गते यक्षे प्रबुद्धोऽहं [1]प्रगे ततः । प्रस्थिताऽत्रागतश्च द्राक् किं न दिव्यानुभावतः ॥६१४॥
तद् दक्ष ! दक्षिणावन् मे द्राग् देह्यन्यतरं सुतम् । सकाले शीतले येन यामः स्वाश्रममश्रमात् ॥६१५॥
द्वितीयोऽप्यद्वितीयश्रीर्बालोऽप्यबालविक्रमः । जगाद सादरमथो हंसो हंसोल्लसद्ध्वनिः ॥६१६॥
यास्यामि तीर्थरक्षार्थं तातेति पितरौ ततः । प्रोचतुर्न्युञ्छने वत्स ! भवावस्तव भाषिते ॥६१७॥
ऋषिश्चाख्यत् [2]चित्रपात्रं क्षात्रं बाल्येऽप्यहो महः । सतां भानोश्च न वयोऽपेक्षिणी वा महस्विता ॥६१८॥
भूपालोऽथाऽऽह बालोऽयं प्रहेतुं शक्यते कथम् । शक्तेऽपि हि शिशौ पित्रोः प्रेम्णाऽपायैकशङ्किता ॥६१९॥
भयान्यहो ! प्रेम पश्यत्यपदेऽपि पदे पदे । सिंही सिंहेऽपि शावे किं नाऽनिष्टाशङ्किनी क्वचित् ॥६२०॥
सोत्साहः प्राह तत्कालमौचितीचतुरः शुकः । प्राग् निनंसामि[3] तत्तीर्थं कार्यं चैतदुपस्थितम् ॥६२१॥
मृदङ्गनादो नृत्येच्छोर्बुभुक्षोश्च निमन्त्रणम् । शय्यान्यासः शयालोश्च मम दिष्ट्येदमापतत् ॥६२२॥

---

१. प्रातःकाले । २. आश्चर्यपात्रं । ३. नन्तुमिच्छामि ।

पूज्यादेशाद् व्रजिष्यामि तत्तत्राहमथो नृपः । मन्त्रिणां मुखमैक्षिष्ट मन्त्रिणोऽप्याचचक्षिरे ॥६२३॥
ऋषीन्द्रोऽर्थी प्रदाता त्वं रक्षितव्या च तीर्थभूः । रक्षकः शुकराजश्चेदनुमन्यामहेतमाम् ॥६२४॥
तत्पायसे [1]घृतसिताक्षेपं मत्वोत्सुकः शुकः । समं तेनाचलत्पित्रोर्नत्वाऽङ्घ्री साश्रुनेत्रयोः ॥६२५॥
स पार्थ इव तूणीरधनुर्द्धरणदुर्धरः । तत्क्षणात्प्राप्य तत्तीर्थमाराध्यं तत्र तस्थिवान् ॥६२६॥
तत्प्रभावादभूत् तत्राश्रमे पुष्पफलोच्छ्रयः । दुःश्वापददवाग्न्यादिर्नोपदुद्राव च क्वचित् ॥६२७॥
कोऽप्यहो प्राग्भवाचीर्णश्रीधर्ममहिमा महान् । नृमात्रस्यापि तीर्थेशस्येव येनेदृशी स्थितिः ॥६२८॥
तापसानां स सान्निध्यात् सुखं तत्राश्रमे वसन् । रजन्यामन्यदाऽश्रौषीत् सुदतीं रुदतीं क्वचित् ॥६२९॥
कारुण्याम्बुनिधिः सत्त्वनिधिर्गत्वाऽथ तत्र ताम् । आलाप्य [2]मसृणालापैरप्राक्षीत् दुःखकारणम् ॥६३०॥
साऽप्याऽह पुरि चम्पायां निष्कम्पायां रिपुव्रजैः । राजास्ति नामतः शत्रुमर्दनः शत्रुमर्दनः ॥६३१॥
गुणैः पद्मावती साक्षात् तस्य पद्मावती सुता । मया धात्र्याऽन्यदोत्सङ्गे नीता रङ्गेण यावता ॥६३२॥
तावन्मया समं विद्याभृता केनापि पापिना । [3]हर्यक्षेणाऽपजह्रे सा जवाद्वत्सेव धेनुयुक् ॥६३३॥

१. घृतशर्कराप्रक्षेपं । २. कोमलालापैः । ३. सिंहेन ।

त्यक्त्वाऽत्र मां च तां नीत्वा काकनाशं ननाश सः । तद्दुःखाद्रोदिमीत्युक्ते तामाश्वासितवान् शुकः ॥६३४॥
तां च मुक्त्वोटजे[1] क्वापि खेचरं शोधयन्नयम् । भ्राम्यन् पश्चिमयामिन्यां चैत्यपृष्ठमुपेयिवान् ॥६३५॥
अद्राक्षीच्च नरं कञ्चित् क्रन्दतं पतितं भुवि । अप्राक्षीच्च दयादक्षः कस्त्वं दुःखं च ते किमु ॥६३६॥
कृपालोः सम्यगाख्येयमित्याख्यत् सोऽप्यहो अहम् । सूनुर्गगनवल्लभपुरेशखेचरेशितुः ॥६३७॥
वायुवेगेति सत्याह्वः कन्यां हृत्वा व्रजन्निह । तीर्थस्योल्लङ्घनाद् भ्रष्टविद्यः सद्यः प्रपेतिवान् ॥६३८॥
अन्यकन्याऽपहृतिजात् पातकान्नु प्रपातुकः । व्यमुचं कन्यकां रागबुद्धिमप्यर्दिताङ्गकः ॥६३९॥
शकुनीव शाकुनिकमुक्ता सापि ययौ क्वचित् । हा मां लोभेच्छया [2]मूलहारिणं पापकारिणम् ॥६४०॥
जिज्ञासितव्यतिकरोपलब्धिमुदितस्ततः । शुकोऽन्विष्यन्नवैक्षिष्ट चैत्यान्तस्तां सुरीमिव ॥६४१॥
धात्रीपुत्र्यौ शुकेनाथ मेलिते कलिते मुदा । खेचरोऽप्युपचारेण पटूचक्रेऽमुना क्रमात् ॥६४२॥
जीवितोपकृतिक्रीतः स्फीतप्रीतिः शुकस्य सः । बभूव खेचरोऽप्यस्याऽनुचरः सुकृतान्यहो ॥६४३॥
भो ! नभोगामिनी विद्या विद्यते ते न वेति ? सः । शुकपृष्टोऽन्यदाऽवादीद् विद्यते न पुनः स्फुरेत् ॥६४४॥

१. पर्णकुट्यम् । २. मूलधनहारिणम् ।

कश्चित्परः सिद्धविद्यः पुनर्दद्याद्यदि स्वकम् । मूर्ध्नि कृत्वा करं तर्हि मम स्फुरति नान्यथा ॥६४५॥
शुकः स्माहतमां मह्यं तर्हि देहि यथा ह्यहम् । सिद्धविद्यः पुनस्तुभ्यं तां ददे प्रतिदेयवत् ॥६४६॥
तुष्टेन तेन सा तस्मै दत्ताऽनेनापि साधिता । देवस्य दृष्टौ पुण्यैर्द्राक् सिद्धा शुद्धात्मनोऽस्य च ॥६४७॥
साऽस्मै ददे शुकेनापि सिद्धा च पाठसिद्धवत् । ततो द्वावपि जज्ञाते खेचरौ भूचरावपि ॥६४८॥
विद्या विद्याभृताऽन्या अप्यदीयन्त शुकाय च । अगण्यपुण्यसंयोगैः किं किं वा दुर्लभं नृणाम् ॥६४९॥
विकुर्व्योच्चैर्विमानं तौ निर्देशाद् गाङ्गलेस्ततः । वनिते ते सहाऽऽदाय पुरीं चम्पामुपेयतुः ॥६५०॥
कन्याहरणसंभूतप्रभूतार्त्तितमोग्रहम्[1] । राज्ञः[2] सङ्गत्य सद्यस्तौ [3]बुधवत्प्रत्यषेधताम् ॥६५१॥
राज्ञा जिज्ञासिते व्योमगामिनापि प्रकाशिते । वृत्ते समस्ते सोऽज्ञासीत् शुकं स्वकसुहृत्सुतम् ॥६५२॥
शास्त्रेषु मित्रपुत्रस्य[4] राजा[5] रिपुरिति स्थितिः । चित्रं मित्रभुवस्त्वस्य स राजा प्रेमभूरभूत् ॥६५३॥
स तस्मै मित्रपुत्रायाऽप्यमन्दाय मुदा ददौ । तां नन्दनां निजामेवं प्रीतिः स्फीतिमुपैति हि ॥६५४॥
वधूवरस्यावनिपः परं परिणयोत्सवम् । चक्रे वरं च सच्चक्रे प्रोच्चैः प्रेम्णः स्थितिर्ह्यसौ ॥६५५॥

---

१. राहुम् । २. राज्ञः पक्षे चन्द्रस्य । ३. पक्षे बुधग्रहवत् । ४. पक्षे सूर्यपुत्रस्य शनैश्चरस्य । ५. राजा चन्द्रः ।

विललास कियत्कालं सलीलं तत्र चैतया । पद्मावत्या स भोगीन्द्रः क्षितीन्द्रप्रार्थनावशात् ॥६५६॥
व्यापारा ऐहिकाः सर्वे स्युः पुण्येनैव सत्फलाः । लवणेनैव सुस्वादुरसा रसवती किल ॥६५७॥
तत्सांसारिककृत्यानि कुर्वाणेन विवेकिना । तदन्तर्धर्मकार्याणि कार्याण्येव यथोचितम् ॥६५८॥
इत्यन्येद्युरनुज्ञाप्य नृपमापृच्छ्य च प्रियाम् । शुकः सखेचरश्चैत्यनत्यै वैताढ्यमीयिवान् ॥६५९॥
[1]चित्राद्वैताढ्यवैताढ्यश्रियमास्वादयन्नयम् । गच्छंश्च मार्गे गगनवल्लभं पुरमापिवान् ॥६६०॥
स्वपित्रोः खेचरस्तत्र शुकोपकृतिमुक्तवान् । हृष्टौ तौ ददतुश्चास्मै वायुवेगां निजाङ्गजाम् ॥६६१॥
ताभ्यां विवाह्य सोऽबाह्यप्रीत्याऽस्थाप्यत सत्कृतः । [2]तीर्थनत्यर्थमत्यर्थमप्युत्कः[3] कतिचिद् दिनान् ॥६६२॥
भाग्यभाजां तथाऽन्येषां [4]विष्कम्भाः स्युः पदे पदे । एकेषां सत्कृतेः किन्तु परेषां तु तिरस्कृतेः ॥६६३॥
तौ पर्वाऽन्येद्युरुद्दिश्य भगिनीभर्तृशालकौ । नन्तुं तीर्थं प्रतस्थाते विमानस्थाविवामरौ ॥६६४॥
शुकराज शुकराजेत्युच्चैः पश्चाच्च काञ्चन । तदा शब्दायमानां तौ निशम्य विस्मितौ स्थितौ ॥६६५॥
का त्वमित्यनुयुक्ता सा व्यक्तमुक्तवतीति च । देवी चक्रेश्वरीनाम्ना देवीचक्रेश्वरी ह्यहम् ॥६६६॥

१. आश्चर्यैकतायुक्तवैताढ्यश्रियम् । २. तीर्थनमनार्थम् । ३. उत्कण्ठितः । ४. विस्ताराः ।

गोमुखाख्यस्य यक्षस्य शिक्षया सुगुरोरिव । रक्षार्थं तीर्थमुख्यस्य काश्मीरमधितस्थुषः ॥६६७॥
प्रयान्ती क्षितिप्रतिष्ठपुरोपर्यहमाययौ । तत्रैकां रुदतीं प्रोच्चैः सुदतीं निशशाम च ॥६६८॥ युग्मम् ।
ततः सपदि तद्दुःखग्रस्ताऽधस्तादवातरम् । स किं जीवन्न दुःखी यः परं प्रेक्ष्यापि दुःखिनम् ॥६६९॥
रमामिव गृहारामे तां व्यालोक्याऽऽकुलां शुचा । पर्यन्वयुक्षि पद्माक्षि ! किं ते दुःखमथाह सा ॥६७०॥
मामकीनः शुकः सूनुर्निन्ये गाङ्गलिनाऽऽश्रमे । कुशलादि चिरात्तस्य नैव वेद्मीति रोदिमि ॥६७१॥
मयाऽथाऽवादि मा रोदीर्भद्रे ! तत्रैव याम्यहम् । कुशलं वलमानाऽऽशु समानेष्ये सुतस्य ते ॥६७२॥
तामित्याश्वास्य तत्तीर्थं प्रयाता त्वामवीक्ष्य तु । समीक्ष्य चावधिज्ञानादत्रायाताऽस्मि संप्रति ॥६७३॥
द्राक् तदागत्य विज्ञात्मन् ! आत्ममातरमातुराम् । स्वदर्शनामृतरसैः सिञ्चस्वाऽमृतमेघवत् ॥६७४॥
सुपुत्राश्च सुशिष्याश्च सुस्नुषाश्च विशेषतः । सर्वथैवाऽनुवर्त्तन्ते गुरून् भृत्या इव प्रभून् ॥६७५॥
प्रेप्स्यन्ते पितृभिः पुत्राः स्वात्मनः सुखहेतवे । तेऽपि चेद्दुःखहेतुः स्युरुत्थितोऽग्निस्तदोदकात् ॥६७६॥
जननी माननीया च पित्रोरपि विशेषतः । यदुच्यते पितुर्माता सहस्त्रगुणगौरवा ॥६७७॥
तदुक्तं—ऊढो गर्भः प्रसवसमये सोढमप्युग्रशूलं, पथ्याहारैः स्नपनविधिभिः स्तन्यपानप्रयत्नैः ।
विष्ठामूत्रप्रभृतिमलिनैः कष्टमासाद्य सद्यः, त्रातः पुत्रः कथमपि यया स्तूयतां सैव माता ॥६७८॥

इति श्रुत्वा शुकोऽश्रूणि स्त्रवन् शोकलवानिव । प्रोचेऽन्तिके कथं तीर्थमनत्वा देव्युपैम्यहम् ॥६७९॥
छेकेनाऽप्युत्सुकेनाऽपि कार्यमेव यथोचितम् । सद्धर्मकर्माऽवसरानुप्राप्तमिव भोजनम् ॥६८०॥
माताऽत्र स्वार्थकृत्तीर्थमत्राऽमुत्राप्यदः पुनः । एतदानत्य तत्तत्राऽऽगच्छन्नस्मि समुत्सुकः ॥६८१॥
आयातमेव मां मातुर्वदेरित्युदिता द्रुतम् । देवी तथाकरोत्साऽथ सोऽपि तीर्थमुपास्थितः ॥६८२॥
विस्मयायतने सिद्धायतने तत्र शाश्वते । [1]नत्वार्चाः शाश्वतीः स स्वं कृतार्थीकृतवान् जनुः ॥६८३॥
व्याघुट्य द्रागथादाय दयिते श्वसुरावुभौ । मातामहं चानुज्ञाप्य युगादीशं प्रणम्य च ॥६८४॥
निःसमानविमानस्थः प्रोद्दण्डाडम्बरेण यः । सेव्यो वैद्याधरैर्वृन्दैः स्वपुरासन्नमियिवान् ॥६८५॥ युग्मम् ।
सुश्लाघामुखरमुखैर्वीक्ष्यमाणोऽखिलैर्जनैः । जयन्त इव शक्रस्य स पुरं प्राविशत् पितुः ॥६८६॥
अकारि च पुरे पित्रा पुत्रागममहो महान् । सार्वत्रिको हि महतां हर्षः प्रावृषिकाऽब्दवत् ॥६८७॥
शुकराजो राज्यचिन्तां चक्रेऽथ युवराजवत् । स [2]किं पुत्रः प्रभुष्णुर्यः पैतृकीं नोद्धरेद्धुरम् ? ॥६८८॥
क्रीडासिन्धौ [3]मधौ लब्धप्रसरेऽथ नरेश्वरः । इयाय सत्रा पुत्राभ्यामारामं सपरिच्छदः ॥६८९॥

१. प्रतिमाः । २. कुत्सितः पुत्रः इत्यप्यर्थः । ३. वसन्ते ।

यावत्सर्वेऽपि निर्व्रीडं क्रीडन्ति स्म पृथक् पृथक् । तावत्कलकलः कोऽपि दुस्सहः सहसाऽभवत् ॥६९०॥
राजा पृष्टश्च [1]निष्टंक्याऽऽचष्ट कोऽपि भटः प्रभो ! । नृपोऽस्ति नाम्ना वीराङ्गः सारङ्गपुरपत्तने ॥६९१॥
शूरस्तस्य सुतः सूरनामायं पूर्ववैरतः । त्वत्पुत्रं हंसमभ्यागात् क्रुद्धो हस्तीव हस्तिनम् ॥६९२॥
निशम्येति स्फुरत्तर्कस्तर्कयाञ्चकृवान् नृपः । राज्यं करोम्यहं राज्यचिन्तां पुनरयं शुकः ॥६९३॥
मत्सेवकश्च वीराङ्गस्तदहो हंससूरयोः । वैरस्य हेतोर्वैरस्य भवेत् किं नाम कारणम् ॥६९४॥
ध्यायन्निति दधावाऽसावुत्सुकः शुकहंसयुक् । यावत्तावत्कश्चिदेत्य भटोऽभाषिष्ट भूभुजम् ॥६९५॥
प्राग्भवे देव ! पुत्रस्ते हंसः सूरं पराभवत् । तेन वैरेण सूरोऽयं याचते हंसमाहवम्[2] ॥६९६॥
वीरावतंसो हंसोऽथ पितरं भ्रातरं भृशम् । सन्नह्यन्तं निवार्याशु डुढौके योद्धुमुद्धुरः ॥६९७॥
सूरोऽपि भूरिशस्त्रौघैरुग्रं साङ्ग्रामिकं रथम् । आरूढः प्रौढदर्पेण सङ्ग्रामाङ्गणमागमत् ॥६९८॥
सर्वेष्वन्येषु पश्यत्सु शस्त्राशस्त्रि तयोश्चिरम् । महायुद्धमभूत् पार्थकर्णयोरिव चित्रकृत् ॥६९९॥
तौ द्वावपि भृशं युद्धश्रद्धालू श्राद्धभोजिनौ । ब्राह्मणाविव नो तृप्तिं कियताऽप्यापतुस्तदा ॥७००॥

१. निश्चित्य । २. युद्धम् ।

तौ द्वावपि वरौ वीरौ महोत्साहौ महाबलौ । तुल्यौ वीक्ष्य क्षणं भेजे जयश्रीरपि संशयम् ॥७०१॥
अथ हंसेन सूरस्य शस्त्राणि निखिलान्यपि । छिन्नानि क्रमशः क्ष्माभृत्पक्षा इव [1]बिडौजसा ॥७०२॥
ततः सूरः स्फुरत्क्रोधपूरदुर्धरसिन्धुर[2]ः । हंसं हन्तुमधाविष्ट मुष्टिमुत्पाट्य वज्रवत् ॥७०३॥
शङ्कितेन तदा राज्ञा शुकसन्मुखमीक्षिते । दक्षः शुकोऽपि हंसाङ्गे स्वविद्याः समचिक्रमत्[3] ॥७०४॥
तद्बलात्तत्क्षणं हंसः सूरमुत्पाट्य दूरतः । साधिक्षेपं प्रचिक्षेप प्रोच्चैः कन्दुकलीलया ॥७०५॥
सूरः स्वसैन्यमुल्लङ्घ्य पपात परतस्ततः । सैन्यस्य न्युञ्छनमिव प्रार्छन्मूर्छां न सोच्छ्रयाम् । ७०६॥
सेवकैरुदकैः सिक्तः कृच्छ्राद् बाह्यां स चेतनाम् । प्राप कोपस्फुटफलात् सुखेनाभ्यन्तरीं पुनः ॥७०७॥
दध्यौ च धिग् ! मया क्रोधान्मुधा लेभे पराभवः । भवश्च पुरतो रौद्रध्यानेनाऽनन्तदुःखदः ॥७०८॥
इति ध्यायन् विशुद्धात्मा त्यक्तक्रोधविरोधधीः । क्षमयामास भूमीशं सद्विपुत्रं[4] मृगध्वजम् ॥७०९॥
स भूभुजाऽऽश्चर्ययुजा वैरं वेत्सि कथं न्विति । पृष्टोऽभ्यधत्त श्रीदत्तः केवली प्राप नः पुरे ॥७१०॥
मत्पृष्टः प्राग्भवं सोऽवक् भो भद्दिलपुरे नृपः । जितारिर्हंसीसारस्यौ देव्यौ सिंहश्च मन्त्रिराट् ॥७११॥

१. इन्द्रेण । २. गजः । ३. सङ्क्रामयामास । ४. पुत्रद्वयसहितम् ।

स गाढाभिग्रहो यात्रां व्रजन् यक्षावतारिते । काश्मीरान्तःश्रीविमलगिरितीर्थेऽनमज्जिनम् ॥७१२॥
अतिष्ठिपच्च विमलपुरं तत्र चिरं स्थितः । कालेन सोऽपि भूपालः कालधर्ममुपेयिवान् ॥७१३॥
मन्त्री सिंहस्ततस्तस्य समग्रं नागरं जनम् । सार्द्धमादाय भद्दिलपुरं प्रत्यचलत्तराम् ॥७१४॥
जननी जन्मभूमिश्च निद्रा पश्चिमरात्रिजा । इष्टयोगः सुगोष्ठी च दुर्मोचाः पञ्च देहिभिः ॥७१५॥
अर्द्धमार्गे गतस्याथ मन्त्रिणः स्मृतिमागमत् । तत्रैव विस्मृतं किञ्चिद्वस्तु सारतरं निजम् ॥७१६॥
बभाषे [1]धीसखेनाथ चरकः स्वकसेवकः । भोः प्रयाहि पुरस्थाने वस्तु तत्तूर्णमानय ॥७१७॥
सोऽप्यवक् कथमेकाकी शून्यस्थाने प्रयाम्यहम् । कोपं कृत्वा ततः प्रैषि मन्त्रिणा तत्र सोऽप्यगात् ॥७१८॥
भिल्लस्तत्तु निजगृहे जगृहे कोऽपि वस्त्वतः । न लेभे स ततः पश्चादेत्याऽमात्यं तथाऽभ्यधात् ॥७१९॥
क्रुद्धोऽमात्यस्त्वयैवाऽऽत्तमिति[2] व्यक्तमताडयत् । गाढं तत्रैव मूर्च्छालं जहौ हि लोभमूढता ॥७२०॥
मन्त्र्यथो लोकयुक् प्राप्तः स्वं भद्दिलपुरं क्रमात् । सचेतनश्च चरकः शीतलैरनिलैरभूत् ॥७२१॥
सार्थं स्वार्थपरं सर्वं गतं दृष्ट्वा च दध्यकौ । धिग् धिग् धीसखमधमं प्रभुतागर्वगर्वितम् ॥७२२॥

१. मन्त्रिणा । २. गृहीतम् ।

यतः—चोरा चिलक्काइं[1] गंधिअ भट्टा य विज्जपाहुणया । वेसा [2]धूअनरिंदा परस्स पीडं न याणंति ॥७२३॥
ध्यायन्नित्येष पन्थानमजानन्नवटवीमटन् । भ्रामं भ्रामं म्रियते स्म क्षुत्तृषाद्यार्त्तरौद्रहृत् ॥७२४॥
स च सर्पः स्फुरद्दर्पोऽभूद् भद्दिलपुरे वने । तेन तत्रागतो मन्त्री दष्टो रुष्टात्मना मृतः ॥७२५॥
सर्पः सोऽपि मृतः प्राप नरकं नरकात्पुनः । उद्धृतोऽजनि वीराङ्गभूपपुत्रो भवानयम् ॥७२६॥
मन्त्री च मृत्वा विमलाचले वापीजलेऽजनि । मरालबालस्तत्तीर्थं दृष्ट्वा स्वां जातिमस्मरत् ॥७२७॥
सम्यङ् नाराधितः स्वामी प्राक् तत्तिर्यक्त्वमाप्नुवम् । ध्यात्वेति जिनमानर्च चंञ्च्वानीतैः [3]सुमैरयम् ॥७२८॥
भृत्वाऽम्भोभिरुभौ पक्षौ [4]सार्वमुख्यमसिस्नपत् । इत्याद्याराध्य मृत्वाऽसौ सौधर्मे निर्जरोऽजनि ॥७२९॥
ततश्च्युत्वाऽधुना पुण्यैर्मृगध्वजमहीभुजः । हंसराजाङ्गजो जातोऽस्तीति श्रुत्वा मुनेर्वचः ॥७३०॥
तत्प्राग्भवभवं वैरं स्मरन् जातिस्मृतेरिव । हंसं हन्मीत्यहं जल्पन्नहङ्कारादिहागमम् ॥७३१॥ युग्मम् ।
वार्यमाणोऽपि पित्राऽहं तदानीं नैव तस्थिवान् । इहागतस्तु निर्जिग्ये [5]युग्ये त्वत्सूनुनाऽधुना ॥७३२॥
एतस्मादेव वैराग्याद् भाग्यादासादितादहम् । दीक्षां कक्षीकरिष्यामि स्वामिश्रीदत्तसन्निधौ ॥७३३॥

१. शिशवः । २. पुत्री । ३. कुसुमैः । ४. मुख्यजिनम् । ५. युद्धे ।

इत्युक्त्वा [1]दुस्तमःसूरः सूरः स्वस्थानमाप्तवान् । प्राव्राजीदविलम्बं च धर्मे श्लाघ्या त्वरैव हि ॥७३४॥
यो यन्मनास्तदासक्तं सोऽन्यं दृष्ट्वा तदुत्सुकः । स्यादिति क्षितिपोऽप्युच्चैर्दीक्षात्को[2] दध्यिवान्स्तदा ॥७३५॥
नाद्यापि किं मे वैराग्यरङ्गः सङ्गमकृन्मुदा । यद्वा केवलिना ज्ञानबलिना जगदे तदा ॥७३६॥
तदा ते भविता सम्यग् वैराग्यं योग्यतावशात् । यदा कदाचित्त्वं चन्द्रवत्याः प्रेक्षिष्यसेऽङ्गजम् ॥७३७॥
तस्यास्तु पुत्रो नाद्यापि वन्ध्याया इव जायते । तत्किं कुर्यामिति ध्यायेद्यावत् क्ष्माभृद्रहःस्थितः ॥७३८॥
तावत्तत्रोरुतारुण्यपुण्यः कोऽप्यागमत् पुमान् । अनंसीच्च नरेशाय कस्त्वं तेनाऽप्यपृच्छ्यत ॥७३९॥
प्रतिवक्ति स तं यावत्तावदाविरभूद्दिवि । दिव्या वाग् भूप ! विज्ञेयश्चन्द्रवत्याः सुतो ह्ययम् ॥७४०॥
तवाऽत्र यदि सन्देहस्तदैशान्यामितो दिशि । पञ्चैव योजनान्यद्रिद्वयान्तः कदलीवनम् ॥७४१॥
आस्ते यशोमती तत्र योगिनी ज्ञानयोगिनी । प्रष्टव्या सा समस्तं ते वृत्तान्तं व्याहरिष्यति ॥७४२॥
इत्याकर्ण्य धरित्रीशः प्रोच्चैश्चित्रीयमाणहृत् । पुंसा तेन सहेशानदिशि तत्राशु जग्मिवान् ॥७४३॥
ददर्श योगिनीं तां च साऽऽपि प्रीत्याऽऽह तं प्रति । भूभर्तः ! सत्यमेवैतत् यत् त्वया शुश्रुवे वचः ॥७४४॥

१. दुरन्धकारे सूर्यः । २. दीक्षोत्सुकः ।

विषमः कोऽपि संसारकान्तारगहनक्रमः । चित्रं यत्र विमुह्यन्ति तत्त्वज्ञास्त्वादृशा अपि ॥७४५॥
आमूलचूलमेतस्य वृत्तं श्रृणु भणामि भोः । चन्द्रपुर्यां सोमचन्द्रः क्षितीन्द्रश्चन्द्रसद्यशाः ॥७४६॥
भार्या भानुमती तस्य क्षेत्राद्धैमवतादध । युग्मं सौधर्मशर्माणि भुक्त्वा तत्कुक्षिमागमत् ॥७४७॥
पुत्रः पुत्री च जज्ञाते ज्ञातेः प्रमददायिनौ । नाम्ना ख्यातौ च तौ चन्द्रशेखरश्चन्द्रवत्यपि ॥७४८॥
सार्द्धं प्रवर्द्धमानौ तौ स्पर्द्धमानौ वपुःश्रिया । भवं सस्मरतुः पूर्वमपूर्वं यौवनं श्रितौ ॥७४९॥
तावच्चन्द्रवती पित्रा तुभ्यं प्रादायि सादरम् । विवाहिता पुनश्चन्द्रशेखरेण यशोमती ॥७५०॥
तौ च पूर्वभवाभ्यासान्मिथोऽत्यन्तानुरागिणौ । सकामौ कर्तुकामौ प्राग्भवसम्बन्धमेव धिक् ॥७५१॥
जीवानां याप्यनिर्वाच्या ही ही भवकुवासना । यया प्रवृत्तिरीदृक् स्यात्तयोरुत्तमयोरपि ॥७५२॥
यदाऽचाली गाङ्गलेस्त्वमाश्रमं [1]प्रत्यविश्रमम् । आहूतश्चन्द्रवत्याऽसौ स्वेष्टसिद्ध्यै तदा मुदा ॥७५३॥
त्वद्राज्यग्रहणायैवायातोऽपि सुकृतात्तव । [2]उत्तम्भकादिवाग्निर्द्राग् विफलीभवति स्म सः ॥७५४॥
त्वं च वञ्चनया नानावचोरचनया रयात् । पर्यवासाप्यथास्ताभ्यां विदग्धोऽपि[3] हि मुग्धवत् ॥७५५॥

१. विश्रान्तिरहितं यथा स्यात्तथा । २. निर्वापणात् । ३. चतुरोऽपि ।

आराधितस्ततस्तेन कामदेवाख्ययक्षराट् । प्रत्यक्षः क्षिप्रमाचख्यौ किं कुर्वे तव भोः प्रियम् ॥७५६॥
सोऽवक् चन्द्रवतीं मे द्राग् देहि यक्षस्ततोऽञ्जनम् । तस्मै दत्त्वाऽब्रवीदस्माददृश्यीकरणाञ्जनात् ॥७५७॥
न मृगध्वजराड् यावद् द्रष्टा चन्द्रवतीसुतम् । तया विलासिनं तावन्न त्वां ज्ञास्यति कश्चन ॥७५८॥ युग्मम् ।
तस्मिन् दृष्टे पुना राज्ञा स्फुटीभाव्यखिलं ह्यदः । इति यक्षोक्तिहृष्टोऽसौ ययौ चन्द्रवतीगृहम् ॥७५९॥
स्वैरं चिरं तत्र तिष्ठन् अदृश्योऽञ्जनयोगतः । सोऽजीजनच्चन्द्रवत्यां पुत्रं चन्द्राङ्कनामकम् ॥७६०॥
यक्षप्रभावान्न ज्ञातं तस्य जन्मादि केनचित् । जातमात्रं च तं पुत्रं स्वप्रियायै स आर्पयत् ॥७६१॥
सा तं यशोमती त्वात्मजातबालमपालयत् । पत्युरास्यमप्यपश्यन्त्यहो स्नेहो मृगीदृशाम् ॥७६२॥
क्रमात्तं स्फारतारुण्यलावण्योल्लासशालिनम् । निध्याय दध्यूषी सोच्चैर्वियोगार्त्ता यशोमती ॥७६३॥
चन्द्रवत्यां भृशासक्तिचेतसं चन्द्रशेखरम् । नित्यप्रोषितकान्तेव जातु प्रेक्षेऽपि नो पतिम् ॥७६४॥
एनमेवाथ शरणं रमणीयं विधाय तत् । पालितस्येव [१]सालस्य गृह्णाम्यस्य स्वयं फलम् ॥७६५॥
एवं ध्यात्वा च हित्वा च विवेकच्छेकतामियम् । तमभाषत भो भद्र ! मां त्वमाद्रियसे यदि ॥७६६॥

१. वृक्षविशेषस्य ।

तदा ते प्राज्यराज्यं स्यादहं च वशवर्त्तिनी । श्रुत्वेत्यतर्कितात्युग्रघातार्त्त इव सोऽब्रवीत् ॥७६७॥
मातः ! किमिदमश्रव्यमवक्तव्यमयुक्तकम् । ब्रवीषि साब्रवीन्नाहं सुभग ! स्यां [1]प्रसूस्तव ॥७६८॥
किन्तु चन्द्रावती राज्ञी मृगध्वजमहीभुजः । इति श्रुत्वाशु तत्त्वार्थं ज्ञातुमातुरमानसः ॥७६९॥
तदीयां दुःश्रववाचमवमन्य स सत्यधीः । पित्रोर्वीक्षापरीक्षार्थं निर्गतोऽद्य च तेऽमीलत् ॥७७०॥ युग्मम् ।
सा बकीवोभयभ्रष्टा पतिपुत्रवियोगिनी । वैराग्याद्योगिनी जज्ञे जैनसाध्व्याद्ययोगतः ॥७७१॥
साऽहं यशोमती सम्यग् भवभावनयाऽऽशु मे । उत्पेदानं कियज्ज्ञानं जाने तेनाखिलं ह्यदः ॥७७२॥
तेनैव दक्षयक्षेणाऽन्तरीक्ष्योक्त्या[2] मदन्तिके । प्राहायिष्टा मयाप्येत्तदाख्याहि यथास्थितम् ॥७७३॥
इत्यनाकर्ण्यमाकर्ण्य चुक्रोधोच्चैश्चिखेद च । [3]महीन्दुर्गृहदुर्वृत्ताच्चित्तं कस्य न दह्यते ॥७७४॥
ततस्तत्प्रतिबोधार्थं साऽभ्यधान् मधुरध्वनिः । योगिनी योगिनीवाणीरीत्या सत्यार्थवेदिनी ॥७७५॥
कवण केरा पुत्र मित्रा रे, कवण केरी नारी । मुहिआं मोहिओ मेरी मेरी मेरी, मूढ भणइ अविचारी ॥७७६॥

१. माता । २. अन्तरीक्षोक्त्या इत्यपि पाठः । ३. राजा ।

**जागि न जोगी हो हो होहो [1]जागि न जोग विचारा ।**
**मेल्हिअ मारिग ( आदरि मारग ) जिम पामे भवपारा ।।७७७।।** आंचली ॥
**अतिहिं गहना अतिहिं कूडा, अतिहिं अथिर संसारा ।**
**भामओ छांडी योग जुमांडी, कीजे जिनधर्मसारा ।।७७८।।** जागि न जोगी० ।
**मोहिइं मोहिओ कोहिइ खोहिओ, लोहिइं वाहिओ धाइं ।**
**मुहिआ बिहुं भव अवरा कारणि, मूरख दुःखिओ थाइ ।।७७९।।** जागि न० ॥
**एकने काजिइं बेहइ खंचे, त्रिण संचे, च्यारि चारें ।**
**पांचइ पाले छइ टाले, आपिइ आप उतारे ।।७८०।।** जागि न जोगि० । इति योगिनीवाणी ।
**तन्निशम्य नृपः सम्यग् जातशान्तविरक्तहृत् । तामनुज्ञाप्य चन्द्राङ्कयुग् ययौ स्वपुरीवनम् ।।७८१।।**
**प्रेष्य चन्द्राङ्कमाकार्य मन्त्र्यादीन् स्वसुतान्वितान् । स व्याजहार संसारोद्विग्नस्तत्त्वनिमग्नधीः ।।७८२।।**
**[1]तपस्यामहमादास्ये दास्येनेव भवेन यत् । पराबभूवैतद् भृशं राज्यं देयं शुकाय तु ।।७८३।।**
**गृहमेष्यामि नैवाहं प्राहुर्मन्त्र्यादयस्ततः । गृहमागम्यतां देव ! दोषः को हि गृहागमे ।।७८४।।**

१. जोइनें इति ह० प्र० पाठः । १. प्रव्रज्यां ।

निर्मोहतायां गृहमप्यरण्यमन्यथा पुनः । अप्यरण्यं गृहं मोहादेव बन्धो हि देहिनाम् ॥७८५॥
तदाग्रहाद् गृहं प्राप क्ष्मापतिः सपरिच्छदः । उपक्षितीन्द्रं चाद्राक्षीच्चन्द्राङ्कं चन्द्रशेखरः ॥७८६॥
ततः संस्मृततद्यक्षवचनः स कथञ्चन । केनाप्यज्ञात एवागात्स्वपुरं जीववज्जवात् ॥७८७॥
शुकराजाय राजाऽथ राज्यं प्राज्योत्सवैर्ददे । प्रत्याददे च प्रव्रज्याऽनुमतिं वेतनं ततः ॥७८८॥
राज्ञि तस्मिन्नभिभवोदयश्रियमुषेयुषि । युक्तं प्रासादयामास प्रोल्लासमथ यामिनी ॥७८९॥
तमोभरेऽपि वितमास्तदा दध्यौ मृगध्वजः । कदा च भावि सुप्रातर्मोदिष्ये दीक्षया कदा ? ॥७९०॥
कदा च निरतिचारचारुचारित्रचर्यया । चरिष्यामि ? करिष्यामि कृत्स्नकर्मक्षयं कदा ? ॥७९१॥
[1]इत्युच्चैश्चटदुत्कर्षः शुभध्यानैकतानधीः । स तथा भावनां काञ्चित् विभावर्यामभावयत् ॥७९२॥
प्रातर्यथा निशीथिन्या समं दुष्कर्मणां क्षयात् । स्पर्धादिवोदगात्तस्य केवलं [2]हेलिना सह ॥७९३॥
महायत्नोऽप्यैहिकः स्याद्विहितोऽपि हि निष्फलः । धर्मसङ्कल्पमात्रेणाऽप्येवं केवलमप्यहो ॥७९४॥
तस्याशेषविदः[3] सद्यः साधुवेषप्रदायिभिः । महीयान् महिमाऽमर्त्यैर्निर्ममे[4] निर्ममेशितुः ॥७९५॥

१. चटदुत्कर्ष इत्यपि पाठान्तरम् । २. सूर्येण । ३. सर्वज्ञस्य । ४. देवैः ।

तदेयुः शुकराजाद्याः सप्रमोदाः सविस्मयाः । राजर्षिश्च [1]सुधादेश्यामादिदेशेति देशनाम् ॥७९६॥
भव्याः ! साधुश्राद्धधर्मौ सेतुबन्धौ भवाम्बुधौ । अवक्रवक्रौ विषमसमौ यात यथेप्सितम् ॥७९७॥
तदा कमलमालाऽर्हद्धर्महंसश्च[2] हंसराट् । चन्द्राङ्कश्च प्रबुध्याऽऽत्तव्रताः सिद्धास्त्रयः क्रमात् ॥७९८॥
दृढसम्यक्त्वपूर्वं च यथाशक्ति शुकादयः । यतिधर्मकृतश्रद्धाः श्राद्धधर्मं प्रपेदिरे ॥७९९॥
असत्याश्चन्द्रवत्यास्तु दुर्वृत्तं नौच्यत क्वचित् । राजर्षिणाऽपि चन्द्राङ्केनाऽपि वैराग्यवत्तया ॥८००॥
किं नाम सम्यग्वैराग्येऽन्येषां दोषप्रघोषणैः । भवाभिनन्दिनामेव परिवादे विदग्धता ॥८०१॥
स्वश्लाघा परनिन्दा च लक्षणं निर्गुणात्मनाम् । परश्लाघा स्वनिन्दा तु लक्षणं सद्गुणात्मनाम् ॥८०२॥
पादन्यासैः पुपावोर्वीं ततोऽसौ ज्ञानिभानुमान् । राज्यं च पालयामास शुकः शक्रपराक्रमः ॥८०३॥
दुर्न्यायशेखरश्चन्द्रशेखरः पुनरन्यदा । चन्द्रवत्यामतिस्निह्यन् द्रुह्यन् शुकमहीभुजे ॥८०४॥
भृशं क्लेशवशाद्राज्याधिष्ठात्रीं गोत्रदेवताम् । चिरादाराधयाभास धिक्कामान्धकदाग्रहम् ॥८०५॥
सापि प्रत्यक्षतां प्राप्ता प्रोचे वत्स ! वरं वृणु । तेनोक्तं शुकराजस्य राज्यं देवि ! प्रदेहि मे ॥८०६॥

१. अमृततुल्याम् । २. अर्हद्धर्मे हंसरूपः ।

सा प्राह शुकराजस्य दृढसम्यक्त्वशालिनः । न प्रभूष्णुरहं हन्त सिंहस्येव कुरङ्गिका ॥८०७॥
शिष्टं तेनापि तुष्टा चेद्देवी[1] त्वं च दधासि चेत् । बलेनापि छलेनापि तद्विधेयं विधेहि मे ॥८०८॥
इत्याद्युक्त्या च भक्त्या च तोषिता देवताऽवदत् । छलौपयिकमेवास्ति न बलौपयिकं त्विह ॥८०९॥
शुकराजे गतेऽन्यत्र व्रजेस्त्वं तत्र सत्वरम् । मत्प्रभावाच्च ते भावि शुकसारूप्यमेव हि ॥८१०॥
तद्राज्यं स्वेच्छया भोज्यमित्युक्त्वा सा तिरोऽभवत् । सोऽपि प्रीतः स्वरूपं तच्चन्द्रवत्यै न्यवेदयत् ॥८११॥
शुकराजोऽन्यदा यात्रोत्कण्ठया स्वप्रियाद्वयम् । प्रोचे प्रिये प्रयास्यामि तीर्थं नन्तुं तमाश्रमम् ॥८१२॥
ते प्राहतुः सहेष्याव आवामपि यतस्ततः । यस्मात्पित्रोरपि भवेत् सङ्गमः प्रीतिसङ्गमः ॥८१३॥
ततस्ताभ्यां युतः कस्याऽप्यनुक्त्वैव स दैवतः । विमानयानः प्राचालीन्न ज्ञातोऽपि च केनचित् ॥८१४॥
चन्द्रवत्या च तद्वृत्तं ज्ञापितश्चन्द्रशेखरः । तत्पुरं प्रविवेश द्राक् परकायमिव च्छलात् ॥८१५॥
जातश्च शुकरूपेण ज्ञातश्च शुक एव सः । सर्वैरपि जनैः कूटसुग्रीव इव दम्भवान् ॥८१६॥
रात्रौ पूत्कृत्य चोत्तस्थौ भो भो धावत धावत । अपहृत्य हि मत्पत्न्यो विद्याभृद्याति यात्ययम् ॥८१७॥

---

१. ''देवी त्वं च ददासि चेत्'' इत्यपि पाठः ।

हाहाकारपराः सर्वे मन्त्र्याद्यास्तत [1]ऐयरुः । प्रोचिरे च प्रभो ! विद्यास्तावकीना गताः क्व ताः ॥८१८॥
सदुःख इव सोऽवादीत् किं कुर्वेऽसौ दुराशयः । हा विद्या अप्यपाहार्षीत् प्राणानिव यमो मम ॥८१९॥
ते प्राहुर्यातु ता विद्या दयितासहिता अपि । महेश ! पिप्रियिमहे वपुषः श्रेयसैव ते ॥८२०॥
एवं राजकुलं सर्वं कपटेन पटीयसा । [2]प्रत्याय्य राज्यमकरोत्प्रीतिं चन्द्रवर्ती नयन् ॥८२१॥
शुकोऽथ नत्वा तत्तीर्थं गत्वा श्वसुरयोः पुरे । स्थित्वा कियद्दिनीं प्राप स्वपुरोपवनान्तरे ॥८२२॥
स्वकृत्यशङ्कितश्चन्द्रशेखरस्तु गवाक्षगः । शुकमायातमालोक्य व्याकुलस्तुमुलं व्यधात् ॥८२३॥
ऊचे च सचिवं विद्याः पत्न्यौ च मम योऽहरत् । स एव कृत्वा मद्रूपं मामुपद्रोतुमेत्ययम् ॥८२४॥
तद् गत्वा तत एवाशु तं कथञ्चिन्निवर्त्तय । मृदूक्तियुक्त्या सामैव बलं हि बलिनं प्रति ॥८२५॥
कार्यं सुसाधं दुस्साधमपि स्याद्दक्षसख्यतः । इत्यमात्योऽन्वितो दक्षैस्तं प्रति प्राचलत्ततः ॥८२६॥
सन्मुखं मे समेत्येतत्सर्वमेवमखर्वमुत् । शुकः स्वयानादुत्तीर्य [3]रसालतलमीयिवान् ॥८२७॥
मन्त्री च गत्वा तं नत्वा व्याजहार विचारवित् । विद्याधरेन्द्र ! शक्तिस्ते वाग्युक्तिरिव निःसमा ॥८२८॥

१. आजग्मुः । २. प्रतीतिं गमयित्वा । ३. आम्रतलम् ।

यदस्मत्स्वामिनः पत्न्यौ विद्याश्चापहृतास्त्वया । अथ प्रसह्य सद्यस्तु याहि स्थानं निजं जवात् ॥८२९॥
भ्रान्तोऽयं शून्यचित्तो वा वातकी वा पिशाचकी । इत्याद्यनल्पसङ्कल्पः शुकोऽजल्पत् सविस्मयः ॥८३०॥
अगादि किमिदं मन्त्रिन् ! त्वया हन्त शुकोऽस्म्यहम् । मन्त्र्यूचे खेचरैवं मामपि वञ्चयसे किमु ॥८३१॥
मृगध्वजमहावंशसहकारशुकः शुकः । भवनेऽस्ति प्रभुर्नस्तद्रूपभृत् त्वं तु खेचरः ॥८३२॥
किं वा बहूक्त्या नः स्वामी शुकस्ते दर्शनादपि । ओतोरिव[१] बिभेत्युच्चैः कम्प्रः क्षिप्रमतो व्रज ॥८३३॥
शुकेन खिन्नचित्तेन चिन्तितं नियतं छलात् । मद्रूपं कोऽपि निर्माय मायावी राज्यमग्रहीत् ॥८३४॥
राज्यं भोज्यं च शय्या च वरवेश्म वराङ्गना । धनं चैतानि शून्यत्वेऽधिष्ठीयन्ते ध्रुवं परैः ॥८३५॥
किं कार्यमथ हत्वैनं राज्यं गृह्णामि यद्यहम् । तदा लोकापवादो मे भवितैवं सुदुःश्रवः ॥८३६॥
धूर्त्तः कोऽपि महापापी मृगध्वजनृपात्मजम् । शुकं जघान राज्यं च जग्राह [२]ग्राहदुर्ग्रहः ॥८३७॥
तेनाऽनेकेऽथ[३] सङ्केताः प्रोक्ताः कान्ताद्वयेन च । परं न कश्चिन्मन्येत धिगहो दम्भजृम्भितम् ॥८३८॥
चिन्तार्त्तः शुकभूकान्तः कान्ताद्वितययुक् ततः । [४]विमानमानी व्योम्नाऽगाद्विमानमधिरूढवान् ॥८३९॥

---

१. मार्जारस्य । २. ग्राहो मकरविशेषः । ३. तेन नैके इत्यपि पाठः । ४. आत्मानं विमानं मानरहितं मन्यते इति ।

मन्त्री च मुदितः कूटशुकभूपसमीपगः । प्राह तद्गमनं सोऽपि [१]जहर्ष स्मरतर्षभृत् ॥८४०॥
शुकः शुक इव व्योम्नि ससंभ्रममथ भ्रमन् । ह्रिया प्रियाप्रेरितोऽपि न ययौ श्वसुरं पुरम् ॥८४१॥
स्वपदभ्रष्टेन पदेन गम्यमुपलक्षितस्य न स्वस्य । नितरां श्वशुरस्य तु यत्तदुचितमाडम्बरस्यैव ॥८४२॥ (आर्या)
यतः—सभायां व्यवहारे च वैरिषु श्वशुरौकसि । आडम्बराणि पूज्यन्ते स्त्रीषु राजकुलेषु च ॥८४३॥
विद्याभिः पूर्णो भोगाङ्गसामग्रीकोऽपि चिन्तया । स सदुःखः शून्यवासी षण्मासीमत्यवाहयत् ॥८४४॥
महात्मनामपि हहा महान् कोऽप्येष विप्लवः । कस्य वा दिवसाः सर्वे सर्वाङ्गीणसुखात्मकाः ॥८४५॥
यतः—कस्य वक्तव्यता नास्ति ? को न जातो मरिष्यति ? । केन न व्यसनं प्राप्तं ? कस्य सौख्यं निरन्तरम् ? ॥८४६॥
अन्यदा तस्य सौराष्ट्रराष्ट्रे विचरतः सतः । विमानमस्खलत् खेऽपि सरित्पूरो गिराविव ॥८४७॥
दग्धोपरि स्फोटकोऽथ प्रहारः पतितोपरि । क्षारक्षेपः क्षतेऽपीति शुकोऽमंस्त विहस्तहृत्[२] ॥८४८॥
ततोऽयं स्वयमुत्तीर्य वीर्यभृत्तत्क्षणादधः । विमानस्खलनहेतुं हन्त यावद् व्यलोकयत् ॥८४९॥
तावत्केवलिनं तातमेव [३]सौवं[४] ददर्श सः । मन्दारमिव मेरुस्थं स्वर्णाब्जस्थं सुरैः श्रितम् ॥८५०॥

१. सहर्ष इत्यपि पाठः । २. व्याकुल हृदयः । ३. स्वकीयम् । ४. शौचमित्यपि पाठः ।

प्रणत्य सत्यभक्त्याऽथ प्रीतः स्फीततराऽश्रुदृक् । तातं प्रति स्वराज्यस्य भ्रंशमाशु शशंस सः ॥८५१॥
पित्रादेः प्रियमित्रस्य स्वामिनः स्वाश्रितस्य वा । निवेद्याऽपि निजं दुःखं स्यात्सुखीव सकृज्जनः ॥८५२॥
गुरुणाऽथ पुरा कर्मविपाकोऽयमितीरिते । स प्राह किं मयाऽर्जि ? प्राक् कर्मेदृग् गुरुरप्यवक् ॥८५३॥
जितारितः पूर्वभवे भवान् भद्रकभावभृत् । न्यायनिष्ठः ठक्कुरोऽभूद् ग्रामे श्रीग्रामनामनि ॥८५४॥
पितृदत्ताऽपरग्रामभोक्ता भ्राता च तेऽभवत् । प्रकृत्यैवान्तकनिष्टः कनिष्ठः परमातृजः ॥८५५॥
श्रीग्रामग्राममागत्य सोऽन्यदा स्वपदं व्रजन् । भवता स्थापयामास हास्याद् बन्दगृहीतवत् ॥८५६॥
उक्तश्च सुखमत्रैव तिष्ठ किं ग्रामचिन्तया । सति ज्येष्ठे कनिष्ठस्य का चिन्ता क्लेशकृन्मुधा ॥८५७॥
वैमात्रैयतया भीरुतया चान्यस्त्वतर्कयत् । हा ध्रुवं मे गतं राज्यमहहा किमिहागमम् ॥८५८॥
अथ हा किं करिष्यामीत्येषोऽतिव्याकुलस्त्वया । मुक्तः कियन्मुहूर्त्तान्ते स्वं जीवितममानयत् ॥८५९॥
तदा तु दारुणं कर्म बद्धं हास्यादपि त्वया । तस्योदयात्तवाप्यासीद्राज्यभ्रंशः सुदुःसहः ॥८६०॥
गर्विता इव कुर्वन्ति जीवाः सांसारिकीं क्रियाम् । तद्विपाके तु दीनाः स्युः फालभ्रष्टप्लवङ्गवत् ॥८६१॥
यतिचन्द्रश्च तच्चन्द्रशेखरस्य विचेष्टितम् । विदन्नप्यवदन्नैव व्यक्त्याऽप्राक्षीन्न यन्नृपः ॥८६२॥

किञ्चिदीदृक्षमाख्यान्ति न च प्रश्नं विना जिनाः । औदासीन्यं केवलं हि फलं केवलसंविदः ॥८६३॥
शुकराजोऽथ शिशुवद्विलग्य स्वपितुः पदोः । प्रोचे राज्यं कथं यातु तात ! त्वय्यपि वीक्षिते ॥८६४॥
धन्वन्तरावपि प्राप्ते कोऽयमामयविप्लव[1]: । प्रत्यक्षे कल्पवृक्षेऽपि केयं दौस्थ्यकथाप्रथा[2] ॥८६५॥
कैषा तमोऽर्त्तिरुदितेऽप्यादित्ये कश्चिदीश ! तत् । तत्प्राप्त्युपायमचिरान्निरपायमुपादिश ॥८६६॥
इत्युद्युक्त्याऽत्यर्थमेवाभ्यर्थितः प्रभुरभ्यधात् । भो ! भवेदपि दुःसाधं सुसाधं धर्मकर्मणा ॥८६७॥
आसन्नमेव विमलाचलोऽयं तीर्थमादिमम् । अत्रादिमं तीर्थनाथं नत्वा स्तुत्वा च भक्तितः ॥८६८॥
[3]इदमीयदरीमध्ये षण्मासान् स्मर्यते यदि । परमेष्ठिमहामन्त्रः स्वतन्त्रः सर्वसिद्धिषु ॥८६९॥ युग्मम् ।
स्वयमेव तदापैति शत्रुर्वित्रस्तफेरुवत् । नंष्ट्वा जवाज्जीवनाशं विफलीभूतकैतवः ॥८७०॥
गुहामध्ये महातेजः प्रोस्फुरीति[4] यदा तदा । तत्कार्यसिद्धिर्जातेति ज्ञेयं धेयं च चेतसि ॥८७१॥
स्वशत्रोर्दुर्जयस्यापि जयस्यौपयिकं शुकः । श्रुत्वेति तात्त्विकं सूनोरसुनूरिव[5] हृष्टवान् ॥८७२॥
ततो विमानारूढोऽसौ गत्वा श्रीविमलाचलम् । जजाप पापहृन्मन्त्रं योगीन्द्र इव निश्चलः ॥८७३॥

१. रोगोपद्रवः । २. दारिद्र्यम् । ३. अस्येयं-इदमीया अस्य दरी गुहा तन्मध्ये । ४. अतिशयेन स्फुरति । ५. असूनुः पुत्रहितः सूनोः पुत्रस्य वार्ता ।

यथोक्तरीत्या षण्मासातिक्रमे त्वक्रमेण सः । तेजो [1]विष्वग् जगद्द्राक्षीत्स्वप्रतापमिवोदितम् ॥८७४॥
तस्मिन्नवसरे गोत्रसुरी सा चान्द्रशेखरी । बभूवुषी निष्प्रभावा प्रोचुषी चन्द्रशेखरम् ॥८७५॥
भो ! याहि याहि स्वस्थानं गता ते शुकरूपता । इत्युदित्वा गता सापि सोऽपि स्वं रूपमाप च ॥८७६॥
भ्रष्टश्रीक इवोद्विग्नश्चिन्तामग्नः स भग्नमुत् । चौरवन्निरगाद्यावच्छुकस्तावत्समाययौ ॥८७७॥
प्राच्यं च शुकरूपं तमपश्यन्तः शुकं च तम् । पश्यन्तः सचिवाद्यास्ते सर्वेऽपि बहु मेनिरे ॥८७८॥
दुष्टः कोऽपि प्रविष्टोऽभून्नष्टवान् किन्तु साम्प्रतम् । इत्येव सर्वैर्विज्ञातमधिकं तु न केनचित् ॥८७९॥
स्पष्टदृष्टफलः सोऽथ शुकराजः सुरेन्द्रवत् । दिव्यनव्यस्फुरन्नानाविमानाद्युरुडम्बरः ॥८८०॥
सर्वसामन्तसम्बन्धिखेचरैः परिवारितः । प्राचालीद्विमलगिरिं प्रति निष्प्रतिमोत्सवम् ॥८८१॥ युग्मम् ।
केनाप्यज्ञातदुर्वृत्तः सद्वृत्तवदशङ्कितः । चन्द्रशेखरभूपोऽपि सहैवाऽऽगच्छदुत्सुकः ॥८८२॥
शुकराजस्तत्र गत्वाऽर्चित्वा स्तुत्वा च तं जिनम् । कृत्वा महोत्सवं सर्वसमक्षमिदमूचिवान् ॥८८३॥
मन्त्रस्य साधनादत्र जातः शत्रुजयो मम । ततः शत्रुञ्जयेत्याख्या प्रख्याप्याऽस्य विचक्षणैः ॥८८४॥

१ समन्तात् व्यापकं । द्यगद्रा० (?) ।

तेनैवं तस्य तीर्थस्य सार्थं नाम प्रतिष्ठितम् । पृथिव्यां पप्रथे प्रोचैर्नव्यं प्रायः प्रसिद्धिभृत् ॥८८५॥

जिनेन्द्रचन्द्रं दृष्ट्वा च विनिद्रश्चन्द्रशेखरः । स्वकृतं दुष्कृतं निन्दन् पश्चात्तापमवापिवान् ॥८८६॥

ततो महोदयं वाञ्छन् महोदयमहामुनिम् । सोऽपृच्छत् स्वच्छधीः शुद्धिः स्यान्ममापि कथञ्चन ॥८८७॥

वाचं वाचंयमः प्रोचे सम्यगालोच्य यद्वयम् । तीव्रं तपस्तप्यसेऽस्मिंस्तीर्थे शुद्धिस्तवापि तत् ॥८८८॥

यतः—जन्मकोटिकृतमेकहेलया कर्म तीव्रतपसा विलीयते । किं न दाह्यमति बह्वपि क्षणादुच्छिखेन शिखिनाऽत्र दह्यते ॥८८९॥

श्रुत्वेत्यालोच्यमालोच्य स तत्पार्श्वे व्रतं श्रितः । मासिकादि तपस्तप्त्वा तत्रैव शिवमीयिवान् ॥८९०॥

अथ निष्कण्टकं राज्यं भुञ्जानः शुकराजराट् । परमार्हतभूपानामभूदेकनिदर्शनम् ॥८९१॥

द्वेधा[१] शत्रुञ्जयस्त्रेधा यात्राः श्रीसङ्घभक्तयः । चतुर्धा बहुधा चैत्याऽर्चादि तेन वितेनिरे ॥८९२॥

पद्मावत्यग्रहमहिषी वायुवेगापरास्य च । बह्वोऽप्यन्याः प्रियाश्चासन् नृपखेचरपुत्रिकाः ॥८९३॥

पद्मावत्याः सुतः पद्माकरः पद्माकरः[२] श्रियाम् । सत्याह्वो वायुवेगाया वायुसारश्च विश्रुतः ॥८९४॥

जन्यो जनकसङ्काश इति याभ्यां निजैर्गुणैः । निदर्श्यतेऽच्युतसुतशम्बप्रद्युम्नवत् पुरा ॥८९५॥

१. बाह्याभ्यन्तरप्रकाराभ्यां शत्रुञ्जयः । २. पद्माकरश्रियामित्यपि पाठः ।

**प्रदायाऽऽद्याय पुत्राय शुकराजनृपः क्रमात् । स्वं राज्यं यौवराज्यं च द्वितीयायाऽद्वितीयमुत् ॥८९६॥**

**प्रव्रज्य सप्रियः प्राज्योत्सवैः शत्रुञ्जयार्थ्यसौ । युक्तं शत्रुञ्जयं तीर्थं प्रतिप्रास्थित सुस्थितः ॥८९७॥** युग्मम् ।

**तत्राध्यारोहतस्तस्य शुक्लध्यानाधिरोहतः । प्राग् जज्ञे केवलज्ञानमहो लब्धिर्महात्मनाम् ॥८९८॥**

**चिरं धरित्र्यां विहरन् हरन्मोहतमो नृणाम् । भार्याभ्यामवियुक्तोऽसौ मुक्तिमाक्रमत क्रमात् ॥८९९॥**

**प्राग्भद्रकत्वादिगुणैः सुदर्शनाद्यवाप्तितन्निर्वहणादिकं फलम् ।**
**श्रुत्वेत्यपूर्वं शुकराजभूभुजस्तदर्जनायां प्रयतध्वमादृताः ॥९००॥**

इति भद्रकत्वादिगुणेषु शुकराजनृपकथा ।

अथ श्राद्धस्वरूपमाह—

**नामाई चउभेओ, सड्ढो भावेण इत्थ अहिगारो ।**
**तिविहो अ भावसड्ढो, दंसणवयउत्तरगुणेहिं ॥४॥**

नामस्थापनाद्रव्यभावैश्चतुर्भेदः श्राद्धः । तत्र नामश्राद्धो [१]गुणशून्यः श्राद्धनामधारी ईश्वरादिनामधारकदरिद्रदासादिवत् ।

१. अन्वर्थशून्यः इति को० ह० प्र० पाठः ।

स्थापनाश्राद्धो लेप्यमयादिः । द्रव्यश्राद्धो भावशून्यश्राद्धक्रियाकृद् अभयकुमारबन्धनार्थचण्डप्रद्योतननृपादिष्टकपटश्राविकीभूतगणिकावत्। भावश्राद्धो भावपूर्वकश्राद्धक्रियानिष्ठः । अत्र च भावश्राद्धेनाधिकारो, नामश्राद्धादीनां नामगवादीनामिवेष्टसाध्यासाधकत्वात् । भावश्राद्धश्च त्रिविधो, दर्शनश्राद्धो, व्रतश्राद्ध, उत्तरगुणश्राद्धश्च । तत्र दर्शनश्राद्धः केवलसम्यक्त्वधारी श्रेणिकादिवत् । व्रतश्राद्धः सम्यक्त्वमूलाणुव्रतधारी सुरसुन्दरकुमारभार्या इव, तासां वचः[व्रत]पञ्चके मुनिनोपदिश्यमाने रहःस्थतद्भर्त्रा ईर्ष्यालुना मुनेः पञ्चस्वङ्गेषु पञ्च पञ्च लकुटप्रहारान् दास्ये इत्यचिन्ति । मुनिना त्वाद्याणुव्रते सदृष्टान्तमुक्ते ताभिः स्वीकृते रुष्टा अपि एता मां न मारयिष्यन्तीति हृष्टः स एकैकं प्रहारं न्यूनीचक्रे । ताभिश्चैवं पञ्चाणुव्रती स्वीचक्रे, ततः स धिग् दुर्ध्यातं मयेति भृशं सानुशयः क्षमयित्वा मुनेः पार्श्वे सप्रियो व्रतं लात्वा स्वर्गतः । उत्तरगुणाः-त्रीणि गुणव्रतानि चत्वारि शिक्षाव्रतानि च, सम्यक्त्वाणुव्रतसहितान्येतानि धरन्नुत्तरगुणश्राद्धः सुदर्शनश्रेष्ठ्यादिवत् । अथवा सम्यक्त्वमूलद्वादशव्रतधारी व्रतश्राद्धः, उत्तरगुणश्राद्धस्तु पूर्वोक्तगुणयुक्तः सर्वसचित्तपरिहारैकाहार-त्रिविध-चतुर्विधाहार प्रत्याख्यान-ब्रह्मचर्य-भूमिशयन-प्रतिमादिविशेषाभिग्रहवान् आनन्द-कामदेव-कार्तिकश्रेष्ठ्यादिवत् । एकद्व्यादिव्रतभावेऽपि च व्रतश्राद्धत्वं स्यात्, तत्र च द्वादशव्रतानामेकद्विकचतुष्कादिसंयोगैर्द्विविधं त्रिविधेनेत्यादिभङ्ग्योजितैरुत्तरगुणाऽविरतरूपभेदद्वययुतैः श्राद्धभङ्गकसर्वाग्रमित्युक्तम्—

**तेरसकोडिसयाइं, चुलसीइ जुयाइं बारस य लक्खा । सत्तासीइ सहस्सा, दुन्निसया तह दुरग्गा य ॥**

***ननु*** त्रिविधं त्रिविधेनेति भेदोऽत्र कुत्रापि किं न योजितः ? ***उच्यते,*** गृहिणा स्वयं पुत्रादिभिर्वा प्राक्प्रारब्धारम्भादावनुमतेर्निषेद्धुमशक्यत्वात् । यत्पुनः प्रज्ञप्त्यादौ त्रिविधं त्रिविधेनेत्यपि प्रत्याख्यानमुक्तमगारिणाम्, तद्विशेषविषयम् । तथाहि-यः खलु प्रविव्रजिषुरेव पुत्रादिसन्ततिपालनाय विलम्बमानः प्रतिमाः प्रतिपद्यते, यो वा विशेषं स्वयम्भूरमणादिगतमत्स्यमांसादि नृक्षेत्राद्बहिः स्थूलहिंसादिकं वा क्वचिदवस्थाविशेषेण[1] प्रत्याख्याति, स एव त्रिविधं त्रिविधेनेति करोतीत्यल्पविषयत्वादत्र न विवक्षितम् । वि० आ० २ महाभाष्येऽप्युक्तं—

**केई भणंति गिहिणो, तिविहं तिविहिएण नत्थि संवरणं । तं न, जओ निद्दिट्ठं पन्नत्तीए विसेसेउं ॥**

**पुत्ताइं संततिनिमित्तमित्तमेक्कारसिं पवण्णस्स । जंपंति केइ गिहिणो दीक्खाभिमुहस्स तिविहंपि ॥**

**जइ किंचिदप्पओअणमप्पप्पं वा विसेसिअं वत्थुं । पच्चक्खेज्ज न दोसो, सयंभुरमणादिमच्छव्व ॥**

'अप्पओअणंत्ति'-अप्रयोजनं काकमांसादि, 'अप्पप्पं' अप्राप्यं नृक्षेत्राद् बहिर्दन्तिदन्तचित्रकचर्मादिकं विशिष्टम् । ***ननु*** आगमेऽन्यथा श्रावकभेदाः श्रूयन्ते । यदुक्तं श्रीस्थानाङ्गे-''**चत्तारि समणोवासगा पन्नत्ता, तंजहा-अम्मापियसमाणे भायसमाणे मित्तसमाणे सवत्तिसमाणे** (सू० ३२१) । अथवा **चत्तारि समणोवासगा पन्नत्ता, तंजहा-आयंव्ससमाणे**

१. विशेषे इति को० ह० प्र० पाठः ।

**पडागासमाणे थाणुसमाणे खरकंटयसमाणे ।''** एते च साधूनाश्रित्य द्रष्टव्याः, ते चामीषां चतुर्णां मध्ये कस्मिन्नवतरन्ति ? । ***उच्यते,*** व्यहारनयमतेन भावश्रावका एवैते तथा व्यवह्रियमाणत्वात्, निश्चयनयमतेन पुनः सपत्नीखरण्टसमानौ मिथ्यादृष्टिप्रायौ द्रव्यश्रावकौ, शेषास्तु भावश्रावकाः । तदुक्तं –

**चिंतइ जइकज्जाइं, न दिट्ठखलिओवि होइ निन्नेहो । एगंतवच्छलो जइजणस्स जणणीसमो सड्ढो ॥**

**हिअए ससिणेहो च्चिअ, मुणीण मंदायरो विणयकम्मे । भायसमो साहूणं, पराभवे होइ सुसहाओ ॥**

**मित्तसमाणो माणा ईसिं रूसइ अपुच्छिओ कज्जे । मन्नंतो अप्पाणं, मुणीणं सयणाउ अब्भहिअं ॥**

**थद्धो छिद्दप्पेही, पमायखलिआणि निच्चमुच्चरइ । सड्ढो सवत्तिकप्पो साहूजणं तणसमं गणइ ॥**

तथा द्वितीयचतुष्के –

**गुरुभणिओ सुत्तत्थो, बिंबिज्जइ अवितहो मणे जस्स । सो आयंससमाणो, सुसावओ वन्निओ समए ॥**

**पवणेण पडागा इव, भामिज्जइ जो जणेण मूढेण । अविणिच्छियगुरुवयणो, सो होइ पडाइआतुल्लो ॥**

**पडिवन्नमसग्गाहं, न मुअइ गीअत्थसमणुसिट्ठोवि । थाणुसमाणो एसो, अपओसी मुणिजणे नवरं ॥**

**उम्मग्गदेसओ निन्हवोसि मूढोसि मंदधम्मोसि । इअ सम्मंपि कहंतं खरंटए सो खरंटसमो ॥**

**जह सिढिलमसुइदव्वं, छुप्पंतं पिहु नरं खरंटेइ । एवमणुसासगं पिहु दूसंतो भन्नइ खरंटो ॥**

**निच्छयओ मिच्छत्ती, खरंटतुल्लो सवत्तितुल्लोवि । ववहारओ उ सड्ढा, वयंति जं जिणगिहाईसु ॥**

स-शयोरैक्यात् स्रवति मुञ्चति दानशीलतपोभावनादिना शुभयोगेनाष्टप्रकारं कर्मेति, शृणोति यतिभ्यः सम्यक् सामाचारी-मित्यादिर्वा श्रावकशद्बार्थोऽपि भावश्रावकमेवाश्रित्य घटते । यदाहुः —

**स्रवन्ति यस्य पापानि पूर्वबद्धान्यनेकशः । आवृत्तश्च व्रतैर्नित्यं श्रावकः सोऽभिधीयते ॥**

**संपत्तदंसणाई पइदिअहं जइजणा सुणेई अ । सामायारिं परमं, जो खलु तं सावगं बिंति ॥**

**श्रद्धालुतां श्राति पदार्थचिन्तनाद्धनानि पात्रेषु वपत्यनारतम् ।**
**किरत्यपुण्यानि सुसाधुसेवनादतोऽपि तं श्रावकमाहुरुत्तमाः ॥**

**यद्वा—श्रद्धालुतां श्राति शृणोति शासनं दानं वपत्याशु वृणोति दर्शनम् ।**
**कृन्तत्यपुण्यानि करोति संयमं तं श्रावकं प्राहुरमी विचक्षणाः ॥**

तथा—श्रद्धा सम्यग् धर्मेऽस्याऽस्तीति **प्रज्ञाश्रद्धाऽर्चावृत्तेर्णः** (सि० है० ७-२-३३) इति णप्रत्यये श्राद्ध इति श्राद्ध-शद्बान्वर्थोऽपि भावश्राद्धत्वापेक्ष एवेत्यत्रोक्तं भावश्राद्धेनात्राधिकार इति चतुर्थगाथार्थः ॥४॥

एवं श्राद्धस्य स्वरूपमुक्त्वा प्रागुक्ते दिनरात्र्यादिकृत्यषट्के प्रथमं दिनकृत्यविधिमाह –

**नवकारेण विबुद्धो, सरेइ सो सकुलधम्मनियमाई ।**
**पडिकमिअ सुई पूइअ, गिहे जिणं कुणइ संवरणं ॥५॥**

'नमो अरिहंताणं' इत्यादिना **विबुद्धः स** श्राद्धः **स्वकुलधर्मनियमादीन् स्मरेत्** । अयमर्थः-श्रावकेण तावत् स्वल्पनिद्रेण भाव्यं, पाश्चात्यरात्रौ च यामादिसमये सकाले उत्थातव्यं, तथा सति यथा विलोक्यमानैहिकलौकिकपारलौकिक-कार्यसिद्ध्यादयोऽनेकगुणाः, अन्यथा तत्सीदनादयो दोषाः । लोकेऽप्युक्तं –

**कम्मीणां धण संपडइ, धम्मीणां परलोअ जिहिं । सुत्तां रवि उग्गमइ, तिहिं नरआउ न ओय ॥**

निद्रापारवश्यादिना यदि तथोत्थातुं न शक्नोति, तदा पञ्चदशमुहूर्त्ता रजनी तस्यां जघन्यतोऽपि चतुर्दशे ब्राह्मे मुहूर्त्ते उत्तिष्ठेत्, उत्थितश्च द्रव्याद्युपयोगं करोति-द्रव्यतः कोऽहं श्राद्धोऽन्यो वा ? क्षेत्रतः किं स्वगृहेऽन्यत्र वा ? उपरितलेऽधस्तले वा ? कालतो रात्रिर्दिनं वा ? भावतः कायिक्यादिना पीडितोऽहं न वा ? एवमुपयोगे दत्ते निद्रानुपरमे [१]नासानिःश्वासं निरुणद्धि । ततोऽपनिद्रः

१. नासां इति को० ह० प्र० पाठः ।

सन् द्वारं दृष्ट्वा कायिक्यादिचिन्तां करोति । उक्तञ्च साधुमाश्रित्यौघनिर्युक्तौ—**'दव्वाइउवओगं ऊसासनिरुंभणा लोअं' गा० ( २०६ )** इति रात्रौ च यदि किञ्चित् कार्याद्यन्यस्मै ज्ञापयति, तदा मन्दस्वरादिनैव, उच्चैःस्वरं तु शब्दकासितखुंकारहुंकाराद्यपि न कुर्यात्, रात्रौ [१]तत्करणजागरितैर्गृहगोधादिहिंस्रजीवैर्मक्षिकोपद्रवाद्यारम्भः, प्रातिवेश्मिकैर्वा स्वस्वाऽऽरम्भः प्रवर्त्त्येत । तथा च पानीयाहारिका-रन्धन-कारिका-वाणिज्यकारक-[२]शोषकारक-पथिक-कर्षकाऽऽरामिकाऽरघट्टिकघरट्टादियन्त्रवाहक-शिलाकुट्टक-चाक्रिक-रजक-कुम्भकार-लोहकार-सूत्रधार-द्यूतकार-शस्त्रकार-मद्यकार-मात्स्यिक-सौनिक-वागुरिक-लुब्धक-घातक-पारदारिक-तस्करा-वस्कन्ददायकादीनामपि परम्परया कुव्यापारप्रवृत्तिरिति निरर्थकमनेके दोषाः । तदुक्तं श्री भगवत्यङ्गे—

**जागरिआ धम्मीणं, अहम्मीणं तु सुत्तया सेया । वच्छाहिवभइणीए, अकहिंसु जिणो जयंतीए ॥**

निद्राच्छेदे च तज्ज्ञेन भूजलाग्निवायुव्योमसु किं तत्त्वमित्याद्यन्वेष्यं यतः—

**अम्भोभूतत्त्वयोर्निद्राविच्छेदः शुभहेतवे । व्योमवाय्वग्नितत्त्वेषु स पुनर्दुःखदायकः ॥**

**वामा शस्तोदये पक्षे सिते कृष्णे तु दक्षिणा । त्रीणि त्रीणि दिनानीन्दुसूर्ययोरुदयः शुभः ॥**

**शुक्लप्रतिपदो वायुश्चन्द्रेऽथार्के त्र्यहं त्र्यहम् । वहन् शस्तोऽनया वृत्त्या विपर्यासे तु दुःखदः ॥**

१. तत्करणे इति मुद्रितम् । २. शोक० इति मुद्रितम् ।

**शशाङ्केनोदये वायोः सूर्येणाऽस्तं शुभावहम् । उदये रविणा त्वस्य शशिनाऽस्तं शुभावहम् ॥**

केषाञ्चिन्मते वारक्रमेण सूर्यचन्द्रोदयो, तत्र रविभौमगुरुशनिषु सूर्योदयः सोमबुधशुक्रेषु चन्द्रोदयः । केषाञ्चित् सङ्क्रान्तिक्रमाद्, यथा **मेसविसे रविचंदा** इत्यादि । केषाञ्चिच्चन्द्रराशिपरावर्त्तक्रमेण –

**सार्द्धं घटीद्वयं नाडिरेकैकाऽर्कोदयाद्वहेत् । अरघट्टघटीभ्रान्तिन्यायो नाड्यो पुनः पुनः ॥**

**षट्त्रिंशद्गुरुवर्णानां या वेला भणने भवेत् । सा वेला मरुतो नाड्या नाड्यां सञ्चरतो लगेत् ॥**

पञ्चतत्त्वानि चैवं –

**ऊर्ध्वं वह्निरधस्तोयं तिरश्चीनः समीरणः । भूमिर्मध्यपुटे व्योम सर्वगं वहते पुनः ॥**

**वायोर्वह्नेरपां पृथ्व्या व्योम्नस्तत्त्वं वहेत् क्रमात् । वहन्त्योरुभयोर्नाड्योर्ज्ञातव्योऽयं क्रमः सदा ॥**

**पृथ्व्याः पलानि पञ्चाशच्चत्वारिंशत्तथाऽम्भसः । अग्नेस्त्रिंशत्पुनर्वायोर्विंशतिर्नभसो दश ॥**

**तत्त्वाभ्यां भूजलाभ्यां स्याच्छान्ते कार्ये फलोन्नतिः । दीप्ता स्थिरादिके कृत्ये तेजोवाय्वम्बरैः शुभम् ॥**

**जीवितव्ये जये लाभे सस्योत्पत्तौ च वर्षणे । पुत्रार्थे युद्धप्रश्ने च गमनागमने तथा ॥**

**पृथ्व्यप्तत्त्वे शुभे स्यातां वह्निवातौ च नो शुभौ । अर्थसिद्धिः स्थिरोर्व्यां तु शीघ्रमम्भसि निर्दिशेत् ॥** युग्मम् ।

**पूजाद्रव्यार्जनोद्वाहे दुर्गादिसरिदाक्रमे । गमागमे जीविते च गृहे क्षेत्रादिसङ्ग्रहे ॥**

**क्रयविक्रयणे वृष्टौ सेवाकृषिद्विषज्जये । विद्यापट्टाभिषेकादौ शुभेऽर्थे च शुभः शशी ॥** युग्मम् ।

**प्रश्ने प्रारंभणे वाऽपि कार्याणां वामनासिका । पूर्णा वायोः प्रवेशश्चेत्तदा सिद्धिरसंशयम् ॥**

**बद्धानां रोगितानां च प्रभ्रष्टानां निजात्पदात् । प्रश्ने युद्धविधौ वैरिसङ्गमे सहसा भये ॥**

**स्नाने पानेऽशने नष्टान्वेषे पुत्रार्थमैथुने । विवादे दारुणार्थे च सूर्यनाडिः प्रशस्यते ॥** युग्मम् ।

क्वचित्त्वेवम् -

**विद्यारम्भे च दीक्षायां शस्त्राभ्यासविवादयोः । राजदर्शनगीतादौ मन्त्रयन्त्रादिसाधने ॥** सूर्यनाडी शुभा ।

**दक्षिणे यदि वा वामे यत्र वायुर्निरन्तरम् । तं पादमग्रतः कृत्वा निस्सरेत् निजमन्दिरात् ॥**

**अधमर्णारिचौराद्या विग्रहोत्पातिनोऽपि च । शून्याङ्गे स्वस्य कर्तव्याः सुखलाभजयार्थिभिः ॥**

**स्वजनस्वामिगुर्वाद्या ये चान्ये हितचिन्तकाः । जीवाङ्गे ते ध्रुवं कार्याः कार्यसिद्धिमभीप्सुभिः ॥**

**प्रविशत्पवनापूर्णनासिकापक्षमाश्रितम् । पादं शय्योत्थितो दद्यात् प्रथमं पृथिवीतले ॥**

एवं विधिना त्यक्तनिद्रः श्रावक आत्यन्तिकबहुमानः परममङ्गलार्थं नमस्कारं स्मरेद् अव्यक्तवर्णं, यदाह—

**परमिट्ठिचिंतणं माणसम्मि सिज्जागएण कायव्वं । सुत्ताऽविणयपवित्ती निवारिआ होइ एवं तु ॥**

अन्ये तु न सा काचिदवस्था यस्यां पञ्चनमस्कारस्याऽनधिकार इति मन्वाना अविशेषेणैव नमस्कारपाठमाहुः । एतन्मतद्वयमाद्यपञ्चाशकवृत्त्यादावुक्तम् । श्राद्धदिनकृत्ये त्वेवमुक्तं—

**सिज्जाठाणं पमुत्तूणं, चिट्ठिज्जा धरणीयले । भावबंधुं जगन्नाहं, नमोक्कारं तओ पढे ॥** (श्लो० ९)

यतिदिनचर्यायां चैवं—

**जामिणिपच्छिमजामे, सव्वे जग्गन्ति बालबुड्ढाई । परमिट्ठिपरममंतं भणंति सत्तट्ठवाराओ ॥**

[१]एवं च नमस्कारं स्मरन् सुप्तोत्थितः पल्यङ्कादि मुक्त्वा पवित्रभूमौ ऊर्ध्वं स्थितो निविष्टो वा पद्मासनादिसुखासनासीनः पूर्वस्यामुत्तरस्यां वा सम्मुखो जिनप्रतिमाद्यभिमुखो वा चित्तैकाग्रताद्यर्थं कमलबन्ध-करजापादिना नमस्कारान् परावर्तयेत्, तत्राऽष्टदले कमले कर्णिकायामाद्यं पदं, द्वितीयादिपदानि चत्वारि पूर्वादिदिक्चतुष्के, शेषाणि चत्वार्याग्नेय्यादिविदिक्चतुष्के न्यसेदित्यादि । उक्तं चाष्टमप्रकाशे श्रीहेमसूरिभिः—

**अष्टपत्रे सिताऽम्भोजे कर्णिकायां कृतस्थितिम् । आद्यं सप्ताक्षरं मन्त्रं पवित्रं चिन्तयेत्ततः ॥** (श्लो० ३३)

१. नमस्कारपरिवर्तनविधिरयम्-हृदि नमस्कारं इति को० ह० प्र० पाठः ।

**सिद्धादिकचतुष्कं च दिक्पत्रेषु यथाक्रमम् । चूलापादचतुष्कं च विदिक्पत्रेषु चिन्तयेत् ॥** (३४)

**त्रिशुद्ध्या चिन्तयंस्तस्य शतमष्टोत्तरं मुनिः । भुञ्जानोऽपि लभेतैव चतुर्थतपसः फलम् ॥** (३५)

करजापो नन्द्यावर्त्तशङ्खावर्त्तादिना इष्टसिद्ध्यादिबहुफलः । प्रोक्तं च—

**करआवत्ते जो पंचमंगलं साहुपडिमसंखाए । नववारा आवत्तइ छलंति तं नो पिसायाई ॥**

बन्धनादिकष्टे तु विपरीतशङ्खावर्त्तादिनाऽक्षरैः पदैर्वा विपरीतं नमस्कारं लक्षाद्यपि जपेत्, क्षिप्रं क्लेशनाशादि स्यात् । करजापाद्यशक्तस्तु सूत्र-रत्न-रुद्राक्षादिजपमालया स्वहृदयसमश्रेणिस्थया परिधानवस्त्रचरणादावलगन्त्या मेर्वनुल्लङ्घनादिविधिना जपेत्। यतः—

**अङ्गुल्यग्रेण यज्जप्तं यज्जप्तं मेरुलङ्घने । व्यग्रचित्तेन यज्जप्तं तत्प्रायोऽल्पफलं भवेत् ॥**

**सङ्कुलाद्विजने भव्यः सशब्दान्मौनवान् शुभः । मौनजान्मानसः श्रेष्ठो जापः श्लाघ्यः परः परः ॥**

**जपश्रान्तो विशेद् ध्यानं ध्यानश्रान्तो विशेज्जपम् । द्वयश्रान्तः पठेत् स्तोत्रमित्येवं गुरुभिः स्मृतम् ॥**

श्रीपादलिप्तसूरिकृतप्रतिष्ठापद्धतावप्युक्तं-जापस्त्रिविधो मानसोपांशुभाष्यभेदात्, तत्र मानसो मनोमात्रवृत्तिनिर्वृत्तः स्वसंवेद्यः, उपांशुस्तु परैरश्रूयमाणोऽन्तःसञ्जल्परूपः, यस्तु परैः श्रूयते स भाष्यः, अयं यथाक्रममुत्तममध्यमाधमसिद्धिषु शान्तिपुष्ट्यभि-

चारादिरूपासु नियोज्यः, मानसस्य प्रयत्नसाध्यत्वाद्, भाष्यस्याधमसिद्धिफलत्वादुपांशुः साधारणत्वात्प्रयोज्यः इति। नमस्कारस्य पञ्चपदीं नवपदीं वाऽनानुपूर्व्याऽपि चित्तैकाग्र्यार्थं गुणयेत्, तस्य च प्रत्येकमेकैकाक्षरपदाद्यपि परावर्त्यम् । यदुक्तमष्टमप्रकाशे—

**गुरुपञ्चकनामोत्था विद्या स्यात् षोडशाक्षरा । जपन् शतद्वयं तस्याश्चतुर्थस्याऽऽप्नुयात् फलम् ॥** (यो. शा. ८. ३८)

गुरुपञ्चकं=परमेष्ठिपञ्चकं, षोडशाक्षरा=अरिहंतसिद्धआयरियउवज्झायसाहुरूपा । तथा—

**शतानि त्रीणि षड्वर्णं चत्वारि चतुरक्षरम् । पञ्चवर्णं जपन् योगी चतुर्थफलमश्नुते ॥** (यो. शा. ८. ३९)

षड्वर्णम्=अरिहंतसिद्ध इति । चतुरक्षरं=अरिहंत इति । अवर्णं=अकारमेव मन्त्रम् ।

**प्रवृत्तिहेतुरेवैतदमीषां कथितं फलम् । फलं स्वर्गापवर्गौ तु वदन्ति परमार्थतः ॥** (यो. शा. ८. ४०)

तथा—

**नाभिपद्मे स्थितं ध्यायेदकारं विश्वतोमुखम् । सिवर्णं मस्तकाम्भोजे आकारं वदनाम्बुजे ॥**
**उकारं हृदयाम्भोजे साकारं कण्ठपञ्जरे । सर्वकल्याणकारीणि बीजान्यन्यान्यपि स्मरेत् ॥**

असिआउसा इति बीजान्यन्यान्यपि 'नमः सर्वसिद्धेभ्य' इति ।

**मन्त्रः प्रणवपूर्वोऽयं फलमैहिकमिच्छुभिः । ध्येयः प्रणवहीनस्तु निर्वाणपदकाङ्क्षिभिः ॥**

**एवं च मन्त्रविद्यानां वर्णेषु च पदेषु च । विश्लेषं क्रमशः कुर्याल्लक्ष्यभावोपपत्तये ॥**

जापादेश्च बहुफलत्वं, यतः–

**पूजाकोटिसमं स्तोत्रं स्तोत्रकोटिसमो जपः । जपकोटिसमं ध्यानं ध्यानकोटिसमो लयः ॥**

ध्यानसिद्धये च जिनजन्मादिकल्याणकभूम्यादिरूपं तीर्थमन्यद्वा स्वास्थ्यहेतुं विविक्तं स्थानाद्याश्रयेत् । यद् ध्यानशतके–

**निच्चं चिअ जुवइपसुनपुंसगकुसीलवज्जियं जइणो । ठाणं विअणं भणिअं, विसेसओ झाणकालंमि ॥**

**थिरकयजोगाणं पुण, मुणीण झाणेसु निच्चलमणाणं । गामम्मि जणाइन्ने, सुन्ने रन्ने व न विसेसो ॥**

**तो जत्थ समाहाणं, होइ मणोवयणकायजोगाणं । भूओवरोहरहिओ, सो देसो झायमाणस्स ॥**

**कालो वि सुच्चिअ जहिं जोगसमाहाणमुत्तमं लहइ । नउ दिवसनिसावेलाइनियमणं झाइणो भणिअं ॥**

**जच्चिअ देहावत्था, जिआण झाणावरोहिणी होइ । झाइज्जा तदवत्थो, ठिओ निसन्नो निवन्नो वा ॥**

**सव्वासु वट्टमाणा मुणओ जं देसकालचिट्ठासु । वरकेवलाइलाभं, पत्ता बहुसो समिअपावा ॥**

**तो देसकालचिट्ठानिअमो झाणस्स नत्थि समयम्मि । जोगाण समाहाणं, जइ होइ तहा पयइअव्वं ॥** इत्यादि ।।

नमस्कारश्चात्राऽमुत्राऽप्यत्यन्तं गुणकृत् । उक्तं हि महानीशीथे –

**नासेइ चोरसावयविसहरजलजलणबंधणभयाइं । चिंतिज्जंतो रक्खसरणरायभयाइं भावेण ॥**

अन्यत्रापि—

**जाएवि जो पढिज्जइ, जेणं जायस्स होइ फलरिद्धि । अवसाणेवि पढिज्जइ, जेण मओ सुग्गइं जाइ ॥**

**आवइहिंपि पढिज्जइ, जेण य लंघेइ आवइसयाइं । रिद्धीएवि पढिज्जइ, जेण य सा जाइ वित्थारं ॥**

**नवकारइक्कअक्खर, पावं फेडेइ सत्त अयराणं । पन्नासं च पएणं, पंचसयाइं समग्गेणं ॥**

**जो गुणइ लक्खमेगं पूएइ विहीइ जिणनमुक्कारं । तित्थयरनामगोअं, सो बंधइ नत्थि संदेहो ॥**

**अट्ठेव य अट्ठसया, अट्ठसहस्सं च अट्ठकोडीओ । जो गुणइ अट्ठलक्खे, सो तइअभवे लहइ सिद्धिं ॥**

नमस्कारमाहात्म्ये इह लोके श्रेष्ठिपुत्रशिवादयो दृष्टान्ताः । यथा—स द्यूताद्यासक्तो 'विषमे नमस्कारं स्मरेः' इति पित्रा शिक्षितः पितरि मृते व्यसननिर्धनो धनार्थी दुष्टत्रिदण्डिगिरा उत्तरसाधकीभूतः कृष्णचतुर्दशीरात्रौ स्मशाने खड्गपाणिः शबस्याङ्घ्री म्रक्षयन् भीतो नमस्कारं सस्मार, त्रिरुत्थितेनापि शबेन तं प्रत्यप्रभूष्णुना त्रिदण्ड्येव हतः, स्वर्णनरः सिद्धस्तस्य, ततो महर्द्धिः शिवश्चैत्याद्यचीकरत्, इत्यादि । परलोके तु वटशमलिकादयः, यथा सा म्लेच्छबाणविद्धा साधुदत्तनमस्कारात्सिंहलेशस्य मान्यपुत्रीत्वेनोत्पन्ना क्षुतसमयमहेभ्योक्तनमस्काराद्यपदश्रुतेर्जातिस्मरा पञ्चशत्या पोतैरागत्य भृगुपुरे शमलिकाविहारोद्धारकमकारयदित्यादि । तस्मात्सुप्तोत्थितेन पूर्वं नमस्कारः स्मर्त्तव्यः, ततो धर्मजागर्या कार्या । यथा—

**कोहं का मम जाई, किं च कुलदेवया च के गुरुणो । को मह धम्मो के वा, अभिग्गहा का अवत्था मे ॥**

**किं मे कडं किंच मे किच्चसेसं, किं सक्कणिज्जं न समायरामि ।**

**किं मे परो पासइ किं च अप्पा, किं वाहं खलिअं न विवज्जयामि ॥** (दशवैकालिक० चू० २-१२-१३)

एवमद्य का तिथिः ? किं वाऽर्हतां कल्याणकं ? किं वाऽद्य मम कृत्यमित्यादि । अत्र स्वकुलधर्मव्रतादेः स्मरणं भावतः, गुर्वादेस्तु द्रव्यतः, कुत्र देशे पुरे ग्रामे स्थाने वाऽस्मीति क्षेत्रतः, कः कालः प्रभातादिः सम्प्रतीति च कालतः, इदं च सर्वमादिशब्देन सङ्गृहीतम् । एवं स्मरणे हि जीवसावधानत्व-तत्तद्विरुद्धकर्मस्वदोषादिपरिहार-स्वनियमनिर्वाहन-व्यगुणविशेष-धर्मार्जनादयो गुणाः । श्रूयते ह्यानन्दकामदेवाद्यैरपि धर्मजागर्याप्रतिबुद्धैः प्रतिमादिविशेषधर्मकरणादि ।

अथोत्तरार्द्धव्याख्या—"**पडिकमिअत्ति**" ततः चेत् प्रतिक्रामकस्तदा **प्रतिक्रम्य**=रात्रिप्रतिक्रमणं कृत्वा । तद्विधिरग्रे वक्ष्यते । यो न प्रतिक्रामति तेनापि रागादिमयकुस्वप्न-प्रद्वेषादिमयदुःस्वप्नयोरनिष्टसूचकताद्दक्स्वप्नस्य च प्रतिघाताय स्त्रीसेवादिकुस्वप्नोपलम्भेऽष्टोत्तरशतोच्छ्वासमानः कायोत्सर्गः कार्यः, अन्यथा तु शतोच्छ्वासमानः कायोत्सर्गः कार्यः । यदुक्तं व्यवहारभाष्ये—

**पाणिवहमुसावाए, अदत्तमेहुणपरिग्गहे सुमिणे । सयमेगं तु अणूणं, ऊसासाणं झविज्जाहि ॥**

**महव्वयाइं झाइज्जा सिलोगे पंचवीसई । इत्थीविप्परिआसे अ सत्तावीससिलोइओ ॥**

प्राणिवधादिचतुष्के स्वप्ने कृते कारितेऽनुमोदिते च, मैथुने तु कृते द्वितीयगाथोत्तरार्द्धेऽष्टोत्तरशतोच्छ्वासोत्सर्गस्योक्तत्वात्

त्काकारितेऽनुमोदिते च शतमेकमन्यूनमुच्छ्वासानां क्षपयेत् । पञ्चविंशत्युच्छ्वासप्रमाणं चतुर्विंशतिस्तवं चतुरो वारान् ध्यायेदिति भावः। अथवा महाव्रतानि दशवैकालिकश्रुतबद्धानि (अध्य. ४. सू. ३-९) कायोत्सर्गे ध्यायेत् । तेषामपि प्रायः पञ्चविंशति-श्लोकमानत्वात् । यदि वा यान् तान् वा स्वाध्यायभूतान् पञ्चविंशतिश्लोकान् ध्यायेदिति ॥ तद्वृत्तौ आद्यपञ्चाशकवृत्तावपि जातु मोहोदयात् कुस्वप्ने स्त्रीसेवादिरूपे तत्कालमुत्थायेर्यापथप्रतिक्रमणपूर्वकमष्टोत्तरशतोच्छ्वासप्रमाणः कायोत्सर्गः कार्य इति । कायोत्सर्गे कृतेऽपि प्रतिक्रमणवेलाया अर्वाग् बहुनिद्रादिप्रमादे पुनरेवं कायोत्सर्गः क्रियते । जातु दिवापि निद्रायां कुस्वप्नाद्युप-लम्भे एवं कायोत्सर्गः कर्त्तव्यो विभाव्यते, परं तदैव क्रियते सन्ध्याप्रतिक्रमणावसरे वेति निर्णयो बहुश्रुतगम्यः । विवेक-विलासादौ त्वेवमुक्तं—

**सुस्वप्नं प्रेक्ष्य न स्वप्यं कथ्यमह्नि च सद्गुरोः । दुःस्वप्नं पुनरालोक्य कार्यः प्रोक्तविपर्ययः ॥**
**समधातोः प्रशान्तस्य धार्मिकस्यापि नीरुजः । स्यातां पुंसो जिताक्षस्य स्वप्नौ सत्यौ शुभाशुभौ ॥**
**अनुभूतः श्रुतो दृष्टः प्रकृतेश्च विकारजः । स्वभावतः समुद्भूतश्चिन्तासन्ततिसम्भवः ॥**
**देवताद्युपदेशोत्थो धर्मकर्मप्रभावजः । पापोद्रेकसमुत्थश्च स्वप्नः स्यान्नवधा नृणाम् ॥** युग्मम् ।
**प्रकारैरादिमैः षड्भिरशुभश्च शुभोऽपि च । दृष्टो निरर्थकः स्वप्नः सत्यस्तु त्रिभिरुत्तरैः ॥**
**रात्रैश्चतुर्षु यामेषु दृष्टः स्वप्नः फलप्रदः । मासैर्द्वादशभिः षड्भिस्त्रिभिरेकेन च क्रमात् ॥**
**निशाऽन्त्यघटिकायुग्मे दशाहात्फलति ध्रुवम् । दृष्टः सूर्योदये स्वप्नः सद्यः फलति निश्चितम् ॥**

मालास्वप्नोऽह्नि दृष्टश्च तथाऽऽधिव्याधिसम्भवः । मलमूत्रादिपीडोत्थः स्वप्नः सर्वो निरर्थकः ॥

अशुभः प्राक् शुभः पश्चात् शुभो वा प्रागथाशुभः । पाश्चात्यः फलदः स्वप्नो दुःस्वप्ने शान्तिरिष्यते ॥

स्वप्नचिन्तामणिशास्त्रेऽपि—

स्वप्नमनिष्टं दृष्ट्वा सुप्यात्पुनरपि निशामवाप्याथ ।
न कथं कथमपि कथयेत्केषाञ्चित् फलति न स यस्मात् ॥ (१.२१)

उत्थाय जिनं प्रातर्ध्यायति [१]यः स्तौति वाऽथवा स्मरति । पञ्चनमस्कृतिमन्त्रं [२]दुःस्वप्नस्तस्य वितथः स्यात् ॥ (२२)

पूजादीन्यपि रचयेद्देवगुरूणां तपश्च निजशक्त्या । सततं धर्मरतानां दुःस्वप्नो भवति सुस्वप्नः ॥ (२३)

देवगुरूणां स्मरणं नामग्रहणं सुतीर्थसूरीणाम् । विरचय्य स्वपिति यदा न कदाऽप्याप्नोति दुःस्वप्नम् ॥ (१.२५)

निष्ठीवनेन दद्वादेस्ततः कुर्यान्निघर्षणम् । अङ्गदाढ्र्याय पाणिभ्यां वज्रीकरणमाचरेत् ॥

प्रातः प्रथममेवाथ स्वपाणिं दक्षिणं पुमान् । पश्येद्वामं तु वामाक्षी निजपुण्यप्रकाशकम् ॥

मातृप्रभृतिवृद्धानां नमस्कारं करोति यः । तीर्थयात्राफलं तस्य तत्कार्योऽसौ दिने दिने ॥

अनुपासितवृद्धानामसेवितमहीभुजाम् । अवारमुख्यासुहृदां दूरे धर्मार्थतुष्टयः ॥

१. यो वस्तुतोऽपि जिननाथं । २. वितथत्वं रा प्रथयति तस्य ॥

प्रतिक्रामकस्य च प्रत्याख्यानोच्चारात्पूर्वं सच्चित्तादिचतुर्दशनियमग्रहणं स्यात् । अप्रतिक्रामकेनापि सूर्योदयात् प्राक् चतुर्दशनियमग्रहणं यथाशक्ति नमस्कारसहितादि ग्रन्थिसहितादि द्व्यासनैकासनादि यथागृहीतसच्चित्तद्रव्यविकृतिनैयत्यादि-नियमोच्चारणरूपं देशावकाशिकं च कार्यम् ।

विवेकिना हि पूर्वं सद्गुरुपार्श्वे सम्यक्त्वमूलः श्रावकधर्मो यथाशक्ति द्वादशव्रतात्मकः प्रतिपत्तव्यः । तथा सति सर्वाङ्गीणविरतेः सम्भवाद्, विरतेश्च महाफलत्वाद्, अविरतेश्च निगोदादीनामिव मनोवाक्कायव्यापाराभावेऽपि बहुकर्मबन्धादि-महादोषात् । तथा चोक्तं—

**भाविना भविना येन स्वल्पापि विरतिः कृता । स्पृहयन्ति सुरास्तस्मै स्वयं तां कर्तुमक्षमाः ॥**

**अकुर्वन्तोऽपि कवलाहारमेकेन्द्रियाङ्गिनः । यन्नोपवासपुण्याढ्यास्तत्तत्राविरतेः फलम् ॥**

**सावद्यं चित्तवाक्कायैरकुर्वन्तोऽपि जन्मिनः । अनन्तकालमेकाक्षास्तिष्ठन्त्यविरतेः खलु ॥**

**तिरिया कसंकुसारा, निवायवहबंधमारणसयाइं । नेव इहं पावंता, परत्थ जइ निअमिआ हुंता ॥**

अविरतिकर्मोदये हि देवानामिव गुरूपदेशादियोगेऽपि विरतिप्रतिपत्तिः कापि न स्याद्, अत एव श्रेणिकनृपः क्षायिक-सम्यग्दृष्टिरपि श्रीवीरवचःश्रवणादियोगेऽपि काकादिमांसमात्रनियममपि न स्वीचक्रे । अविरतिश्च विरत्या जीयते, विरति-श्चाभ्याससाध्या, अभ्यासादेव हि सर्वक्रियासु कौशलमुन्मीलति । अनुभवसिद्धं चेदं लिखनपठनसङ्ख्यानगाननृत्यादि-

सर्वकलाविज्ञानेषु सर्वेषाम् । उक्तमपि–

**अभ्यासेन क्रियाः सर्वा अभ्यासात् सकलाः कलाः । अभ्यासाद् ध्यानमौनादि किमभ्यासस्य दुष्करम् ? ॥**

निरन्तरं विरतिपरिणामाभ्यासे च प्रेत्याऽपि तदनुवृत्तिः स्यात् । यदुक्तं–

**जं अब्भसेइ जीवो, गुणं च दोसं च एत्थ जम्मम्मि । तं पावइ परलोए, तेण य अब्भासजोएण ॥**

तस्माद् यथेच्छमपि द्वादशव्रतप्रतिबद्धनियमा विवेकिना स्वीकार्याः । अत्र च श्राद्धश्राविकायोग्यमिच्छापरिमाणं सविस्तरं व्याख्येयं, यथा तन्नियमानां सम्यक् परिज्ञानपूर्वं प्रतिपत्तौ भङ्गादिदोषो न स्यात् । नियमाश्च विमर्शपूर्वकं तथैव ग्राह्या यथा निर्वोढुं शक्यन्ते । सर्वेष्वपि नियमेषु च सहसाऽनाभोगाद्याकारचतुष्कं चिन्त्यं,[१] तेनाऽनाभोगादिना नियमितबहुवस्तुग्रहणेऽपि नियमभङ्गो न स्यात्, किन्तु अतिचारमात्रम् । ज्ञात्वा त्वंशमात्रग्रहणेऽपि नियमभङ्ग एव, जातु दुष्कर्मपारवश्येन ज्ञात्वापि भङ्गेऽग्रतो नियमः पाल्य एव धर्मार्थिना । प्रतिपन्नपञ्चमीचतुर्दश्यादितपोदिनेऽपि तिथ्यन्तरभ्रान्त्यादिना सच्चित्तजलपानताम्बूल-भक्षणकियद्भोजनादौ यदा तपोदिनं ज्ञातं तदनु मुखान्तःस्थमपि न गिलति, किन्तु तत्त्यक्त्वा प्रासुकवारिणा मुखशुद्धिं कृत्वा तपोरीत्यैव तिष्ठति, तद्दिने च यदि भ्रान्त्या पूर्णं भुक्तस्तदा द्वितीयदिने दण्डनिमित्तं तत्तपः कार्यं, समाप्तौ च तत्तपो वर्द्धमानं

१. चिन्त्यतेऽना इति को० ह० प्र० पाठः ।

कार्यम्, एवं चातिचार एव स्यान्न तु भङ्गः । तपोदिनज्ञानादनु सिक्थादिमात्रगिलने तु भङ्ग एव नरकादिहेतुः, दिनसंशये कल्प्याकल्प्यसंशये वा कल्प्यग्रहणेऽपि भङ्गादिदोषः, गाढमान्द्ये भूतादिदोषपारवश्ये सर्पदंशाद्यसमाधौ च यदि तत्तपः कर्त्तुं न शक्नोति, तदापि चतुर्थाकारोच्चारान्न भङ्गः । एवं सर्वेषु नियमेष्वपि भाव्यम् । उक्तञ्च–

**वयभंगे गुरुदोसो, थोवस्सवि पालणा गुणकरी अ । गुरूलाघवं च नेअं, धम्मम्मि अओ अ आगारा ॥**

नियमश्च महाफलः, यदि ह्यासन्नकुम्भकृत्खलतिं दृष्टां विना न भोक्ष्ये इति कौतुकमात्रगृहीतोऽपि नियमः श्रेष्ठिकमलस्य निधानार्द्धप्राप्त्या सफलीभूतः, तदा पुण्यार्थं नियमफलं कियदुच्यते ? तथाह–

**योऽपि सोऽपि ध्रुवं ग्राह्यो नियमः पुण्यकाङ्क्षिणा । सोऽल्पोऽप्यनल्पलाभाय कमलश्रेष्ठिनो यथा ॥**

परिग्रहपरिमाणनियमदृढतायां रत्नसारकुमारकथाऽग्रे वक्ष्यते । नियमाश्चैवं ग्राह्या, तत्र पूर्वं तावन्मिथ्यात्वं त्याज्यं, ततो नित्यं यथाशक्ति त्रिर्द्विः सकृद्वा जिनपूजा, जिनदर्शनं, सम्पूर्णदेववन्दनं, चैत्यवन्दना वा कार्येति नियम्यम् । एवं सामग्र्यां गुरोर्बृहल्लघु वा वन्दनम्, सामग्र्यभावे नामग्रहणेन वन्दनं, नित्यं वर्षाचतुर्मास्यां पञ्चपर्व्यादौ वाऽष्टप्रकारा पूजा, यावज्जीवं नव्यान्नपक्वान्न-फलादेर्देवस्य ढौकनं विना अग्रहणं, नित्यं नैवेद्यपूगादेर्ढौकनं, नित्यं चतुर्मासीत्रयवार्षिकदीपोत्सवादौ वा अष्टमङ्गलिकढौकनं, नित्यं पर्वसु वा वर्षमध्ये कियद्वारं वा खाद्यस्वाद्यादिसर्ववस्तूनां देवस्य गुरोश्च प्रदानपूर्वं भोजनं, प्रतिमासं प्रतिवर्षं वा महाध्वजप्रदानादिविस्तरेण स्नात्रमहमहापूजा, रात्रिजागरणादि, नित्यं वर्षासु कियद्वारं वा चैत्यशालाप्रमार्जनसमारचनादि, प्रतिवर्षं

प्रतिमासं वा चैत्येऽङ्गरूक्षण-दीपार्थपूणी-कियद्दीपतैल-चन्दनखण्डादेः, शालायां मुखवस्त्र-जपमाला-प्रोञ्छनक-चरवलकाद्यर्थं कियद्वस्त्रसूत्रकम्बलोर्णादेश्च मोचनं, वर्षासु श्राद्धादीनामुपवेशनार्थं कियत्पट्टिकादेः कारणं, प्रतिवर्षं सूत्रादिनाऽपि सङ्घपूजा कियत्साधर्मिकवात्सल्यादि च, प्रत्यहं कियान् कायोत्सर्गः, स्वाध्यायत्रिशत्यादिगुणनं, नित्यं दिवा नमस्कारसहितादे रात्रौ दिवसचरमस्य च प्रत्याख्यानस्य करणं, द्विप्रतिक्रमणादि चादौ नियमनीयानि ।

ततो यथाशक्ति द्वादशव्रतस्वीकारः, तत्र च सप्तमव्रते सचित्ताचित्तमिश्रव्यक्तिः सम्यग् ज्ञेयः । यथा प्रायः सर्वाणि धान्यानि धाननक-जीरकाजमक-विरहाली-सोआ-राई-खसखस-प्रभृतिसर्वकणाः, सर्वाणि फलपत्राणि, लवण-खारी-क्षारक-रक्तसैन्ध-व-सञ्चलादिरकृत्रिमः क्षारो, मृत्-खटी-वर्णिकादिः आर्द्रदन्तकाष्ठादि च व्यवहारतः सचित्तानि । जलेन क्लेदिताश्चणकगोधूमादि-कणाश्चणकमुद्गादिदालयश्च क्लिन्ना अपि क्वचिन्नखिकासम्भवान्मिश्राः, तथा पूर्वं लवणादिप्रदानं बाष्पादिप्रदानं वालुकाक्षेपं वा विना सेकिताश्चणका गोधूमयुगन्धर्यादिधानाः, क्षारादिप्रदानं विना लोलिततिला, ओलक-डंबिका-पृथुक-सेकित-फलिका-पर्पटिकादयो मरिच-राजिका-वघारादिमात्रसंस्कृतचिर्भटिकादीनि सचित्तान्तर्बीजानि सर्वपक्वफलानि च मिश्राणि । यद्दिने तिलकुट्टिः कृता तद्दिने मिश्रा, मध्येऽन्न-रौट्टिकादिक्षेपे तु मुहूर्त्तादनु प्रासुका, दक्षिणमालवादौ प्रभूततरगुडक्षेपेण तद्दिनेऽपि तस्याः प्रासुकत्वव्यवहारः । वृक्षात्तत्कालगृहीतं गुन्द-लाक्षा-छल्ल्यादि, तात्कालिको नालिकेर-निम्बक-निम्बाऽऽम्रेक्ष्वादीनां रसः तात्कालिकं तिलादितैलं, तत्कालभग्नं निर्बीजीकृतं नालिकेर-शृङ्गाटक-पूगीफलादि, निर्बीजकृतानि पक्वफलानि,

गाढमर्दितं निष्कणं जीरकाजमकादि च मुहूर्तं यावन्मिश्राणि, मुहूर्तादूर्ध्वं तु प्रासुकानीति व्यवहृतिः । अन्यदपि प्रबलाग्नियोगं विना यत्प्रासुकीकृतं स्यात् तन्मुहूर्तावधि मिश्रं तदनु प्रासुकं व्यवह्रियते, यथा प्रासुकनीरादि, तथा कच्चफलानि कच्चधान्यानि गाढं मर्दितमपि लवणादि च प्रायोऽग्न्यादिप्रबलशस्त्रं विना न प्रासुकानि । यदुक्तं श्रीपञ्चमाङ्गे अयमर्थ एकोनविंशे शते तृतीयोद्देशके सूत्र-३२ ''वज्रमय्यां शिलायां स्वल्पपृथ्वीकायस्य वज्रलोष्टकेनैकविंशतिवारान् पेषणे सन्त्येके केचन जीवा ये स्पृष्टा अपि नेति ।'' योजनशतात्परत आगतानि हरीतकी-खारिकि-किसिमिसि-द्राक्षा-खजूर-मरिच-पिप्पली-जातिफल-बदाम-वायम-अखोडन-मिजां-जरगोजां-पिस्तां-चणीकबावा-स्फटिकानुकारिसैन्धवादीनि, सज्जिकाबिडलवणादिः कृत्रिमः क्षारः, कुम्भकारादिपरिकर्मितमृदादिकम्, एला-लवंग-जावित्री-शुष्क-मुस्ता-कोंकणादिपक्वकदलीफलानि, उत्कालित-शृङ्गाटकपूगादीनि च प्रासुकानीति व्यवहारो दृश्यते। उक्तमपि श्रीकल्पे –

**जोअणसयं तु गंतुं, अणहारे तुण्ण भंडसंकती । वायागणिधूमेण य, विद्धत्थं होइ लोणाई ॥** (भा० ९७३)

लवणादिकं स्वस्थानात् गच्छत् प्रत्यहं बहुबहुतरादिक्रमेण विध्वस्यमानं योजनशतात्परतो गत्वा सर्वथैव विध्वस्तमचित्तं भवति । ***आह***-शस्त्राभावे योजनशतगमनमात्रेणैव कथमचित्तीभवतीत्याह, अनाहारेण यस्य यदुत्पत्तिदेशादिकं साधारणं तत्ततो व्यवच्छिन्नं स्वोपष्ठम्भकाहारविच्छेदाद्विध्वस्यते, तच्च लवणादिकं भाण्डसङ्क्रान्त्या पूर्वस्मात्पूर्वस्माद् भाजनादपरभाजनेषु, यद्वा पूर्वस्या भाण्डशालाया अपरस्यां भाण्डशालायां सङ्क्रम्यमाणं विध्वस्यते । तथा वातेन वाऽग्निना वा महानसादौ धूमेन वा

लवणादिकं विध्वस्तं भवति । **लोणाई** इत्यत्राऽऽदिशब्दादमी द्रष्टव्या—

**हरिआल मणोसिल पिप्पली अ खज्जू रमुद्दिया अभया । आईन्नमणाइन्ना, ते वि हु एमेव नायव्वा ॥** (व्य.भा. ९७४)

हरितालं मनःशिला पिप्पली च खर्जूरः । एते प्रतीताः, मुद्रिका-द्राक्षा, अभया-हरीतकी, एतेऽप्येवमेव लवणवद् योजनशतगमनादिभिः कारणैरचित्तीभवन्तो ज्ञातव्याः, परमेकेऽत्राऽऽचीर्णा अपरेऽनाचीर्णाः, तत्र पिप्पलीहरीतकीप्रभृतय आचीर्णा इति गृह्यन्ते, खर्जूरमुद्रिकादयः पुनरनाचीर्णा इति न गृह्यन्ते ।

**आरुहणे ओरुहणे निसिअण गोणाइणं च गाउम्हा । भुम्माहारच्छेए, उवक्कमेणं च परिणामो ॥** (व्य.भा. ९७५)

शकटे गवादिपृष्टेषु च लवणादीनां यद्भूयो भूय आरोहणमवरोहणं च, तथा यत्तस्मिन् शकटादौ लवणादिभारोपरि मनुष्या निषीदन्ति, तेषां गवादीनां च यः कोऽपि पृष्ठादिगात्रोष्मा तेन वा परिणामो भवति, तथा यो यस्य भौमादिकः पृथिव्यादिकः आहारः[1] तद्व्यवच्छेदे तस्य परिणामः उपक्रमः शस्त्रं, तच्च त्रिधा, स्वकायपरकायतदुभयरूपं, तत्र स्वकायशस्त्रं यथा लवणोदकं मधुरोदकस्य, कृष्णभूमिर्वा पाण्डुभूमेः, परकायशस्त्रं यथाऽग्निरुदकस्य, उदकं चाग्नेरिति, तदुभयशस्त्रं यथा उदकमृत्तिका शुद्धोदकस्येत्यादि । एवमादीनि सचित्तवस्तूनां परिणमनकारणानि मन्तव्यानि ।

१. आहारः स इति को० ह० प्र० पाठः ।

**उप्पलपउमाइं पुण, उण्हे दिन्नाइं जाम न धरिंती । मोग्गरगजूहिआओ, उण्हे छुढा चिरं हुंति ॥**

**मगदंतिअपुप्फाईं, उदए छूढाइं जाम न धरिंती । उप्पलपउमाइं पुण, उदए छूढा चिरं हुंति ॥** (व्य.भा. ९७८-९७९)

उत्पलानि पद्मानि च उदकयोनिकत्वादुष्णे आतपे दत्तानि यामं प्रहरमात्रं कालं न ध्रियन्ते-नावतिष्ठन्ते, किन्तु प्रहरादर्वागेवाऽचित्तीभवन्ति । मोगरकाणि-मृगदन्तिकापुष्पाणि यूथिकापुष्पाणि चोष्णयोनिकत्वादुष्णे क्षिप्तानि चिरमपि कालं भवन्ति, सचित्तान्येव तिष्ठन्तीति भावः । मृगदन्तिकापुष्पाणि उदके क्षिप्तानि यामं प्रहरमपि न ध्रियन्ते, उत्पलपद्मानि पुनरुदके क्षिप्तानि चिरमपि भवन्ति ।

**पत्ताणं पुप्फाणं, सरडुफलाणं तहेव हरियाणं । विंटम्मि मिलाणंमी, नायव्वं जीवविप्पजढं ॥** (व्य.भा. ९८०)

पत्राणां पुष्पाणां सरडुफलानामबद्धास्थिकफलानां, तथैव हरितानां वास्तुलादीनां सामान्यतस्तरुणवनस्पतीनां वा वृन्ते मूलनाले म्लाने सति ज्ञातव्यं जीवविप्रयुक्तमेतत् पत्रादिकमिति श्रीकल्पवृत्तौ । शाल्यादिधान्यानां तु श्रीपञ्चमाङ्गे षष्ठशते [१]सप्तमोद्देशके सचिताचित्तत्वविभाग एवमुक्तः— (सूत्र-१)

**अह भन्ते ! सालीणं वीहीणं गोहूमाणं जवाणं जवजवाणं एएसि णं धन्नाणं कोठाउत्ताणं पल्लाउत्ताणं मंचाउत्ताणं मालाउत्ताणं**

१. पञ्चमोद्देशके इति को० ह० प्र० पाठः ।

**उल्लित्ताणं लित्ताणं पिहिआणं मुदिआणं लंछिआणं केवइअं कालं जोणी संचिट्ठइ, गोयमा ! जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं तिन्नि संवच्छराइं, तेण परं जोणीपमिला( ली )इ विद्धंसइ बीए अबीए भवति।'** तेण परं जोणीवोच्छेदे पव्वत्ते समणीउसो ! —

'सालीणंति' कलमादीनां 'वीहीणंति' सामान्यतः 'जवजवाणंति' यवविशेषाणां, पल्यो वंशादिमयः मञ्चमालयोरयं भेदः, **'अकुट्टो होइ मंचो मालो अ घरोवरिं होइ ।'** अयुक्तानां सङ्गृहीतानां, द्वारदेशे पिधानेन सह गोमयादिनाऽवलिप्तानां सर्वतो गोमयादिनैव लिप्तानां, मुद्रितानां तथाविधाच्छादनेनाच्छादितानां, लाञ्छितानां रेखादिना कृतलाञ्छनानां, योनिरङ्कुरोत्पत्तिहेतुः । एवं

**अह भन्ते ! कलाय-मसूर-तिल-मुग्ग-मास-निप्फाव-कुलत्थ-अलिसंदग-सईणपलिमंथ-गमाईणं एएसि णं धन्नाणं, जहा सालीणं तहा एआणवि । नवरं पंच संवच्छराइं सेसं तं चेव ।** (भगवती शतक-६-उद्देश-७ सूत्र-२ (भा० २-पत्र ३२०)

कलायास्त्रिपुटाख्यं धान्यं, अन्त्यधान्यत्रयं चपलकतुवरीवृत्तचणकरूपं सम्भाव्यते । अग्रे गाथासु तथोक्तेः ।

**अह भन्ते ! अयसि-कुसुंभग-कोद्दव-कंगु-वरट्ट-रालाग-कोडू-सग-सण-सरिसव-मूलबीआईणं धन्नाणं, तहेव नवरं सत्त संवच्छराइं ।** (भग० ६-७-३) (२-३२०)

अत्र पूर्वसूरिकृता गाथा यथा—

**जव-जवजव-गोहुम-सालि-वीहि-धण्णाण कुट्ठयाईसु । खिविआणं उक्कोसं, वरसतिगं होइ सजीवत्तं ॥**

**तिल-मुग्ग-मसूर-कलाय-मास-चवलय-कुलत्थ-तुवरीण । तह वट्ट-चणय-वल्लाण वरिसपणगं सजीवत्तं ॥**

**अयसी-लट्टा-कंगू-कोडूसग-सणवरट्टसिद्धत्था । कुद्दव-रालय-मूलगबीआणं सत्तवरिसाणि ॥**

कर्पासस्य चाऽचित्तता त्रिवर्ष्यां स्यात्, यदुक्तं श्रीकल्पबृहद्भाष्ये–'**सेडुगं तिवरिसाइं** ।' गिण्हंति सेडुगं त्रिवर्षातीतं विध्वस्तयोनिकमेव गृहीतुं कल्पते, सेडुकः कर्पास इति तद्वृत्तौ, पिष्टस्य तु मिश्रतादि एवमुक्तं पूर्वसूरिभिः-

**पणदिणमीसो लुट्टो, अचालिओ सावणे अ भद्दवए । चउ आसोए कत्तिअ, मगसिरपोसे तिन्नि दिणा ॥**

**पणपहर माहफग्गुणि, पहरा चत्तारि चित्तवइसाहे । जिट्ठासाढे तिपहरं तेण परिं होइ अचित्तो ॥**

चालितं तु पिष्टं मुहूर्त्तादुर्ध्वमचित्तम् । ***ननु*** पिष्टाद्यचित्तीभूतं कियद्दिनान्यचित्तभोजिनः कल्पते ? उच्यते, नात्र दिननियमः सिद्धान्ते श्रूयते, परं नव्यजीर्णकणादिद्रव्य-सरसनीरसादिक्षेत्र-वर्षाशीतोष्णादिकाल-तत्तत्परिणामादिभावविशेषेण पक्षमा-साद्यवधियावद्वर्णगन्धरसादिविपरिणाम इलिकादिजीवसंसक्तिश्च न स्यात्तावत्कल्पते । साधूनाश्रित्य सक्तुयतना कल्पवृत्तितुर्यखण्डे त्वेवमुक्ता- यत्र देशादौ सक्तूनां संसक्तिः तत्र ते न ग्राह्या, अनिर्वाहे तद्दिनकृता ग्राह्याः, तथाप्यनिर्वाहे द्वित्रिदिनकृताः पृथक् पृथग् ग्राह्याः, चतुर्दिनकृतादयस्तु सर्वेऽप्येकत्र ग्राह्याः, तेषामयं विधिः–रजस्त्राणमधः प्रस्तार्य तस्योपरि पात्रकम्बलं कृत्वा तत्र सक्तवः प्रकीर्यन्ते, तत ऊर्ध्वमुखं पात्रकबन्धं कृत्वा एकस्मिन् पार्श्वे नीत्वा यास्तत्रोरणिका लग्नास्ता उद्धृत्य कर्परे क्षिप्यन्ते,

एवं नव वारान् प्रत्युपेक्षणे यदि न दृष्टाः प्राणिनस्तदा भोक्तव्यास्ते, अथ दृष्टास्तदा पुनर्नव वारान् प्रत्युपेक्ष्यास्तथापि चेद् दृष्टास्ततः पुनर्नव वारानेवं शुद्धा भोज्याः, अथ न शुद्धास्तदा परिष्ठाप्याः, असंस्तरणे तु तावत्प्रत्युपेक्ष्यन्ते, यावच्छुद्धाः स्युः, ऊरणिकाश्च घरट्टादिपार्श्वस्थप्रभूततुषरूपे आकारे तदभावे कर्परादौ स्तोकसक्तून् क्षिप्त्वाऽनाबाधप्रदेशे स्थाप्यन्त इति । पक्वान्नाद्याश्रित्य चैवमुक्तं—

**वासासु पनरदिवसं सीउण्हकालेसु मासदिणवीसं । ओगाहिमं जईणं, कप्पइ आरब्भ पढमदिणा ॥**

केचित्त्वस्या गाथाया अलभ्यमानस्थानत्वं वदन्तो यावद् गन्धरसादिना न विनश्यति तावदवगाहिमं शुध्यतीत्याहुः ।

**जइ मुग्गमासपभिई, विदलं कच्चंमि गोरसे पडइ । ता तसजीवुप्पत्तिं, भणति दहिएवि दुदिणुवरिं ॥**

'तिदिणुवरिं' इति पाठस्तु सम्यग् न सम्भाव्यते,[1] **'दध्यहर्द्वितयातीतम्'** इति हैमवचनात् ।

**जम्मि उ पिलिज्जंते, नेहो नहु होइ बिंति तं विदलं । विदले वि हु उप्पन्नं, नेहजुअं होइ नो विदलं ॥**

पर्युषितं द्विदल-पूपिकादि-केवलजलराद्धकूरादि तथान्यदपि सर्वं कुथितान्नं पुष्पितौदनपक्वान्नादि चाभक्ष्यत्वेन वर्जनीयं, द्वाविंशत्यभक्ष्यद्वात्रिंशदनन्तकायव्यक्तिस्वरूपं मत्कृतश्राद्धप्रतिक्रमणसूत्रवृत्तेर्ज्ञेयम् । विवेकिना चाऽभक्ष्यवद् बहुबीजजीवा-

१. सम्यक् सम्भाव्यते इति को० ह० प्र० पाठः ।

कुलत्वादिना रिंगणकाय-माटी-टिंबरु-जम्बू-बिल्वार्द्रपीलु-पक्वकरमन्द-गुन्दी-फल-पिंचू-मधूक-मकुर-वाल्हउलि-बृहद्बदरक-कच्चकुठिंभड-खसखस-तिल-सच्चित्तलवणाद्यपि वर्ज्यं, यच्च रक्ताद्यनीदृशच्छायं पक्वगोल्हककंकोडकफणसफलादि, यच्च यत्र देशादौ जने विरुद्धं [1]कादन्तुबक-कुष्माण्डादि तत्र तदपि त्याज्यमन्यथा जिनधर्मेऽपभ्राजनाद्यापत्तेः । अभक्ष्यानन्तकायिके तु परगृहादौ प्रासुकभूते अपि न ग्राह्ये, निःशूकताप्रसङ्गवृद्ध्यादिदोषसम्भवात्, अत एवोत्कालिकसेल्लरकं राद्धार्द्रकसूरणवृन्ताकादि प्रासुकमपि सर्वं वर्ज्यं, प्रसङ्गदोषपरिहाराय, मूलकस्तु पञ्चाङ्गोऽपि त्याज्यः, शुण्ठ्यादि तु नामस्वादभेदादिना कल्पते, उष्णनीरं तु त्रिदण्डोत्कलनावधि मिश्रम् । यदुक्तं पिण्डनिर्युक्तौ–

**उसिणोदगमणुवत्ते, दंडे वासे अ पडिअमित्तम्मि । मुत्तूणादेसतिगं, चाउलउदगऽबहु पसन्नं ॥** (२८)

अनुद्वृत्तेषु त्रिषु दण्डेषु उत्कालेषु जलमुष्णं मिश्रं ततः परमचित्तं, तथा वर्षे वृष्टौ पतितमात्रायां ग्रामादिषु प्रभूत-मनुष्यप्रचारभूमौ यज्जलं तद्यावन्न परिणमति तावन्मिश्रं, अरण्यभूमौ तु यत् प्रथमं पतति तत् पतितमात्रं मिश्रं पश्चान्नि-पतत्सच्चित्तं, आदेशत्रिकं मुक्त्वा तन्दुलोदकमबहुप्रसन्नं मिश्रं, अतिस्वच्छीभूतं त्वचित्तं, अत्र त्रय आदेशा यथा केचिद्वदन्ति, तन्दुलोदके तन्दुलप्रक्षालनभाण्डादन्यत्र भाण्डे क्षिप्यमाणे त्रुटित्वा भाण्डपार्श्वे लग्ना बिन्दवो यावन्न शाम्यन्ति तावन्मिश्रम् ।

१. कटुतुम्बक इति को० ह० प्र० पाठः ।

अपरे तु तथैव जाता यावद् बुद्बुदा न शाम्यन्ति तावत् । अन्येतु यावत्तन्दुला न सिध्यन्ति तावत्, एते त्रयोऽप्यनादेशा, रूक्षेतरभाण्डपवनाऽग्निसम्भवाऽसम्भवादिभिरेषु कालनियमस्याऽभावात्ततोऽतिस्वच्छीभूतमेवाचित्तम् ।

**निव्वोदगस्स गहणं, केई भाणेसु असुइपडिसेहो । गिहिभायणेसु गहणं, ठिअवासे मीसगं छारो ॥**

नीव्रोदकं हि धूमधूम्रीकृतदिनकरकरसम्पर्कसोष्मनीव्रसम्पर्कादचित्तमतस्तद्ग्रहणे न काचिद्विराधना । केचिदाहुः स्वभाजनेषु तद् ग्राह्यम्, अत्राचार्यः प्राह-अशुचित्वात् स्वपात्रेषु ग्रहणस्य प्रतिषेधः, ततो गृहीभाजने कुण्डिकादौ ग्राह्यं, वर्षति मेघे च तन्मिश्रं, ततः स्थिते वर्षेऽन्तर्मुहूर्त्तादूर्ध्वं ग्राह्यं, जलं हि केवलं प्रासुकीभूतमपि प्रहरत्रयादूर्ध्वं भूयः सचित्तं स्यादतस्तन्मध्ये क्षारः क्षिप्यते, एवं च स्वच्छतापि स्यादिति पिण्डनिर्युक्तिवृत्तौ । तन्दुलानां धावनोदकानि प्रथमद्वितीयतृतीयानि अचिरकृतानि मिश्राणि, चिरं तिष्ठन्ति त्वचित्तानि, चतुर्थादिधावनानि तु चिरं स्थितान्यपि सचित्तानि । प्रासुकजलादिकालमानमेवमुक्तं प्रवचनसारोद्धारादौ—

**उसिणोदगं [१]तिण्हुक्कालिअं फासुअजलं जइकप्पं । नवरि गिलाणाइकए पहरतिगोवरिवि धरियव्वं ॥**

**जायइ सचित्तया से गिम्हासु पहरपंचगस्सुवरिं । चउपहरूवरिं सिसिरे, वासासु पुणो तिपहरूवरिं ॥**

१. तिगंडुक्क इति को० ह० प्र० पाठः । मुद्रितेऽपि ।

जायते सचित्तता से=तस्योष्णोदकस्य प्रासुकजलस्य वा ग्लानाद्यर्थं धृतस्य ग्रीष्मे प्रहरपञ्चकस्योपरि प्रहरपञ्चकादूर्ध्वं कालस्यातिरूक्षत्वाच्चिरेणैव जीवसंसक्तिसद्भावात्, तथा शिशिरे शीतकाले कालस्य स्निग्धत्वात्प्रहरचतुष्टयादूर्ध्वं सचित्तता स्यात् । वर्षासु पुनः कालस्यातिस्निग्धत्वात्प्रासुकीभूतमपि जलं प्रहरत्रयादूर्ध्वं सचित्तं, तदूर्ध्वमपि यदि ध्रियते, तदा क्षारः प्रक्षेप्यो, येन न भूयः सचित्तं स्यादिति । १३६ द्वारे[१] । यश्चाप्कायादिः स्वभावादेवाचित्तीस्यान्न बाह्यशस्त्रसम्बन्धात्तमचित्तं जानाना अपि केवलमनःपर्यायावधिश्रुतज्ञानिनो न परिभुञ्जतेऽनवस्थाप्रसङ्गभीरुतया । यतः श्रूयते भगवता श्रीवर्द्धमानेन शैवलपटल-त्रसादिरहितो महाह्रदोऽचित्तवारिपूर्णः स्वशिष्याणां तृड्बाधितानां प्राणान्तसङ्कटेऽपि पानाय नाऽनुजज्ञे, एवं क्षुधाशरीरचिन्तया च बाधितानामप्यचित्ततिलशकटाचित्तस्थण्डिलपरिभोगानुज्ञा न कृता, अनवस्थादोषसंरक्षणार्थं श्रुतज्ञानप्रामाण्यज्ञापनार्थं च, तथाहि-न सामान्यश्रुतज्ञानी बाह्यशस्त्रसम्पर्कं विना जलाद्यचित्तमिति व्यवहरति, अतो बाह्यशस्त्रसंपर्काद्वर्णादिभिः परिणामान्तरापन्नमेव जलाद्यचित्तं व्यापार्यम् । कङ्कटुकमुद्ग-हरीतकी-कुलकादिरचेतनोऽप्यविनष्टयोनिरक्षणार्थं निःशूकतादिपरिहारार्थं च दन्तादिभिर्न भज्यते । यदुक्तं श्रीओघनिर्युक्तौ पञ्चसप्ततितमगाथावृत्तौ-''ननु कस्मादचित्तवनस्पतियतना ? उच्यते, यद्यप्यचित्तस्तथापि केषाञ्चिद्वनस्पतीनामविनष्टा योनिः स्यात् गुडूचीमुद्गादीनां, तथाहि-गुडूची शुष्काऽपि जलसेकात्तादात्म्यं भजन्ती दृश्यते, एवं कङ्कुटुकमुद्गादिरपि, अतो योनिरक्षणार्थमचेतनयतनाऽपि न्यायवत्येवेति ।'' एवं सचित्ताचित्तादिव्यक्तिं ज्ञात्वा सप्तमं व्रतं नाम-

१. १३६ इति को० ह० प्र० पाठः ।

ग्राहं सचित्तादिसर्वभोग्यवस्तुनैयत्यकरणादिना स्वीकार्यं, यथा आनन्दकामदेवादिभिः । तथासङ्क्षेपाशक्तौ तु सामान्यतो दिनं प्रति एकद्व्यादिसचित्त-दशद्वादशादिद्रव्यैकद्व्यादिविकृत्यादिनियमं कुर्यात्, परं दिनं प्रति एकसचित्ताभिग्रहिणोऽप्येवं नियमग्रहणे पृथक् पृथक् दिनेषु परावर्त्तेन सर्वसचित्तग्रहणमपि स्यात्, तथा च न विशेषविरतिः, नामग्राहं सचित्तनैयत्याभिग्रहे तु तदन्यसर्वसचित्त-निषेधरूपं यावज्जीवं स्पष्टमेवाधिकं फलम् उक्तञ्च–

**पुप्फफलाणं च रसं, सुराइमंसाण महिलिआणं च । जाणंता जे विरिया, ते दुक्करकारए वंदे ॥**

सचित्तेषु च सर्वेष्वपि नागवल्लीदलान्येव दुस्त्यजानि, शेषसचित्तानां प्रायः सर्वेषां प्रासुकीभवनेऽपि स्वादुतादियोगाद्विशिष्य चाम्रादीनां, नागवल्लीदलेषु च निरन्तरं जलक्लेदादिना नीलीकुन्थ्वण्डकादिविराधना भूयसी, तत एव तानि पापभीरवो रात्रौ न व्यापारयन्ति, येऽपि व्यापारयन्ति तेऽपि सम्यग् दिवा संशोध्यैव, ब्रह्मचारिणा तु विशिष्य तानि त्याज्यानि कामाङ्गत्वात्तेषां, प्रत्येकसचित्तेऽप्येकस्मिन् पत्रफलादावसङ्ख्यजीवविराधनासम्भवः । यदागमः–

**जं भणिअं पज्जत्तग निस्साए वुक्कमंतऽपज्जता । जत्थेगो पज्जत्तो, तत्थ असंखा अपज्जत्ता ॥**

बादरेष्वेकेन्द्रियेष्वेवमुक्तं, सूक्ष्मेषु तु यत्रैकोऽपर्याप्तः तत्र तन्निश्रया नियमादसङ्ख्याः पर्याप्ताः स्युरित्याचाराङ्गवृत्त्यादौ प्रोक्तम् । एवमेकस्मिन्नपि पत्रादावसङ्ख्या जीवा विराध्यन्ते, तदाश्रितजलनील्यादिसम्भवे त्वनन्ता अपि । जललवणादि चासङ्ख्यजीवात्मकमेव । यदार्षं–

**एगम्मि उदगबिंदुम्मि, जे जीवा जिणवरेहिं पन्नत्ता । ते जइ सरसवमित्ता, जंबूद्दीवे न मायंति ॥**

**अद्धामलगपमाणे, पुढवीक्काए हवंति जे जीवा । ते पारेवयमित्ता, जंबूद्दीवे न मायंति ॥**

सर्वसचित्तत्यागे च अम्बडपरिव्राजकसप्तशतीशिष्यज्ञातम् । ते हि स्वीकृतश्राद्धधर्माः प्रासुकपरदत्तान्नपानभोजिनो ग्रीष्मे गङ्गोपकण्ठेऽटव्यामटन्तोऽतितृषार्त्ताः सचित्तमदत्तं च जलं सर्वथा न गृह्णीम इति दृढनियमा अनशनेन ब्रह्मलोके इन्द्रसमाः सुरा जज्ञिरे, एवं सचित्तत्यागे यतनीयम् । येन च चतुर्दश नियमाः प्राक् स्वीकृताः स्युः, तेन प्रत्यहं ते सङ्क्षेप्या, यथाशक्ति अन्येन वा ग्राह्याः । ते चैवमुक्ताः—

**सचित्त-दव्व-विगई-वाणह-तंबोल-वत्थ-कुसुमेसु । वाहण-सयण-विलेवण-बंभ-दिसि-न्हाण-भत्तेसु ॥**

मुख्यवृत्त्या सुश्रावकेण सचित्तं सर्वथा त्याज्यं, तदशक्तौ नामग्राहं सामान्यतो वा एकद्व्यादि तन्नियम्यम् । यदुक्तं-

**निरवज्जाहारेणं, निज्जीयेणं परित्तमीसेणं । अत्ताणुसंधणपरा सुसावगा एरिसा हुंति ॥**

**सचित्तनिमित्तेणं मच्छा गच्छंति सत्तमिं पुढविं । सच्चित्तो आहारो, न खमो मणसावि पत्थेउं ॥**

इति सचित्तविकृतिवर्जं यन्मुखे क्षिप्यते तत्सर्वं द्रव्यं, क्षिप्रक्षिप्रा-रोट्टिका-निविकृतिकमोदक-लपनेप्सिता-पर्पटिका-चूरिम-करम्ब-क्षैरेय्यादिकं बहुधान्यादिनिष्पन्नमपि परिणामान्तराद्यापत्तेरेकैकमेव द्रव्यं, एकधान्यनिष्पन्नान्यपि पोलिका-स्थूलरोट्टक-मण्डक-खाखरक-घूघरी-ढोक्कलक-थूली-बाट-कणिक्कादीनि पृथक् पृथग् नामास्वादवत्त्वेन पृथक् पृथग् द्रव्याणि,

फली-फलिकादौ तु नामैक्येऽपि भिन्नभिन्नस्वादव्यक्तेः परिणामान्तराभावाच्च बहुद्रव्यत्वम् । अन्यथा वा विवक्षासम्प्रदायादि-वशाद् द्रव्याणि गणनीयानि, धातुमयशलाका-कराङ्गुल्यादिकं द्रव्यमध्ये न गणयन्ति २। विकृतयो भक्ष्याः षट्, दुग्ध-दधि-घृत-तैल-गुड-सर्वपक्वान्नभेदात् ३। वाणहत्ति उपानद्युग्मं, मोचकयुग्मं वा, काष्ठपादुकादिस्तु बहुविराधनादिहेतुः श्राद्धस्य न युज्यते। ताम्बूलं पत्र-पूग-खदिरवटिका-कत्थकादिस्वादिमरूपं ५। वस्त्रं पञ्चाङ्गादिर्वेषः, धौतिकपौतिकरात्रिवस्त्रादि वेषे न गण्यते ६। कुसुमानि शिरःकण्ठक्षेपशय्योच्छीर्षकाद्यर्हाणि, तन्नियमेऽपि देवपूजादौ[1] कल्पन्ते ७। वाहनं रथाऽश्व-पौष्ठिक-सुखासनादि ८। शयनं खट्वादि ९। विलेपनं भोगार्थं चन्दनजबाधिचोअक-कस्तूर्यादि, तन्नियमेऽपि देवपूजादौ तिलकहस्तकङ्कणधूपनादि कल्पते १०। ब्रह्म दिवा रात्रौ वा पत्न्याद्याश्रित्य ११। दिक्परिमाणं सर्वतोऽमुकदिशि वा इयत्क्रोशयोजनाद्यवधिकरणं १२। स्नानं तैलाभ्यङ्गादिपूर्वकं । भक्तं राद्धधान्य-सुखभक्षिकादि सर्वं त्रिचतुःसेरादिमितं, खडबूजादिग्रहणे बहवोऽपि सेराः स्युः १४।

इह सचित्तवद् द्रव्यादीनामपि व्यक्त्या नामग्राहं सामान्येन वा यथाशक्ति युक्तिनैयत्यं कार्यं । उपलक्षणत्वादन्येऽपि शाकफलधानादिप्रमाणारम्भनैयत्यादिनियमा यथाशक्ति ग्राह्याः । एवं नियमग्रहणानन्तरं यथाशक्ति प्रत्याख्यानं कार्यम् ।

तत्र नमस्कारसहितपौरुष्यादिकालप्रत्याख्यानं सूर्योदयात्प्राग् यद्युच्चार्यते तदा शुध्यति नान्यथा । शेषप्रत्याख्यानानि सूर्यो-

१. देवशेषाः कल्पन्ते इति को० ह० प्र० पाठः ।

दयात् पश्चादपि क्रियन्ते । नमस्कारसहितं च यदि सूर्योदयात् प्रागुच्चारितं तदा [१]तत्पूर्तेरन्यदपि पौरुष्यादिकालप्रत्याख्यानं सर्वं क्रियते स्वस्वावधिमध्ये । नमस्कारसहितोच्चारं विना सूर्योदयादनु कालप्रत्याख्यानं न शुद्ध्यति यदि दिनोदयात्प्राग् नमस्कारसहितं विना पौरुष्यादि कृतं तदा तत्पूर्तेरूर्ध्वमपरं कालप्रत्याख्यानं न शुध्यति, तन्मध्ये तु शुध्यतीति वृद्धव्यवहारः । नमस्कारसहितस्य मुहूर्तप्रमाणत्वमल्पाकारत्वादेव लभ्यते, मुहूर्तानन्तरमपि नमस्कारपाठं विना भोजनेऽस्य भङ्ग एव नमस्कार-सहितेत्युच्चारणात् । प्रमादपरिजिहीर्षोर्हि प्रत्याख्यानं विना न युक्तं क्षणमप्यासितुमिति । नमस्कारसहितादिकालप्रत्याख्यानपूर्ति-समये ग्रन्थिसहितादि कार्यं, ग्रन्थिसहितं च बहुवारौषधादिभोजिनां बालग्लानादीनामपि सुसाध्यं,[२] नित्यम-प्रमत्ततानिमित्ततया च महाफलं, सकृत् कृतग्रन्थिसहितमात्रकपर्दियक्षीभूतमांसमद्याद्यासक्तकुविन्दादेरिव । उक्तञ्च–

**जे निच्चमप्पमत्ता, गंठिं बंधंति गंठिसहिअस्स । सग्गापवग्गसुक्खं तेहिं निबद्धं सगंठिम्मि ॥**

**भणिऊण नमुक्कारं, निच्चं विस्सरणवज्जिअं धन्ना । पारंति गंठिसहियं गंठिसह कम्मगंठिहिं ॥**

**इअ कुणइ ए अब्भास अब्भासं सिवपुरस्स जइ महसि । अणसणसरिसं पुण्णं, वयंति एअस्स समयन्नू ॥**

रात्रिचतुर्विधाहारपरिहार-स्थानोपवेशनपूर्वकताम्बूलादिव्यापारण-मुखशुद्धिकरणादिविधीनां ग्रन्थिसहितप्रत्याख्यानपालनेन

१. तत्पूर्तेरन्वपि इति को० ह० प्र० पाठः । २. सुसाधम् इति को० ह० प्र० पाठः ।

एकवारभोजिनः प्रतिमासमेकोनत्रिंशद्, द्विवारभोजिनस्त्वष्टाविंशतिर्निर्जला उपवासाः स्युरिति वृद्धाः । भोजनताम्बूलजल-व्यापारणादौ हि प्रत्यहं घटीद्वयघटीद्वयसम्भवे मासे एकोनत्रिंशत्, घटीचतुष्टयघटीचतुष्टयसम्भवे त्वष्टाविंशतिरुपवासाः । यदुक्तं पद्मचरित्रे—

**भुंजइ अणंतरेणं, दुन्निउ वेलाउ जो नियोगेणं । सो पावइ उववासा अट्ठावीसं तु मासेणं ॥**

**इक्कंपि अह मुहुत्तं परिवज्जइ जो चउव्विहाहारं । मासेण तस्स जायइ, उववासफलं तु सुरलोए ॥**

**दसवरिससहस्साउ, भुंजइ सो (जो) अन्नदेवया भत्तो । पलिओवमकोडी पुण, होइ ठिई[१] जिणवरतवेणं ॥**

**एवं मुहुत्तवुड्ढी, उपवासे छट्ठअट्ठमाईए । जो कुणइ जहाथामं तस्स फलं तारिसं भणिअं ॥**

एवं युक्त्या ग्रन्थिसहितप्रत्याख्यानफलमप्यनन्तरोदितं भाव्यम् । प्रत्याख्यानं च सर्वं पुनः पुनः स्मर्त्तव्यं स्वस्वावधिपूर्त्तौ च पूर्णं मेऽमुकप्रत्याख्यानमित्यादि चिन्त्यम् । भोजनसमयेऽपि पुनः स्मर्त्तव्यमन्यथा जातु भङ्गाद्यपि स्यात् ।

अशनादिविभागश्चैवम्-अन्नपक्वान्नमण्डकसक्तुकादि सर्वं क्षुधोपशमसमर्थम् अशनं, तक्रोदकमद्यादि पानं, फलेक्षुपृथुक-सुखभक्षिकादि खाद्यं, स्वाद्यं शुण्ठी-हरीतकी-पिप्पली-मरीच-जीरक-अजमक-जातिफल-जावित्री-कसेल्लक-कत्थक-खदिर-

१. ठिओ इति को० ह० प्र० पाठः ।

वटिका-ज्येष्ठीमधु-तज-तमालपत्र-एला-लवङ्ग-कोठी-विडंग-बिडलवण-अज्जंक-अजमोदा-कुलिञ्जण-पिप्पलीमूल-चिणीकबाबा-कच्चूरक-मुस्ती-कंटासेलिओ-कर्पूर-संचल-हरडा-बिभीतक-कुम्भठवो-बब्बूल-धव-खदिर-खीजडादिछल्ली-पत्र-पूग-हिङ्गुलाष्टक-हिङ्गुत्रेवीसओ-पञ्चकूल-पुष्करमूल-जवासकमूल-बावची-तुलसी-कपूरीकन्दादिकम् । जीरकं स्वभाष्यप्रवचनसारोद्धाराद्यभिप्रायेण स्वाद्यं, कल्पवृत्त्यभिप्रायेण तु खाद्यम् अजमकं खाद्यमिति केचित् ४। सर्वं स्वाद्यं एलाकर्पूरादिजलं च द्विविधाहारप्रत्याख्याने कल्पते । वेसण-विरिहाली-सोआ-कउठवडी-आमलागन्ठी-आम्बागोली[१]-कउठीपत्र-लिम्बूईपत्रप्रमुखं स्वाद्यत्वादिना द्विविधाहारे न कल्पते, त्रिविधाहारे तु जलमेव कल्पते । तत्रापि फुङ्कानीरं सीकरी-कर्पूर-एला-कत्थ-खदिर-चूर्ण-कसेल्लक-पाडलादिजलं च नीतरितं गालितं वा नान्यथा । शास्त्रेषु मधुगुडशर्कराखण्डाद्यपि स्वाद्यतया द्राक्षाशर्करादिजलं तक्रादि च पानकतया उक्तं, परं द्विविधाहारादौ न कल्पते । उक्तञ्च नागपुरीयगच्छप्रत्याख्यानभाष्ये—

**दक्खापाणाईअं पाणं तह साइमं गुडाईअं । पढिअं सुअम्मि तहवि हु तित्ती जणगंति नायरिअं ॥**

स्त्रियाः सम्भोगे चतुर्विधाहारं न भज्यते, बालादीनामोष्ठादिचर्वणे तु भज्यते, द्विविधाहारे तु तदपि कल्पते । प्रत्याख्यानं हि कावलिकाहारविषयमेव, न तु लोमाद्याहारविषयमपि, अन्यथोपवासाचामाम्लादेर्वपुरभ्यङ्गगडुकरम्बबन्धनादिनाऽपि भङ्गप्रसङ्गात् । न चैवं व्यवहारो, लोमाहारस्य निरन्तरं सम्भवेन प्रत्याख्यानाभावस्यैव प्रसङ्गात् ।

१. गोटी इति को० ह० प्र० पाठः ।

अनाहारतया व्यवह्रियमाणानि, यथा—पञ्चागनिम्ब-मूत्र-गुडुची-कडु-किरिआतउं-अतिविष-कुडउ-चीड-सूकडी-रक्षा-हरिद्रा-रोहिणि-ऊपलोट-वज-त्रिफला-वाउलछल्लीत्यन्ये । धमासउ-नाहि-आसन्धि-रिंगणी-एलिओ-गुगूल-हरडादालि-वउणि-बदरी-कन्थेरि-करीरमूल-पुंआड-बोड-थेरी-आछी-मजीठ-बोल-वीओ-कुंवारि-चित्रक-कुंदरुप्रभृत्यनिष्टास्वादं रोगाद्यापदि चतुर्विधाहारेऽप्येतानि कल्प्यानि । श्रीकल्पतद्वृत्तितुर्यखण्डेऽप्युक्तम्—

**परिवासिअ आहारस्स, मग्गणा ( आहारो ) को भवे अणाहारो ।** सूरिः-**आहारो एगंगिओ, चउव्विहु जं वा आईइ तहिं ॥**

एकाङ्गिकः-शुद्ध एव क्षुधां शमयति, स आहारो ज्ञेयोऽत्र, सोऽशनादिश्चतुर्धा, यद्वा तत्राहारेऽन्यल्लवणादिकमयति प्रविशति तदप्याहारो ज्ञेय इति । अथैकाङ्गिकं चतुर्विधमाहारं व्याचष्टे—

**कूरो नासेइ छुहं, एगंगी तक्कउदगमज्जाई । खादिमफलमंसाई साइम्मि महुफाणिताईणि ॥** क०नि० ५९९९

अथवा 'जं वाआईइ तहिंति' पदं व्याख्याति—

**जं पुण खुहापसमणे, असमत्थेगंगि होइ लोणाई । तं पिअ होइ आहारो, आहारजुअं च विजुअं वा ॥** क०नि० ६०००

यत्पुनरैकाङ्गिकं क्षुधाप्रशमनेऽसमर्थं परमाहारे उपयुज्यते, तदप्याहारे संयुक्तमसंयुक्तं वा आहारो भवति, तच्च लवणादिकं, तत्राऽशने लवण-हिंगु-जीरकादिकमुपयुज्यते ।

**उदए कप्पूराई, फलिसुत्ताईणि सिंगबेर गुले । न य ताणि खविंति खुहं, उवगारित्ताउ आहारो ॥** क०नि० ६००१

उदके कर्पूरादिकं आम्रादिफलेषु सुत्रादीनि द्रव्याणि, शृङ्गबेरे-शुण्ठयां गुड उपयुज्यते, न चैतानि कर्पूरादीनि क्षुधां क्षपयन्ति, परमुपकारित्वादाहार उच्यते ।

**अहवा जं भुक्खत्तो, कद्दमउवमाइ पक्खिवइ कोट्ठे । सव्वो सो आहारो, ओसहमाई पुणो भइओ ॥** क०नि० ६००२

औषधादिकं तु किञ्चिदाहारः किञ्चिदनाहारः इत्यर्थः, तत्र शर्करादिकमौषधमाहारः सर्पदष्टादेर्मृत्तिकादिकमौषधमनाहारः ।

**जं वा भुक्खत्तस्स उ, संकसमाणस्स देइ आसायं । सव्वो सो आहारो, अकामऽणिट्ठं चऽणाहारो ॥** क०नि० ६००३

यद्वा द्रव्यं बुभुक्षार्त्तस्य सङ्कर्षतो ग्रसमानस्य भक्षयत आस्वादं प्रयच्छति स सर्व आहारः । यत् पुनरकाममभ्यवहरा-मीत्येवमनभिलषणीयम् अनिष्टं च जिह्वाया अरुच्यम् ईदृशं सर्वमनाहारो भण्यते । तच्चानाहारमिदम्—

**अणाहारो मोअछल्लीमूलं च फलं च होइ अणाहारो ।** क०नि० ६००४

पूर्वार्द्धम् । मोकं=कायिकी छल्ली=निम्बादित्वक्, मूलं=पञ्चमूलादिकं, फलं च आमलक-हरीतक-बिभीतकादि-कमेतत्सर्वमनाहारो भवतीति चूर्णिः । निशीथचूर्णौ तु या निम्बादीनां छल्ली त्वक्, यच्च तेषामेव निम्बोलिकादिकं फलं, यच्च तेषामेव मूलमेवमादिकं सर्वमप्यनाहार इति । प्रत्याख्यानोच्चारे च पञ्चस्थानानि, आद्यस्थाने नमस्कारसहितादिकालप्रत्याख्यानं

सर्वं प्रायश्चतुर्विधाहारम् १। द्वितीयस्थाने विकृतिनिर्विकृत्याचामामाम्लोच्चारः विकृतिप्रत्याख्यानं चास्वीकृत-विकृतिनैयत्यानामपि प्रायेणाऽभक्ष्यविकृतिचतुष्कत्यागात्सर्वेषां स्यात् २। तृतीयस्थाने एकद्व्यासनादिद्वित्रिचतुर्विधाहारम् ३। चतुर्थस्थाने पाणस्सेत्यादि ४। पञ्चमस्थानके देशावकाशिकव्रतं प्राग्गृहीतसचित्तादिचतुर्दशनियमसङ्क्षेपरूपमुच्चार्यते प्रातः ५। सायं च उपवासाचा-माम्लनिर्विकृतिकानि प्रायस्त्रिचतुर्विधाहाराणि, अपवादात्तु निर्विकृतिकादि पौरुष्यादि च द्विविधाहारमपि स्यात् । तदाहुः—

**साहूणं रयणीए, नवकारसहिअं चउव्विहाहारं । भवचरिमं उववासो, अंबिल तिहचउव्विहाहारं ॥**

**सेसा पच्चक्खाणा, दुहतिहचउहावि हुंति आहारे । इअ पच्चक्खाणेसु, आहारविगप्पणा नेआ ॥**

निर्विकृतिकाचामाम्लादौ कल्प्याकल्प्यविभागः स्वस्वसामाचारीतो ज्ञेयः सिद्धान्ताद्यनुसारेण । अनाभोगसहसाद्याकार-व्यक्त्यादिस्वरूपं च प्रत्याख्यानभाष्याद्युक्तं सम्यग् हृदि निधेयम्, अन्यथा प्रत्याख्यानस्य शुद्धत्वाद्यसम्भवात् ।

एवं सूत्रगाथोत्तरार्द्धे '**पडिक्कमिअत्ति**' पदं सप्रसङ्गं व्याख्यातम्, अथाग्रतो व्याख्यायते-**सूईपूईअ** इत्यादि, शुचिरिति मलोत्सर्गदन्तधावनजिह्वालेखनगण्डूषकरणसर्वदेशस्नानादिना पवित्रः सन्नित्यनुवादपरं, लोकसिद्धो ह्ययमर्थ इति नोपदेशपरं, अप्राप्ते हि शास्त्रमर्थवत्, न हि मलिनः स्नायाद् बुभुक्षितोऽश्नीयादित्यत्र शास्त्रमुपयुज्यते । अप्राप्ते त्वामुष्मिके मार्गे शास्त्रोपदेशसाफल्यम् । एवमन्यत्रापि ज्ञेयम् । सावद्यारम्भेषु हि शास्तॄणां वाचनिकी अपि अनुमोदना न युक्ता । यदाहुः—

**सावज्जाणवज्जाणं, वयणाणं जो न जाणइ विसेसं । वोत्तुंपि तस्स न खमं, किमं पुण देसणं काउं ॥**

मलोत्सर्गश्च मौनेन निरवद्याऽर्हस्थानादिविधिनैवोचितः । [1]यतः—

**मूत्रोत्सर्गं मलोत्सर्गं मैथुनं स्नानभोजने । सन्ध्यादिकर्म पूजां च कुर्याज्जापं च मौनवान् ॥**

विवेकविलासेऽपि—

**मौनी वस्त्रावृतः कुर्याद्दिने सन्ध्याद्वयेऽपि च । उदङ्मखः शकृन्मूत्रे रात्रौ याम्याननः पुनः ॥**

**नक्षत्रेषु समग्रेषु भ्रष्टतेजस्सु भास्वतः । यावदर्द्धोदयस्तावत्प्रातःसन्ध्याऽभिधीयते ॥**

**अर्केऽर्द्धास्तमिते यावन्नक्षत्राणि नभस्तले । द्वित्राणि नैव वीक्ष्यन्ते तावत्सायं विदुर्बुधाः ॥**

**भस्मगोमयगोस्थानवल्मीकशकृदादिमत् । उत्तमद्रुमसप्तार्चिर्मार्गनीराश्रयादिमत् ॥**

**स्थानं चितादिविकृतं तथा कूलङ्कषातटम् । [2]स्त्रीपूज्यागोचरं वर्ज्यं वेगाभावेऽन्यथा न तु ॥** युग्मम् ॥

श्रीओघनिर्युक्त्यागमे तु साधुमाश्रित्यैवमुक्तम्—

**अणावायमसंलोए, परस्सऽणुवघाइए । समे अज्झुसिरे वावि, अचिरकालकयम्मि अ ॥** (३१३)

**वित्थिण्णे दूरमोगाढे, नासन्ने बिलवज्जिए । तसपाणबीअरहिए, उच्चाराईणि वोसिरे ॥** (३१४)

१. उक्तं विवेकविलासे इति को० ह० प्र० पाठः । २. स्त्रीपूज्य इति को० ह० प्र० पाठः ।

अनापातोऽसंलोकश्च परस्य यत्र १। उपघातः पिट्टनादिना उड्डाहादिर्यत्र न २। समे अलुठने ३। अझुसिरे यत्तृणादिच्छन्नं न, तत्र हि वृश्चिकादिर्दशति कीटिकादिर्वा प्लाव्यते ४। अचिरकालकृते द्विमासिके ऋतौ वह्न्यादिना प्रासुके, द्वितीयऋतौ तु तन्मिश्रं स्यात्, यत्र तु वर्षासु ग्राम उषितः स प्रदेशो द्वादशवर्षाणि स्थण्डिलं ५। विस्तीर्णे जघन्यतोऽपि हस्तमात्रे ६। दूरमोगाढे दूरमधोऽवगाह्याऽग्न्यादितापेन जघन्यतोऽपि चत्वार्यङ्गुलानि प्रासुकीकृते ७। अनासन्ने द्रव्यासन्नं धवलगृहारामादीनामासन्नं न व्युत्सृजति भावासन्नं अतिवेगे आसन्नमेव व्युत्सृजति ८। बिलवर्जिते ९। त्रसप्राणबीजरहिते १। तथा–

**दिसिपवणगामसूरिअछायाइ पमज्जिऊण तिक्खुत्तो । जस्सुग्गहुत्ति काउण, वोसिरे आयमिज्जा वा ॥** (३१६)

**उत्तरपुव्वा पुज्जा, जंमाए निसिअरा अहिवडंति । घाणारिसाय पवणे, सूरिअ गामे अवन्नो अ ॥**

**संसत्तग्गहणो पुण, छायाए निग्गयाइ वोसिरए । छायासइ उण्हम्मि वि, वोसिरिअ मुहुत्तगं चिट्ठे ॥**

**मुत्तनिरोहे चक्खू, वच्चनिरोहे अ जीवियं चयइ । ऊड्ढनिरोहे कुट्ठं, गेलन्नं वा भवे तिसुवि ॥** (ओघति० १९७)

इत्यादि । मलमूत्रश्लेष्मादीनां चाऽप्युत्सर्गे पूर्वं–अणुजाणह जस्सुग्गहो इति वदेत्, व्युत्सर्गादनु च सद्यो वोसिरेइत्ति त्रिश्चिन्तयेत् । श्लेष्मादीनां च धूल्याच्छादनादियतनामपि कुर्यात्, अन्यथा तेष्वसङ्ख्यसम्मूर्छिममनुष्यसम्मूर्छनविराधनादिदोषः । यदुक्तं प्रज्ञापनोपाङ्गे प्रथमपदे–

**कहन्नं भंते ! संमुच्छिममणुस्सा संमुच्छंति ? गोयमा अंतो मणुस्सखित्ते पणयालीसाइ जोयणसयसहस्सेसु अड्ढाइज्जेसु दीवसमुद्देसु पन्नरससु**

कम्मभूमीसु छप्पन्नाइ अंतरदीवेसु गब्भवक्कंतिअमणुस्साणं चेव उच्चारेसु वा पासवणेसु वा खेलेसु वा सिंघाणेसु वा वंतेसु वा पित्तेषु वा सुक्केसु वा सुक्कसोणिएसु वा सुक्कपुग्गलपरिसाडेसु वा विगयजीवकलेवरेसु वा थीपुरिससंजोएसु वा नगरनिद्धमणेसु वा सव्वेसु वा चेव असुइठाणेसु सम्मुच्छिममणुस्सा संमुच्छंति, अंगुल-असंखिज्जभागमित्ताए ओगाहणाए असन्नी मिच्छद्दिट्ठी अन्नाणी सव्वाहिं पज्जत्तीहिं अपज्जत्तगा अंतमुहुत्तद्धाउआ चेव कालं पकरंति त्ति ।

'असुइठाणेसु त्ति' अन्यान्यपि यानि कानिचिन्मनुष्यसंसर्गादशुचीनि तेषु सर्वेष्विति तद्वृत्तौ ।

दन्तधावनाद्यपि निरवद्यस्थाने प्रासुकज्ञातमृदुदन्तकाष्ठेन दन्तदार्ढ्यहेतुतर्जनीघर्षेण वा दन्तादिमलधूल्याच्छादनादियतनयैव कुर्यात् । व्यवहारशास्त्रे त्वेवमुक्तं—

दन्तदार्ढ्याय तर्जन्या घर्षयेद्दन्तपीठिकाम् । आदावतः परं कुर्यात् दन्तधावनमादरात् ॥

यद्याद्यवारिगण्डूषाद् बिन्दुरेकः प्रधावति । कण्ठे तदा नरैर्ज्ञेयं शीघ्रं भोजनमुत्तमम् ॥

अवक्राऽग्रन्थि सत्कूर्चं सूक्ष्माग्रं च दशाङ्गुलम् । कनिष्ठाग्रसमस्थौल्यं ज्ञातवृक्षं सुभूमिजम् ॥

कनीष्ठिकाऽनामिकयोरन्तरे दन्तधावनम् । आदाय दक्षिणां दंष्ट्रां वामां वा संस्पृशंस्तले ॥

तल्लीनमानसः स्वस्थो दंतमांसव्यथां त्यजन् । उत्तराभिमुखः प्राचीमुखो वा निश्चलासनः ॥

दन्तान् मौनपरस्तेन घर्षयेद्वर्जयेत्पुनः । दुर्गन्धं शुषिरं शुष्कं स्वाद्वम्लं लवणं च तत् ॥ चतुर्भिः कलापकम् ॥

**व्यतिपाते रवेर्वारे सङ्क्रान्तौ ग्रहणे न तु । दन्तकाष्ठं [1]नवाष्टैकभूतपक्षान्तषड्द्युषु ॥**

**अभावे दन्तकाष्ठस्य मुखशुद्धिविधिः पुनः । कार्यो द्वादशगण्डूषैर्जिह्वोल्लेखस्तु सर्वदा ॥**

**विलिख्य रसनां जिह्वानिर्लेखिन्या शनैः शनैः । शुचिप्रदेशे प्रक्षाल्य दन्तकाष्ठं पुरस्त्यजेत् ॥**

**संमुखं पतितं स्वस्य शान्तानां ककुभां च तत् । ऊर्ध्वस्थं च सुखाय स्यादन्यथा दुःखहेतवे ॥**

**ऊर्ध्वं स्थित्वा क्षणं पश्चात् पतत्येद्यदा पुनः । मिष्टाहारस्तदा देश्यस्तद्दिने शास्त्रकोविदैः ॥**

**कासश्वासजराजीर्णशोकतृष्णास्यपाकयुक् । तन्न कुर्याच्छिरोनेत्रहृत्कर्णावयवानपि ॥**

**केशप्रसाधनं नित्यं कारयेदथ निश्चलः । कराभ्यां युगपत् कुर्यात्स्वोत्तमाङ्गे स्वयं न तत् ॥**

**तिलकं द्रष्टुमादर्शो मङ्गलाय च वीक्ष्यते । दृष्टे देहे शिरोहीने मृत्युः पञ्चदशे दिने ॥**

उपवासपौरुष्यादिप्रत्याख्यानिनस्तु दन्तधावनादि विनापि शुद्धिरेव, तपसो महाफलत्वात् । लोकेऽप्युपवासादौ दन्तकाष्ठादि विनापि देवार्चादिकरणात् । निषिद्धं च लौकिकशास्त्रेऽप्युपवासादौ दन्तकाष्ठादि । यदुक्तं विष्णुभक्तिचन्द्रोदये—

**प्रतिपद्दर्शषष्ठीषु मध्याह्ने नवमीतिथौ । सङ्क्रान्तिदिवसे प्राप्ते न कुर्याद्दन्तधावनम् ॥**

---

१. न चाष्टैक इति को० ह० प्र० पाठः ।

**उपवासे तथा श्राद्धे न कुर्याद्दन्तधावनम् । दन्तानां काष्ठसंयोगो हन्ति सप्तकुलानि वै ॥**

**ब्रह्मचर्यमहिंसा च सत्यमामिषवर्जनम् । व्रते चैतानि चत्वारि चरितव्यानि नित्यशः ॥**

**असकृज्जलपानात्तु ताम्बूलस्य च भक्षणात् । उपवासः प्रदूष्येत दिवा स्वापाच्च मैथुनात् ॥**

स्नानमप्युत्तिङ्ग-पनक-कुन्थ्वयाद्यसंसक्त-वैषम्य-शुषिराद्यदूषित-भूभागे परिमितवस्त्रपूतजलेन सम्पातिमसत्त्वरक्षणादियतनया कुर्यात् । उक्तञ्च दिनकृत्ये—

**तसाइजीवरहिए भूमिभागे विसुद्धए । फासुएणं तु नीरेणं, इअरेणं गलिएण उ ॥ काऊणं विहिणा ण्हाणंति ।** (२३)

व्यवहारशास्त्रे त्वेवमुक्तं—

**नग्नाऽऽर्त्तः प्रोषितायातः सचेलो भुक्तभूषितः । नैव स्नायादनुव्रज्य बन्धून् कृत्वा च मङ्गलम् ॥**

**अज्ञाते दुष्प्रवेशे च मलिनैर्दूषितेऽथवा । तरुच्छन्ने ससेवाले न स्नानं युज्यते जले ॥**

**स्नानं कृत्वा जलैः शीतैर्भोक्तुमुष्णं न युज्यते । जलैरुष्णैस्तथा शीततैलाभ्यङ्गश्च सर्वदा ॥**

**स्नातस्य विकृता छाया दन्तघर्षः परस्परम् । देहे च शवगन्धश्चेन्मृत्युस्तद्दिवसत्रये ॥**

**स्नातमात्रस्य चेच्छोषो वक्षस्यङ्घ्रिद्वयेऽपि च । षष्ठे दिने तदा ज्ञेयं पञ्चत्वं नात्र संशयः ॥**

**रते वान्ते चिताधूमस्पर्शे दुःस्वप्नदर्शने । क्षौरकर्मण्यपि स्नायाद् गलितैः शुद्धवारिभिः ॥**

**अभ्यक्तस्नाताशितभूषितयात्रारणोन्मुखैः क्षौरम् । विद्यादि निशासंध्यापर्वसु नवमेऽह्नि च न कार्यम् ॥**

**कल्पयेदेकशः पक्षे रोमश्मश्रुकचान्नखान् । न चात्मदशनाग्रेण स्वपाणिभ्यां च नोत्तमः ॥**

स्नानं च वपुःपावित्र्यसुखकरत्वादिना भावशुद्धिहेतुः । उक्तञ्च द्वितीयेऽष्टकप्रकरणे—

**जलेन देहदेशस्य क्षणं यच्छुद्धिकारणम् । प्रायोऽन्यानुपरोधेन द्रव्यस्नानं तदुच्यते ॥** (अष्ट० २-२)

देहदेशस्य त्वङ्मात्रस्यैव प्रभूतकालं, प्रायः शुद्धिहेतुर्न त्वेकान्तेन तादृग्रोगग्रस्तस्य क्षणमप्यशुद्धेः, प्रक्षालनाऽर्हमलादन्यस्य मलस्य कर्णनासाद्यन्तर्गतस्याऽनुपरोधेनाऽप्रतिषेधेन, यद्वा प्रायो जलादन्येषां प्राणिनामनुपरोधेन अव्यापादनेन द्रव्यस्नानं बाह्यस्नानमित्यर्थः ।

**कृत्वेदं यो विधानेन देवतातिथिपूजनम् । करोति मलिनारम्भी तस्यैतदपि शोभनम् ॥** (अष्ट० २-३)

विधानेन-विधिना, अतिथिः-साधुः, मलिनारम्भी-गृहस्थः, द्रव्यस्नानस्य शोभनत्वे हेतुमाह—

**भावशुद्धेर्निमित्तत्वात्तथाऽनुभवसिद्धितः । कथञ्चिद्दोषभावेऽपि तदन्यगुणभावतः ॥** युग्मम् ॥ (अष्ट० २-४)

दोषोऽप्कायविराधनादिः, तस्माद्दोषाद् सद्दर्शनशुद्धिलक्षणः । यदुक्तं—

**पूआए कायवहो पडिकुट्ठो सो उ किन्तु जिणपूआ । सम्मत्तसुद्धिहेउत्ति भावणीआ उ निरवज्जा ॥**

एवं च देवपूजाद्यर्थमेव गृहस्थस्य द्रव्यस्नानमनुमतं, तेन द्रव्यस्नानं पुण्यायेति यत्प्रोच्यते तन्निरस्तं मन्तव्यम् । तीर्थविहितेनापि स्नानेन हि देहस्यैव काचिच्छुद्धिः स्यात्, न तु जीवस्यांऽशतोऽपि । उक्तञ्च स्कन्दपुराणे काशीखण्डे षष्ठाध्याये—

**मृदो भारसहस्रेण जलकुम्भशतेन च । न शुध्यन्ति दुराचाराः स्नातास्तीर्थशतैरपि ॥**

**जायन्ते च म्रियन्ते च जलेष्वेव जलौकसः । न च गच्छन्ति ते स्वर्गमविशुद्धमनोमलाः ॥**

**चित्तं शमादिभिः शुद्धं वदनं सत्यभाषणैः । ब्रह्मचर्यादिभिः कायः शुद्धो गङ्गां विनाप्यसौ ॥**

**चित्तं रागादिभिः क्लिष्टमलीकवचनैर्मुखम् । जीवहिंसादिभिः कायो गङ्गा तस्य पराङ्मुखी ॥**

**परदारपरद्रव्यपरद्रोहपराङ्मुखः । गङ्गाऽप्याह कदागत्य मामयं पावयिष्यति ॥**

अत्र ज्ञातम्, यथैकः कुलपुत्रो गङ्गादौ गच्छन् मात्रोचे, ''वत्स ! यत्र त्वं स्नासि तत्र मे तुम्बमपि स्नापयेः'' इत्युक्त्वा तदर्पितम्, सोऽपि तल्लात्वा तथा कुर्वन् गङ्गादौ गत्वा गृहे प्राप्तः । तत्तुम्बशाकं मात्रा तस्मै परिवेषितम् । तेनोक्तं 'भृशं कटु' । मात्रोक्तं, 'यद्यस्य स्नानशतैः कटुत्वं न गतं तदा तैस्ते पापं कथं गतम् ? तद्धि क्रियातपोभिरेव याति,' ततः सोऽपि प्रबुद्धः । स्नाने चासङ्ख्यजीवमयजलशैवलाद्यनन्तजन्तूनामगलितजले तदाश्रितपूतरादित्रसानां विराधनया सदोषत्वं प्रतीतं जलस्य जीवमयत्वं च लोकेऽप्युक्तम् । यदुत्तरमीमांसा—

**लूताऽऽस्यतन्तुगलिते ये बिन्दौ सन्ति जन्तवः । सूक्ष्मा भ्रमरमानास्ते नैव मान्ति त्रिविष्टपे ॥** इत्यादि ।

भावस्नानमाह—

**ध्यानाम्भसा तु जीवस्य सदा यच्छुद्धिकारणम् । मलं कर्म समाश्रित्य भावस्नानं तदुच्यते ॥** (अष्ट० २-६)

कस्यचित् स्नाने कृतेऽपि यदि गडुक्षतादि स्रवति, तदा तेनाङ्गपूजा स्वपुष्पचन्दनादिभिः परेभ्यः कारयित्वा अग्रपूजा भावपूजा च स्वयं कार्या, वपुरपावित्र्ये प्रत्युताशातनासम्भवेन स्वयमङ्गपूजाया निषिद्धत्वात्, उक्तञ्च—

**निःशूकत्वादशौचोऽपि देवपूजां तनोति यः । पुष्पैर्भूपतितैर्यश्च भवतः श्वपचाविमौ ॥१॥**

कामरूपपत्तने मातङ्गस्यैकस्य पुत्रो जातः । स जातमात्र एव पूर्वभववैरिणाव्यन्तरेणाऽपहृत्य वने मुक्तः । इतश्च कामरूपपत्तनाधिपो राजा राजपाटिकायां निर्गतः । वने स बालको दृष्टः । अपुत्रत्वेन गृहीतः पालितः 'पुण्यसार' इति नाम दत्तम्। स उद्यौवनो जातः । राजा तस्मै राज्यं दत्वा दीक्षां जग्राह । कालेन केवली जातः । कामरूपे समागतः । पुण्यसारो वन्दनाय गतः । पौराः सर्वे समागताः । पुण्यसारजननी मातङ्ग्यपि तत्रायाता । राजानं दृष्ट्वा तस्याः स्तन्यप्रस्रवो जातः । राज्ञा कारणं पृष्टः केवली प्राह—"हे राजन् ! एषा तव माता, मया त्वं वने पतितो लब्धः" । राज्ञा पृष्टं केन कर्मणाऽहं मातङ्गो जातः ? ज्ञानी प्राह-पूर्वभवे त्वं व्यवहारी अभूः । त्वयैकदा जिनं पूजयता पुष्पं भूमौ पतितं देवस्याऽनारोप्यं जानताऽप्यवज्ञयाऽऽरोपितं, तेन त्वं मातङ्गो जातः । यतः—

**उच्छिट्ठं फलकुसुमं, नेविज्जं वा जिणस्स जो देइ । सो नीअगोअकम्मं, बंधइ पायन्नजम्मंमि ॥**

तव पूर्वभवे या माताऽभूत्तयैकदा स्त्रीधर्मेऽपि देवपूजा कृता, तत्कर्मणा सैषा मातङ्गी जाता । ततो वैराग्याद् राज्ञा दीक्षा गृहीता । **इत्यशौचे भूपतितपुष्पैश्च देवपूजायां मातङ्गकथा** ॥ अतो भूपतितं पुष्पं सुगन्ध्यपि देवस्य नारोप्यम् । स्वल्पेऽप्यपावित्र्ये देवानां नाभ्यर्चनीयम् । विशिष्य चोच्छिष्टिदिने स्त्रीभिर्बृहदाशातनादिदोषात् । ततः पवित्रमृदुगन्धकाषायिकाद्यंशुकेना- ऽङ्गरूक्षणपौतिकमोचनपवित्रवस्त्रान्तरपरिधानादियुक्त्या क्लिन्नाङ्घ्रिभ्यां भूमिमस्पृशन् पवित्रस्थानमागत्योत्तराभिमुखः सन्धत्ते[१] दिव्यं नव्यमव्यङ्गमकीलितं पृथुलं श्वेतांशुकद्वयम् । यतः—

**विशुद्धिं वपुषः कृत्वा यथायोगं जलादिभिः । धौतवस्त्रे च सीते[ सिते ] द्वे विशुद्धे धूपधूपिते ॥**

लोकेऽप्युक्तं—**न कुर्यात्सन्धितं वस्त्रं देवकर्मणि भूमिप ! । न दग्धं न तु वैच्छिन्नं परस्य तु न धारयेत् ॥**

**कटिस्पृष्टं तु यद्वस्त्रं पुरीषं येन कारितम् । समूत्रमैथुनं चापि तद्वस्त्रं परिवर्जयेत् ॥**

**एकवस्त्रो न भुञ्जीत न कुर्याद्देवतार्चनम् । न कञ्चुकं विना कार्या देवार्चा स्त्रीजनेन तु ॥**

एवं हि पुंसां वस्त्रद्वयं स्त्रीणां च वस्त्रत्रयं विना न कल्पते देवार्चादि । धौतवस्त्रं च मुख्यवृत्त्याऽतिविशिष्टं क्षीरोदकादिकं

१. संव्यवयते इति को० ह० प्र० पाठः ।

श्वेतमेव कार्यम् । उदायनृपराज्ञीप्रभावतीप्रभृतीनामपि धौतांशुकं श्वेतं निशीथादावुक्तं । दिनकृत्यादावपि—**सेयवत्थनिअंसणो**त्ति क्षीरोदकांशुकाद्यशक्तावपि दुकूलादि धौतिकं विशिष्टमेव कार्यम् । यदुक्तं पूजाषोडशके—**सितशुभवस्त्रेणे**ति । तद्वृत्तिर्यथा- **सितवस्त्रेण शुभवस्त्रेण च, शुभमिह सितादन्यदपि पट्टयुग्मादि, रक्तपीतादिवर्णं परिगृह्यते इति । एगसाडिअं उत्तरासंगं करेइ** इत्याद्यागमप्रामाण्यादुत्तरीयमखण्डमेव कार्यं न तु खण्डद्वयादिरूपम् । न च दुकूलं भोजनादिकरणेऽपि सर्वदा पवित्रमेवेति लोकोक्तिरत्र प्रमाणयितव्या, किन्त्वन्यधौतिकवद् दुकूलमपि भोजनमलमूत्राशुचिस्पर्शवर्जनादिना सत्यापनीयं, व्यापारणानुसारेण पुनः पुनर्धावनधूपनादिना च पावनीयं, धौतिकं च स्वल्पवेलमेव व्यापार्यं, प्रस्वेदश्लेष्मादि च धौतिकेन न स्फेटनीयम् अपावित्र्यप्रसक्तेः, व्यापारितवस्त्रान्तरेभ्यश्च पृथङ् मोच्यं, तच्च परसत्कं प्रायो वर्जनीयं, विशिष्य च बालवृद्धस्त्र्यादिसत्कं । श्रूयते हि कुमारपालनृपस्योत्तरीयधौतिके मन्त्रिबाहडानुजचाहडेन व्यापारिते, राज्ञोक्तं,-'नव्यं मेऽर्पय' । तेनोक्तं-''दुकूलं नव्यमपि सपादलक्षे बम्बेरापुर्येव निष्पद्यते । तदीशव्यापारितमेव अत्रायाति । ततो राज्ञाऽव्यापारितमेकं मार्गितोऽपि बम्बेरानृपो यदा नाऽदात् तदा स राजा रूष्टः । चाहडं दानशौण्डत्वं न कार्यमित्युक्त्वा ससैन्यं तं प्रति प्रैषीत् । तृतीयप्रयाणे लक्षमार्गणेऽनर्पणात् श्रीगृहिकं निष्कास्य यथेच्छं दानी चतुर्दशशतीकरभीस्थभटैः सद्यो रात्रौ बम्बेरापुरमवेष्टयत् । तदा सप्तशतीकन्योद्वाहाऽविघ्नाय तां रात्रिं विलम्ब्य प्रातर्दुर्गं जगृहे । सप्तस्वर्णकोटीरेकादशशतीं हयांश्च ललौ, दुर्गं घरट्टैश्चूर्णीचक्रे । तत्र देशे स्वस्वाम्याज्ञां प्रवर्त्त्य सप्तशतीशालापतीन् पत्तने समहमानिन्ये । राज्ञोक्तं-तव स्थूललक्षतादोष एव दृग्दोषरक्षामन्त्रः, त्वं मत्तोऽप्यधिकव्ययः ।

तेनोक्तं,-मम व्यये स्वामिनो बलं तव तु कस्य ? इत्युक्त्या तुष्टो नृपः सत्कृत्य 'राजघरट्ट' बिरुदं तस्मै ददे । **इत्यन्यव्यापारित-धौतिके ज्ञातं ।** ततः सुस्थानात् स्वयं ज्ञातगुणसुमानुषपार्श्वाद्वा पवित्रभाजनाच्छादनाऽऽनेतृमार्गादियुक्त्या पानीयपुष्पाद्यानयनम्, पानीयपुष्पाद्यर्पयितुः सुमूल्यार्पणादिना प्रीणनम् । एवं मुखकोशपवित्रस्थानादियुक्त्या असंसक्तशोधितजात्यकेसरकर्पूरादिमिश्र-श्रीखण्डघर्षणं । संशोधितजात्यधूपप्रदीपाखण्डचोक्षादिविशेषाक्षतविशिष्टाऽ[1]नुच्छिष्टनैवेद्यहृद्यफलादिसामग्रीमीलनम् । एवं द्रव्यतः शुचिता । भावतः शुचिता तु रागद्वेषकषायेर्ष्यैहिकामुष्मिकस्पृहाकौतुकव्याक्षेपादित्यागेनैकाग्रचित्तता । उक्तञ्च—

**मनोवाक्कायवस्त्रोर्वीपूजोपकरणस्थितेः । शुद्धिः सप्तविधा कार्या श्रीअर्हत्पूजनक्षणे ॥**

एवं द्रव्यभावाभ्यां शुचि**र्गृहे** गृहचैत्ये—

**आश्रयन् दक्षिणां शाखां पुमान् योषित्त्वदक्षिणाम् । यत्नपूर्वं प्रविश्यान्तर्दक्षिणेनाङ्घ्रिणा ततः ॥**

**सुगन्धिमधुरैर्द्रव्यैः प्राङ्मुखो वाप्युदङ्मुखः । वामनाड्यां प्रवृत्तायां मौनवान् देवमर्चयेत् ॥**

इत्याद्युक्तेन नैषेधिकीत्रयकरणप्रदक्षिणात्रयचिन्तनादिकेन च विधिना शुचिपट्टकादौ पद्मासनादिसुखासनासीनः चन्दन-भाजनाच्चन्दनं स्थानान्तरे हस्ततले वा प्रक्षिप्य कृतभालतिलकहस्तकङ्कणः श्रीचन्दनचर्चितधूपधूपितहस्तद्वयो **जिन**मर्हन्तं

१. विशिष्टातुच्छ इति को० ह० प्र० पाठः ।

पूजयित्वा वक्ष्यमाणाभिरङ्गाग्रभावपूजाभिरभ्यर्च्य संवरणं प्रत्याख्यानं प्राक् कृतमकृतं वा यथाशक्ति **करोति** देवसाक्षिक-मुच्चारयतीति पञ्चमगाथार्थः ॥५॥ ततः—

**विहिणा जिणं जिणगिहे, गंतुं अच्चेइ उचिअचिंतरओ ।**
**उच्चरइ पच्चक्खाणं, दढपंचाचारगुरुपासे ॥६॥**

**'विहिणात्ति'** विधिनेति पदं सर्वत्रापि योज्यम् । ततो विधिना **जिनगृहे** गत्वा विधिना, **'उचितचिन्तारतो' विधिना जिनमर्चयति** । विधिश्चायं,—यदि राजादिमहर्द्धिः तदा **सव्वाए इड्ढीए, सव्वाए दित्तीए, सव्वाए जुईए, सव्वबलेणं, सव्वपोरिसेणं** इत्यादिवचनात् प्रभावनानिमित्तं महद्धर्या देवगृहे याति । यथा दशार्णभद्रनृपः, तथा श्रीवीरं वन्दे यथा प्राक् केनापि न वन्दितः इत्यहङ्कृतिकृतपरमद्धर्या सर्वाङ्गीणशृङ्गारसुभगगजादिचतुरङ्गसैन्यदन्तरूप्यस्वर्णमयपञ्चशतीपर्यङ्किकाधि-रूढान्तःपुरादिरूपया श्रीवीरं वन्दितुमागतः । तन्मदापनोदाय सौधर्मेन्द्रः श्रीवीरं वन्दितुमागच्छन् दिव्यर्द्धिं विचक्रे । उक्तञ्च वृद्धर्षिमण्डलस्तवे—

**चउसट्ठि करिसहस्सा, पणसय बारससिराइं पत्तेअं । कुंभे अड अड दंता, दंतेसु अ वावि अट्ठट्ठ ॥**
**अट्ठट्ठ लक्खपत्ताइं, तासु पउमाइं हुंति पत्तेयं । पत्ते पत्ते बत्तीस, बद्धनाडयविही दिव्वो ॥**

**एगेगकण्णिआए, पासायवडिंसओ अ पईपउमं । अग्गमहिसीहिं सद्धिं उवगिज्जइ सो तहिं सक्को ॥**
**एयारिसइड्ढीए, विलग्गमेरावणम्मि दट्ठु हरिं । राया दसन्नभद्दो, निक्खंतो पुन्नसपइन्नो ॥**

अत्र पूर्वाचार्यप्रणीता हस्तिमुखादिसङ्ख्यागाथा । यथा–

**मुहपणसयबारूत्तरसहस्सा चत्तारि छन्नवइ दंता । बत्तीससहस्स सगसय अडसट्ठी वावीपरिमाणं ॥**
**कमलाणं दोलक्खा, सहस्सबासट्ठिसइगुचोआलं । कण्णिअपासायाणं, [1]णेया संखा कमलसरिसा ॥**
**छव्वीसं कोडिसया इगवीसं कोडिलक्खचउचत्ता । इगकरिकमलदलाणं, [2]माणं सिरिसिक्करायस्स ॥**
**चउसट्ठिकरिसहस्सा, मुहाण पत्तेअमट्ठदंताणं । पंचसयबारसुत्तर सव्वेसिं मुहाण वुच्छामि ॥**
**तिन्नेवय कोडीओ, लक्खा सगवीस सहस्स अडसट्ठी । सव्वमुहाणं संखा, दंताणं तह पुणो वुच्छं ॥**
**छव्वीसं कोडीओ, लक्खा इगवीस सहस्स चउचत्ता । दंताण सव्वसंखा, इक्किक्के अट्ठ पुक्खरिणी ॥**
**दुन्नियकोडिसयाइं, नवकोडिगसत्तरी तहा लक्खा । बावन्नं च सहस्सा पुक्खरिणीणं इमा संखा ॥**
**कोडिसहस्सा छस्सय, कोडीओ सत्तसत्तरी कोडी । बावत्तरिं च लक्खा, सोल( स )सहस्सा कमलसंखा ॥**

१. नाडय इति को० ह० प्र० पाठः । २. संखा इति को० ह० प्र० पाठः ।

**सोलसकोडाकोडी, सत्तत्तरि हुंति कोडिलक्खा य । कोडिसहस्स बिसत्तरि, कोडिसयं सट्ठिकोडीओ ॥**
**नाडगपत्ते संखा, भणिआ पभणामि नट्टरूवाणं । पणसयकोडाकोडी, छत्तीसं कोडिकोडीओ ॥**
**सगसीइकोडीलक्खा, नवकोडिसहस्स कोडिसयमेगं । कोडीण वीससंखा, आवस्सयचुन्निए भणिया ॥**

प्रासादे प्रासादेऽष्टाग्रमहिषीयुत इन्द्रः, तत्सङ्ख्या तु कमलवत् । इन्द्राणीसङ्ख्या त्वियं, त्रयोदशसहस्राः कोट्यः, सप्तसप्ततिलक्षाः अष्टाविंशतिश्च सहस्राः । एकैकस्मिन् नाटके समानरूपशृङ्गारनाट्योपकरणा अष्टोत्तरं शतं दिव्यकुमारा अष्टोत्तरं शतं दिव्यकन्याश्च स्युः । एवं शङ्ख-शृङ्ग-शङ्खिका-पेया[1]-परिपरिका-पणव-पटह-भम्भा-होरम्भा-भेरी-झल्लरी-दुन्दुभि-मुरज-मृदङ्ग-नान्दीमृदङ्ग-आलिङ्ग-कुस्तुम्ब-गोमुख-मर्दल-विपञ्ची-बल्लकी-भ्रामरी-षट्भ्रामरी-परिवादिनी-[2]बव्वीसा-सुघोषा-नन्दिघोषा-महती-कच्छपी-चित्रवीणा-आमोट-झंझा-नकुल-तूणी-तुम्बवीणा-मुकुन्द-हुडुक्का-चिच्चिकी-करटी-डिंडिभ-किणित-कडम्बा-दर्दरक-दर्दरिका-कुस्तुम्ब-कलशिका-तलताल-कांस्यताल-रिगिसिका-मकरिका-शिशुमारिका-वंश-वाली-वेणु-परिली-बन्धूकप्रमुखविधवाद्यवादकाः प्रत्येकमष्टोत्तरशतं । शङ्खिका लघुशङ्खः किञ्चित्तीक्ष्णस्वरः, शङ्खस्तु गम्भीरस्वरः । पेया महाकाहला । परिपरिका कोलिकपुटावनद्धमुखवाद्यं । पणवः पटहविशेषो भाण्डपटहो । भम्भा ढक्का । होरम्भा महाढक्का । भेरी ढक्काकृति वाद्यविशेषः । झल्लरी चर्मावनद्धा विस्तीर्णवलयाकारा । दुन्दुभिः भेर्याकारं सङ्कटमुखं देवतोद्यं । मुरजो

१. पेखा इति को० ह० प्र० पाठः । २. बलवीसा इति को० ह० प्र० पाठः ।

महामर्दलं । मृदङ्गं लघुमर्दलं । नान्दी मृदङ्गमेकतः सङ्कीर्णमन्यतो विस्तृतं । आलिङ्गो मुरजविशेषः । कुस्तुम्बश्चर्मावनद्ध थुडः । मर्दलमुभयतः समं । विपञ्ची त्रितन्त्री वाणा । बल्लकी सामान्यतो वीणा । परिवादिनी सप्ततन्त्री वीणा । महती शततन्त्री वीणा । तुम्बवीणा तुम्बयुक्तवीणा । मुकुन्दो मुरजविशेषो योऽतिलीनं प्रायो वाद्यते । हुडुक्का प्रसिद्धा । डिंडिभः प्रस्तावनासूचकपणवविशेषः । कडम्बा करटिका । दर्दरकः प्रसिद्धः । स लघुः दर्दरिका । तलो हस्ततलः । वाली तूणविशेषो मुखवाद्यं । बन्धूकस्तूणविशेषः । शेषभेदा लोकाज्ज्ञेयाः । सर्वेऽप्यातोद्यभेदा एकोनपञ्चाशदातोद्यभेदेष्वन्तर्भवन्ति । यथा वंशे वालीवेणुपरिलीबन्धूकातोद्यानि । शङ्खशृङ्गशङ्खिकासुरमुखीपेयापरपरिकासु गाढं ध्मायमानासु, पटहपणवेष्वाहन्यमानेषु, भम्भाहोरम्भाष्वास्फाल्यमानासु, भेरीझल्लरीदुन्दुभिषु ताड्यमानासु, मुरजमृदङ्गनान्दीमृदङ्गेष्वालप्यमानेषु, आलिङ्ग-कुस्तुम्बगोमुखीमर्दलेषु बलात्ताड्यमानेषु, विपञ्चीवीणावल्लकीषु मूर्च्छ्यमानासु, भ्रामरीषड्भ्रामरीपरिवादिनीषु स्पन्द्यमानासु बब्बीसासुघोषानन्दिघोषासु सार्यमाणासु, महतीकच्छपिचित्रवीणासु कुट्यमानासु, आमोटझंझानकुलेष्वामोट्यमानेषु, तूणतुम्बवीणासु स्पृश्यमानासु, मुकुन्दहुडुक्काचिच्चिकीषु मूर्च्छ्यमानासु, करटीडिंडिमकिणितकडंबासु, वाद्यमानासु, दर्दर-दर्दरी-कुस्तुम्ब-कलशिकासु बाढं ताड्यमानासु, तलताल-कांस्यतालासु वाद्यमानासु, रिगिसिका-लत्तिका-मकरिका-शिशुमारिकासु घर्ष्यमाणासु, वंश-वेणु-वाली-पिरली-बन्धूकेषु फुंक्यमानेषु, ते सर्वे दिव्यकन्याकुमाराः समकं गायन्ति नृत्यन्ति। [द्वात्रिंशद्] नाटकनामान्यमूनि (१) स्वस्तिक-श्रीवत्स-नन्द्यावर्त्त-वर्द्धमानक-भद्रासन-कलश-मत्स्यदर्पणरूपाष्टमाङ्गलिक्यभक्तिविचित्र (२)

आवर्त्त-प्रत्यावर्त्त-श्रेणि-प्रश्रेणि-स्वस्तिक-पुष्यमान-वर्द्धमान-मत्स्याण्डक-मकराण्डक-जारमार-पुष्पावलि-पद्मपत्र-सागरतरङ्ग-वासंतीलता-पद्मलता-भक्तिचित्र (३) ईहामृग-ऋषभ-तुरग-नर-मकर-विहग-व्याल-किन्नर-रुरु-शरभ-चमर-कुञ्जर-वनलता-पद्मलताभक्तिचित्र (४) एकतश्चक्र-एकतःखड्ग-एकतश्चक्रवाल-द्विधाचक्रवाल-चक्रार्द्धचक्रवाल (५) चन्द्रसूर्यवलय-ताराहंसैकमुक्ताकनकरत्नावलिप्रविभक्त्यभिनयात्मकावलिप्रविभक्ति (६) चन्द्रोद्-गमसूर्योद्गमप्रविभक्तियुक्ततदुद्गमनप्रविभक्ति (७) चन्द्रसूर्यागमनप्रविभक्तियुक्तागमनप्रविभक्ति (८) चन्द्रसूर्यावतरणप्रविभक्ति (९) चन्द्रसूर्यास्तमनप्रविभक्ति (१०) चन्द्र-सूर्य-नाग-यक्ष-भूत-राक्षस-महोरग-गन्धर्व-मण्डल-प्रविभक्ति (११) ऋषभ-सिंह-ललित-हयगज-विलसित-मत्तहयगज-विलम्बिताभिनयरूपद्रुतविलम्बित (१२) सागरनागरप्रविभक्ति (१३) नन्दाचम्पाप्रविभक्ति (१४) मत्स्याण्डक-मकराण्डक-जारमारप्रविभक्ति (१५) कखगघङप्रविभक्ति (१६) चछजझञप्रविभक्ति (१७) टठडढणप्रविभक्ति (१८) तथदधनप्रविभक्ति (१९) पफबभमप्रविभक्ति (२०) अशोक-आम्र-जम्बू-कोसंब-पल्लवप्रविभक्ति (२१) पद्मनागाशोकचम्पकचूतवनकुन्दाति-मुक्तकश्यामलताप्रविभक्ति (२२) द्रुत (२३) विलम्बित (२४) द्रुतविलम्बित (२५) अञ्चित (२६) रिभित (२७) अञ्चितरिभित (२८) आरभट (२९) भसोल (३०) आरभटभसोल (३१) उत्पातनिपातप्रवृत्तसङ्कुचितप्रसारितरेचकरचितभ्रान्तसम्भ्रान्त (३२) तीर्थङ्करादिमहापुरुषचरिताभिनयनिबद्धम् इति राजप्रश्नीये ।

एवं महर्द्धिर्देवगृहे याति । सामान्यविभवस्त्वौद्धत्यपरिहारेण लोकोपहासं परिहरन् यथानुरूपाडम्बरं भ्रातृमित्रपुत्रादिपरिवृतो

व्रजति । एवं जिनगृहे गत्वा । पुष्पताम्बूलसिद्धार्थदूर्वादीनां च क्षुरिकापादुकाकिरीटवाहनादीनां च सचिताचित्तद्रव्याणां परिहारेण किरीटवर्जशेषाभरणाद्यचित्तद्रव्याणामपरिहारेण कृतैकपृथुलवस्त्रोत्तरासङ्गो दृष्टे जिनेन्द्रेऽञ्जलिबन्धं शिरस्यारोपयन् 'नमो जिणाणं' इति भणन् प्रणमन् मनसश्चैकाग्र्यं कुर्वन् इति पञ्चविधाभिगमेन नैषेधिकीपूर्वं प्रविशति । यदार्षम्-

**सचित्ताणं दव्वाणं विउसरणयाए अचित्ताणं दव्वाणं अविउसरणयाए एगल्लसाडएणं उत्तरासंगेणं चक्खुफासे अंजलिपग्गहेणं मणसो एगत्तीकरणेणं** ति । राजादिस्तु चैत्यं प्रविशंस्तत्कालं राजचिह्नानि त्यजति । यतः—

**अवहट्टु रायककुहाइं पंच वररायककुहरूवाइं । खग्गं छत्तो आहण मउडं तह चामराओ अ ॥**

अग्रद्वारप्रवेशे मनोवाक्कायैर्गृहव्यापारो निषिध्यते, इति ज्ञापनार्थं नैषेधिकीत्रयं क्रियते, परमेकैवैषा गण्यते, गृहादि-व्यापारस्यैकस्यैव निषिद्धत्वात् । ततो मूलबिम्बस्य प्रणामं कृत्वा, सर्वं हि प्रायेणोत्कृष्टं वस्तु कल्याणकामैर्दक्षिणभाग एव विधेयमित्यात्मनो दक्षिणाङ्गभागे मूलबिम्बं कुर्वन् ज्ञानादित्रयाराधनार्थं प्रदक्षिणात्रयं दद्यात् । उक्तञ्च—

**[१]तत्तो णमो जिणाणंति भणिअ अद्धोणयं पणामं च । काउं पंचंगं वा भत्तिब्भरनिब्भरमणेणं ॥** (१८९)

**पूअंगपाणि परिवारपरिगओ गहिरमहुरघोसेणं । पढमाणो जिणगुणगणनिबद्धमंगल्लथुत्ताइं ॥** (चै० वं० महा १९०)

**करधरिअजोगमुद्दो, पए पए पाणिरक्खणाउत्तो । दिज्जा पयाहिणतिगं, एगग्गमणो जिणगुणेसु ॥** (१९१)

**गिहचेइएसु न घडइ, इअरेसु वि जइवि कारणवसेण । तहवि न मुंचइ मइमं, सयावि तक्करणपरिणामं ॥** (१९२)

१. अद्धावणयपणामं तत्तो काऊण भुवणनाहस्स ।

प्रदक्षिणादाने च समवसरणस्थचतूरूपश्रीजिनं ध्यायन् गर्भगृहे पृष्ठवामदक्षिणदिक्त्रयस्थबिम्बत्रयं वन्दते । अत एव सर्वस्यापि चैत्यस्य समवसरणस्थानीयतया गर्भगृहबहिर्भागे दिक्त्रये मूलबिम्बनाम्ना बिम्बानि कुर्वन्ति । एवं च **'वर्जयेदर्हतः पृष्ठम्'** इत्युक्तेरर्हत्पृष्ठनिवासदोषश्चतुर्दिक्ष्वपि टलति । ततश्चैत्यप्रमार्जनपोतकलेख्यकादिवक्ष्यमाणयथोचितचिन्तापूर्वं कृतसमग्रपूजा-सामग्रीकश्चैत्यव्यापारनिषेधरूपां द्वितीयनैषेधिकीं मुखमण्डपादौ कृत्वा मूलबिम्बस्य प्रणामत्रयपूर्वं पूजां करोति । यद्भाष्यं–

**तत्तो निसीहिआए, पविसित्ता मंडवम्मि जिणपुरओ । महिनिहिअजाणुपाणी, करेइ विहिणा पणामतिअं ॥**

**तयणु हरिसुल्लसंतो, कयमुहकोसो जिणिंदपडिमाणं । अवणेइ रयणिवसिअं, निम्मल्लं लोमहत्थेणं ॥**

**जिणगिहपमज्जणं तो, करेइ कारेइ वा वि अन्नेणं । जिणबिंबाणं पूअं तो विहिणा कुणइ जहजोगं ॥**

मुखकोशश्चाष्टपुटपटप्रान्ते नास्यनासानिःश्वासनिरोधार्थं कार्यः । वर्षादौ च निर्माल्ये कुन्थ्वादिसंसक्तिरपि स्यात् तेन निर्माल्यं स्नात्रजलं च पृथक् पृथग् जनाऽनाक्रम्यपवित्रस्थाने त्यज्यते, एवमाशातनाऽपि न स्यात् । गृहचैत्ये चार्चामुच्चैः स्थाने भोजनादावव्यापार्ये पवित्रपात्रे स्थापयित्वा करयुगधृतशुचिकलशादिजलेनाभिषिञ्चेत् ।

**बालत्तणंमि सामिअ, सुमेरुसिहरम्मि कणयकलसेहिं । तिअसासुरेहिं ण्हविओ ते धन्ना जेहिं दिट्ठोसि ॥**

इत्यादि च तदा चिन्त्यम् । ततः सुयत्नेन वालककुञ्चिकां व्यापार्य, प्रक्षाल्याऽङ्गम्, अङ्गरुक्षणद्वयेन निर्जलतामापाद्य **'अङ्घ्रिजानुकरांसेषु मूर्ध्नि पूजा यथाक्रमम्'** इत्युक्तेर्वक्ष्यमाणतया सृष्ट्या नवाङ्गेषु श्रीचन्दनादिनाऽर्चयेत् । केऽप्याहुः पूर्वं भाले तिलकं

कृत्वा नवाङ्गपूजा कार्या । श्रीजिनप्रभसूरिकृतपूजाविधौ तु—**सरससुरहिचंदणेण देवस्स दाहिणजाणुदाहिणखंधनिडालवामक्खंधवाम-जाणुलक्खणेसु पंचसु हिअएहिं सह छसु वा अंगेसु पूअं काऊण पच्चग्गकुसुमेहिं गन्धवासेहिं च पूएइ** इत्युक्तम् । यदि च प्राक् केनापि पूजा कृता स्यात्तदा विशिष्टाऽन्यपूजासामग्र्यभावे तां नोत्सारयेत्, भव्यानां तद्दर्शनजन्य[1]पुण्यबन्धस्याऽन्तरायप्रसङ्गात्, किन्तु तामेव विशेषयेत् । यद् बृहद्भाष्यं—

**अह पुव्वं चिय केणइ, हविज्ज पूआ कया सुविहवेण । तंपि सविसेससोहं जह होइ तहा तहा कुज्जा ॥**

**निम्मल्लंपि न एवं, भन्नइ निम्मल्ललक्खणाभावा । भोगविणट्ठं दव्वं, निम्मल्लं बिंति गीयत्था ॥**

**इत्तो चेव जिणाणं, पुणरवि आरोवणं कुणंति जहा । वत्थाहरणाईणं, जुगलिअंकुडलिअमाईणं ॥**

**कहमन्नह एगाए, कासाईए जिणिंदपडिमाणं । अट्ठसयं [2]लूहंणेण, विजयाई वण्णिआ समए ।।उ**

यद् जिनबिम्बारोपितं सद् विच्छायीभूतं विगन्धं जातं, दृश्यमानं च निःश्रीकं, न भव्यजनमनःप्रमोदहेतुस्तन्निर्माल्यं ब्रुवन्ति बहुश्रुता इति सङ्घाचारवृत्तौ । प्रद्युम्नसूरिकृते विचारसारप्रकरणे त्वेवमुक्तं—

**चेइअदव्वं दुविहं, पूआ निम्मल्लभेअओ इत्थ । आयाणाई दव्वं, पूआरित्थं मुणेयव्वं ॥**

**अक्खयफलबलिवत्थाइ संतिअं जं पुणो दविणजायं । तं निम्मल्लं वुच्चइ, जिणगिहकम्मंमि उवओगो ॥**

१. पुण्यानुबन्धिपुण्य इति को० ह० प्र० पाठः । २. लूहंता इति को० ह० प्र० पाठः ।

अत्र ढौकिताऽक्षतादेर्निर्माल्यत्वमुक्तं, परमन्यत्राऽऽगमे प्रकरणचरित्रादौ वा क्वापि न दृश्यते, वृद्धसम्प्रदायादिनापि क्वापि गच्छेऽपि नोपलभ्यते । यत्र च ग्रामादावादानादिद्रव्याऽऽगमोपायो नास्ति, तत्राक्षतबल्यादिद्रव्येणैव प्रतिमाः पूज्यमानाः सन्ति । अक्षतादेर्निर्माल्यत्वे तु तत्र प्रतिमापूजाऽपि कथं स्यात् ? तस्माद्भोगविनष्टस्यैव निर्माल्यत्वं युक्तियुक्तं प्रतिभाति । ''**भोगविणट्ठं दव्वं निम्मल्लं बिंति गीअत्था**'' इत्यागमोक्तेरपि, तत्त्वं तु केवलिगम्यम् ।

चन्दनपुष्पादिपूजा च तथा कार्या यथा जिनस्य चक्षुर्मुखाच्छादनादि न स्यात्, सश्रीकताऽतिरेकश्च स्यात्, तथैव द्रष्टॄणां प्रमोदपुण्यवृद्ध्यादिसम्भवात् । अङ्गाग्रभावैश्च त्रिधा पूजा । तत्र निर्माल्यापनयनं, प्रमार्जनाङ्गप्रक्षालनं, वालककूञ्चिकाव्यापारणं, पूजनं, कुसुमाञ्जलिमोचनं, पञ्चामृतस्नात्रं, शुद्धोदकधाराप्रदानं, धूपितस्वच्छमृदुगन्धकाषायिकादिवस्त्रेणाङ्गरूक्षणं, कर्पूर-कुङ्कुमादिमिश्रगोशीर्षचन्दनविलेपनाऽऽङ्गीविधानादि, तथा गोरोचन-मृगमदादिभिस्तिलकपत्रभङ्ग्यादिकरणम्, निस्सपत्न-रत्नसौवर्णमुक्ताभरणरौप्यसुवर्णपुष्पादिभिरलङ्करणं । यथा श्रीवस्तुपालः स्वकारितसपादलक्षबिम्बानां श्रीशत्रुञ्जये सर्वबिम्बानां च रत्नस्वर्णाभरणानि कारितवान् । यथा वा दमयन्ती प्राग्भवेऽष्टापदे चतुर्विंशतेरर्हतां रात्नतिलकानि ददौ । एवं चान्येषामपि भाववृद्ध्यादि । यतः—

**पवरेहिं साहणेहिं, पायं भावोवि जायए पवरो । न य अन्नो उवओगो, एएसिं सयाण लट्ठयरो ॥** पञ्चाशक-४-१६



तथा परिधापनिका चन्द्रोदयादिविचित्रदुकूलादिवस्त्रैः परिधापनं, ग्रन्थिम-वेष्टिम-पूरिम-सङ्घातिमरूपचतुर्विधप्रधाना-

म्लान-विध्यानीत-शतपत्र-सहस्रपत्र-जाती-केतक-चम्पकादिविशेषपुष्पैर्माला-मुकुट-शिरस्क-पुष्पगृहादिविरचनम् । जिनहस्ते सौवर्ण-बीजपूर-नालिकेरपूगी-फल-नागवल्लीदल-नाणकमुद्रिकामोदकादिमोचनम् । धूपोत्क्षेप-सुगन्धवासप्रक्षेपाद्यपि सर्व-मङ्गपूजायां भवति । तथोक्तं बृहद्भाष्ये —

[१]**ण्हवण-विलेवण-आहरण-वत्थफल-गंध-धूवपुप्फेहिं । कीरइ जिणंगपूआ, तत्थ विही एस नायव्वो ॥**

**वत्थेण बंधिऊणं, नासं अहवा जहा समाहीए । वज्जेअव्वं तु तया देहम्मिवि कण्डुअणमाई ॥** चै. २०१/पंचा.४-२०

अन्यत्रापि

**कायकण्डूयणं वज्जे, तहा खेलविगिंचणं । थुइथुत्तभणणं चेव, पूअंतो जगबंधुणो ॥**

देवपूजाक्षणे च मुख्यवृत्त्या मौनमेव कार्यम्, तदशक्तौ पापहेतुर्वचः सर्वथा त्याज्यम्, नैषेधिकीकरणे गृहादिव्यापारनिषेधात्, तत एव पापहेतुः सञ्ज्ञाऽपि वर्ज्या, अनौचित्यादिप्रसङ्गादपि । तथा धवलक्कवासी श्रेष्ठी जिणहाकोऽतिदुःस्थो घृतकुतुप-कर्पासादिभारवहनेन निर्वाही भक्तामरस्तवादिस्मृतेः तुष्ट चक्रेश्वरीदत्तवश्यकृद्रत्नमहिम्ना मार्गे दुष्टताविख्यातं चौरत्रयं जघान। पत्तने भीमदेवनृपोऽद्भुतं तमुदन्तं श्रुत्वा सबहुमानमाकार्य तस्मै [२]देशरक्षार्थं खड्गं ददौ । तदा शत्रुशल्यः सेनानीः सेर्ष्यमाख्यात् —

१. वत्था हरणविलेवणसुगंधिगंधेहि धूवपुप्फेहिं । चै. म. २०० । २. देह इति को० ह० प्र० पाठः ।

**खाण्डउ तासु समप्पिइ, जसु खण्डइ अब्भास । जिणहा इक्कु समप्पिइ, तुलचेलउ कप्पास ॥**

स प्रत्याह–

**असिधर धणुधर कुंतधर, सत्तिधरा य बहुअ । सत्तुसल जे रणि सूरनर जणणिति विरलपसूअ ॥**

**अश्वः शस्त्रं शास्त्रं वाणी वीणा नरश्च नारी च । पुरुषविशेषं प्राप्ता भवन्त्ययोग्याश्च योग्याश्च ॥**

तदुक्त्या हृष्टो नृपः तं तलारक्षं चक्रे । तेन गुर्जरत्रायां चोरनाम निष्ठापितं । अन्येद्युः सुराष्ट्रचारणस्तत्परीक्षार्थं कृतोष्ट्रचौर्यस्तद्भटैर्बद्धः प्रातर्देवपूजाक्षणे जिणहाग्रे नीतः तेन पुष्पवृन्ततोटनसञ्ज्ञाकरणे चारणः प्रोचे–

**जिणहानइ जिणवरह न मिलइ तारोतार । जिणि करि जिणवर पुजिइ, ते किम मारणहार ॥**

ततस्तेन ह्रीणेन चौर्यं न कार्यमित्युक्त्वा स मुक्तः प्राह–

**इक्का चोरी सा किआ, जा खोलडइ न माइ । बीजी चोरी किम करइ, चारण चोर न थाय ॥**

ततश्चारणः सम्यगुक्त्या परिधापितः । जिणहाख्यो यात्राचैत्यपुस्तकलेखनादिपुण्यं चक्रे । पोट्टलिकशुल्कमोचनादि च, तत्तु जनेऽद्ययावन्निर्वहते **इति जिणहाकप्रबन्धः ।**

मूलबिम्बसविस्तरपूजानन्तरं च सृष्ट्या सर्वापरबिम्बपूजा यथायोगं कार्या । द्वारबिम्बसमवसरणबिम्बपूजाऽपि मुख्यबिम्ब-

पूजाद्यनन्तरं गर्भगृहान्निर्गमनसमये कर्त्तव्या सम्भाव्यते न तु प्रवेशे, पूर्वं मूलबिम्बस्यैव पूजाया औचित्यप्रतिभासात् । आसन्नीभूतत्वेन द्वारबिम्बादेः पूर्वं पूजने बृहच्चैत्यप्रवेशेऽनेकबिम्बानामासन्नीभवनेन पूर्वं पूजाप्रसङ्गः । तथा चाल्पपुष्पादि-समाप्तौ [1]मूलार्चापूजापि न स्यात् । तथा श्रीशत्रुञ्जयरैवतादितीर्थे प्रवेशमार्गासन्नान्यान्यचैत्यार्चापूजने मुख्यचैत्यगमनमपि प्रान्ते प्रसज्यते । न चैवं युज्यते, उपाश्रयप्रवेशे आसन्नसाधूनामपि गुरुवन्दनात्पूर्वं वन्दनप्रसङ्गात् । प्रणाममात्रं तु आसन्नार्चादीनां पूर्वमपि युक्तम् । तृतीयोपाङ्गविसंवादिन्यां सङ्घाचारोक्तविजयदेववक्तव्यतायामपि द्वारसमवसरणबिम्बपूजा पश्चादुक्ता । यथा—

**तो गंतुं सुहम्मसहं, जिण सकहा दंसणंमि पणमित्ता । उग्घाडित्तु समुग्गे, पमज्जए लोमहत्थेणं ॥**

**सुरहिजलेणिगवीसं, वारा पक्खालिआणुलिंपित्ता । गोसीसचंदणेणं, तो कुसुमाईहिं अच्चेइ ॥**

**तो दारपडिमपूअं, सहासु पंचसुवि करइ पुव्वं व । दारच्चणाइ सेसं, तइअ उवंगाउ नायव्वं ॥**

तस्मान्मूलनायकस्य पूजा सर्वेभ्योऽपि पूर्वं सविशेषा च कार्या । उक्तमपि—

**उचिअत्तं पूआए, विसेसकरणं तु मूलबिंबस्स । जं पडइ तत्थ पढमं, जणस्स दिट्ठी सहमणेणं ॥** चै. म. १९७

शिष्यः—**पूआवंदणमाई, काऊणेगस्स सेसकरणम्मि । नायगसेवगभावो, होइ कओ लोगनाहाणं ॥** चै. म. ३९

१. मूलनायकस्येत्यर्थः ।

**एगस्सायरसारा, कीरइ पूआ परेसि थोवयरी । एसावि महावन्ना, लक्खिज्जइ निउणबुद्धीहिं ॥** चै. म. ४०

आचार्यः—**नायगसेवगबुद्धी, न होइ एएसु जाणगजणस्स । पिच्छंतस्स समाणं, परिवारं पाडिहेराई ॥** चै. म. ५०

**ववहारो पुण पढमं, पइट्ठिओ मूलनायगो एसो । अवणिज्जइ सेसाणं, नायगभावो न उण तेण ॥** चै. म. ५१

**वंदणपूअणबलिढोअणेसु एगस्स कीरमाणेसु । आसायणा न दिट्ठा, उचितपवित्तस्स पुरिसस्स ॥** चै. म. ५२

**जह मिम्मयपडिमाणं, पूआ पुप्फाइएहिं खलु उचिआ । कणगाइ निम्मिआणं, उचिअतमा मज्जणाइ वि ॥** चै. ५४

**कल्लाणगाइकज्जा, एगस्स विसेसपूअकरणे वि । नावन्नापरिणामो, जह धम्मिजणस्स सेसेसु ॥** चै. म. ५३

**उचिअपवित्ति एवं, जहा कुणंतस्स होइ नावन्ना । तह मूलबिंबपूआ, विसेसकरणे वि तं नत्थि ॥**

**जिणभवणबिंबपूआ, कीरंति जिणाण नो कए किंतु । सुहभावणानिमित्तं, बुहाण इयराण बोहत्थं ॥** चै. म. १४२

**चेईहरेण केई, पसंतरूवेण केइ बिंबेण । पूआइसया अन्ने, अन्ने बुज्झंति उवएसा ॥** चै. म. १४३

अत एव चैत्यं गृहचैत्यं च तथा तयोर्बिम्बानि विशिष्य च मुख्यबिम्बं यथास्वसामर्थ्यदेशकालाद्यपेक्षमतिविशिष्टानि कारयति । गृहचैत्यं हि पित्तल-ताम्रादिधातुमयं सम्प्रत्यपि कारयितुं शक्यते । तदशक्तौ दन्तादिमयं दन्तभ्रमर्यादिरचनापित्तल-हिङ्गुलशोभाप्रवरकोरणीविशिष्टकाष्ठादिमयं वा कार्यते । तथा चैत्ये गृहचैत्ये च प्रत्यहं सर्वतः प्रमार्जनं यथाविलोक्य-मानतैलाभ्यञ्जनं सुधाधवलनं जिनचरित्रादिविचित्ररचनं समग्रपूजोपकरणसमारचनं परिधापनिकाचन्द्रोदयप्रदानादि च तथा करोति

यथा सश्रीकताऽतिरकेता स्यात् । गृहचैत्योपरि न धौतिकाद्यपि च मोच्यं, चैत्यवत्तत्रापि चतुरशीत्याशातनानां वर्जनीयत्वात्, पित्तलशैलादिमय्योऽर्चाश्च स्नपनाऽनन्तरमेकेनाऽङ्गरूक्षणेन सर्वतो निर्जलीकृत्य प्रत्यहं द्वितीयेन मृदूज्जवलाङ्गरूक्षणेन मुहुर्मुहुः सर्वतः स्पृशेत्, एवमर्चानामौज्ज्वल्यं स्यात् । यत्र यत्र स्वल्पोऽपि जलक्लेदस्तिष्ठति तत्र तत्र श्यामिका स्यादिति, स सर्वथा व्यपास्यते, केसरबहुलचन्दनविलेपनेनाऽप्यधिकाधिकमौज्ज्वल्यं तासां स्यात् ।

न च पञ्चतीर्थीचतुर्विंशतिपट्टादौ मिथः स्नात्रजलस्पर्शादिना दोष आशङ्क्यः, यदाहुः–

**रायप्पसेणइज्जे, सोहम्मे सूरियाभदेवस्स । जीवाभिगमे विजयापुरीइ विजयाइदेवाणं ॥**

**भिंगारलोमहत्थयलूहणया धूवदहणमाईअं । पडिमाणं सकहाणय पूआए इक्कयं भणियं ॥**

**निव्वुअजिणिंदसकहा सग्गसमुग्गेसु तिसु वि लोएसु । अन्नोन्नं संलग्गा, ण्हवणजलाईहिं संपुट्ठा ॥**

**पुव्वधरकालविहिआ, पडिमाई संति केसु वि पुरेसु । वत्तक्खा खेत्तक्खा, महक्खया गंधदिट्ठा य ॥**

एकस्यार्हतः प्रतिमा व्यक्त्याख्या, एकत्र पट्टादौ चतुर्विंशतिप्रतिमा क्षेत्राऽऽख्या, एवं सप्ततिशतप्रतिमा महाऽऽख्या–

**मालाधराइआण वि, धुवणजलाई फुसेइ जिणबिंबं । पुत्थयपत्ताईण वि, उवरुवरिं फरिसणाईअं ॥**

**ता नज्जइ नो दोसो करणे चउवीसवट्टयाईणं । आयरणाजुत्तीओ, गंथेसु अ दिस्समाण त्ति ॥**

बृहद्भाष्येऽप्युक्तं–**जिणरिद्धिदंसणत्थं, एगं कारेइ कोइ भत्तिजुओ । पायडिअपाडिहेरं, देवागमसोहिअं चेव ॥**
**दंसणनाणचरित्ताराहणकज्जे जिणत्तिअं कोइ । परमिट्ठिनमोक्कारं, उज्जमिअं कोइ पंच जिणे ॥** चै. म. २८
**कल्लाणयतवमहवा, उज्जमिउं भरहवासभावित्ति । बहुमाणविसेसाउ, कोई केरिंति चउव्वीसं ॥** चै. म. २९
**उक्कोस सत्तरिसयं, नरलोए विहरइत्ति भत्तीए । सत्तरिसयंपि कोई, बिंबाणं कारइ धणड्ढो ॥** चै. म. ३०

तस्मात् त्रितीर्थीपञ्चतीर्थीचतुर्विंशतिपट्टादिकारणं न्याय्यमेव दृश्यते । इत्यङ्गपूजा ।

रौप्यसौवर्णशालिसिद्धार्थाद्यक्षतैरष्टमङ्गलालेखनम् । यथा श्रेणिकनृपस्य प्रत्यहमष्टोत्तरशतसौवर्णयवैः । अन्यथा वा ज्ञानदर्शनचारित्राराधननिमित्तं सृष्ट्या पुञ्जत्रयेण पट्टादौ विशिष्टाक्षतढौकनं, तथा विविधानां कूराद्यशन-शर्करागुडादिपान-पक्वान्नफलादिखाद्य-ताम्बूलादिस्वाद्यानां ढौकनं, गोशीर्षचन्दनरसेन पञ्चाङ्गुलितलैर्मण्डलालेखनादि पुष्पप्रकराऽऽरात्रिकादि च सर्वमग्रपूजायामन्तर्भवति । यद् भाष्यं–

**गंधव्वनट्टवाइअलवणजलारत्तिआइ [1]दीवाई । जं किच्चं तं सव्वंपि ओअरइ अग्गपूआए ॥** चै. म. २०५

नैवेद्यपूजा च प्रत्यहमपि सुकरा महाफला च, धान्यस्य विशिष्य च राद्धस्य जगज्जीवनतया सर्वोत्कृष्टरत्नत्वात्, तत एव वनवासगतश्रीरामेण महाजनोऽन्नस्य कुशलं पृष्टः । कलहनिवृत्तिप्रीत्याद्यपि मिथोऽन्नभोजनेनैव सुदृढम् । देवा अपि नैवेद्येन प्रायः

१. .....जं किच्चं । आमिसपूयाए च्चिय सव्वं पि तयं समोयरइ ॥

प्रीयन्ते । श्रूयते ह्यग्निवेतालः शतमूढकनैवेद्यादिना विक्रमादित्यस्य वशीभूतः । भूतप्रेतादयोऽपि क्षैरेयीक्षिप्रचटकाद्यन्न-मेवोत्तारणादौ याचन्ते । तथा दिक्पालादीनां बलिः तीर्थकृद्देशनानन्तरं बलिश्चान्नेनैव क्रियते । निःस्वो हली साधूक्त्याऽऽसन्नचैत्ये नित्यं नैवेद्यं ददानोऽन्यदा उत्सूरे सिंहरूपभिक्षुत्रयदर्शनपरीक्षातुष्टयक्षगिरा सप्तमेऽह्नि स्वयंवरे कन्यां नृपजयं राज्यं च लेभे ।

लोकेऽप्युक्तं—**धूपो दहति पापानि दीपो मृत्युविनाशनः । नैवेद्ये विपुलं राज्यं सिद्धिदात्री प्रदक्षिणा ॥**

अन्नादिसर्ववस्तुनिष्पत्तिहेतुत्वादिना जलमन्नादेरप्यतिशायीति तद्ढौकनमपि कार्यम् । नैवेद्यारात्रिकाद्यागमेऽप्युक्तं । यदावश्यकनिर्युक्तौ—**कीरइ**[1] **बलित्ति** । निशीथेऽपि-**तओ पभावईए देवीए सव्वं बलिमाइ काउं भणिअं देवाहिदेवो वद्धमाणसामी तस्स पडिमा कीरउ त्ति वाहिओ कुहाडो, दुहा जायं पिच्छइ सव्वलंकारविभूसिअं भयवओ पडिमं** । निशीथपीठेऽपि—"**बलित्ति असिवोवसमनिमित्तं कूरो किज्जइ** ।" निशीथचूर्णौ च—**सम्प्रतिराजा रहग्गओ विविहफले खज्जगभुज्जगे अ कवडगवत्थमाई उक्किरणे करेइ** । कल्पेऽपि—

**साहम्मिओ न** [2]**सत्था, तस्स कयं तेण कप्पइ जईणं । जं पुण पडिमाण कए, तस्स कहा का अजीवत्ता ॥**

प्रतिष्ठाप्राभृतात् श्रीपादलिप्तोध्धृतप्रतिष्ठापद्धतौ च यथाभणितमागमे—

---

१. कीरइ बली सुरावि अखंडफुडियाण फलगसरियाणं (आ.नि.५८४) । २. शास्तातीर्थकरः ।

**आरत्तिअमवयारण, मंगलदीवं च निम्मिउं पच्छा । चउनारीहिं वि निम्मत्थणं च विहिणाउ कायव्वं ॥**

महानिशीथेऽपि तृतीयाध्ययने–**अरिहंताणं भगवंताणं गंधमल्लपईवसम्मज्जणोवलेवणविचित्तबलिवत्थधूवाइएहिं पूआसक्कारेहिं पइदिणमब्भच्चणं पकुव्वाणा तित्थुच्छप्पणं करेमो** त्ति । इत्यग्रपूजा ।

भावपूजा तु जिनपूजाव्यापारनिषेधरूपतृतीयनैषेधिकीकरणपूर्वं जिनाद् दक्षिणदिशि पुंसः स्त्रियास्तु वामदिशि, आशातना-परिहारार्थं जघन्यतोऽपि सम्भवे नवहस्तमानात्, गृहचैत्यादौ तु हस्तहस्तार्द्धमानात्, उत्कृष्टतस्तु षष्ठिहस्तमानादवग्रहाद् बहिःस्थित्या चैत्यवन्दना विशिष्य स्तुत्यादिभिः स्यात् । आह च-

**तइआओ भावपूआ, ठाउं चिइवंदणोचिए देसे । जहसत्ति चित्तथुइथुत्तमाइणा देववंदणयं ॥**

निशीथेऽपि–**सो उ गंधारसावओ थयथुईहिं थुणंतो तत्थ गिरिगुहाए अहोरत्तं निवसिओ** । तथा वसुदेवहिण्डौ–**वसुदेवो पच्चूसे कयसमत्तसावयसामाइआइनियमो गहिअपच्चक्खाणो कयकाउसग्गथुइवंदणो** त्ति । एवमनेकत्र श्राविकादिभिरपि कायोत्सर्गस्तुत्याद्यैश्चैत्य-वन्दना कृतेत्युक्तम् । चैत्यवन्दना च जघन्यादिभेदात् त्रेधा । यद्भाष्यं–

**नमुक्कारेण जहन्ना चिइवंदणमज्झदंडथुइजुअला । पणदंडथुइचउक्कगथयपणिहाणेहिं उक्कोसा ॥**

नमस्कारेण=अञ्जलिबन्धशिरोनमनादिलक्षणप्रणाममात्रेण, यद्वा 'नमो अरिहंताणं'' इत्यादिना, अथवैकेन श्लोकादिरूपेण,

नमस्कारेणेति जातिनिर्देशाद् बहुभिरपि नमस्कारैः, यद्वा प्रणिपाताऽपरनामतया प्रणिपातदण्डकाख्यशक्रस्तवेनैकेन १। मध्या= मध्यमा दण्डः=चैत्यस्तवदण्डः ''अरिहंतचेइआणं'' इत्यादि स्तुतिः प्रतीता-या तदन्ते दीयते ते एव युगलं यस्यां सा २। पञ्चदण्डाः शक्रस्तव-चैत्यस्तव-नामस्तव-श्रुतस्तव-सिद्धस्तवाख्याः, प्रणिधानं जयवीअराय इत्यादि ३।–

**अन्ने बिंति इगेणं, सक्कत्थएणं जहन्नवंदणया । तद्दुगतिगेण मज्झा, उक्कोसा चउहिं पंचहिं वा ॥**

**इरियाए पुव्वं वा, पणिहाणं चेव सक्कत्थयभणणे । दुगुणचिइवंदणं ते च हुंति सक्कत्थया तिन्नि ॥**

**इगवारवंदणे पुव्व पच्छ सक्कत्थएहिं ते चउरो । दुगुणिअवंदणए वा, पुव्विं पच्छा च सक्कत्थए ॥**

**सक्कत्थओ अ इरिया दुगुणिअ चिइवंदणाइ तह तिन्नि । थुत्तपणिहाण सक्कत्थओ अ इअ पंच सक्कत्थया ॥**

चैत्यवन्दनाश्च प्रत्यहं सप्त महानिशीथे साधोः प्रोक्ताः, श्राद्धस्याऽप्युत्कर्षतः सप्त । यद् भाष्यं–

**पडिकमणे चेइअजिणचरिमपडिकमणसुअणपडिबोहे । चिइवंदण इअ जइणो सत्त उ वेला अहोरत्ते ॥**

**पडिकमओ गिहिणो वि हु सगवेला पंचवेल इयरस्स । पूआसु तिसंझासु अ होइ तिवेला जहन्नेणं ॥**

तत्र द्वे आवश्यकयोः द्वे स्वापाऽवबोधयोः त्रिकालपूजाऽनन्तरं तिस्रश्चेति सप्त, एकावश्यककरणे तु षट्, स्वापादिसमये तदकरणे पञ्चादयोऽपि, बहुदेवगृहादौ तु सप्ताधिका अपि, यदापि पूजा न स्यात्तदापि त्रिसन्ध्यं देवा वन्द्याः श्राद्धेन । यदागमः–

**भो भो देवाणुप्पिआ अज्जप्पभिइए जावज्जीवं तिकालिअं अव्वक्खित्ताचलेगग्गचित्तेणं चेइए वंदिअव्वे, इणमेव भो मणुअत्ताओ असुइअसासयखणभंगुराओ सारंति । तत्थ पुव्वण्हे ताव उदगपाणं न कायव्वं जाव चेइए साहू अ न वंदिए, तहा मज्झण्हे ताव असणकिरिअं न कायव्वं जाव चेइए न वंदिए, तहा अवरण्हे चेव तहा कायव्वं जहा अवंदिएहिं चेइएहिं नो सिज्जायलमइक्कमिज्जइ ।** तथा—

**सुपभाए समणोवासगस्स पाणंपि कप्पइ न पाउं । नो जाव चेइआइं, साहूवि अ वंदिआ विहिणा ॥**

**मज्झण्हे पुणरवि वंदिऊण नियमेण कप्पए भुत्तुं । पुण वंदिऊण ताइं, पओससमयम्मि तो सुअइ ॥**

गीतनृत्ताद्यग्रपूजायामुक्तं भावपूजायामप्यवतरति, तच्च महाफलत्वान्मुख्यवृत्त्या स्वयं करोति उदायननृपराज्ञी प्रभावती यथा। यन्निशीथचूर्णिः—

**पभावई ण्हाया कयकोउअमंगला सुक्किल्लवासपरिहिआ जाव अट्ठमिचउद्दसीसु अ भत्तिराएण सयमेव राओ नट्टोवयारं करेइ, रायावि तयाणुवित्तिए मुरयं वाएइ त्ति ।**

पूजाकरणादौ चार्हतश्छद्मस्थकेवलिसिद्धावस्थात्रयं भावयेत् । यद्भाष्यं—

**ण्हवणच्चगेहिं छउमत्थवत्थपडिहारगेहिं केवलिअं । पलिअंकुस्सग्गेहि अ, जिणस्स भाविज्ज सिद्धंतं ॥**

स्नापकैः परिकरोपरिघटित-गजारूढकरकलित-कलशैरमरैरर्चकैश्च तत्रैव घटितमालाधारैः कृत्वा जिनस्य छद्मस्थावस्थां भावयेत् । छद्मस्थावस्था च त्रिधा जन्मावस्था राज्यावस्था श्रामण्यावस्था च, तत्र स्नपनकारैर्जन्मावस्था, मालाधारै राज्यावस्था,

श्रामण्यावस्था तु भगवतोऽपगते केशशीर्षमुखदर्शनात् सुज्ञातैव । प्रातिहार्येषु परिकरोपरितनकलशोभयपार्श्वघटितैः पत्रैः कङ्केलिः, मालाधारैः पुष्पवृष्टिः, वीणावंशकरैः प्रतिमोभयपार्श्ववर्त्तिभिर्दिव्यो ध्वनिः शेषाणि स्फुटान्येव । इति भावपूजा ।

**पंचोवयारजुत्ता, पूआ अट्ठोवयारकलिआ य । रिद्धिविसेसेण पुणो, नेआ सव्वोवयाराविं ॥** चै. महा. २०९

**तहिअं पंचुवयारा, कुसुमक्खयगंधधूवदीवेहिं ।**

**कुसुम-क्खय-गंध-पईव-धुव-नेवज्ज-फल-जलेहिं पुणो । अट्ठविहकम्महणणी, अट्ठुवयारा हवइ पूआ ॥**

**सव्वोवयारपूआ, ण्हवणच्चणवत्थभूसणाईहिं । फलबलिदीवाईनट्टगीअआरत्तिआइहिं ॥**

इति बृहद्भाष्याद्युक्तं पूजाभेदत्रयम् । तथा–

**सयमाणयणे पढमा, बीआ आणावणेण अन्नेहिं । तइआ मणसा संपाडणेण वरपुप्फमाईणं ॥**

इति कायवाङ्मनोयोगितया करणकारणानुमतिभेदतया च पूजात्रिकम् । तथा–**पूअंपि पुप्फामिसथुइपडिवत्तिभेअओ चउविहंपि जहासत्तीए कुज्जा ।**

ललितविस्तरादौ तु पुष्पामिषस्तोत्रप्रतिपत्तिपूजानां यथोत्तरं प्राधान्यमित्युक्तम् (नमुत्थुनं पदव्याख्यानावसरे) । तत्रामिषं प्रधानमशनादि भोग्यं वस्तु । यद् गौडः–

**उत्कोचे पलले न स्त्री आमिषं भोग्यवस्तुनि ।**

प्रतिपत्तिः पुनरविकलाऽऽप्तोपदेशपरिपालना । इत्यागमोक्तं पूजाभेदचतुष्टयम् । तथा—

**दुविहा जिणिंदपूआ, दव्वे भावे अ तत्थ दव्वम्मि । दव्वेहिं जिणपूआ, जिणआणापालणं भावे ॥**

इत्याद्युक्तं द्रव्यभावादिलक्षणं पूजाभेदद्वयादि । तथा—**पुप्फारुहणं गंधारुहणं** इत्यादयः सप्तदश, स्नात्रविलेपनादय-श्चैकविंशतिः पूजाभेदा अङ्गादिपूजात्रये सर्वव्यापकेऽन्तर्भवन्ति । सप्तदशपूजाभेदांश्चैवमूचुः—

**ण्हवणविलेवणअंगम्मि चक्खुजुअलं च वासपूआए । पुप्फारुहणं मालारुहणं तह वन्नयारुहणं ॥**

**चुन्नारुहणं जिणपुंगवाण आहरणारोहणं चेव । पुप्फगिह पुप्फपगरो, आरत्तिमंगलपईवो ॥**

**दीवो धूवुक्खेवं, नेवेज्जं सुहफलाण ढोअणयं । गेअं नट्टं वज्जं पूजाभेआ इमे सत्तर ॥**

एकविंशतिभेदपूजादिविधिश्चैवमुक्तः—

**स्नानं पूर्वामुखीभूय प्रतीच्यां दन्तधावनम् । उदीच्यां श्वेतवस्त्राणि पूजा पूर्वोत्तरामुखी ॥**

**गृहे प्रविशतां वामभागे शल्यविवर्जिते । देवतावसरं कुर्यात् सार्द्धहस्तोर्ध्वभूमिके ॥**

**नीचैर्भूमिस्थितं कुर्याद्देवतावसरं यदि । नीचैर्नीचैस्ततो वंशः सन्तत्याऽपि सदा भवेत् ॥**

पूजकः स्याद्यथा पूर्व उत्तरस्याश्च सम्मुखः । दक्षिणस्या दिशो वर्जं विदिग्वर्जनमेव हि ॥
पश्चिमाभिमुखं कुर्यात् पूजां जैनेन्द्रमूर्त्तये । चतुर्थसन्ततिच्छेदो दक्षिणस्यामसन्ततिः ॥
आग्नेय्यां तु यदा पूजा धनहानिर्दिने दिने । वायव्यां सन्ततिर्नैव नैर्ऋत्यां च कुलक्षयः ॥
ऐशान्यां कुर्वतां पूजां संस्थितिर्नैव जायते । अङ्घ्रि-जानु-करांसेषु-मूर्ध्नि पूजा यथाक्रमम् ॥
श्रीचन्दनं विना नैव पूजा कार्या कदाचन । भाले कण्ठे हृदम्भोजोदरे तिलककारणम् ॥
नवभिस्तिलकैः पूजा करणीया निरन्तरम् । प्रभाते प्रथमं वासपूजा कार्या विचक्षणैः ॥
मध्याह्ने कुसुमैः पूजा सन्ध्यायां धूपदीपकात् । वामांशे धूपदाहः स्याज्जल[1]पात्रं तु सम्मुखम् ॥
अर्हतो दक्षिणे भागे दीपस्य विनिवेशनम् । ध्यानं तु दक्षिणे भागे चैत्यानां वन्दनं तथा ॥
हस्तात्प्रस्खलितं क्षितौ निपतितं लग्नं क्वचित्पादयोर्यन्मूर्धोर्ध्वगतं धृतं कुवसनैर्नाभेरधो यद् धृतम् ।
स्पृष्टं दुष्टजनैर्घनैरभिहतं यद्दूषितं कीटकैस्त्याज्यं तत्कुसुमं दलं फलमथो भक्तैर्जिनप्रीतये ॥ (शा० वि०)
नैकपुष्पं द्विधा कुर्यान्न च्छिन्द्यात्कलिकामपि । चम्पकोत्पलभेदेन भवेद्दोषो विशेषतः ॥

१. 'अग्रपूजा' इत्यपि पाठः, 'अग्रपूरं' इत्यपि को० ह० प्र० पाठः ।

**गन्धधूपाक्षतैः स्रग्भिः प्रदीपैर्बलिवारिभिः । प्रधानैश्च फलैः पूजा विधेया श्रीजिनेशितुः ॥**
**शान्तौ श्वेतं तथा पीतं लाभे श्यामं पराजये । मङ्गलार्थे तथा रक्तं पञ्चवर्णं च सिद्धये ॥**
**पञ्चामृतं तथा शान्तौ दीपः स्यात्सघृतैर्गुडैः । वह्नौ लवणनिक्षेपः शान्त्यै [१]तुष्ट्यै प्रशस्यते ॥**
**खण्डिते सन्धिते छिन्ने रक्ते रौद्रे च वाससि । दानपूजातपोहोमसन्ध्यादि निष्फलं भवेत् ॥**
**पद्मासनसमासीनो नासाग्रन्यस्तलोचनः । मौनी वस्त्रावृतास्योऽयं पूजां कुर्याज्जिनेशितुः ॥**
**स्नात्रं-विलेपन-विभूषण-पुष्पवास-धूप-प्रदीप-फल-तन्दुल-पत्र-पूगैः ।**
**नैवेद्य-वारि-वसनैश्चमरातपत्र-वादित्र-गीत-नटन-स्तुति-कोशवृद्ध्या ॥** (वसन्ततिलका)
**इत्येकविंशतिविधा जिनराजपूजा ख्याता सुरासुरगणेन कृता सदैव ।**
**खण्डीकृता कुमतिभिः कलिकालयोगाद् यद्यत्प्रियं तदिह भाववशेन योज्यम् ॥** (वसन्ततिलका)

इति पूजाप्रकरणमुमास्वातिवाचककृतमिति प्रसिद्धिः । तथा—**'ऐशान्यां देवतागृहम्'** इति **विवेकविलासे** । तथा—

**न वैषम्ये न पादस्थे न चैवोत्कटिकासने । नैवोर्ध्वे वामपदे न न पूजा वामहस्ततः ॥**
**न शुष्कैः पूजयेद्देवं कुसुमैर्न महीगतैः । न विशीर्णदलैः स्पृष्टैर्नाशुभैर्नाऽविकासिभिः ॥**

१. पुष्ट्यै इति को० ह० प्र० पाठः ।

**कीटकोशापविद्धानि शीर्णपर्युषितानि च । वर्जयेदूर्णनाभेन वासितं यदशोभनम् ॥**

**पूतिगन्धीन्यगन्धीनि अम्लगन्धीनि वर्जयेत् । मलमूत्रादिनिर्माणादुच्छिष्टानि कृतानि च ॥**

सविस्तरपूजावसरे च नित्यं विशेषतश्च पर्वसु त्रिपञ्चसप्तकुसुमाञ्जलिप्रक्षेपादिपूर्वं भगवतः स्नात्रं विधेयम् । तत्रायं विधिः, प्रातः पूर्वं निर्माल्योत्सारणं प्रक्षालनं सङ्क्षेपपूजा आरात्रिकं मङ्गलप्रदीपश्च । ततः स्नात्रादिसविस्तरद्वितीयपूजाप्रारम्भे देवस्य पुरः सकुङ्कुमजलकलशः स्थाप्यः ततः—

**मुक्तालङ्कारविकारसारसौम्यत्वकान्तिकमनीयम् । सहजनिजरूपनिर्जितजगत्त्रयं पातु जिनबिम्बम् ॥**

इत्युक्त्वाऽलङ्कारोत्तारणम् ।

**अवणिअ कुसुमाहरणं पयइपइट्ठिअमणोहरच्छायं । जिणरूवं मज्जणपीठसंठिअं वो सिवं दिसउ ॥**

इत्युक्त्वा निर्माल्योत्तारणम् । ततः प्रागुक्तकलशढालनं पूजा च । अथ धौतधूपितकलशेषु स्नात्रार्हसुगन्धजलक्षेपः, श्रेण्या तेषां व्यवस्थापनं सद्वस्त्रेणाच्छादनं च । ततः स्वचन्दनधूपादिना कृततिलकहस्तकङ्कणहस्तधूपनादिकृत्याः श्रेणिस्थाः श्रावकाः कुसुमाञ्जलिपाठान् पठन्ति । तत्र—

**सयवत्तकुंदमालइ, बहुविहकुसुमाइं पंचवन्नाइं । जिणनाहण्हवणकाले दिंति सुरा कुसुमंजली हिट्ठा ॥**

इत्युक्त्वा देवस्य मस्तके पुष्पारोपणम् ।

**गंधायाड्ढिअमहुअरमणहरझंकारसद्दसंगीआ । जिणचलणोवरि मुक्का हरउ तुम्ह कुसुमंजली दुरिअं ॥**

इत्यादिपाठैः प्रतिगाथादिपाठं जिनचरणोपरि एकेन श्रावकेण कुसुमाञ्जलिपुष्पाणि क्षेप्याणि । सर्वेषु कुसुमाञ्जलिपाठेषु च तिलकपुष्पपत्रधूपादिविस्तरो ज्ञेयः । अथोदारमधुरस्वरेणाऽधिकृतजिनजन्माभिषेककलशपाठः । ततो घृतेक्षुरसदुग्धदधिसुगन्धि-जलैः पञ्चामृतैः स्नात्राणि, स्नात्रान्तरालेषु च धूपो देयः । स्नात्रकालेऽपि जिनशिरः पुष्पैरशून्यं कार्यम् । यदाहुर्वादिवेताल-श्रीशान्तिसूरयः—

**आस्नात्रपरिसमाप्तेरशून्यमुष्णीषदेशमीशस्य । सान्तर्धानाऽब्धारापातं पुष्पोत्तमैः कुर्यात् ॥**

स्नात्रे च क्रियमाणे निरन्तरं चामरसङ्गीततूर्याद्याडम्बरः सर्वशक्त्या कार्यः । सर्वैः स्नात्रे कृते पुनरकरणाय शुद्धजलेन धारा देया । तत्पाठश्चायम् —

**अभिषेकतोयधारा धारेयं ध्यानमण्डलाग्रस्य । भवभवनभित्तिभागान् भूयोऽपि भिनत्तु भागवती ॥**

ततोऽङ्गरूक्षणविलेपनादिपूजा प्राक्पूजातोऽधिका कार्या । सर्वप्रकारैर्धान्यपक्वान्नशाकविकृतिफलादिभिर्बलिढौकनम्, ज्ञानादिरत्नत्रयाढ्यस्य लोकत्रयाधिपतेर्भगवतोऽग्रे पुञ्जत्रयेणोचितं स्नात्रपूजादिकं पूर्वं श्रावकैर्वृद्धलघुव्यवस्थया, ततः श्राविकाभिः

कार्यम् । जिनजन्ममहेऽपि पूर्वमच्युतेन्द्रः स्वसुरयुतस्ततो यथाक्रममन्ये इन्द्राः स्नात्रादि कुर्वन्ति । स्नात्रजलस्य च शेषावत् शीर्षादौ क्षेपेऽपि न दोषः सम्भाव्यः । यदुक्तं हैमे श्रीवीरचरित्रे–

**अभिषेकजलं तत्तु सुरासुरनरोरगाः । ववन्दिरे मुहुः सर्वाङ्गीणं च परिचिक्षिपुः ॥**

श्रीपद्मचरितेऽप्येकोनत्रिंशे उद्देशे अषाढशुक्लाष्टम्या आरभ्य दशरथनृपकारिताष्टाह्निकाचैत्यस्नात्रमहाधिकारे–

**तं ण्हवणसंतिसलिलं, नरवइणा पेसिअं सभज्जाणं । तरूणविलयाहिं नेउं, छूढं चिअ उत्तमंगेसु ॥**

**कंचुइहत्थोवगयं, जावय गंधोदयं चिरावेइ । तावय वरग्गमहिसी, पत्ता सोगं च कोवं च ॥** इत्यादि

**सा कंचुइणा कुद्धा, अहिसित्ता तेण संतिसलिलेणं । निव्वविअमाणसग्गी, पसन्नहियआ तओ जाया ॥**

बृहच्छान्तिस्तवेऽपि '**शान्तिपानीयं मस्तके दातव्य**'मित्युक्तम् । श्रूयतेऽपि जरासङ्घमुक्तजरयोपद्रुतं स्वसैन्यं श्रीनेमिगिरा कृष्णेनाराद्ध नागेन्द्रात्पातालस्थश्रीपार्श्वप्रतिमां शङ्खेश्वरपुरे आनाय्य तत्स्नपनाऽम्बुना पटूचक्रे । जिनदेशनासद्मनि नृपाद्यैः प्रक्षिप्तं कूररूपं बलिमर्द्धमपतितं देवा गृह्णन्ति, तदर्द्धार्द्धं नृपः, शेषं तु जनाः । तत्सिक्थेनापि शिरसि क्षिप्तेन व्याधिरुपशाम्यति, षड् मासांश्चान्यो न स्यादित्यागमेऽपि ।

ततः सद्गुरुप्रतिष्ठितः प्रौढोत्सवानीतो दुकूलादिमयो महाध्वजः प्रदक्षिणात्रयादिविधिना प्रदेयः । सर्वैर्यथाशक्ति

परिधापनिका च मोच्या । अथाऽऽरात्रिकं समङ्गलप्रदीपमर्हतः पुरस्तादुद्द्योत्यम् । आसन्नं च वह्निपात्रं स्थाप्यं, [1]तत्र लवणं मृदं च पातयिष्यते ।

**उवणेउ मंगलं वो, जिणाण मुहालिजालसंवलिआ । तित्थपवत्तणसमये, तिअसविमुक्का कुसुमवुट्ठी ॥**

इत्युक्त्वा प्रथमं कुसुमवृष्टिः । ततः—

**उयह[2] पडिभंगपसरं, पयाहिणं मुणिवइं करेऊणं । पडइ सलोणत्तणलज्जिअं व लोणं हुअवहम्मि ॥**

इत्यादिपाठैर्विधिना जिनस्य त्रिः सपुष्पलवणजलोत्तारणादि कार्यम् । ततः सृष्ट्या पूजयित्वा आरात्रिकं सधूपोत्क्षेपमुभयत उच्चैः सकलशजलधारं परित श्राद्धैः प्रकीर्यमाणपुष्पप्रकरम्—

**मरगयमणिघडिअविसालथालमाणिक्कमण्डिअपईवं । ण्हवणयरकरुक्खित्तं, भमउ जिणारत्तिअं तुम्ह ॥**

इत्यादिपाठपूर्वं प्रधानभाजनस्थं सोत्सवमुत्तार्यते त्रिवारम् । यदुक्तं त्रिषष्ठीयादिचरित्रे—

**कृतकृत्य इवाऽथाऽपसृत्य किञ्चित् पुरन्दरः । पुरोभूय जगद्भर्त्तुरारात्रिकमुपाददे ॥**

**ज्वलद्दीपत्विषा तेन चकासामास कौशिकः[3] । भास्वदौषधिचक्रेण शृङ्गेणेव महागिरिः ॥**

१. लवणजलं च इति को० ह० प्र० पाठः । २. पश्यत । ३. इन्द्रः ।

**श्रद्धालुभिः सुरवरैः प्रकीर्णकुसुमोत्करम् । भर्त्तुरुत्तारयामास तत् त्रिस्त्रिदशपुङ्गवः ॥**

मङ्गलप्रदीपोऽप्यारात्रिकवत्पूज्यते–

**कोसंबिसंठिअस्स व, पयाहिणं कुणइ मउलिअपईवो[1] । जिण ! सोमदंसणे दिणयरुव्व तुह मंगलपईवो ॥**

**भामिज्जंतो सुरसुंदरिहिं तुह नाह ! मंगलपईवो । कणयायलस्स नज्जइ, भाणुव्व पयाहिणं दिंतो ॥**

इति पाठपूर्वं तथैवोत्तार्य दीप्यमानो जिनचरणाग्रे मुच्यते । आरात्रिकं तु विधाप्यते न दोषः । प्रदीपारात्रिकादि च मुख्यवृत्त्या घृतगुडकर्पूरादिभिः क्रियते विशेषफलत्वात् । लोकेऽप्युक्तं–

**प्रज्वाल्य देवदेवस्य कर्पूरेण तु दीपकम् । अश्वमेधमवाप्नोति कुलं चैव समुद्धरेत् ॥**

अत्र मुक्तालङ्कारेत्यादिगाथाः श्रीहरिभद्रसूरिकृताः सम्भाव्यन्ते । तत्कृतसमरादित्यचरित्रग्रन्थस्यादौ–

**'उवणेउ मंगलं वो'** इति नमस्कारस्य दर्शनात् । एताश्च गाथाः श्रीतपापक्षादौ प्रसिद्धा इति न सर्वा लिखिताः । स्नात्रादौ सामाचारीविशेषेण विविधविधिदर्शनेऽपि न व्यामोहः कार्यः, अर्हद्भक्तिफलस्यैव सर्वेषां साध्यत्वात् । गणधरादिसामाचारीष्वपि भूयांसो भेदा भवन्ति । तेन यद्यद्धर्माद्यविरुद्धमर्हद्भक्तिपोषकं तत्तन्न केषामप्यसम्मतम् । एवं सर्वधर्मकृत्येष्वपि ज्ञेयम् । इह

१. पयावो इति को० ह० प्र० पाठः ।

लवणारात्रिकाद्युत्तारणं सम्प्रदायेन सर्वगच्छेषु परदर्शनेष्वपि च सृष्ट्यैव क्रियमाणं दृश्यते । श्रीजिनप्रभसूरिकृतपूजाविधौ त्वेवमुक्तम्—**लवणाइउत्तारणं पालित्तयसूरिमाइपुव्वपुरिसेहिं संहारेण अणुन्नायंपि संपयं सिट्ठिए कारिज्जइ** । स्नात्रकरणे च सर्वप्रकारसविस्तर-पूजाप्रभावनादिसम्भवेन प्रेत्य प्रकृष्टं फलं स्पष्टम् । जिनजन्मस्नात्रकर्तृचतुःषष्टिनिर्जरेन्द्राद्यनुकारकरणादि चाऽत्रापि । इति स्नात्रविधिः । प्रतिमाश्च विविधास्तत्पूजाविधौ सम्यक्त्वप्रकरणे इत्युक्तं—

**गुरुकारिआइ केई, अन्ने सयकारिआइ तं बिंति । विहिकारिआइ अन्ने, पडिमाए पूअणविहाणं ॥**

गुरवो मातृपितृपितामहादयस्तैः कारिताया: केचिद्, अन्ये स्वयंकारितायाः, विधिकारितायास्त्वन्ये प्रतिमायास्तत्पूर्वाभिहितं पूजाविधानं ब्रुवन्ति कर्त्तव्यमिति शेषः । अवस्थितपक्षस्तु गुर्वादिकृतत्वस्याऽनुपयोगित्वान्ममत्वाऽऽग्रहरहितेन सर्वप्रतिमा अविशेषेण पूजनीयाः । सर्वत्र तीर्थकृदाकारोपलम्भेन तद्बुद्धेरुपजायमानत्वाद् अन्यथा हि स्वाग्रहवशादर्हद्बिम्बेऽप्यवज्ञामाचरतो दुरन्तसंसारपरिभ्रमणलक्षणो बलाद् दण्डः समाढौकते । न चैवमविधिकृतामपि पूजयतस्तदनुमतिद्वारेणाज्ञाभङ्गलक्षणदोषापत्तिः आगमप्रामाण्यात् । तथा हि श्रीकल्पभाष्ये—

**निस्सकडमनिस्सकडे अ चेइए सव्विहिं थुई तिन्नि । वेलं व चेइआणि अ नाउं इक्किक्किआ वावि ॥** कल्प० १८०४

निश्राकृते गच्छप्रतिबद्धे, अनिश्राकृते च तद्विपरीते चैत्ये सर्वत्र तिस्रः स्तुतयो दीयन्ते । अथ प्रतिचैत्यं स्तुतित्रये दीयमाने वेलाया अतिक्रमो भवति । भूयांसि वा तत्र चैत्यानि ततो वेलां चैत्यानि वा ज्ञात्वा प्रतिचैत्यमेकैकापि स्तुतिर्दातव्या । चैत्ये

तन्तुजालादौ विधिमाह—

**सीलेह मंखफलए, इअरे चोइंति तंतुमाईसु । अभिजोइंति सवित्तिसु अणिच्छफेडंतऽदीसंता ॥** कल्प० १८१०

इतरेऽसंविग्ना देवकुलिका इत्यर्थः, ताँस्तन्तुजाललूतापुटकादिषु सत्सु ते साधवो नोदयन्ति, यथा शीलयत परिकर्मयत, मङ्खफलकानीव मङ्खफलकानि, देवकुलानि, मङ्खो नाम चित्रफलकव्यग्रहस्तः तस्य च यदि फलकमुज्ज्वलं भवति ततो लोकः सर्वोऽपि तं पूजयति, एवं यदि यूयमपि देवकुलानि भूयो भूयः सम्मार्जनादिना सम्यगुज्ज्वालयत, ततो भूयान् लोको भवतां पूजासत्कारं कुर्यात् । अथ ते देवकुलिकाः सवृत्तिकाश्चैत्यप्रतिबद्धगृहक्षेत्रादिवृत्तिभोगिनस्ततस्तानभियोजयन्ति=निर्भर्त्सयन्ति, यथा एकं तावद्देवकुलानां वृत्तिमुपजीवथ, द्वितीयमेतेषां सम्मार्जनादिसारामपि न कुरुथ, इत्थमुक्ता अपि यदि तन्तुजालादीन्यपनेतुं नेच्छन्ति, ततोऽदृश्यमानाः स्वयमेव स्फेटयन्त्यपनयन्तीति तद्वृत्तिः । एवमागमाच्च विनश्यच्चैत्याद्युपेक्षा संयतेनापि सर्वथा न कार्येत्यागतम् । अयं च चैत्यगमनपूजास्नात्रादिविधिः सर्वोऽपि ऋद्धिप्राप्तमाश्रित्योक्तः, तस्यैवैतद्योगसम्भवात् । अनृद्धिप्राप्तस्तु श्राद्धः स्वगृहे सामायिकं कृत्वा केनापि सह ऋणविवादाद्यभावे ईर्याद्युपयुक्तः साधुवच्चैत्यं याति नैषेधिकीत्रयादि-भावपूजानुयायिविधिना । स च पुष्पादिसामग्र्यभावाद् द्रव्यपूजायामशक्तः सामायिकं पारयित्वा कायेन यदि किञ्चित् पुष्पग्रथनादि कर्त्तव्यं स्यात्तत् करोति । ***ननु*** कथं सामायिकत्यागेनात्र द्रव्यस्तवस्यौचित्यम् ? ***उच्यते,*** सामायिकमस्य स्वायत्तत्वात् सकलकालमपि कर्त्तव्यं स्यात्, चैत्यकृत्यं तु समुदायायत्तत्वात्कादाचित्कं, प्रस्तावे च तस्मिन् क्रियमाणे

विशेषपुण्यलाभः । यदागमः—

**जीवाण बोहिलाभो, सम्मद्दिट्ठीण होइ पिअकरणं । आणा जिणंदभत्ती, तित्थस्स पभावणा चेव ॥**

एवमनेके गुणास्तस्मात्तदेव कर्तव्यम् । उक्तञ्च दिनकृत्यसूत्रेऽपि—

**एवं विहि इमो सव्वो, रिद्धिमंतस्स देसिओ । इअरो निअगेहम्मि, काउं सामाइयं वयं ॥** (७७)

**जइ न कस्सइ धारेइ, न विवाओ अ विज्जए । उवउत्तो सुसाहुव्व, गच्छए जिणमंदिरे ॥** (७८)

**काएण अत्थि जइ किंचि कायव्वं जिणमंदिरे । तओ सामाइअं मोत्तुं, करे जं करणिज्जयं ॥** (७९)

अत्र च सूत्रगाथोक्तविधिनेति पदेन दशत्रिकाभिगमपञ्चकादिचतुर्विंशतिमूलद्वारैश्चतुःसप्तत्यधिकद्विसहस्रीमितप्रतिद्वाररूपो भाष्याद्युक्तः सर्वोऽपि विधिरभ्यूह्यः यथा—

**तिन्नि निसीही तिन्नि उ पयाहिणा तिन्नि चेव य पणामा । तिविहा पूआ य तहा, अवत्थतिअ भावणं चेव ॥**

**तिदिसि निरिक्खणविरई, पयभूमिपमज्जणं च तिखुत्तो । वन्नाइतिअं मुद्दातिअं च तिविहं च पणिहाणं ॥** इत्यादि ।

विधिप्रधानमेव च विधीयमानं सर्वं देवपूजावन्दनकादिधर्मानुष्ठानं महाफलमन्यथा त्वल्पफलम् सातिचारतया च जातु ततः प्रत्यपायादेरप्यापत्तिः । उक्तञ्च—

**धर्मानुष्ठानवैतथ्यात्प्रत्यपायो महान् भवेत् । रौद्रदुःखौघजननो दुष्प्रयुक्तादिवौषधात् ॥**

चैत्यवन्दनादेश्चाविधिना विधाने प्रायश्चित्तमप्युक्तमागमे । तथाच महानिशीथसप्तमाध्ययनसूत्रं—**अविहीए चेइआइं वंदिज्जा तस्स णं पायच्छित्तं उवइसिज्जा, जओ अविहीए चेइआइं वंदमाणो अन्नेसिं असद्धं जणेइ इइ काऊणं ।**

देवताविद्यामन्त्रादयोऽपि विधिनैवाराद्धाः सिद्धिफलाः[१], अन्यथा तु अनर्थाद्यपि सद्यः कुर्युः । यथाऽयोध्यायां सुरप्रियो यक्षः प्रत्यब्दं यात्रादिने चित्रितश्चित्रकर्मचित्रितस्तु पूर्लोकं हन्ति, ततो नश्यन्तश्चित्रकृतो मिथः प्रतिभूत्वादिना राज्ञा श्रृङ्खलाबद्धीकृताः, घटन्यस्तपत्रिकायां यन्नाम निर्याति तत्पार्श्वाद् यक्षश्चित्र्यते, अन्यदा वृद्धापुत्रस्य नामनिर्गमे वृद्धारोदने कौशाम्ब्यागतकियद्दिन-स्थितचित्रकृद्दारकेण ध्रुवमविधिनैते चित्रयन्ति इति विमृश्य दृढमुक्तम्, 'अहं चित्रयिष्यामि' इति । ततस्तेन षष्ठं कृत्वा वपुर्वस्त्रवर्णककूर्चिकादिपावित्र्य-अष्टपुटमुखकोशादिविधिना स चित्रितः, पदोः पतित्वा च क्षमितः, तुष्टो दारकेणोक्तः मारिर्न कार्या, पुनस्तुष्ट एकांशदर्शने यथास्थरूपचित्रणकलां ददौ । तेन कौशाम्बीससभायां जालिकाङ्गुष्ठदर्शिना मृगावतीरूपं यथास्थं चित्रितम् । राज्ञोरूतिलकं दृष्ट्वा स वध्य आज्ञप्तः । सर्वैर्वरकथनेऽपि मुखमात्रदर्शनेन कुब्जारूपचित्रणेऽपि छिन्नसंदंशः । पुनर्यक्षमाराध्य वामहस्तचित्रितां मृगावतीं चण्डप्रद्योतायाऽदर्शयत् । स प्रहितदूतधिक्कारे कौशाम्बीं रुरोध ।

---

१. आराध्याः सिद्धफलाः इति को० ह० प्र० पाठः ।

शतानीके मृते मृगावतीगिरा उज्जयिन्यानीतेऽष्टाभिर्वप्रं तृणान्नपूर्णां पूरीं च चक्रे । श्रीवीरे समवसृते भिल्लपृष्टं या सा सा सेति सम्बन्धं श्रुत्वा सा अङ्गारवत्याद्याश्चण्डप्रद्योतराज्ञोऽष्टौ प्रव्रजिताः । इति विध्यविध्योर्ज्ञातम् ।

न चाविधिकृतादकृतमेव वरमिति प्रतिपक्षश्चिन्त्यः । यदुक्तं—

**अविहिकया वरमकयं असुअवयणं भणंति समयन्नू । पायच्छित्तं अकए, गुरुअं वितहं कए लहुअं ॥**

तस्माद्धर्मानुष्ठानं निरन्तरं कार्यमेव, किन्तु तत्कुर्वता सर्वशक्त्या विधिविधौ यतनीयम् । इदमेव च श्रद्धालोर्लक्षणम् । आहुश्च—

**विहिसारं चिअ सेवइ, सद्धालू सत्तिमं अणुट्ठाणं । दव्वाइदोसनिहओ, विचक्खवायं वहइ तम्मि ॥**

**धन्नाण विहिजोगो विहिपक्खाराहगा सया धन्ना । विहिबहुमाणा धन्ना, विहिपक्खअदूसगा धन्ना ॥**

**आसन्नसिद्धिआणं विहिपरिणामो होइ उ सयकालं । विहिचाओ अविहिभत्ती, अभव्वजिअदूरभव्वाणं ॥**

कृषिवाणिज्यसेवाद्यपि भोजनशयनासनगमनवचनाद्यपि च द्रव्यक्षेत्रकालादिविधिना पूर्णं फलति, अन्यथा त्वल्पमेव । श्रूयते हि द्वौ नरौ द्रव्यार्थिनौ देशान्तरे सिद्धनरं बहूपासितवन्तौ, ततस्तुष्टेन तेन तुम्बीफलबीजानि सप्रभावाण्यर्पितानि, सम्यगाम्नायश्चोक्तो, यथा शतवारकृष्टक्षेत्रे निरातपे उक्तनक्षत्रवारयोगे तानि वाप्यानि, वल्लीनिष्पत्तौ कानिचिद् बीजानि सङ्गृह्य

सपत्रपुष्पफला सा वल्ली क्षेत्रस्यैव दह्यते, तद्भस्मन एकगदीआणकश्चतुःषष्टिगदीआणकताम्रमध्ये क्षिप्यते, ततो जात्यं हेम स्यादिति सिद्धशिक्षितौ गृहमायातौ । एकेन यथाविधिकृते जात्यं हेम जज्ञे । अन्येन विधिः किञ्चिन्न्यूनश्चक्रे, तस्य च रूप्यमेवेति सर्वत्र सम्यग् विधिर्ज्ञेयः कार्यश्च सर्वशक्त्या । पूजादिपुण्यक्रियाप्रान्ते च सर्वत्राऽविध्याशातनानिमित्तं मिथ्यादुष्कृतं दातव्यं । अङ्गादिपूजात्रयफलं त्वेवमाहुः—

**विग्घोवसामिणेगा, अब्भुदयपसाहणी भवे बीआ । निव्वुइकरणी तइआ, फलया उ जहत्थनामेहिं ॥**

अत्र च प्रागुक्तमङ्गाग्रपूजाद्वयं चैत्यबिम्बकारणयात्रादिश्च द्रव्यस्तवः । यदाह—

**जिणभवणबिंबठवणजत्तापूआइसुत्तओ विहिणा । दव्वत्थओ त्ति नेओ, भावत्थयकारणत्तेण ॥**

**निच्चं चिअ संपुन्ना, जइवि हु एसा न तीरए काउं । तहवि अणुचिट्ठिअव्वा, अक्खदीवाइदाणेण ॥**

**एगंपि उदगबिंदू, जह पक्खित्तं महासमुद्दम्मि । जायइ अक्खयमेवं, पूआ वि हु वीअरागेसु ॥**

**एएणं बीएणं, दुक्खाइं अपाविऊण भवगहणे । अच्चंतुदारभोए, भोत्तुं सिज्झंति सव्वजिया ॥**

**पूआए मणसंती, मणसंतीए उत्तमं झाणं । सुहझाणेण य मुक्खो मुक्खे सुक्खं निराबाहं ॥**

**पुष्पाद्यर्चा तदाज्ञा च, तद्द्रव्यपरिरक्षणम् । उत्सवास्तीर्थयात्रा च, भक्तिः पञ्चविधा जिने ॥**

द्रव्यस्तवश्चाऽभोगाऽनाभोगाभ्यां द्विधा । यदाहुः—

**देवगुणपरिन्नाणा[1] तब्भावाणुगयमुत्तमं विहिणा । [2]आयरसारं जिणपूअणेण आभोगदव्वथओ ॥**

**एत्तो चरित्तलाभो, होइ लहुं सयलकम्मनिद्दलगो । ता एत्थ सम्ममेव हि, पयट्टिअव्वं सुदिट्ठीहिं ॥**

**पूआविहिविरहाओ, अपरिन्नाणा उ जिणगयगुणाणं । सुहपरिणामवियुत्ता, एसोऽणाभोगदव्वथओ ॥**

**गुणठाणठाणगत्ता एसो एवंपि गुणकरो चेव । सुहसुहयरभावविसुद्धिहेउओ बोहिलाभाओ ॥**

**असुहक्खएण धणिअं, धन्नाणं आगमेसिभद्दाणं । अमुणिअगुणे वि नूणं, विसए पीई समुच्छलइ ॥**

**यथा शुकमिथुनस्याऽर्हद्बिम्बे ।**

**होइ पओसो विसए, गुरुकम्माणं भवाभिनंदीणं । पत्थंमि आउराण व उवट्ठिए निच्छिए मरणे ॥**

**एत्तो च्चिय तत्तन्नू, जिणबिंबे जिणवरिंदधम्मे वा । असुहब्भासभयाओ, पओसलेसंपि वज्जंति ॥**

परजिनाऽर्चाद्विषे कुन्तलाराज्ञीज्ञातम् । यथा—अवनिपुरे जितशत्रुनृपस्य पट्टदेवी कुन्तला, अर्हद्धर्मनिष्ठा, धर्मे प्रवर्त्तिका, तद्वचसा तस्याः सपत्न्यः सर्वा धर्मिष्ठीभूतास्तां बहु मन्यन्ते । अन्यदा सर्वराज्ञीनां साङ्गोपाङ्गनव्यप्रासादेषु निष्पद्यमानेषु कुन्तला

---

१. न्नाणी इति को० ह० प्र० पाठः । २. आयारसार इति को० ह० प्र० पाठः ।

अतुच्छमत्सराकुला स्वप्रासादं तत्प्रतिमाः तत्र महापूजा नाट्यादिविधिं च विशिष्टतरं विशिष्टतरं कारयति । सपत्नीचैत्य-प्रतिमापूजादौ च प्रद्वेषं वहति । अहह मत्सरस्य दुस्तरता । तदभ्यधिष्महि—

**पोता अपि निमज्जन्ति मत्सरे मकराकरे । तत्तत्र मज्जनेऽन्येषां दृषदामिव किं नवम् ॥**

**विद्यावाणिज्यविज्ञानवृद्धिऋद्धिगुणादिषु । जातौ ख्यातौ प्रोन्नतौ च धिग् धिग् धर्मेऽपि मत्सरः ॥**

ऋज्व्यः सपत्न्यस्तु तस्याः कृत्यं नित्यमनुमोदन्ते । एवं मत्सरग्रस्ता दुर्दैवादसाध्यविविधव्याधिबाधिता राज्ञा गृहीताभरणा दिसारा भृशार्त्तिभृन्मृत्वा सपत्नीचैत्याऽर्चाप्रद्वेषेण शुनी जाता, स्वचैत्यद्वारे पूर्वाभ्यासात्तिष्ठति । अथ तत्रागतः केवली, कुन्तला मृत्वा क्व गतेति राज्ञीभिः पृष्टः सर्वं यथावदाचष्ट । ततस्ताः परमसंविग्नास्तस्याः शुन्या भक्ष्यं क्षिपन्त्यः सस्नेहं प्राहुः, 'महाभागे ! धर्मिष्ठयाऽपि त्वया हा किमेवं मुधा प्रद्वेषः कृतः ? येनेदृग् जाताऽसीति । तदाकर्णनचैत्यदर्शनादिना जातजातिस्मृतिः सा शुनी संविग्ना सिद्धादिसमक्षं प्रद्वेषादि आलोच्य प्रतिपन्नानशना मृत्वा वैमानिकीभूता । तस्मात् प्रद्वेषस्त्याज्यः । इति द्रव्यस्तवः ।

इह सर्वापि भावपूजा श्रीजिनाज्ञापालनं च भावस्तवः । जिनाज्ञा च द्विप्रकारा स्वीकारपरिहाराभ्याम् । तत्र सुकृताऽऽचरणं स्वीकारः, निषिद्धाऽनासेवनं परिहारः । स्वीकारपक्षाच्च परिहारपक्ष एव श्रेष्ठः, यतो निषिद्धासेविनो बह्वपि सुकृताचरणं विशेषगुणाय नोपजायते । यथाहि व्याधितस्य प्रतीकारः स्वीकारपरिहाराभ्यां द्वेधा, तत्रौषधानां स्वीकारोऽपथ्यस्य च परिहारः,

भेषजानां हि करणेऽप्यपथ्यसेविनो नारोग्यलाभः यतः—

**औषधेन विना व्याधिः पथ्यादेव निवर्त्तते । न तु पथ्यविहीनस्य औषधानां शतैरपि ॥**

एवं भक्तिरपि निषिद्धाचरणशीलस्य न विशेषफलाय । यदि तु द्वयमपि भवति तदा सम्पूर्णसिद्धिः, यथा पथ्यशील-स्यौषधैः । श्रीहेमसूरयोऽप्याहुः—

**वीतराग ! सपर्यातस्तवाज्ञापालनं वरम् । आज्ञाऽऽराद्धा विराद्धा च शिवाय च भवाय च ॥**

**आकालमियमाज्ञा ते हेयोपादेयगोचरा । आस्रवः सर्वथा हेय उपादेयश्च संवरः ॥**

द्रव्यभावस्तवयोश्चैवं फलमूचुः—

**उक्कोसं दव्वत्थयं, आराहिअ जाइ अच्चुअं जाव । भावत्थएण पावइ, अंतमुहुत्तेण निव्वाणं ॥**

द्रव्यस्तवे च यद्यपि षट्कायोपमर्दनादिका काचिद्विराधना स्यात् तथापि कूपोदाहरणेन गृहिणः स कर्त्तुमुचित एव कर्तृद्रष्टृश्रोतृणामगण्यपुण्यानुबन्धनिबन्धनत्वात् । यथा नव्यग्रामे स्नानपानाद्यर्थं जनैः कूपखनने तेषां तृष्णाश्रमकर्दममालिन्यादि स्यात्, परं कूपजलोद्गमे तेषामन्येषां च तृष्णादेः प्राक्तनमलादेश्चोपशमेन सर्वदा सर्वाङ्गीणं सुखं स्यात् तथेहापि । तदावश्यक-निर्युक्तौ—

**अकसिणपवत्तगाणं, विरयाविरयाण एस खलु जुत्तो । संसारपयणुकरणे, दव्वथए कूवदिट्ठंतो ॥** पंचा. ६-४२

अन्यत्रापि—**आरंभपसत्ताणं गिहीण छज्जीववहअविरयाणं । भवअडविनिवडिआणं दव्वथओ च्चेव आलंबो ॥**

**[1]स्थेयो वायुचलेन निर्वृतिकरं निर्वाणनिर्घातिना, स्वायत्तं बहुनायकेन सुबहु स्वल्पेन सारं परम् ।**
**निस्सारेण धनेन पुण्यममलं कृत्वा जिनाभ्यर्चनं, यो गृह्णाति वणिक् स एव निपुणो वाणिज्यकर्मण्यलम् ॥** (शा.वि.)

**यास्याम्यायतनं जिनस्य लभते ध्यायंश्चतुर्थं फलं, षष्ठं चोत्थित उद्यतोऽष्टममथो गन्तुं प्रवृत्तोऽध्वनि ।**
**श्रद्धालुर्दशमं बहिर्जिनगृहात्प्राप्तस्ततो द्वादशं, मध्ये पाक्षिकमीक्षिते जिनपतौ मासोपवासं फलम् ॥** (शा. वि.)

पद्मचरित्रे त्वेवमुक्तं—

**मणसा होइ चउत्थं, छट्ठफलं उट्ठिअस्स संभवइ । गमणस्स या पारंभे होइ फलं अट्ठमोवासो ॥**
**गमणे दसमं तु भवे, तह चेव दुवालसं गए किंचि । मज्झे पक्खुववासो मासुववासं च दिट्ठम्मि ॥**
**संपत्तो जिणभवणे, पावइ छम्मासिअं फलं पुरिसो । संवच्छरियं तु फलं, दारद्देसट्ठिओ लहइ ॥**
**पायक्खिणेण पावइ, वरिससयफलं तओ जिणे महिए । पावइ वरिससहस्सं, अणंतपुण्णं जिणे थुणिए ॥**
**सयं पमज्जणे पुन्नं, सहस्सं च विलेवणे । सयसाहस्सिआ माला अणंतं गीअवाइए ॥**

१. स्थेयम् इति भाव्यम् ।

पूजा च प्रत्यहं त्रिसन्ध्यं विधेया । यतः—

**जिनस्य पूजनं हन्ति प्रातः पापं निशाभवम् । आजन्मविहितं मध्ये सप्तजन्मकृतं निशि ॥**

**जलाहारौषधस्वापविद्योत्सर्गकृषिक्रियाः । सत्फला स्वस्वकाले स्युरेवं पूजा जिनेश्वरे ॥**

**जिणपूअणं तिसंझं, कुणमाणो सोहए अ सम्मत्तं । तित्थयरनामगुत्तं, पावइ सेणिअनरिंदुव्व ॥**

**जो पूएइ तिसंझं, जिणिंदरायं सया विगयदोसं । सो तइअभवे सिज्झइ, अहवा सत्तट्ठमे जम्मे ॥**

**सव्वायरेण भवयं, पूइज्जंतो वि देवनाहेहिं । णो होइ पूइओ खलु, जम्हाणंतग्गुणो भयवं ॥**

**तुममच्छीहि न दीससि, नाराहिज्जसि पभूअपूआए । किंतु गुरुभत्तिराएण वयणपरिपालणेणं च ॥**

देवपूजादौ च हार्दबहुमानसम्यग्विधिविधानयोः शुद्धाशुद्धरौप्यटङ्ककदृष्टान्तेन चतुर्भङ्गी ज्ञेया । यथा शुद्धं रूप्यं शुद्धा मुद्रेति प्रथमो भङ्गः । शुद्धं रूप्यमशुद्धा मुद्रेति द्वितीयः । शुद्धा मुद्रा रूप्यमशुद्धमिति तृतीयः । द्वयोरशुद्धत्वे चतुर्थः । एवं देवपूजादौ सम्यग् बहुमाने सम्यग् विधौ च प्रथमः । सम्यग् बहुमानो न तु सम्यग् विधिरिति द्वितीयः । सम्यग्विधिर्न तु सम्यग् बहुमान इति तृतीयः । द्वयोरभावे तुर्यः । उक्तञ्च बृहद्भाष्ये—

**इत्थ पुण वंदणाए, रूप्पसमो होइ चित्तबहुमाणो । टंकसमा विन्नेआ, संपुन्ना बाहिरा किरिया ॥**

**दुण्हंपि समाओगे, सुवंदणा छेअरूवगसरिच्छा । बीअगरूवगतुल्ला, पमाइणो भत्तिजुत्तस्स ॥**

लाभाइनिमित्ताओ, अखण्डकिरियंपि कुव्वओ तइया । उभयविहूणा नेआ, अवंदणा चेव तत्तेणं ॥
एसो इह भावत्थो, कायव्वो देसकालमासज्ज । अप्पा वा बहुगा वा, विहिणा बहुमाणजुत्तेण ॥
अन्नं च जिणमयम्मि, चउव्विहं वन्निअं अणुट्ठाणं । पीइज्जुअं भत्तिजुअं वयणपहाणं असंगं च ॥
जं कुणइ पीइरसो, वड्ढइ जीवस्स उजुसहावस्स । बालाईण व रयणे, पीइअणुट्ठाणमेअं तु ॥
बहुमाणविसेसाओ, सुद्धविवेगस्स भव्वजीवस्स । पुव्विल्लसमं करणं, भत्तिअणुट्ठाणमाहंसु ॥
तुल्लंपि पालगाई, जायाजणणीण पीइभत्तिगयं । पीईभत्तिजुआणं, भेओ नेओ तहेहंपि ॥
जो पुण जिणगुणवेई, सुत्तविहाणेण वंदणं कुणइ । वयणाणुट्ठाणमिणं, चरित्तिणो होइ निअमेण ॥
जं पुण अब्भासरसा, सुअं विणा कुणइ फलनिरासंसो । तमसंगाणुट्ठाणं, विन्नेअं निउणदंसीहिं ॥
कुंभारचक्कभमणं, पढमं दंडा तओ वि तयभावे । वयणासंगाणुट्ठाणभेअकहणे इमं नायं ॥
पढमं भावलवाओ, पायं बालाइआण संभवइ । तत्तोवि उत्तरुत्तरसंपत्ति नियमओ होइ ॥
तम्हा चउव्विहंपि हु नेअमिणं पढमरूवगसमाणं । जम्हा मुणीहिं सव्वं, परमपयनिबंधणं भणियं ॥
बीअगरूवसमंपि हु सम्माणुट्ठाणकारणत्तेण[1] । एगंतेण न दुट्ठं, पुव्वायरिया जओ बिंति ॥

१. कारणं होइ इति को० ह० प्र० पाठः ।

**असढस्स अ परिसुद्धा, किरिया सुद्धाइकारणं होइ । अंतो विमलं रयणं, सुहेण बज्झं मलं चयइ ॥**
**तइअगरूवगतुल्ला, मायामोसाइदोससंपत्ता । कारिमरूवयववहारिणोव्व कुज्जा महाणत्थं ॥**
**होइ अ पाएणेसा, अन्नाणाओ असद्दहाणाओ । कम्मस्स गुरुत्ताओ, भवाभिनंदीण जीवाणं ॥**
**उभयविहीणाओ पुणो, नियमाराहणविराहणारहिआ । विसयब्भासगुणाओ कयाइ होज्जा सुहनिमित्तं ॥**
**जह सावगस्स पुत्तो, बहुसो जिणबिंबदंसणगुणेणं । अकयसुकओ वि मरिउं, मच्छभवे पाविओ सम्मं ॥**

एतद्गाथासु पञ्चमादिगाथासप्तकस्याऽर्थलेशो यथा—

सदनुष्ठानं चतुर्विधं-प्रीतियुतं भक्तियुतं वचनप्रधानं असङ्गानुष्ठानं च । यत्कुर्वतः प्रीतिरसोऽतिरुचिरूपो वर्द्धते तत् प्रीत्यनुष्ठानम् १। पूज्येषु प्रीत्यनुष्ठानसममपि करणं भक्त्यनुष्ठानं २। प्रीत्या पत्न्याः पालनादि क्रियते, मातुस्तु भक्त्येति प्रीतिभक्त्योर्विशेषः । वचनानुष्ठानं सर्वत्राऽऽगमात्मकप्रवृत्तिरूपं चरित्रिणः साधोर्नान्यस्य पार्श्वस्थादेः ३। यत् पुनरभ्यासरसाद-भ्यासप्रकर्षाद् भूयो भूयस्तदासेवनेन श्रुतापेक्षां विनैव करोति फलनिराशंसो जिनकल्पिकादिस्तदसङ्गानुष्ठानम् ४। यथा चक्रभ्रमणमेकं दण्डसंयोगाज्जायते एवं वचनानुष्ठानमप्यागमात्प्रवर्त्तते, यथा चान्यच्चक्रभ्रमणं दण्डसंयोगाभावे केवलादेव संस्कारपरिक्षयात् स्यात्, एवमागमसंस्कारमात्रेण यद्वचननिरपेक्षं तदसङ्गानुष्ठानमिति पञ्चमादिगाथासप्तकार्थः । एवं च देवपूजादावेकान्तहार्दबहुमाने यथोक्तविधिविधाने च सम्पूर्णफलमिति । तत्र सम्यग् यतनीयं, अत्र धर्मदत्तनृपनिदर्शनं दर्श्यते ।

तच्चेदम् —

राजद्राजतचैत्ये राजपुरे राजते स्म राजधरः । राजा राजेव नृणां शीतकरः कुवलयोल्लासी ॥१॥

प्रीतिमतीप्रभृतीनां पञ्चशती तस्य करगृहीतानाम् । आसीद्यासु न्यासीकृतेव रूपर्द्धिरमरीभिः ॥२॥

[१]अर्थात् प्रीतिमतीत्वं प्रीतिमतीवर्जमन्यभार्याभिः । विश्वानन्दनन्दनलाभाल्लेभेऽथ निखिलाभिः ॥३॥

सुतवन्ध्या वन्ध्यावत्प्रीतिमती त्वधिकमाप हृदि खेदम् । दुर्विषहः खलु पङ्क्तेर्भेदो हि विशिष्य मुख्यत्वे ॥४॥

यदि वा दैवायत्ते वस्तुनि किं मुख्यतादिचिन्ताभिः । तदपि तदर्त्तिं दधतां धिङ् मौढ्यं मूढहृदयानाम् ॥५॥

विविधोपयाचितशते वैफल्यमिते तदर्त्तिरति ववृधे । नाऽऽशाप्युपेयविषया निष्फलतायामुपायानाम् ॥६॥

कश्चिन्मरालबालस्तयाऽन्यदा धाम्नि बालवद्विलसन् । नीतः करेऽप्यभीतः स्फीतनृवाचेत्युवाचेमाम् ॥७॥

भद्रे ! स्वैरमिहाप्तं किं मां धरसे रसेन निपुणापि । स्वैरविहारपराणां धरणं हि निरन्तरं मरणम् ॥८॥

वन्ध्यात्वमनुभवन्त्यपि कथमीदृशमशुभकर्म निर्मासि । शुभकर्मणैव धर्मो धर्माच्च निजेष्टसिद्धिरपि ॥९॥

अथ सा विस्मितभीताऽभाषत भो ! भाषसे किमीदृङ् माम् । त्वां दक्षमुख्य ! मङ्क्ष्वपि मोक्षाम्येकं तु पृच्छामि ॥१०॥

१. प्रीतिमतीत्यन्वर्थं इति को० ह० प्र० पाठः ।

नानादैवतपूजनदानादिसुकर्मनिर्मिमाणाऽपि । संसारसारभूतं शप्तेवाप्नोमि किं न सुतम् ? ॥११॥
पुत्रार्त्तिं मम च कथं वेत्स्यभिधत्से नृभाषया च कथम् । सोऽप्यभ्यधत्त किं मम ? [1]तप्त्याऽभिदधे तु ते हितकृत् ॥१२॥
प्राक्कृतकर्माधीना धनतनयसुखादिसंपदः सकलाः । विघ्नोपशमनिमित्तं त्वत्राऽपि कृतं भवेत्सुकृतम् ॥१३॥
यत्तद् देवार्चाद्यं मिथ्या मिथ्यात्वमाचरन्त्यधियः । जिनधर्म एव भविनामत्राऽप्यभीष्टफलकारी[2] ॥१४॥
यदि जिनधर्माद्विघ्नोपशमादि न भावि तत्कुतोऽन्येभ्यः । यद् भानुना न भेद्यं तमः कथं ? तद् ग्रहैरितरैः ॥१५॥
तत्त्यक्त्वा मिथ्यात्वं कुपथ्यमिव तथ्यमार्हतं धर्मम् । सेवस्व सुपथ्यमिवाऽऽप्नोषि यथाऽत्राप्यखिलमिष्टम् ॥१६॥
इत्युक्त्वोड्डीय गते सितच्छदे क्वापि सपदि पारदवत् । अतिविस्मिता स्मितास्याऽजायत जाततनयाशा ॥१७॥
आर्त्तौ सत्यां धर्माद्यास्थास्थास्नुत्वमाश्रयत्युच्चैः । इति सा श्रावकधर्मं ततः प्रपेदे सपदि सुगुरोः ॥१८॥
त्रिर्जिनपूजादिपरा सद्दर्शनशालिनी च सुलसावत् । साऽभूत् क्रमतः सुमहानहो ! गुणः कोऽपि हंसगिरः ॥१९॥
नाद्यापि पट्टदेव्यास्तनुजस्तनुजाः परः शतास्तु परे । राज्यार्ह एषु को न्विति चिन्ता जज्ञेऽन्यदा राज्ञः ॥२०॥
निशि च नरेशं स्वप्ने साक्षादिव दिव्यपुरुषः कश्चित् । स्माह महीश ! वृथा मा कृथाः स्वराज्यार्हसुतचिन्ता ॥२१॥

१. तथ्या इति को० ह० प्र० पाठः । २. अत्राऽमुत्राप्यभीष्टफलः इति को० ह० प्र० पाठः ।

विश्वैककल्पफलदं विधिवज्जिनधर्ममेव सेवस्व । यस्मात्तवेष्टसिद्धिर्भवेद् भवेऽस्मिन् परस्मिंश्च ॥२२॥
स्वप्नोपलम्भतोऽस्मात्प्रयतोऽर्हद्धर्ममाराध मुदा । राजा जिनार्चनाद्यैः को वेदृक् स्वप्नवानलसः ? ॥२३॥
अथ च- अवतीर्णवान् वितीर्णप्रीतिभरः प्रीतिमत्युदरसरसि । हंस इवोत्तमजन्तुः कोऽप्यर्हत्स्वप्नदर्शनकृत् ॥२४॥
मणिचैत्यार्चाकारणतदर्चनादौ हि दोहदस्तस्याः । गर्भानुभावतोऽभूत् पुष्पं हि फलानुरूपं स्यात् ॥२५॥
मनसैव साध्यसिद्धिर्देवानां स्ववचसा नृदेवानाम् । धनिनां धनेन सद्योऽप्यपरनराणां पुनर्वपुषा ॥२६॥
इति नृपतिर्निःशेषं सविशेषं दोहदं तदीयमिदम् । सद्यो दुष्पूरमपि प्रापूरयदतुलमुत्सूरः ॥२७॥
धुर्यप्यपारिजातः सुमेरुभूम्येव पारिजाततरुः । तनयस्तया प्रजातः प्रजातमहिमा क्रमात् जातः ॥२८॥
जात्वकृतपूर्वजन्माद्युत्सवपूर्वकमपूर्वमुत् क्ष्माभृत् । पुत्रस्य धर्मदत्तेत्यभिधां विदधे सदन्वर्थाम् ॥२९॥
श्रीजिनभुवनेऽन्यदिने सानन्दं नन्दने सदुपदावत् । नीत्योत्सवैरभिनवैः प्रणमय्यार्हत्पुरो मुक्ते ॥३०॥
प्रोक्तवती प्रीतिमती प्रीतिमती प्रोच्चकैः प्रति सखीं स्वाम् ।
हंसस्य तस्य सखि ! मेऽद्भुतकृत्काप्युपकृतिः कृतिनः ॥३१॥ युग्मम् ।
अपि दुष्प्रापं प्रापं यद्वचनाराधनान्निधिवदधनः । जैनेद्रधर्मरत्नं सुपुत्ररत्नं च परमीदृक् ॥३२॥
इत्युक्तिसमकमाकस्मिकमूर्छामृच्छति स्म मन्द इव । बालस्तत्कालमथो तन्माताऽप्युग्रतद्दुःखात् ॥३३॥

अहह सहसा सहाऽभूद् द्वयोः किमित्युच्चकैस्तटस्थजनाः । दृग्दोषदिव्यदोषाद्याशङ्कितहृदोऽथ पूच्चक्रुः ॥३४॥
तत्कालमिलितराजामात्याद्यैः शीतलोपचारकृते । जातः सचेतनोऽसौ क्षणात्तदम्बाऽप्यहो ! योगः ॥३५॥
वर्द्धापनादि जज्ञे निन्ये सूनुश्च निजगृहे समहम् । तदहःस्थितश्च सुस्थः स्तन्यास्वादादिकृत् प्राग्वत् ॥३६॥
स्तन्यमहनि द्वितीये शुभंयुरपि नापिबत्त्वरौचकिवत् । चतुराहारप्रत्याख्यातेव न चौषधाद्यपि सः ॥३७॥
पित्रादिषु पौरादिषु दुःखिषु मन्त्र्यादिकेषु मूढेषु । मध्याह्ने मुनिरागात्तत्सुकृताऽऽकृष्ट इव नभसा ॥३८॥
प्रणतः पूर्वमपूर्वप्रीत्या शिशुना नृपादिभिस्तु ततः । शिशुमुखमुद्रणहेतुं पृष्ठश्च स्पष्टमाचष्ट ॥३९॥
दोषा अत्र न किञ्चन जिनदर्शनमस्य किन्तु कारयत । येनाऽधुना स्वयमयं स्तनन्धयत्वं सहर्षयति ॥४०॥
नीतस्ततोऽर्हतोऽग्रे नतिपूर्वं पूर्ववत्प्रवृत्तोऽसौ । स्तन्यं पातुं प्रीतिं प्रापुश्चाऽऽश्चर्यमथ सर्वे ॥४१॥
पुनरवनिपतिर्मुनिपतिमपृच्छदत्यद्भुतं किमेतदिति । सोऽप्यभणत्पूर्वभवाभिधानपूर्वं भणामि शृणु ॥४२॥
पुरिकापुरि कापुरुषैरूनायां सुपुरुषैरनूनायाम् । सकृपः कृपणेष्वकृपः शत्रुषु कृपनामनृपतिरभूत् ॥४३॥
सुत्राममन्त्रिमित्रं मत्यामात्योऽस्य चित्रमत्याह्वः । इच्छावसुरिव वसुभिर्वसुमित्रस्तस्य मित्रमभूत् ॥४४॥
आढ्योऽस्य वणिक्पुत्रः सुमित्र ऊनोऽभिधाक्षरेणैव । तुल्योऽधिकोऽपि च वणिक्पुत्रः स्यात् श्रेष्ठितः क्रमतः ॥४५॥

कुलपुत्रः पुत्रतया मान्यो धन्याभिधोऽस्य भृत्यवरः । सोऽन्येद्युः स्नानार्थी स्नानार्हे सरसि सरति स्म ॥४६॥
तत्र विधा सुकमले जलकेलिं स किल कलभवत्कलयन् । दिव्यमिवातुलपरिमलमलभत कमलं सहस्रदलम् ॥४७॥
निर्गत्य ततश्चलितः प्रीत्या कलितः क्रमेण मिलितश्च । आरामिककन्यानां कुसुमान्युच्चित्य यान्तीनां ॥४८॥
प्राग्भूरिपरिचिताभिस्ताभिर्भणितश्च चतसृभिर्ज्ञाभिः । भो भद्र ! भद्रशालद्रुमसुममिव दुर्लभमिहैतत् ॥४९॥
मा यत्र तत्र यौक्षीरुत्तममिदमुत्तमस्यैव । सोऽप्याख्यद् योक्ष्येऽदः स्फुटमुकुटमिवोत्तमस्यैव ॥५०॥
दध्यौ च ममाभ्यर्च्यः सुमित्र एवोत्तमः समग्राणाम् । यो येन सुनिर्वाहः कस्तस्य ततः परः परमः ॥५१॥
मुग्धात्मा ध्यात्वैतत्तत् प्राभृतमकृत देवतायैव । गत्वा नत्वा विनयाद्यथावदुक्त्वा सुमित्राय ॥५२॥
स्माह सुमित्रः श्रेष्ठी वसुमित्रः सत्तमस्तदर्हमदः । तस्याहर्निशदास्यादपि न स्यादनृणभावो मे ॥५३॥
वसुमित्राय ततोऽसौ ढौकितवान् प्राग्वदुक्तवान् सोऽथ । मन्त्र्युत्तमोऽस्ति यस्मान्ममाऽत्र सर्वार्थसिद्धिरिह ॥५४॥
ढौकयति स्म तथैव प्रीत्याऽमात्याय सोऽथ सोऽप्यवदत् । मत्तोऽपि सत्तमः क्ष्माभर्त्ता हि क्ष्माप्रजाभर्त्ता ॥५५॥
स्त्रष्टुरिव यस्य दृष्टेरपि प्रभावोऽद्भुतो भुवि यया द्राग् । सर्वलघुः सर्वगुरुः सर्वगुरुः स्याच्च सर्वलघुः ॥५६॥
सोऽथ तथैव तदुपदीकृतवान् सपदीश्वराय वसुधायाः । राजापि जैनसद्गुरुसेवाऽभिमुखो बभाषे तम् ॥५७॥
यत्क्रमकमलेऽलिकलां कलयन्ति मदादयोऽपि सैव गुरुः । उत्तम इह तद्योगस्त्वल्पः स्वात्यम्बुयोग इव ॥५८॥

इत्याख्याति क्षितिपेऽन्तरीक्षतस्तत्र चित्रकृत्सुरवत् । चारणमहर्षिरागात् स्पृहालतायाः सफलताऽहो ! ॥५९॥
बहुमानासनदानाभिवन्दनादीनि विहितपूर्विषु च । उर्वीश्वरादिषु मुनेर्धन्योऽढौकत तथैवैतत् ॥६०॥
मुनिनोक्तमुत्तमत्वं तरतमभावेन भवति केष्वपि चेत् । तद्विश्रान्तिस्त्वर्हत्येवार्हति विश्वविश्वार्हे ॥६१॥
तस्मात्तस्यैवोचितमेतद् भोस्त्रिजगदुत्तमतमस्य । कामगवीव नवीनाऽत्राऽमुत्र जिनार्चनाऽर्थितदा ॥६२॥
इति यतिवाक्यान्मुदितो भद्रकभावः स भावतश्चैत्ये । गत्वार्हतः शिरसि तच्छत्रमिवादात् पवित्रतनुः ॥६३॥
तेन स शिरस्कजिनवरशिरसः शोभानिभालनाऽतुलमुत् । शुभभावनाऽऽश्रितमनाः सुस्थस्तस्थौ क्षणं यावत् ॥६४॥
तावत्तत्र चतस्रः कन्यास्ताः कुसुमविक्रयायेयुः । ददृशुश्चार्हतशीर्षे तत्कमलं तेन विन्यस्तम् ॥६५॥
अनुमोदनोद्यतास्ता अपि संपद्बीजमिव भगवतोऽङ्गे । एकैककुसुममसमं समं समारोपयामासुः ॥६६॥
पुण्ये पापे पाठे दानाऽऽदानाऽदनाऽन्यमानादौ । देवगृहादिककृत्येष्वपि प्रवृत्तिर्हि दर्शनतः ॥६७॥
धन्यम्मन्यः प्राप च धन्यः कन्याश्च निजनिजस्थानम् । सति संयोगे प्रणमति तत्प्रभृति प्रतिदिनं स जिनम् ॥६८॥
इति च ध्यायति धिङ् मां प्रतिदिनजिननमननियममपि लातुम् । असमर्थं रङ्कमिवाप्यहर्निशं परवशं पशुवत् ॥६९॥
धात्रीशमन्त्रिवसुमित्रसुमित्राख्यास्तु चारणर्षिगिरा । प्रतिपन्ना गृहिधर्मं क्रमात्प्रपन्नाश्च सौधर्मम् ॥७०॥

धन्योऽप्यर्हद्भक्तेः सौधर्मेऽभून्महर्द्धिकस्त्रिदशः । जातास्ताश्च चतस्त्रः क्रमात्कुमार्योऽस्य मित्रसुराः ॥७१॥
नृपदेवश्च्युत्वाऽभूद्वैताढये गगनवल्लभे नगरे । सुरनगरे सुरपतिवच्चित्रगतिः खेचराधिपतिः ॥७२॥
सचिवसुरश्च्युत्वाऽस्य च पुत्रः पित्रोः परप्रणयपात्रम् । जातोऽस्ति विचित्रगतिर्नाम्ना धाम्नाऽपि पितुरधिकः ॥७३॥
स प्राज्यराज्यलोभाऽभिभूतहृदयोऽन्यदा पितृनिहत्यै । गूढदृढमन्त्रमाधात् धिग् धिग् लोभान्ध्यमपि सूनोः ॥७४॥
दैवात्तु गोत्रदेव्यादेशादवगत्य गूढमन्त्रं तम् । आत्यन्तिकमाकस्मिकभयेन वैराग्यमाप नृपः ॥७५॥
हा किं कुर्वे किं वा शरणीकुर्वे ब्रुवेऽथ किं कस्य । [1]अकृतसुकृताः सुतादपि पशुमृतिमाप्ताऽस्मि कुगतिमपि ॥७६॥
अद्यापि चेतये वेत्यालोच्य स पञ्चमुष्टिकृतलोचः । सुरदत्तव्रतिलिङ्गः द्राग् व्रतमादत्त सत्तमधीः ॥७७॥
क्षमितश्चानुशययुजाऽऽत्मजेन राज्यार्थमर्थितोऽत्यर्थम् । तं व्रतहेतुं शंसन्निसङ्गः पवनवद् व्यहरत् ॥७८॥
यतिचर्ययाऽस्य चरतस्तपांसि चरतश्च दुस्तपान्युदभूत् । ज्ञानं तृतीयमेतत् स्पर्धादिव तत्तुरीयमपि ॥७९॥
ज्ञानाद् ज्ञात्वा लाभं सोऽहं मोहं व्यपोहितुं भवताम् । अत्राऽऽगमं समग्रं कथयाम्यथ शेषसम्बन्धम् ॥८०॥
वसुमित्रसुरश्च्युत्वा त्वमभूर्भूपः सुमित्रदेवस्तु । तव देवी प्रीतिमती प्रीतिर्वा प्राग्भवाऽभ्यस्ता ॥८१॥

---

१. अक्षत ।

सुश्राद्धत्वज्ञप्त्यै क्वचित्क्वचिन्निकृतिमकृत स सुमित्रः । तत्स्त्रीत्वमत्र हि हिताहितार्थजडता सतामपि हा ॥८२॥
मत्पुत्रात् प्राग् माभूत् पुत्रो भ्रातुर्लघोरिति च दध्यौ । तदिह विलम्ब्य सुतोऽभूत्सकृदपि कुध्यातमतितीव्रम् ॥८३॥
धन्यसुरेणाऽन्यदिने स्वोत्पत्तिपदं जिनेश्वरः सुविधिः । पृष्टः प्रोचे तस्योत्पत्तिं युवयोः सुतत्वेन ॥८४॥
पित्रोर्धर्माऽभावे कुतः सुतस्याऽस्तु धर्मसामग्री । सद्भाव एव कूपे ह्युपकूपे सुलभमम्भः स्यात् ॥८५॥
इत्यात्मबोधिबीजप्राप्त्यै स मरालरूपभृद्राज्ञीम् । तत्तदुदित्वा स्वप्नं दत्त्वा त्वामपि च बोधितवान् ॥८६॥
देवभवे केऽप्येवं प्रयतन्ते प्रेत्य बोधिलाभकृते । नृभवेऽप्यन्ये स्वर्मणिमिवाप्तमपि हारयन्त्यपि तम् ॥८७॥
सम्यग्दृष्टिसुरः स च ततः च्युतोऽयं सुतोऽभवद्युवयोः । हेतुर्मातुस्तादृक् सुस्वप्नसुदोहदादीनाम् ॥८८॥
कायं छायेव पतिं सतीव चन्द्रं च चन्द्रिकेव रविम् । छविरिव तडिदिव जलधरमिममनुसरति स्म जिनभक्तिः ॥८९॥
ह्योऽस्य च चैत्ये नीतस्याऽर्हत्प्रतिमानिरीक्षणेन मुहुः । हंसागमादिवार्त्ताश्रवणेन च मूर्छितश्चाऽऽशु ॥९०॥
जातं जातिस्मरणं विहितप्राग्जन्मकृत्यसंस्मरणम् । तदनु विना जिनदर्शननतिं न दास्यामि किमपि मुखे ॥९१॥
इति यावत्कथिकमसौ स्वीकृतवान्नियममात्ममनसैव । स नियमधर्मो ह्यनियमधर्मादतिशाय्यनन्तगुणः ॥९२॥ तथाहि—
अनियमसनियमभेदाद् द्वेधा धर्मश्चिरार्जितोऽप्याऽऽद्यः । प्रमितानियतफलोऽन्यस्त्वल्पोऽप्यनन्तनियतफलः ॥९३॥

उक्तं विना न वृद्धिर्वित्ते दत्तेऽपि बहुतरेऽपि चिरात् । प्रोक्ते तु प्रत्यहमप्येवं धर्मेऽपि नियमोक्तौ ॥९४॥
श्रेणिकवत्तत्त्वविदोऽप्यविरत्युदये हि न नियमप्राप्तिः । तत्प्राप्तावपि विधुरे दृढता त्वासन्नतरसिद्धेः ॥९५॥
प्राक् प्रेम्णा बहुमानान्नियमोपगमोऽस्य मासिकस्यापि । ह्यस्तु तदा जिनदर्शननतिकृतितः स्तन्यमापपिवान् ॥९६॥
अद्यः पुनस्तदयोगात् सीदन्नपि न दृढहृत् पपौ स्तन्यम् । अस्मद्गिरा त्वभिग्रहपूर्तेः पातुं प्रववृतेऽपि ॥९७॥
यत्प्राग् जन्मनि विहितं विधित्सितं वा शुभाशुभं सर्वम् । तज्जन्यतेऽन्यजन्मनि जन्मयुजामग्रजन्मेव ॥९८॥
अप्यव्यक्तप्राक्तनजिनभक्तेर्महिमतोऽस्य महिमवतः । सर्वाङ्गीणसमृद्धिश्चित्रसवित्री किल भवित्री ॥९९॥
कन्याजीवाश्च दिवश्च्युताः पृथक् प्रौढनृपकुलायाताः । राज्योऽस्यैव भविव्यः सहसुकृतकृतां हि सहयोगः ॥१००॥
इति यतिगिरा तथा शिशुतन्नियमसमीक्षया क्षितीशाद्याः । सनियमधर्मधुरायां दधिरे धौरेयतां नितराम् ॥१०१॥
पुत्रप्रतिबोधकृते विहाराम्यहमित्युदीर्य गुरुवीर्यः । यतिरुत्पपात वैताढ्यं प्रति विनतातनुज इव ॥१०२॥
जातिस्मरस्त्रिजगदाऽऽश्चर्यसृजाऽतिस्मरः स्वरूपर्द्ध्या । मुनिवन्नियमं निर्वाहयन्निमं स क्रमाद्ववृधे ॥१०३॥
प्रावर्द्धत प्रतिदिनप्रवर्द्धमानप्रधानतनुयष्टेः । स्पर्धादिव लोकोत्तररूपादिगुणोत्करस्तस्य ॥१०४॥
धर्मस्त्वस्य गुणानपि गुणीकरोति स्म सुप्रसारितया । न्ययमयदनं यदयं विना जिनार्चां त्रिवर्षोऽपि ॥१०५॥

लिखितपठितादिनृकलाद्वासप्ततिमप्यसौ सलीलमपि । लिखितपठिता इव द्रुतमकृत कृती सुकृतमहिमाऽहो ! ॥१०६॥
पुण्यानुबन्धिपुण्यात्पुण्याप्तिः परभवे भवेत् सुलभा । इति सम्यग् गृहिधर्मं स्वीचक्रे स स्वयं सुगुरोः ॥१०७॥
विधिना विना न पूर्णं फलमिति विधिनैव देवपूजादि । स ततस्त्रिसन्ध्यमाधात् सामाचारी ह्यसौ गृहिणाम् ॥१०८॥
सततममध्यमभावोऽप्यवाप्तवान् मध्यमं क्रमेण वयः । पुण्ड्रेक्षुदण्डवदसावहार्यमाधुर्यधुर्योऽभूत् ॥१०९॥
अपरेऽह्नि नरेशायोपददे वैदेशिकेन केनचन । उच्चैःश्रवाऽइवाऽश्वः सुलक्षणो धर्मदत्तकृते ॥११०॥
तं विष्टपेऽप्यसदृशं स्वमिव व्यालोक्य सदृशयोगचिकीः । सोऽध्यारुरोह सहसा पितुर्निदेशादहो ! मोहः ॥१११॥
आरोहणसमसमयं सातिशयं खेऽपि दर्शयन्नु रयम् । हय उत्पपात सुरपतिहयमिव सङ्गन्तुमत्युत्कः ॥११२॥
दृश्यः क्षणात्त्वदृश्यः खे यान् योजनसहस्रपरतस्तम् । योजनसहस्रविकटाटव्यां मुक्त्वाऽगमत् क्वापि ॥११३॥
फणिफुत्कृति-कपिबूत्कृति-[१]करिघूकृति-चित्रकायचीत्कृतिभिः । चमरीभाङ्कृति-गवयत्राट्कृति-दुष्फेरुफेत्कृतिभिः ॥११४॥
न भयं भयङ्करत्वेऽप्यभयप्रकृतिर्व्यभावयत्सोऽस्याम् । विपदि हि सत्त्वोद्रेकः संपदि च सतामनुत्सेकः ॥११५॥ युग्मम् ॥
शून्येऽप्यशून्यहृदयोऽरण्येऽप्युपवन इव स्वभवनस्य । अस्थात् सुस्थात्मासौ स्वैरविहारी करीन्द्र इव ॥११६॥

१. घुर्कृति इति को० ह० प्र० पाठः ।

दूनः परं जिनार्चायोगवियोगात् फलाद्यपि स नादत् । तदहनि पापक्षपणं ससर्ज किल निर्जलं क्षपणम् ॥११७॥
शीतलजलविविधफलप्राचुर्येऽप्यस्य सीदतोऽप्युच्चैः । क्षपणत्रयमित्यासीत् स्वनियमधर्मैकदृढताऽहो ! ॥११८॥
म्लानतमेऽप्यथ लूकाविलुप्ततममाल्यवत्तदीयेऽङ्गे । चित्ते त्वम्लानतमे प्रादुर्भूयाऽवदत् त्रिदशः ॥११९॥
अयि ! साधु साधु साधो ! दुःसाधमसाधय इमं नियमम् । निजजीवितानपेक्षा नियमापेक्षा तवैवैवम् ॥१२०॥
युक्तं व्यक्तं चक्रे शक्रः श्लाघां तवाऽसहिष्णुस्ताम् । पर्यैक्षे ते [1]कक्षां कक्षान्तरिहापहृत्यैवम् ॥१२१॥
तव दृढतयाऽस्मि तुष्टः शिष्टमते ! स्वेष्टमेकवाक्येन । याचस्व विचार्यैषोऽप्यूचे कुर्याः स्मृतः कार्यम् ॥१२२॥
अद्भुतभाग्यनिधिर्ध्रुवमयमेवं यद् वशीकृतोऽस्म्यमुना । इति चिन्तयंस्तदुदितं प्रतिपद्य सपद्यगात् त्रिदशः ॥१२३॥
स्वपदप्राप्त्याऽद्य मे कथमथ भवितेति चिन्तयेद् यावत् । तावन्नृपसूः प्रेक्षामास स्वावासमध्ये स्वम् ॥१२४॥
अप्यस्मृतेन संप्रति नियतममर्त्येन तेन निजशक्त्या । मुक्तोऽस्मिन्नस्मि पदे तुष्टस्य सुरस्य कियदेतत् ? ॥१३५॥
राजतनुजः स्वजनान् निजसङ्गमतो निजं परिजनं च । प्रीतान् साम्प्रतमतनोद् राजानमपिप्रीणच्चित्तम् ॥१२६॥
तस्मिन् दिनेऽप्यनुत्सुकतयैव विधिवद् विधाय जिनपूजाम् । कृतवान्नृपसूः पारणमहो विधिर्धर्मनिष्ठानाम् ॥१२७॥

१. प्रतिज्ञा ।

अथ च–पूर्वादिदिक्षु देशाधिपनृपतीनामतीव बहुमान्याः । बहुपुत्रोपरि पुत्र्योऽभवन् क्रमात्ताः कनीजीवाः ॥१२८॥
धर्मरतिर्धर्ममतिधर्मश्रीर्धर्मिणी च सत्याह्वाः । पञ्चेव चतूरूपा तास्तारुण्योद्गमेऽथ बभुः ॥१२९॥
ताः कुतुकाज्जिनसदनेऽन्यदिने सदनेकसुकृतमहसदने । प्राप्तास्त्वर्हत्प्रतिमां प्रेक्ष्याऽस्मार्षुर्निजां जातिम् ॥१३०॥
अथ ता विना जिनार्चां भुक्तिं नित्यं नियम्य जिनभक्तिम् । कुर्वाणाः प्राक्परिचितवरार्थमभिजगृहुरेकहृदः ॥१३१॥
तद् ज्ञात्वा प्राग्देशाधिपः स्वपुत्र्याः स्वयंवरं प्रवरम् । कारयति स्माऽऽकारयति स्माऽऽखिलराजकं तस्मिन् ॥१३२॥
राजधरस्य सपुत्रस्याह्वानेऽपि हि न धर्मदत्तोऽगात् । ईदृशि कः सन्दिग्धे मेधावी धावतीति धिया ॥१३३॥
अथ च–निजजनकसद्गुरुगिरा व्रतार्थी विचित्रगतिखगराट् । एकसुताभृद्राज्यार्हं प्रज्ञप्तिमपरिपृच्छत् ॥१३४॥
सा प्राह देहि राज्यं सुतां च योग्याय धर्मदत्ताय । मुदितः स ततस्तस्याह्वानार्थमवाप राजपुरम् ॥१३५॥
सम्यक् स्वयंवरस्य व्यतिकरमवबुध्य धर्मदत्तमुखात् । तं नीत्वाऽगात्कुतुकात् स्वयंवरे स सुरवददृश्यः ॥१३६॥
तत्र च चित्रकरे तौ स्वयंवरे राजकन्यया मुक्तान् । श्याममुखान् मुषितानिव निखिलनृपान् ददृशतुरदृश्यौ ॥१३७॥
अथ किं भावीत्यखिलेष्वाकुलचित्तेषु धर्मदत्तं द्राग् । सारुणमिव तरुणरविं स्वयुतं प्राचीकटत् खगराट् ॥१३८॥
तं प्रेक्ष्यैव प्रीता सा वव्रे रोहिणीव वसुदेवम् । प्राक्प्रेमाप्रेमाणौ प्रेरयतः स्वयमुचितकृत्ये ॥१३९॥
दिक्त्रयदेशेशनृपास्तत्राप्ताः स्वस्वपुत्रिकां खचरात् । आनाययन् विमानैर्मुदिताश्च ददुस्तदैवाऽस्मै ॥१४०॥

तत् खचररचितदिव्योत्सवैश्चतस्रोऽपि ताः स परिणिन्ये । निन्ये च खचरपतिना वैताढ्ये सकलराजकयुक् ॥१४१॥
स्वसुतां राज्यं च ददे स धर्मदत्ताय तत्र चित्रमहैः । विद्यासहस्रमस्य च तदादि खचरार्पितं सिद्धम् ॥१४२॥
तत्प्रमुखखचरदत्ताः स कनीः पाणौ चकार पञ्चशतीम् । क्रमतः स्वपुरं प्राप्तस्त्ववनीशकनीश्च पञ्चशतीम् ॥१४३॥
प्राज्यनिजराज्यसंपत् पित्रा चित्रावहैर्महैस्तदनु । पुत्रे सुगुणक्षेत्रे न्ययोजि वल्लीव वृद्धिकृते ॥१४४॥
जगृहे चाग्रमहिष्या सह दीक्षा तस्य चित्रगतिसुगुरोः । पार्श्वे स्वहितं को वा कवचहरे सुतवरे न चरेत् ॥१४५॥
आपृच्छय धर्मदत्तं विचित्रगतिनाऽप्यभाजि यतिधर्मः । चित्रगतिविचित्रगती पितरौ चामुष्य मोक्षमगुः ॥१४६॥
अथ धर्मदत्तनृपतिर्लीलासाधितसहस्रदेशनृपः । दशदशसहस्रगजरथदशगुणहयकोटिपत्तिपतिः ॥१४७॥
बहुविधविद्यामाद्यत्सहस्रविद्याधराधिपनिषेव्यः । त्रिदशेन्द्र इव प्राज्यं साम्राज्यं स बुभुजे सुचिरम् ॥१४८॥ युग्मम् ।
स्मृतिमात्रागच्छत्प्राक्प्रसन्नदेवेन देवकुरुभूवत् । तद्भूर्विदधे मारीत्यवमव्याध्यादिवारणतः ॥१४९॥
प्राग्दशशतदलकमलार्हदर्चयेद्दक्समृद्धिसुखितोऽपि । त्रिविधिपूजादिविधौ दधौ स धौरेयतामधिकम् ॥१५०॥
पोष्यः स्वकोपकारीत्येष विशेषात् पुपोष जिनभक्तिम् । नवनवचैत्यप्रतिमायात्रास्नात्रादिभिः कृत्यैः ॥१५१॥
राजा यथा तथा स्यात् प्रजेति जिनधर्ममाश्रयन् प्रायः । अष्टादशवर्णा अपि भवद्द्वयेऽभ्युदयितां च ततः ॥१५२॥

**समये सुताय राज्यं प्रदाय देव्यादिभिः सहादाय । व्रतमार्हतभक्त्यैकाग्र्याददर्हत्कर्म सोऽर्जितवान् ॥१५३॥**

**स्वार्युर्द्वैलक्षपूर्वी भुक्त्वा सोऽभूत् सुरः सहस्रारे । अर्जितगणभृत्कर्मा मुख्या राज्योऽपि च चतस्रः ॥१५४॥**

**च्युत्वा च विदेहान्तः स तीर्थकृद्भूय शिवसुखं लेभे । गणभृद्भावमिताभिस्ताभिः सममहह ! सहयोगः ॥१५५॥**

**इत्यवेत्य जिनभक्तिसम्भवं वैभवं नृपतिधर्मदत्तवत् । तद्विधौ शुभविधौ सचेतसः सन्तु सन्ततनिबद्धचेतसः ॥१५६॥**

**इति विधिदेवपूजायां धर्मदत्तनृपकथा ॥**

सूत्रगाथायां **उचिअचिंतरओ** इत्युक्तं, तत्र उचितचिन्ता चैत्यप्रमार्जनं, विनश्यच्चैत्यप्रदेशपूजोपकरणसमारचनं, प्रतिमा-परिकरादिनैर्मल्याऽऽपादनं, विशिष्टपूजाप्रदीपादिशोभाऽऽविर्भावनं, वक्ष्यमाणाशातनानिवारणम्, अक्षतनैवेद्यादिचिन्ता, चन्दन-केशरधूपदीपतैलसङ्ग्रहो, वक्ष्यमाणदृष्टान्तविनश्यच्चैत्यद्रव्यरक्षा, त्रिचतुराद्याऽऽस्तिकसाक्षिकं तदुद्ग्राहणिका, तत्सुस्थान-सुयत्नस्थापनं, तदायव्ययादौ सुव्यक्तं लेख्यकं स्वयं परैश्च द्रव्यार्पण[१]द्रव्यायप्रवर्त्तनविधिना तदुत्सर्पणं, [२]कर्मस्थायकरणं, [२]कर्मकरचिन्ता चेत्यादिरनेकविधा । तत्राढ्यस्य द्रव्यपरिजनादिबलसाध्या चिन्ता सुकरा, अनाढ्यस्य तु स्ववपुः-कुटुम्बादि-साध्या। यस्य च यत्र यथा सामर्थ्यं, स तत्र तथा विशेषतः प्रयतते । या च चिन्ता स्वल्पसमयसाध्या, तां द्वितीयनैषेधिक्या

१. देवदायप्रवर्तन इति को० ह० पाठः । २. कर्मस्थायककारणं इति को० ह० प्र० पाठः ।

अर्वाग् विधत्ते, शेषां तु पश्चादपि यथायोगम् । एवं धर्मशालागुरुज्ञानादेरपि यथोचितचिन्तायां सर्वशक्त्या यतनीयं, नहि देवगुर्वादीनां श्रावकं विनाऽन्यः कश्चित् चिन्ताकर्ताऽस्ति, ततो ब्राह्मणसाधारणधेनोरिव नैव तेषां यथार्हचिन्ताविधावुपेक्षा शिथिलादरता वा कार्या, तथा सति सम्यक्त्वस्यापि संशयापत्तेः । सा हि का नामाऽर्हदादेर्भक्तिर्यस्यामाशातनादावपि नात्यन्तं दूयते । श्रूयते हि लोकेऽपि ईश्वरस्योत्पाटितां दृष्टिं दृष्ट्वाऽतिदूनः पुलिन्दः स्वाक्षि ददौ । तस्मात् स्वजनादिकृत्येभ्यो-ऽप्यत्यन्ताऽऽदृत्या चैत्यादि-कृत्ये नित्यं प्रवर्तितव्यम् । अवोचाम च–

**देहे द्रव्ये कुटुम्बे च सर्वसंसारिणां रतिः । जिने जिनमते सङ्घे पुनर्मोक्षाभिलाषिणाम् ॥**

आशातनाश्च ज्ञानदेवगुर्वादीनां जघन्यादिभेदात् त्रिविधा, तत्र जघन्या ज्ञानाशातना पुस्तक-पट्टिका-टिप्पनिका-जपमाला-देर्वदनोत्थनिष्ठीवनलवस्पर्शः, हीनाधिकाक्षरोच्चारः, ज्ञानोपकरणे समीपस्थे सत्यधोवातनिसर्ग इत्यादि १, मध्यमा अकाले पठनादिः, उपधानतपो विना सूत्राध्ययनं, भ्रान्त्याऽर्थस्यान्यथा कल्पनं, पुस्तकादेः प्रमादात् पादादिस्पर्शः, भूमिपातनं, ज्ञानोपकरणे पार्श्वस्थे सत्याहारग्रहणं, निरोधकरणमित्यादि २, उत्कृष्टा तु निष्ठ्यूतेन पट्टिकादेरक्षरमार्जनम्, उपर्युपवेशनशयनादिः, ज्ञानोपकरणेऽन्तिकस्थे उच्चारादिकरणं, ज्ञानस्य ज्ञानिनां वा निन्दाप्रत्यनीकतोपघातकरणम् उत्सूत्रभाषणं चेत्यादि ३ ।

जघन्या देवाशातना, वासकुम्पिकाद्यास्फालन-श्वासवस्त्राञ्चलादिस्पर्शाद्या १। मध्यमा अधौतपोतिकया पूजनं भूमिपातनाद्याः २। उत्कृष्टा चरणघट्टन-श्लेष्मनिष्ठ्यूतादिलवस्पर्शन-प्रतिमाभङ्ग-निर्गमन-जिनाऽवहीलानाद्याः ३।

अथवा देवाशातना जघन्या दश, मध्यमाश्चत्वारिंशत् । उत्कृष्टाश्चतुरशीतिः, ताश्च क्रमेणैवमाहुः—

**तंबोल-पाण-भोअणु-वाहण-धीभोग-सुयण्ण-निट्ठवणं । मुत्तुच्चारं जूअं, वज्जे जिणमंदिरस्संतो ॥** चै. महा. ६३

इति जघन्यतो दशाशातनाः ।

**मुत्तं पुरीसं पाणह, पाणाऽसण-सयण-इत्थि-तंबोलं । निट्ठीवणं च जूअं, जुआदिपलोअणं विगहा ॥**

**पल्हत्थीकरणं पि हु पायपसारण-परुप्परविवाओ । परिहासो मच्छरिआ, सीहासणमाइपरिभोगो ॥**

**केससरीरविभूसण, छत्तासि-किरिड-चमरधरणं च । धरणं जुवईहिं सविआरहासखिड्डुप्पसंगा य ॥**

**अकयमुहकोस-मलिणंगवत्थ-जिणपूअणापवित्ती य । मणसो अणेगयत्तं, सचित्तदविआण अविमुअणं ॥**

**अच्चित्तदविअवुस्सजणं तह अणेगसाडिअत्तमवि ।**

**जिणदंसणे अणंजलि जिणंमि दिट्ठम्मि अ अपूआ( संति य रिद्धिम्मि अ अपूआ ) ॥**

**अहवा अणिट्ठकुसुमाइपूअणं तह अणायरपवित्ती । जिणपडिणीयऽनिवारणचेइअदव्वस्सुवेहणमो ॥**

**सइ सामत्थि ओवाहणपुव्वं चिइवंदणाइपढणं च । जिणभवणाइट्ठिआणं, चालीसासायणा एए ॥**

इति मध्यमतश्चत्वारिंशदाशातनाः ।

**खेलं केलिं कलिं कला कुललयं तंबोल-मुग्गालयं, गालि कंगुलिआ सरीरधुवणं केसे नहे लोहिअं ।**

**भत्तोसं तय-पित्त-वंत्त-दसणा विस्सामणा दामणं, दंतत्थी-नह-गल्ल-नासिअ-सिरो-सुत्त-च्छवीणं मलं ॥**
**मंतं मीलण लीक्खयं विभजणं भंडार दुट्ठासणं, छाणि-कप्पड-दालि-पप्पड-वडीविस्सारणं नासणं ।**
**अक्कंदं विकहं सरुच्छुघडणं तेरिच्छसंठावणं, अग्गीसेवण रंधणं परिखणं निस्सीहिआभंजणं ॥**
**छत्तोवाणह-सत्थ-चामर-मणोणेगत्तमब्भंगणं, सच्चितणमचाय चायमजिए दिट्ठीइ नो अंजलि ।**
**साडेगुत्तरसंगभंग मउडं मोलिं सिरोसेहरं, हुड्डा-जिड्डुह-गोड्डिआइरमणं जोहार भण्डक्किअं ॥**
**रेक्कारं धरणं रणं विवरणं वालाण पल्हत्थिअं, पाऊ पायपसारणं पुडुपुडी पंकं रओ मेहुणं ।**
**जुअं जेमण-गुज्झ-विज्ज-वणिजं-सिज्जं-जलं-मज्जणं, एमाईअमवज्जकज्जमुजुओ वज्जे जिणिंदालए ॥**

एतद् व्याख्या—खेलं-श्लेष्माणं जिनगृहे निक्षिपति । केलिं-द्यूतक्रीडादिकां तत्र करोति । कलिं-कलहम् । कलाः-धनुर्वेदादिकाः प्रयुङ्क्ते । कुललयं गण्डुषम् ताम्बुलं भक्षयति । भक्षितताम्बूलोद्गालनं तत्र निक्षिपति । गालीर्दत्ते । कंगुलिअत्ति लघुवृद्धनीतिकरणम् हस्तपादाद्यङ्गधावनं करोति । केशान् नखान् समारचयति । रुधिरं तत्र पातयति । भत्तोसं सुखादिकां भक्षयति । त्वचं व्रणादिसम्बंधिनीं पातयति । पित्तं धातुविशेषं औषधादिना तत्र पातयति । एवं वान्तं दन्तं च । विश्रामणां कारयति । दामनम्-अजाश्वादीनां दन्ताक्षि-नख-गण्डनासिका-शिरःश्रोत्रच्छवीनां मलं जिनगृहे त्यजति, तत्र छविः शरीरं शेषास्तदवयवाः ॥१॥

मन्त्रं-भूतादिनिग्रहलक्षणं राजादिकार्यालोचनं वा तत्र करोति । मीलनं क्वापि स्वकीयविवाहादिकृत्ये निर्णयाय वृद्धपुरुषाणां तत्रोपवेशनम् । लेख्यकं-व्यवहारादि । राजादिकार्यविभजनं विभागं वा दायादादीनां तत्र करोति । भाण्डागारं-निजद्रव्यादेः । दुष्टासनं पादोपरिपादस्थापनादिकम् । छाणी-गोमयपिण्डः । कर्पटं-वस्त्रम् । दालिर्मुद्गादिद्विदलरूपा । पर्पटः । वटिकाः । एषामुपलक्षणत्वादन्येषामपि करीरचिर्भटिकाशाकादीनां विसारणं-उद्वापनकृते विस्तारणं । नाशनं राजदायादिभयेन चैत्यस्य गर्भगृहादिष्वन्तर्धानम् । आक्रन्दं-रोदनं पुत्रकलत्रादिवियोगेन । स्त्रीभक्तराजदेशसम्बधिनीर्विकथाः करोति । शराणां बाणानां इक्षूणां च घट्टनं । सरत्थेति पाठे तु शराणामस्त्राणां च धनुरादीनां घट्टनं । गोवृषभादींस्तत्र स्थापयति । शीतार्त्तोऽग्निं सेवते । रन्धनं-धान्यादेः । परीक्षणं-द्रम्मादीनाम् । विधिना नैषेधिकीं न विधत्ते ॥२॥

छत्रोपानहशस्त्रचामराणां देवगृहाद् बहिरमोचनम् । मनस एकाग्र्यं न करोति । अभ्यङ्गं-तैलादिना । सचित्तानां पुष्पादीनामत्यागः । त्यागः परिहारः । अजिएत्ति अजीवानां हारमुद्रिकादीनां, बहिस्तन्मोचने हि अहो ! भिक्षाचराणामयं धर्म इत्यवर्णवादो दुष्टलोकैर्विधीयते । दृष्टे जिनेऽञ्जलिं न बध्नाति एकशाटोत्तरासङ्गं न कुरुते । मुकुटं मस्तके धरति । मौलिं शिरोवेष्टनविशेषरूपाम् । शेखरं कुसुमादिमयं विधत्ते । हुड्डां पारापतनालिकेरादिसम्बन्धिनी पातयति । जिंडुहः कन्दुकः । ज्योत्कारकरणं पित्रादीनाम् । [१]भण्डानां विटानां क्रिया कक्षावादनादिका ॥३॥

१. भेडानां इति को० ह० प्र० पाठः ।

तिरस्कारार्थं रेकारं करोति । लभ्यद्रव्ययाचनाद्यर्थं धरणम् । रणं-सङ्ग्राम् । विवरणं-वालानां विजटीकरणम् । पर्यस्तिकाकरणम् । पादुका काष्ठादिमयं चरणरक्षणोपकरणम् । पादयोः-प्रसारणं स्वैरं निराकुलतायाम् । सुखार्थं पुडपुडीदापनम् । पङ्कं-कर्दमं करोति निजदेहावयवक्षालनादिना । रजो-धूलीं तत्र पादादिलग्नां शाटयति । मैथुनं-कामक्रीडाम् । यूकां-मस्तकादिभ्यः क्षिपयति, वीक्षयति वा । जेमनं-भोजनम् गुह्यं-लिङ्गं तस्यासंवृतस्य करणम् । 'जुज्झं' इति पाठे तु युद्धं दृग्बाह्वादिभिः । वैद्यकम् । वाणिज्यं-क्रयविक्रयादिरूपम् । शय्यां कृत्वा तत्र स्वपिति । जलं पानाद्यर्थं तत्र मुञ्चति पिबति वर्षासु कुट्टिमप्रणालादौ सङ्गृह्णाति वा तथा मज्जनस्थानं तत्र करोति ॥४॥

इत्युत्कर्षतश्चतुरशीत्याशातनाः ।

बृहद्भाष्ये तु पञ्चैवाऽऽशातनाः प्रोक्ता यथा—

**जिणभवणंमि अवन्ना पूआइअणायरो तहा भोगो । दुप्पडिहाणं अणुचिअवत्ती आसायणा पंच ॥**

**तत्थअवन्नासायण, पल्हत्थिअदेवपिट्ठिदाणं च । पुडपुडिअपयपसारणदुट्ठासणसेवणजिणग्गे ॥**

**जारिसतारिसवेसो, जहा तहा जम्मि तम्मि कालम्मि । पूआइ कुणइ सुन्नो, अणायरासायणा एसा ॥**

**भोगो तंबोलाइ, कीरंतो जिणगिहे कुणइऽवस्सं । नाणाइआण आयस्स सायणं तो तमिह वज्जे ॥**

**रागेण व दोसेण व, मोहेण व दूसिआ मणोवित्ती । दुप्पणिहाणं भन्नइ, जिणविसए तं न कायव्वं ॥**

**धरणरणरुअणविगहातिरिबंधणरंधणाइ गिहकिरिआ । गालीविज्जवणीज्जाइ चेइए चयणुचिअवित्ती ॥**

आशातनाश्चात्यन्तविषयिणः सतताविरता देवा अपि देवगृहादौ सर्वथा वर्जयन्ति । उक्तं हि–

**देवहरयम्मि देवा, विसयविसविमोहिआवि न कयावि । अच्छरसाहिं पि समं, हासकड्डाइवि कुणंति ॥**

गुर्वाशातनाश्च त्रयस्त्रिंशद्, यतः–

**पुरओ पक्खा-सन्ने गंता चिट्ठण-निसीअणा-यमणे । आलोयणा पडिसुणणे पुव्वालवणे अ आलोए ॥**

**तह उवदंस निमंतण खद्धायणे तहा अपडिसुणणे । खद्धत्ति अ तत्थगए किं तुम तज्जाय नो सुमणे ॥**

**नोसरसि कहंछित्ता परिसंभित्ता अणुट्ठिआइ कहे । संथारपायघट्टण चिट्ठुच्च समासणे आवि ॥**

गुरोः पुरतो गमने आशातना, यतो मार्गोपदर्शनादिकं तादृक्कारणं विना गुरोः पुरतो गन्तुं न कल्पते, अविनयदोषप्रसङ्गात् । पार्श्वतो गन्ता तदाप्यविनयदोषः । पृष्ठतोऽप्यासन्नं गन्ता तदा कासितक्षुतादिषु श्लेष्माद्यवयवलगनादिदोषः । एवमन्यत्रापि दोषा वाच्याः । एवं स्थाननिषदनाभ्यामपि प्रत्येकं तिस्रस्तिस्र आशातनाः । आहारग्रहणादौ प्रथममाचमनं करोति । गमनागमनविषयं पूर्वमालोचनम् । रात्रौ कोऽपि जागर्त्तीति गुरूक्ते श्रुतेऽपि निद्रादिमिषेण प्रत्युत्तरादानम् । किञ्चिदालाप्यं गुरोः पूर्वमालापयति । आहारादिकं (अशनादिकं) प्राक् साध्वन्तराणामालोचयति, ततो गुरोः । एवमुपदर्शयति अशनादिभिः पूर्वमन्यान्निमन्त्रयति ततो गुरून् । 'खद्धत्ति' गुरुमनापृछ्य स्वेच्छयाऽन्यस्मै स्निग्धमधुरादि दत्ते । 'आइअणेत्ति' गुरोर्यत् किञ्चिद् दत्त्वा स्निग्धादि यथेष्टं

स्वयं भुङ्क्ते । अप्रतिश्रवणं प्राग्वद्, नवरं प्राग् रात्रौ सुप्तजागरितपृच्छाविषयम् इह तु सामान्येन । 'खद्धत्ति'-अत्ति गुरुं प्रति बहुकर्कशोच्चैः स्वरं वक्ति । आलापितः स्वस्थानस्थ एव प्रत्युत्तरयति । गुर्वाहूतः किमिति वक्ति । गुरुणा नोदितस्तज्जातेन प्रतिहन्ति, यथा कुतो ग्लानादेर्वैयावृत्यं न करोषीत्युक्तो वक्ति त्वमेव किं न करोषि । गुरोः कथां कथयतो न सुमनाः स्यात् किन्तु विमनाः गुरुं सूत्रादिकं वदन्तमेवं वक्ति, यथा न स्मरसि त्वमेतमर्थं, न चैषोऽर्थ एवं भवति । गुरौ कथां कथयति तां कथामाच्छिनत्ति यथाहं कथयामीति । पर्षदं भिनत्ति यथा सम्प्रति भिक्षावेलेत्यादि । कथनेन अनुत्थितायां पर्षदि गुरूक्तामेव कथां स्वस्य पाटवादिज्ञापनाय सविशेषं कथयति । शय्यासंस्तारकादि पादाभ्यां घट्टयति । गुरुशय्यादौ स्थानादि करोति । गुरोः सकाशादुच्चासनः । एवं समासनः । आवश्यकचूर्ण्यादौ तु गुरौ कथां कथयति एवमेतदित्यन्तराले शिष्यस्य वचनमाशातना पृथगुक्ता । गुरोः पार्श्वादुच्चसमासनत्वं चैकैव इति त्रयस्त्रिंशद् गुर्वाशातनाः । गुर्वाशातना चैवं त्रिधा । गुरोः पादादिनां सङ्घट्टादौ जघन्या । श्लेष्मनिष्ठीवनलवस्पर्शनादौ मध्यमा । गुर्वादेशाऽकरणविपरीतकरणापकर्णनपरुषभाषणादावुत्कृष्टा ३। स्थापना-चार्यस्येतस्ततश्चालनपादस्पर्शादौ जघन्या, भूमिपातनावज्ञामोचनादौ मध्यमा, प्राणाशनभङ्गादावुत्कृष्टा । एवं ज्ञानोपकरणवत् दर्शनचारित्रोपकरणस्य रजोहरणमुखवस्त्रिकादण्डकदण्डिकादेरपि । '**अहवा नाणाइ तिअं**' गु. वं. भा. २८ इति वचनाद् गुरुस्थाने स्थाप्य-त्वेनाविधिव्यापारणादधिका तदाशातनापि वर्ज्या । यदुक्तं श्रीमहानिशीथे—**अविहीए निअंसणुत्तरियं रयहरणं । दण्डगं वा परिभुंजे चउत्थं इति** । अध्य० ७ सू० २३ पत्र १२८ संपा० पुण्यवि० तेन श्राद्धैश्चरवलकमुखवस्त्रिकादेर्विधिनैव व्यापारणस्वस्थान-

स्थापनादिकार्यं, अन्यथा धर्मावज्ञादि-दोषापत्तेः । एतासु चोत्सूत्रभाषणार्हद्गुर्वाद्यवज्ञादिर्महत्याशातनाऽनन्तसंसारहेतुश्च । सावद्याचार्य-मरीचि-जमालि-कूलवालकादेरिव । यतः—

**उस्सुत्तभासगाणं, बोहीनासो अणंतसंसारो । पाणच्चएवि धीरा, उस्सुत्तं ता न भासंति ॥**

**तित्थयरपवयणसुअं, आयरियं गणहरं महड्ढिअं । आसायंतो बहुसो, अणंतसंसारिओ होइ ॥**

एवं देवज्ञानसाधारणद्रव्याणां गुरुद्रव्यस्य च वस्त्रपात्रादेर्विनाशतदुपेक्षाद्यपि महत्याशातना । यदूचे—

**चेइअदव्वविणासे, इसिघाए पवयणस्स उड्डाहे । संजइचउत्थभंगे, मूलग्गी बोहिलाभस्स ॥**

विनाशोऽत्र भक्षणोपेक्षणादिलक्षणः । श्रावकदिनकृत्य-दर्शनशुद्ध्यादावपि—

**चेइअदव्वं साहारणं च जो दुहइ मोहिअमईओ । धम्मं च सो न याणइ, अहवा बद्धाउओ नरए ॥**

चैत्यद्रव्यं प्रसिद्धं, साधारणं चैत्यपुस्तकापद्गतश्राद्धादिसमुद्धरणयोग्यं-ऋद्धिमच्छ्रावकमीलितं यो द्रुह्यति विनाशयति दोग्धि वा व्याजव्यवहारादिना तदुपयोगमुपभुङ्क्ते इत्यर्थः ।

**चेइअदव्वविणासे, तद्दव्वविणासणे दुविहभेए । साहु उविक्खमाणो, अणंतसंसारिओ भणिओ ॥**

'तद्दव्वत्ति' तस्य चैत्यस्य द्रव्यं दारूपलेष्टकादि, तस्य विनाशने । योग्यातीतभावविनाश्यभेदाद् द्विविधे, तत्र योग्यं नव्यमानीतं, अतीतभावं लग्नोत्पाटितम् । मूलोत्तरभेदाद् वा द्विविधे, तत्र मूलं स्तम्भकुम्भिकादि, उत्तरं तु छादनादि ।

स्वपक्षपरपक्षभेदाद्वा द्विविधे, स्वपक्षः श्रावकादिः, परपक्षो मिथ्यादृष्ट्यादिः, एवमनेकधा द्वैविध्यं । अत्राऽपिशब्दस्याध्याहारादास्तां श्रावकः, सर्वसावद्यविरतः साधुरप्यौदासीन्यं कुर्वाणोऽनन्तसंसारिको भणितस्तीर्थकृदादिभिः । अथ त्रिधा प्रत्याख्यातसावद्यस्य यतेश्चैत्यद्रव्यरक्षायां को नामधिकारः ? इति चेदुच्यते, यदि राजामात्याद्यभ्यर्थनपुरस्सरं गृहहट्टग्रामादिकादानादिविधिना नवमुत्पादयति, तदा भवति भवद्विवक्षितार्थसिद्धिः । यदा तु केनचिद्यथाभद्रकादिना धर्माद्यर्थं प्राग्वितीर्णमन्यद्वा जिनद्रव्यं विलुप्यमानं रक्षति तदा नाभ्युपेताऽर्थहानिरपि तु विशेषतः पुष्टिरेव सम्यग् जिनाज्ञाराधनात् । यथाहि— जिनभवनं नवमकारयतोऽपि पूर्वकृतं तु तत्प्रतिपन्थिनिग्रहेणापि रक्षतो न प्रायश्चित्तं नापि प्रतिज्ञाभङ्ग इति । आगमोऽप्येवमेवं व्यवस्थितो । यदाह—

**चोएइ चेइयाणं, खित्तहिरन्ने अगामगोवाइ । लग्गं तस्स उ जइणो, तिगरणसोही कहं नु भवे ॥**

**भन्नइ इत्थ विभासा, जो एयाइं सयं विमग्गिज्जा । तस्स न होई सोही, अह कोई हरिज्ज एयाइं ॥**

**तत्थ करंतु उवेहं, जा सा भणिआ उ तिगरणविसोही । सा य न होइ अभत्ती अ तस्स तम्हा निवारिज्जा ॥**

**सव्वत्थामेण तहिं, संघेण य होइ लग्गिअव्वं तु । सचरित्तऽचरित्तीण य सव्वेसिं होइ कज्जं तु ॥** इति ।

तथा—**भक्खेइ जो उविक्खेइ जिणदव्वं तु सावओ । पन्नाहीणो भवे जो अ लिप्पए पावकम्मुणा ॥**

 पन्नाहीणत्ति–प्रज्ञाहीनत्वमङ्गोद्धारदानादिना देवद्रव्यविनाशः, यद्वा प्रज्ञाहीनः स्वल्पेन बहुना वाऽर्थेन कार्यसिद्धिमजानानो

मन्दमतितया यथाकथञ्चिद् द्रव्यव्ययकारी कूटलेख्यश्च यत्तदोर्नित्यसम्बन्धात् स लिप्यते ।

**आयाणं जो भंजइ, पडिवन्नधणं न देइ देवस्स । नस्संतं समुविक्खइ, सो वि हु परिभमइ संसारे ॥**

**जिणपवयणवुड्ढिकरं, पभावगं नाणदंसणगुणाणं । भक्खंतो जिणदव्वं, अणंतसंसारिओ होइ ॥**

'जिणपवयणत्ति'—सति हि देवद्रव्ये प्रत्यहं चैत्यसमारचनमहापूजासत्कारसम्भवः, तत्र च प्रायो यतिजनसम्पातः, तद्व्याख्यानश्रवणादेश्च जिनप्रवचनवृद्धिः, एवं ज्ञानादिगुणानां प्रभावना चेत्यर्थः ।

**जिणपयवणवुड्ढिकरं, पभावगं नाणदंसणगुणाणं । रक्खंतो जिणदव्वं, परित्तसंसारिओ होइ ॥**

'परित्तति'—परिमितभवस्थितिः ।

**जिणपवयणवुड्ढिकरं, पभावगं नाणदंसणगुणाणं । वुड्ढंतो जिणदव्वं, तित्थयरत्तं लहइ जीवो ॥**

'वुड्ढंतोत्ति' वृद्धिरत्र सम्यग्रक्षणाऽपूर्वापूर्वार्थप्रक्षेपादिना अवसेया । 'तित्थयरत्ति' तीर्थकरत्वलाभो देवद्रव्यवृद्धिकर्तुरर्हत्प्रवचनभक्त्यतिशयात्सुप्रसिद्ध इति तद्वृत्तौ । पञ्चदशकर्मादान-कुव्यापारवर्जं, सद्व्यवहारादिविधिनैव च तद्वृद्धिः कार्या । यतः—**जिणवरआणारहियं, वद्धारंता वि केवि जिणदव्वं । बुड्डंति भवसमुद्दे, मूढा मोहेण अन्नाणी ॥**

केचित्तु श्राद्धव्यतिरिक्तेभ्यः समधिकग्रहणकं गृहीत्वा कलान्तरेणापि तद्वृद्धिरुचितैवेत्याहुः । सम्यक्त्ववृत्त्यादौ सङ्काश-

कथायां तथोक्तेः । **चैत्यद्रव्यभक्षणरक्षणादौ सागरश्रेष्ठिदृष्टान्तः** । स चैवम् साकेतपुरे सागरश्रेष्ठी परमार्हतः । तस्मै सुश्रावक इति कृत्वा शेषश्रावकैश्चैत्यद्रव्यं दत्तं प्रोक्तं च, चैत्यकर्मस्थाऽऽयकृतां सूत्रधारादीनां त्वया दातव्यमिति । सोऽपि लोभाभिभूतः सूत्रधारादीनां न रोक्यं द्रव्यं दत्ते, किन्तु समर्घाणि धान्यगुडतेलघृतवस्त्रादीनि चैत्यद्रव्येण सङ्गृह्य तेभ्यो दत्ते, लाभं च स्वयं स्थापयति । एवं रूप्यकाशीतिभागरूपाणां काकणीनामेकः सहस्रो लाभेन सङ्गृहीतः अर्जितं च तेनैवं कुर्वता घोरतरं दुष्कर्म । तच्चानालोच्य मृतो जलमानुषीभूयाऽब्ध्यन्तर्जलचरोपद्रवनिवारकाऽण्डगोलिकाग्रहणार्थजात्यरत्नग्राहकप्रयुक्तवज्रघरट्टपीडनमहा-व्यथया मृत्वा तृतीयनरके नारकोऽजनि । यदुक्तं वेदान्तेऽपि—

**देवद्रव्येण या वृद्धिर्गुरुद्रव्येण यद्धनम् । तद्धनं कुलनाशाय मृतोऽपि नरकं व्रजेत् ॥**

नरकादुध्धृतश्च महामत्स्यः पञ्चधनुःशतमानो म्लेच्छकृतसर्वाङ्गच्छेदादिमहाकदर्थनया मृतश्चतुर्थपृथिव्याम् । एवमेकद्व्यादि-भवान्तरितो नरकसप्तकेऽपि द्विरुत्पेदे । ततः स एकसहस्रकाकणीप्रमाणदेवद्रव्योपजीवनात्सान्तरनिरन्तरोत्पत्त्या सहस्रं वारान् श्वा जातः । एवं सहस्रं वारान् गर्त्ताशूकरः, सहस्रं भवान् मेषः, सहस्रं भवानेडकः, सहस्रं भवान् मृगः, सहस्रं भवान् शशः, सहस्रं भवान् शम्बरः, सहस्रं भवान् शृगालः, सहस्रं भवान् मार्जारः, सहस्रं भवान् मूषकः, सहस्रं भवान् नकुलः, सहस्रं भवान् गृहकोलः, सहस्रं भवान् गृहगोधाः, सहस्रं भवान् सर्पः, सहस्रं भवान् वृश्चिकः, सहस्रं भवान् विष्टासु कृमिः । एवं सहस्रं सहस्रं भवान् पृथिवी-जलानलानिल-वनस्पति-शङ्ख-शुक्तिका-जलौकः-कीटिका-कीट-पतङ्ग-मक्षिका-भ्रमर-मत्स्य-कच्छप-खर-

महिष-वृषभ-करभ-वेसर-तुरग-गजादिषु समुत्पत्त्या लक्षसङ्ख्यभवान् भ्रान्तः । प्रायः सर्वभवेषु शस्त्रघातादिना महाव्यथाः सहमान एव मृतः । ततः क्षीणबहुदुष्कर्मा वसन्तपुरे कोटीश्वरवसुदत्तवसुमत्योः पुत्रो जातः । गर्भस्थे एव प्रणष्टं सर्वं द्रव्यं जन्मदिने जनकोऽपि विपन्नः । पञ्चमे वर्षे मातापि मृता । लौकैर्निष्पुण्यक इति दत्तनामा द्रमक-रङ्कवृत्या वृद्धिं प्राप । अन्यदा दृष्टः स्नेहलेन मातुलेन नीतश्च स्वगृहे, रात्रौ च मुषितं मातुलगृहं चौरैः । एवं यस्य वेश्मन्येकमपि दिनं वसति, तत्र चौरधाट्याग्निगृहधनिकविपत्त्याद्युपद्रवः स्यात् । ततः कपोतपोतोऽयं ज्वलन्ती गड्डुरिका वा मूर्तिमानुत्पातो वा इत्यादिलोक-निन्दयोद्विग्नमना गतो देशान्तरम् । प्राप्तश्च ताम्रलिप्तीं पुरीम् । स्थितश्च विनयंधरमहेभ्यगृहे भृत्यवृत्त्या । ज्वलितं च तद्दिने एव तद्गृहं । निष्कासितश्चालर्कशुन इव तेन स्वगृहात् । ततः किंकृत्यमूढ प्राक्कृतं स्वकर्म निन्दति स्म । यतः—

**कम्मं कुणेति सवसा, तस्सुदयम्मि अ परव्वसा हुंति । रुक्खं दुरुहइ सवसो, निवडेइ परव्वसो तत्तो ॥**

ततः स्थानान्तरितानि भाग्यानि इति विमृश्य गतः समुद्रतीरे । तद्दिन एव चटितश्च प्रवहणम् । भृत्यभावेन धनावह-साय्व्यात्रिकेण साकं प्राप्तः क्षेमात्परद्वीपम् । दध्यौ चैवं, अहो उद्घाटितं मम भाग्यं यन्मय्यारूढेऽपि न भग्नं यानपात्रं, यद्वा विस्मृतमिदं दुर्दैवस्य कृत्यं, सम्प्रति मा वलनावसरे स्मृतिविषयं यासीत् । तच्चिन्तानुसारिणैव दैवेन वलमानस्य तस्य प्रचण्डदण्डप्रहतभाण्डमिव शतखण्डीकृतः पोतः । दैवान्निःपुण्यकः फलके लग्नः । कथञ्चित् अब्धितीरग्रामं प्राप्तः । तद्ग्रामठक्कुरमवलगति स्म । अन्यदा धाट्या निष्पातितष्ठक्कुरः । निष्पुण्यकश्च ठक्कुरसुतबुद्ध्या बद्धद्ध्वानीतः पल्ल्याम् । तद्दिवस

एव चान्यपल्लीपतिना विनाशिता सा पल्ली । ततस्तैरपि निर्भाग्य इति निष्काशितः । यतः—

**खल्वाटो दिवसेश्वरस्य किरणैः सन्तापितो मस्तके, वाञ्छन् स्थानमनातपं विधिवशाद् बिल्वस्य मूलं गतः ।**
**तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः, प्रायो गच्छति यत्र दैवहतकस्तत्रैव यान्त्यापदः ॥**

एवमेकोनसहस्रान्यान्यस्थानेषु तस्कर-जलानल-स्वचक्र-परचक्रमरकाद्यनेकोपद्रवसम्भवान्निष्काशनादिना महादुःखं वहन्महाटव्यां सप्रत्ययसेलकयक्षप्रासादं प्राप्त एकाग्रतया तमाराधयामास । स्वदुःखनिवेदनपूर्वं एकविंशत्योपवासैश्च तुष्टो यक्षः प्राह,—भद्र ! सन्ध्यायां मम पुरः सुवर्णचन्द्रकसहस्राङ्कितो महान् मयूरो नृत्यं करिष्यति, प्रतिदिनं पतितानि तत्कनकपिच्छानि त्वया ग्राह्याणि। हृष्टेन तेनापि कियन्त्यपि गलितानि सायं गृहीतानि । एवं प्रत्यहं ग्रहणान्नवशती पिच्छानां प्राप्ता, शतमेकं शेषं तिष्ठति । अथ दुष्कर्मप्रेरितेन तेन चिन्तितं—एतद्ग्रहणायाऽद्यापि कियच्चिरमत्रारण्ये स्थातव्यं, तद्वरमेकमुष्ट्यैव सर्वाण्यपि गृह्णामि इति तद्दिने नृत्यन्मयूरस्य तान्येकमुष्ट्यैव गृहीतुं यावत्प्रवृत्तः तावत्केकी काकरूपः सन्नुड्डीय गतः । पूर्वगृहीतपिच्छान्यपि नष्टानि। यतः—

**दैवमुल्लङ्घ्य यत्कार्यं क्रियते फलवन्न तत् । सरोऽम्भश्चातकेनाऽऽत्तं गलरन्ध्रेण गच्छति ॥**

ततो धिग् मया मुधैवौत्सुक्यं कृतमिति विषण्ण इतस्ततो भ्रमन् ज्ञानिनं मुनिमेकं दृष्ट्वा नत्वा च स्वप्राक्कर्मस्वरूपं पप्रच्छ । तेनाप्युक्तं यथानुभूतं प्राग्भवस्वरूपं व्यक्त्या । ततस्तद्देवद्रव्योजीवनप्रायश्चित्तं ययाचे । मुनिनाप्युक्तं समधिकताव-

देवद्रव्यप्रदानतद्द्रव्यरक्षावृद्ध्यादिना तद्दुष्कर्मप्रतीकारः, सर्वाङ्गीणभोगर्द्धिसुखलाभश्च स्यात् । ततस्तेन सहस्रगुणदेवद्रव्य-प्रदानावधिवस्त्रहारादिनिर्वाहमात्राधिकं स्वल्पमपि द्रव्यं न सङ्ग्राह्यमिति मुनिसमक्षं नियमो जगृहे, विशुद्धश्राद्धधर्मश्च । ततो यद्यद् व्यवहरति तत्र तत्र बहु द्रव्यमर्जयति ददाति च देवस्य । एवं स्वल्पैरेव दिवसैः प्रागुपजीवितसहस्रकाकणीस्थाने काकणीलक्षदशकं प्रादायि । ततो देवस्यानृणीभूतः क्रमादर्जितप्रभूततरद्रव्यः स्वपुरे प्राप्तो महेभ्यमुख्यतया राज्ञापि मान्यः । स्वयं कारितेष्वन्येषु च सर्वजैनप्रसादेषु सर्वशक्त्या सर्वाङ्गीणचिन्ताकरणपूर्वकं प्रत्यहं महापूजाप्रभावनादिविधापनसम्यग्देवद्रव्य-रक्षणयथायुक्तिवृद्धिप्रापणाद्युद्भूतपुण्येन चिरसमयं सञ्चितेन जिननामकर्म बद्धवान् । अवसरे च दीक्षामाददे । तत्रापि गीतार्थीभूतः प्रभूतयथार्हधर्मदेशनादिना देवभक्त्यतिशयेन जिनभक्तिरूपं प्रथमं स्थानकमाराध्यार्हन्नामकर्म निकाचितवान् । ततः सर्वार्थसिद्धे देवभवमनुभूय महाविदेहेऽर्हद्विभूतिं भुक्त्वा सिद्धः । **इति देवद्रव्ये सागरश्रेष्ठिकथा ।**

अथ ज्ञानसाधारणद्रव्ययोर्दृष्टान्तः ।

भोगपुरे पुरे चतुर्विंशतिकनककोटिस्वामी धनावहश्रेष्ठी । पत्नी धनवती । तयोर्यमलजातौ सुतौ कर्मसारपुण्यसारौ सौभाग्यसारौ । पित्राऽन्यदा कीदृशावेतौ भाविनो ? इति नैमित्तिकः पृष्टः प्राह—कर्मसारो जडप्रकृतिरतिनिष्प्रज्ञो विपरीतबुद्धितया बहूपक्रमेऽपि प्राक्तनसर्वद्रव्यनिर्गमनव्यद्रव्योपार्जनाभावादिना बहुकालं भृशं दारिद्र्यदास्यादिदुःखवान् भावी । पुण्यसारोऽपि प्राच्यसर्वद्रव्यस्य नव्योपार्जितद्रव्यस्यापि पुनः पुनर्हान्या तथैव दुःखी भावी, परं वाणिज्यादिकलाकुशलो भविता । द्वयोश्च

वार्द्धके धनसौख्यसन्तत्यादिवृद्धिर्भवित्रीति । क्रमादुभावपि विज्ञोपाध्यायस्य पाठनायार्पितौ । पुण्यसारः सुखेन सर्वविद्या अधीतवान् । कर्मसारस्य तु बहूपक्रमेणाप्यक्षरमात्रमपि नायाति, किं बहुना वाचनलिखनाद्यपि कर्तुं न शक्नोति, सर्वथा पशुरेवेति पाठकेनापि पाठनं मुक्तम् । द्वावपि यौवनस्थौ पितृभ्यां समृद्धतया सुलभे महेभ्यकन्ये परिणायिते सोत्सवम् । मा मिथः कलहायिषातामि इति द्वावपि द्वादश द्वादश कनककोटीर्दत्त्वा पृथक् कृतौ । पितरौ तु प्रव्रज्य स्वर्गतौ । अथ कर्मसारः स्वजनादिभिर्वार्यमाणोऽपि स्वकुबुद्धया तत्तद्वाणिज्यं कुरुते, यत्र यत्र अर्थहानिरेव । एवं स्वल्पैरेव दिनैर्जनकार्षिता द्वादश कोटयो निर्गमिताः । पुण्यसारस्य तु द्वादश कोटयः खात्रं दत्वा तस्करैर्गृहीताः । उभावपि जातौ दरिद्रौ त्यक्तौ स्वजनादिभिः । भार्ये अपि क्षुधार्दिते गते पितृगृहे । यतः—

**अलिअंपि जणो धणवंतयस्स सयणत्तणं पयासेइ । आसण्णबंधवेणवि, लज्जिज्जइ झीणविहवेण ॥**

**गुणवंपि निग्गुणच्चिअ गणिज्जए परिअणेण मयविहवो । दक्खत्ताइगुणेहिं अलिएहिं विगिज्जए सधणो ॥**

ततो निर्बुद्धिनिर्भाग्याविति लोकैर्दत्तापमानौ लज्जमानौ तौ गतौ देशान्तरम् । स्थितौ च पृथक् पृथक् क्वापि महेभ्यगृहे । अन्योपायाभावाद् भृत्यवृत्त्या यस्य च गृहे कर्मसारः स्थितः, सोऽलीकव्यवहारी कृपणश्चेति । प्रोक्तवेतनमपि न दत्ते । अमुकदिने दास्यामीति मुहुर्मुहुस्तं वञ्चयति । इति बहुभिर्दिनैराद्येन किमपि धनं नार्जितम् । द्वितीयेन तु कियदर्जितं परं तत् प्रयत्नगोपितमपि धूर्त्तेनापहृतम् । एवमन्यान्यस्थानेषु भृत्यवृत्त्या धातुवाद-खनिवाद-सिद्धरसायन-रोहणाद्रिगमन-मन्त्रसाधन-रुदन्त्या-

द्यौषधीग्रहणादिना चैकादशवारान्महोपक्रमकरणेऽपि कुबुद्ध्यान्यान्यवैपरीत्यविधानादाद्येन क्वापि धनं नार्जितं, किन्तु तत्तद्दुःखान्येव सोढानि । अपरेण पुनरर्जितमपि प्रमादादिनैकादशवारान्निर्गमितम् । ततोऽत्युद्विग्नौ तौ पोतमारुह्य रत्नद्वीपं गत्वा सप्रत्ययरत्नद्वीपदेव्यग्रे मृत्युमप्यङ्गीकृत्य निविष्टौ । अष्टमे उपवासे नास्ति युवयोर्भाग्यम् इत्युक्तं देव्या । ततः कर्मसार उत्थितः । पुण्यसारस्त्वेकविंशत्योपवासैर्दत्तं तया चिन्तारत्नम् । कर्मसारः पश्चात्तापं कुर्वन् पुण्यसारेणोक्तः—मा विषीद एतच्चिन्तारत्ने तवापि चिन्तितं सेत्स्यति इति । अथ द्वावपि प्रीतौ निवर्त्तमानौ पोतमारूढौ । रात्रौ च राकाशशाङ्कोदये वृद्धेनोक्तं, भ्रातः ! स्फुटीकुरु चिन्तारत्नं विलोक्यते तस्य चन्द्रस्य वाधिकं तेज इति ? । लघुनापि पोततटस्थेन दुर्दैवप्रेरितेन रत्नं हस्ते नीत्वा, क्षणं रत्ने क्षणं चन्द्रे च दृष्टिं निदधता पातितं रत्नं रत्नाकरान्तर्मनोरथैः सह । ततो द्वावपि समदुःखौ स्वपुरं प्राप्तौ । ज्ञानिपार्श्वे स्वप्राग्भवमप्राक्षाम् । ज्ञानी प्राह—चन्द्रपुरे जिनदत्तजिनदासश्रेष्ठिनौ, परमार्हतौ । अन्यदा तत्र श्रावकैर्मीलितं प्रभूतं ज्ञानद्रव्यं साधारणद्रव्यं च तयोः क्रमादर्पितं रक्षायै । तौ सम्यग् रक्षां कुरुतः । अन्येद्युराद्येन स्वपुस्तिकायां किञ्चिद् गाढविलोक्यमानं लेखकपार्श्वाल्लेखितं पार्श्वे चापरद्रव्याभावादिदमपि ज्ञानस्थानमेवेति, विचिन्त्य ज्ञानद्रव्याद् द्वादशद्रम्मा लेखकस्यार्पिताः । द्वितीयेन तु, साधारणद्रव्यं सप्तक्षेत्रयोग्यत्वेन श्राद्धानामपि योग्यम्, अहमपि श्रावक इति विमृश्य साधारणद्रव्याद् द्वादश द्रम्मा स्वगृहगाढप्रयोजने पार्श्वेऽन्यद्रव्याभावाद् व्ययिताः । ततो मृत्वा तौ तद्दुष्कर्मणा प्रथमं नरकं गतौ । यदुक्तं वेदान्तेऽपि—

**प्रभास्वे मा मतिं कुर्यात्प्राणैः कण्ठगतैरपि । अग्निदग्धाः प्ररोहन्ति प्रभादग्धो न रोहति ॥**

**प्रभास्वं ब्रह्महत्या च दरिद्रस्य च यद्धनम् । गुरुपत्नी देवद्रव्यं स्वर्गस्थमपि पातयेत् ॥**

प्रभास्वं साधारणद्रव्यमित्यर्थः । नरकोद्धृतौ च तौ जातौ सरीसृपौ । ततो द्वितीयपृथिव्यां नारकौ । ततो गृध्रौ । ततस्तृतीयपृथिव्यां । एवं एकद्व्यादिभवान्तरितौ सप्तसु पृथ्वीषु एकद्वित्रिचतुःपञ्चेन्द्रियतिर्यक्षु च द्वादशसहस्रभवेषु भूयस्तर-दुःखमनुभूय बहुक्षीणतद्दुष्कर्माणौ युवां जातौ । द्वयोरपि द्वादशद्रम्मोपभोगाद् द्वादशसहस्रभवेषु तादृग् दुःखमस्मिन् भवेऽपि द्वादशकोटिनिर्गमनं द्वादश वारान् बहूपक्रमेऽपि धनलाभधनहानिपरगृहदास्यदुखादि जातम् । कर्मसारस्य च तद्ज्ञानद्रव्योप-जीवनादतिनिष्प्रज्ञत्वनिर्बुद्धित्वाद्यधिकम् । इति श्रुत्वा द्वाभ्यां श्राद्धधर्मं प्रपद्य प्रायश्चित्तपदे द्वादश द्रम्माः सहस्रगुणा ज्ञानसाधारणयोरुत्पन्न एवार्पणीया इति नियमो जगृहे । ततो द्वयोरपि प्राक्कर्मक्षयाद्धनोत्पत्तिभवनेन सहस्रगुणतदर्पणेन च क्रमाद् द्वादशकनककोट्योऽभूवन् । ततो महेभ्यसुश्रावकतया सम्यग् ज्ञानसाधारणद्रव्यरक्षातदुत्सर्पणादिना श्राद्धधर्ममाराध्य प्रव्रज्य च सिद्धौ । **इति ज्ञानसाधारणद्रव्योपरि कर्मसारपुण्यसारकथानकम् ॥**

ज्ञानद्रव्यं हि देवद्रव्यवन्न कल्पते एव श्राद्धानाम् । साधारणमपि द्रव्यं सङ्घदत्तमेव कल्पते व्यापारयितुं न त्वन्यथा । सङ्घेनापि सप्तक्षेत्रीकार्य एव व्यापार्यं न मार्गणादिभ्यो देयम् । साम्प्रतिकव्यवहारेण तु यद् गुरुन्युञ्छनादिना साधारणं [1]कृतं

१. जातं इति को० ह० प्र० पाठः ।

स्यात्तस्य श्रावकश्राविकाणामर्पणे युक्तिरेव न दृश्यते । शालादिकार्ये तु तद् व्यापार्यते श्राद्धैः । एवं ज्ञानसत्कं कागदपत्रादि साध्वाद्यर्पितं श्राद्धेन स्वकार्ये न व्यापार्यम् । स्वपुस्तिकायामपि न स्थाप्यं समधिकनिष्क्रयं विना । साध्वादिसत्क-मुखवस्त्रिकादेरपि व्यापारणं न युज्यते गुरुद्रव्यत्वात् । स्थापनाचार्यजपमालादि तु प्रायः श्राद्धार्पणार्थं गुरुभिर्विह्रियते, तेन गुर्वर्पिततद्ग्रहणव्यवहारो दृश्यते । गुर्वादेशं विना च साधुसाध्वीनां लेखकपार्श्वाल्लेखनं वस्त्रसूत्रादिविहरणमपि न कल्पते, इत्याद्यपि चिन्त्यम् । तदेवं स्वल्पोपजीवनमात्रेऽपि मात्राधिकं दारुणविपाकं विज्ञाय विवेकिभिर्देवज्ञानसाधारणद्रव्याणां स्वल्पोऽप्युपभोगः सर्वथापि परिहार्यः । अत एव मालोद्घट्टन-परिधापनिकामोचन-न्युञ्छनकरणादावपि तदैव द्रव्यार्पणं युक्तम्। तथासम्भवा-भावेऽपि यथा यथा शीघ्रमर्पयति, तथा तथाऽधिको गुणो, विलम्बकरणे हि जातु दुर्दैवात् सर्वस्वहानि-मृत्वादिसम्भवे दुर्गत्यादि दुर्वारं सुश्राद्धस्यापि । श्रूयते हि महापुरे पुरे महेभ्यः श्रेष्ठी ऋषभदत्तः परमार्हतः । पर्वणि चैत्ये गतः । पार्श्वे द्रव्याभावादुद्धारके परिधापनिकार्पणं प्रतिपेदे । सद्यश्च तेनान्यान्यकार्यव्यग्रेण सा नार्पिता । अन्यदा दुर्दैवात्तद् गृहे धाटी प्रविष्टा। सर्वस्वं लुण्टितम्। श्रेष्ठी शस्त्रहस्तो भीतैर्लुण्टाकैः शस्त्रघातैर्हतो मृत्वा तत्रैव पुरे निर्दयदरिद्रकृपणमहिषवाहकगृहे महिषो जातो निरन्तरं नीरादिभारं प्रतिगृहं वहति । तच्च पुरमुच्चैस्तरं नदीनीरं च नीचैस्तरं तेन उच्चैस्तरभूचटनाहोरात्रभारवहन-बहुक्षुन्निरन्तरनिर्दयनाडीघातादिभिर्महाव्यथाश्चिरं सेहे । सोऽन्येद्युर्नव्यनिष्पद्यमानचैत्यजगतीकृते जलं वहंश्चैत्यार्चादि दृष्ट्वा जातजातिस्मृतिश्चैत्यं कथमप्यमुञ्चन् ज्ञानिवचसा प्राग्भवपुत्रैः द्रव्यं दत्त्वा महिषवाहकान् मोचितः । प्राग्भवोक्तं देववदेयं सहस्रगुणं

प्रदायाऽनृणीकृतोऽनशनेन स्वर्गतः क्रमान्मोक्षं च । इति देयार्पणे विलम्बकरणे दृष्टान्तः । तस्माद्देवज्ञानादेर्देयं क्षणमपि न स्थाप्यम् । अन्यस्यापि हि देयस्य प्रदाने विवेकिभिः सर्वथा न विलम्ब्यते, किं पुनर्देवज्ञानादेः । यदा च यावता मालापरिधानादि कृतं तदा तावद्देवादिद्रव्यं जातम् । तच्च कथमुपभुज्यते ? । कथं वा तल्लाभादि गृह्यते पूर्वोक्तदेवादि-द्रव्योपभोगदोषप्रसङ्गात् । तस्मात्सद्य एव तदर्पणीयम् यस्तु सद्योऽर्पयितुमशक्तस्तेनादावेव पक्षार्द्धपक्षाद्यवधिः स्फुटं कार्यः । अवधिमध्ये च स्वयमर्प्यं मार्गणादि विनापि । अवध्युल्लङ्घने देवद्रव्योपभोगदोषः । उद्ग्राहणिकापि शीघ्रमभग्नतया तच्चिन्ताकारकैः स्वद्रव्यवद्देवादिद्रव्येऽपि कार्या, अन्यथा बहुविलम्बे दुर्भिक्षदेशभङ्गदौःस्थ्याद्यापातस्यापि सम्भवाद् बहूपक्रमे-ऽपि तदसिद्धेः । तथा च महादोषः, यथा—महेन्द्रपुरेऽर्हच्चैत्ये चन्दनभोगपुष्पाक्षत-फल-नैवेद्य-दीपतैल-कोश-पूजोपस्कर-तत्समारचन-चैत्यद्रव्योद्ग्राहणिका-तल्लेख्यकसुयत्न-तत्स्थापन-तदायव्ययादिचिन्तायां पृथक् पृथक् चिन्ताकर्तारः प्रत्येकं चत्वारश्चत्वारः श्रीसङ्घेन नियोजिताः सम्यक् चिन्तां कुर्वन्ति । अन्यदा मुख्यश्चिन्ताकृदुद्ग्राहणिकाकरणादौ यत्तद्वचनश्रवणादिना दूनस्तच्चिन्तायां शिथिलीभूतः । मुख्यानुयायिनो व्यवहाराः इत्यन्येऽपि शिथिलीभूताः । तावता देशभङ्गादिना बहु देवद्रव्यं विनष्टम् । तत्कर्मणा सोऽसङ्ख्यभवान् भ्रान्तः । इति चिन्ताशैथिल्ये ज्ञातम्। तथा देवादिदेयं सम्यगेवार्प्यं नतु घृष्टकूट-नाणकादिना, यथा कथञ्चित् देवद्रव्योपभोगदोषपत्तेः । तथा देव-ज्ञान-साधारणसम्बन्धि-गृहाट्ट-क्षेत्र-वाटिका-पाषाणेष्टका-काष्ठ-वंशक-बेल्लुक-मृत्सुधादिकं श्रीखण्डकेसरभोगपुष्पादिकं पिङ्गानिका-चङ्गेरी-धूपपात्र-कलश-वास-कुम्पिकादिकं श्रीकरी-चमर-

चन्द्रोदय-झल्लरी-भेर्यादि-वाद्य-साबाण-सिरावक-जवनिका-कम्बल-कटक-पाट-पट्ट-पट्टिका-कुण्डिका-कुम्भउ-रसकज्जल-जल-प्रदीपादिकं चैत्यशालाप्रणालाद्यागत-जलाद्यपि च स्वकार्ये किमपि न व्यापार्यम्, देवद्रव्यवत्तदुपभोगस्यापि दुष्टत्वात्। चमरसाबाणादीनां मलिनीभवनत्रुटनपाटनादिसम्भवे त्वधिकदोषोऽपि । आह च—

**विधाय दीपं देवानां पुरस्तेन पुनर्नहि । गृहकार्याणि कार्याणि तिर्यङ्ङपि भवेद्यतः ॥**

इन्द्रपुरे देवसेनो व्यवहारी । तस्य धनसेन औष्ट्रिकः सेवकः । तस्य गृहान्नित्यमेका उष्ट्रिका देवसेनगृहे समेति । कुट्टयित्वा धनसेनेन गृहे नीतापि पुनर्देवसेनगृह एव यात्वा तिष्ठति । इभ्येन मूल्येन गृहीत्वा स्थापिता । उभयोरपि स्नेहः । एकदा ज्ञानी पृष्टः स्नेहकारणं प्राह । एषा पूर्वभवे तव माताऽभूत् । तया जिनस्याग्रे दीपं कृत्वा पश्चात्तेनैव दीपेन गृहकार्याणि कृतानि । धूपाङ्गारेण चुल्ली सन्धुक्षिता । तेन कर्मणा उष्ट्री जाता । यतः-

**जो जिणवराण हेउं धूवं दीवं च करिय नियकज्जं । मोहेण कुणइ मूढो तिरियत्तं सो लहइ बहुसो ॥**

प्राग्भवभवोऽयं युवयोः स्नेहः **इति देवदीपव्यापारणे ज्ञातम् ।** अतो देवदीपे लेखा न वाच्यन्ते। गृहकार्यं न क्रियते । नाणकं न परीक्ष्यते। देवदीपाद्दीपः स्वकार्ये न क्रियते । देवश्रीखण्डेन तिलकं न क्रियते स्वललाटादौ। देवजलेन करौ न प्रक्षाल्यौ । देवस्य शेषाऽपि पतिता स्वल्पैव च गृह्यते न शरीरादुत्तार्य । देवसत्कं च झल्लरीबेर्यादि गुरूणामपि सङ्घस्यापि चाग्रे न वाद्यम् । केचित्त्वाहुः पुष्टालम्बने यदि देवझल्लर्यादि व्यापार्यते, तदा पूर्वं बहुनिष्क्रयो देवस्य मोच्यः । यतः—

**मुल्लं विणा जिणाणं, उवगरणं चमरछत्तकलसाई । जो वावारइ मूढो, नियकज्जे सो हवइ दुहिओ ॥**

निष्क्रयं दत्वा स्वकार्यार्थं गृहीतस्य देवझल्लर्यादिकस्य जातु भङ्गादिविनाशे स्वद्रव्येण समारचनं कार्यम् । स्वगृहार्थकृतदीपस्य देवदर्शनार्थमेव देवाग्रे आनयनेऽपि देवसत्कत्वं न स्यात्, पूजार्थमेव देवाग्रे मोचने तु देवसत्कत्वम् । मुख्यवृत्त्या देवदीपकृते कौशिकादि पृथगेव कार्यम् । स्वकौशिकादौ देवपूजार्थं दीपकरणे तु तैलवर्त्यादि स्वकार्ये न व्यापार्यम् । एवं केनाप्यर्चाकृत्कराङ्घ्रिक्षालनाद्यर्थं यदि जलं चैत्ये मुक्तं स्यात्तदा तज्जलव्यापारणेऽपि न दोषः । तत एव स्वगृहे पिङ्गानिकाचङ्गेरीओरसादि श्रीखण्डकर्पूरकस्तूर्यादि न स्वनिश्रास्थमेव देवपूजादौ व्यापार्यं, न तु देवसत्कं कार्यम् । तथा सति स्वगृहप्रयोजनेऽपि व्यापारयितुं कल्पते, एवं झल्लरीभेर्याद्यपि । यदि साधारणं कृत्वा मुक्तं स्यात्तदा धर्मकार्ये सर्वत्र कल्पते। स्वसत्कं तु साबाणजवनिकादि कियद्दिनानि देवगृहादौ विलोक्यमानत्वेन व्यापारणाय मुक्तमपि देवादिसत्कं न स्यात् अभिप्रायस्यैव प्रमाणीकरणात् । अन्यथा स्वभाजनस्थनैवेद्यढोकने भाजनानामपि देवसत्कीभवनप्रसङ्गः । गृहाट्टादि च देवज्ञानसत्कं भाटकेनापि श्राद्धेन न व्यापार्यं निःशूकताद्यापत्तेः । साधारणसम्बन्धि तु सङ्घानुमत्या यदि व्यापार्यते, तदापि लोकव्यवहाररीत्या भाटकमर्प्यते न तु न्यूनं, तच्चोक्तदिनमध्ये स्वमेवार्प्यम् । तत्र च यद् भित्त्यादि प्राक्तनं विनश्यत्समारच्यते, तत्र यावल्लगति तावद् भाटकमध्ये वालनीयमिति, तथा लोकव्यवहारात् । यत्तु स्वकार्यार्थमालयादि नव्यं कार्यते, तत्र यल्लगति तद् भाटकमध्ये न वाल्यं, साधारणद्रव्योपजीवनदोषापत्तेः । सीदन् साधर्मिकस्तु सङ्घोक्त्या भाटकार्पणं विनापि साधारणे गृहे

वसति । तथान्यस्थानाभावे तीर्थादौ चैत्ये यदि बहुस्थितिस्वापादि क्रियते तदापि व्यापारणानुसारेणाऽधिकनिष्क्रयो मोच्यः । स्तोकनिष्क्रयार्पणे स्पष्ट एव दोषः । एवं च सम्यग् निष्क्रयार्पणं विना देवज्ञानसाधारणसत्कं, कर्पटक-नालिकेर-स्वर्ण-रूप्य-पट्टिका-कलश-पुष्प-पक्वान्न-सुखभक्षिकादिकमुद्यापन-नन्दि-पुस्तिकार्चादौ न मोच्यम् । उद्यापनादौ हि प्रौढाडम्बरेण स्वनाम्ना मण्डिते बहुजनश्लाघादि स्यात् । स च स्तोकं निष्क्रयं मुञ्चतीति व्यक्त एव दोषः । अत्र लक्ष्मीवती ज्ञातम् । यथा—सा महर्द्धिर्धर्मिष्ठा महत्त्वार्थिनी स्तोकस्तोकनिष्क्रयार्पणेन विविधोद्यापनादिपुण्यकार्याणि प्रौढाडम्बराण्यजस्रं करोति कारयति च । देवादिद्रव्यं वर्द्धयन्त्यस्मि, प्रभावनां च प्रोज्झम्भयन्त्यस्मीति धिया । एवं श्राद्धधर्ममाराध्य मृता स्वर्गतापि प्रज्ञापराध-दोषाद्धीनसुरीत्वेनोत्पन्ना, क्रमाच्च्युता महेभ्यस्य निरपत्यस्य मान्यपुत्रीत्वेनोत्पन्ना । परं तस्या गर्भस्थत्वे मातुः सीमन्तमहः परचक्रभयोद्रेकेण जन्म-षष्ठी-नामस्थापना-मुण्डनादिमहाश्च नृपत्यमात्यादीनां गृहे शोकोत्पत्त्या नाजायन्त पित्रा प्रौढप्रौढतराडम्बरेण प्रारब्धा अपि । तथा मणिस्वर्णाभरनानि सर्वाङ्गीणानि पित्रा सादरं कारितान्यपि तया दिनमात्रमपि परिधातुं नाशक्यन्त स्तेनादिभयेन । एवं भोजननेपथ्यादावपि प्रायो यद्यत्सामान्यं तत्तत्तस्या आपतती सर्वत्र मान्यत्वेऽपि प्राक्कर्मदोषेण । तदुक्तं केनचित्—

**सायर तुज्झ न दोसो दोसो अम्हाण पुव्वकम्माणं । रयणायरम्मि भरिए, सालुरो हत्थि मे लग्गो ॥**

अस्या एकोऽपि महो न जातोऽस्तीत्यत्याडम्बरेण पित्रा तस्या विवाहे विधीयमाने लग्नासत्तौ माता मृता । तेन निरुत्सवं

पाणिग्रहणमात्रमजनि । महेभ्योदारश्वशुरगृहगमनेऽपि मान्यत्वेऽपि च प्राग्वन्नवनवभयशोकमान्द्यादिना मनोऽभीष्टभोग-सखोत्सवादियोगस्तस्याः प्रायो नासीत् । ततस्तयाऽत्युद्विग्नया संविग्नया च क्वचित् केवली पृष्टः प्रोचे, प्राग्भवे त्वया स्तोकनिष्क्रयार्पणप्रौढाडम्बरदर्शनादिना दुष्कर्म अर्जितं तत्फलमिदम् । ततः सा तत्पापमालोच्य प्रव्रज्य क्रमात् सिद्धा । तस्मादुद्यापनढौकनादौ निष्क्रयग्राह्यवर्त्तुलिकानालिकेरमोदकादेर्यावन्मूल्यं स्यात्तावत्तन्निष्पादनानयनाद्युपक्रमपदे तदनुसारेण कियदधिकं चार्पणीयम् । एवं निष्क्रयशुद्धिः । केनचित् सविस्तरोद्यापनादौ स्वनाम्ना मण्डितेऽधिकशक्त्याद्यभावात्तदुद्याप-नाचारसत्यापनार्थं कश्चिद्यावन्मुञ्चति, तावतापि न दोषः । तथा स्वगृहचैत्यढौकितचोक्षपूगीफलनैवेद्यादिविक्रयोत्थं पुष्पभोगादि स्वगृहचैत्ये न व्यापार्यम् । नापि चैत्ये स्वयमारोप्यं, किन्तु सम्यक् स्वरूपमुक्त्वार्चकादेः पार्श्वात् । तद्योगाभावे तु सर्वेषां स्फुटं स्वरूपमुक्त्वा स्वयमप्यारोपयेत्, अन्यथा मुधाजनप्रशंसादिदोषः । गृहचैत्यनैवेद्यादि चारामिकस्य प्रागुक्तमासदेयस्थाने नार्प्यं, आदावेव नैवेद्यार्पणेन मासदेयोक्तौ तु न दोषः । मुख्यवृत्त्या तु मासदेयं पृथगेव कार्यम् । गृहचैत्यनैवेद्यचोक्षादि तु देवगृहे मोच्यम्, अन्यथा गृहचैत्यद्रव्येणैव गृहचैत्यं पूजितं स्यान्नतु स्वद्रव्येण । तथा चानादरावज्ञादिदोषः । न चैवं युक्तं स्वदेहगृहकुटुम्बाद्यर्थं भूयसोऽपि व्ययस्य गृहस्थेन करणात् । देवगृहे देवपूजापि स्वद्रव्येणैव यथाशक्ति कार्या, न तु स्वगृहढौकितनैवेद्यादिविक्रयोत्थद्रव्येण । देवसत्कपुष्पादिना वा, प्रागुक्तदोषात् । तथा देवगृहागतं नैवेद्याक्षतादि स्ववस्तुवत् सम्यग् रक्षणीयं, सम्यग् मूल्यादियुक्त्वा च विक्रेयं, न तु यथा तथा मोच्यं, देवद्रव्यविनाशादिदोषापत्तेः । सर्वप्रयत्नेन

रक्षणादिचिन्ताकरणे जातु चौराग्न्याद्युपद्रवाद्देवद्रव्यादि विनश्यति, तदा तु चिन्ताकर्ता निर्दोष एवावश्यंभाविभावस्याऽप्रतिकार्यत्वात् । देवगुरु-यात्रा-तीर्थ-सङ्घार्चा-साधर्मिकवात्सल्य-स्नात्रप्रभावना-ज्ञानलेखन-वाचनादौ यद्यन्यसत्कधनं व्ययार्थं गृह्यते तदा चतुष्पञ्चसमक्षमेव ग्राह्यम् । व्ययसमये च गुरुसङ्घाद्यग्रे सम्यक् स्फुटं स्वरूपं वाच्यम्, अन्यथा दोषः । तीर्थादौ च पूजास्नात्रध्वजपरिधापनिकाद्यवश्यकृत्येष्वन्यधनं न क्षेप्यम् । तानि यथाशक्ति स्वयं कृत्वाऽन्यधनं महापूजाभोगाङ्गाद्यर्चनादिना सर्वसमक्षं पृथगेव व्ययितव्यम्। यदा बहुभिः संभूय यात्रावात्सल्यसङ्घार्चादि क्रियते, तदा येषां यथाभागस्तथा सम्यग् वाच्यम्, अन्यथा पुण्यव्ययचौर्याद्यापत्तेः । तथा अन्त्यावस्थायां पित्रादीनां यन्मान्यते, तत्सावधानत्वे गुरुश्राद्धादिबहुसमक्षमेवं वाच्यम् । यद्भवन्निमित्तमियद्दिनमध्ये इयद् व्ययिष्यामि, तदनुमोदना भवद्भिः कार्येति । तदपि सद्यः सर्व[प्रति]ज्ञातं व्ययितव्यम् । स्वनाम्ना व्यये स्तैन्यादिदोषः पुण्यस्थानेऽपि, स च महर्षेरपि हीनताहेतुः । यदार्षम्—

**तवतेणे वयतेणे, रूवतेणे य जे नरे । आयारभावतेणे अ, कुव्वई देवकिव्विसं ॥** दशवै० ५-२-४५

धर्मव्ययश्च मुख्यवृत्त्या साधारण एव क्रियते, यथा यथा विशेषविलोक्यमाने धर्मस्थाने तदुपयोगः स्यात् । सप्तक्षेत्र्यां हि यत्सीदत् क्षेत्रं स्यात् तदुपष्टम्भे भूयान् लाभो दृश्यते । सीदन् श्राद्धोऽपि तदुपष्टम्भेन सधनीभूतः सप्तक्षेत्रीमपि पुष्णाति । लोकेऽप्युक्तं—

**दरिद्रं भर राजेन्द्र ! मा समृद्धं कदाचन । व्याधितस्यौषधं पथ्यं नीरोगस्य किमौषधम् ॥**

अत एव प्रभावनासङ्घपरिधापनिकासम्यक्त्वमोदकलम्भनादौ निःस्वसाधर्मिकाणां विशिष्टमेव वस्तु अर्पयितुं युक्तम्, अन्यथा धर्मावज्ञादिदोषः । युक्तौ निःस्वानां सस्वेभ्योऽधिकं दीयते । तदयुक्तौ सर्वेषां समम् । श्रूयते हि यमुनापुरे ठक्कुरजिनदासेन धनिनां दर्शनमोदके एकैकः सौवर्णः क्षिप्तः, निःस्वानां तु द्वौ द्वौ । मुख्यवृत्त्या पित्रादेः पुत्रादेश्च मिथोव्ययादि-माननं प्रागेव कार्यं, को वेद क्व कथं कस्य वा मृतिः स्यादिति । यच्च मानितं तत् पृथगेव व्ययितव्यम् । स्वयं क्रियमाण-भोजनदानादिरूपव्ययमध्ये न क्षेप्यं, मुधा धर्मस्थाने दोषापत्तेः । एवं सति ये यात्रादौ भोजनशकटसम्प्रेषणादिव्ययं सर्वं मानि-तव्ययमध्ये गणयन्ति, तेषां मूढानां न ज्ञायते का गतिः ? यात्राद्यर्थं हि यावन्मानितं तावद्देवादि द्रव्यं जातं, तस्यान्यत्र[१] स्व-भोजनादौ व्यये कथं न देवादिद्रव्योपभोगदोषः ? । एवञ्चाज्ञानप्रज्ञापराधादिना यः कश्चित्कचिद्देवादिद्रव्योपभोगो जातः स्यात्, तत्प्रायश्चित्तपदे उपभोगसम्भवानुसारेण कियत् कियत् स्वद्रव्यं देवज्ञानसाधारणसम्बन्धि करोति । अन्त्यावस्थायां च विशिष्य । अन्यत्र हि धर्मपदादौ शक्त्याद्यभावे व्ययः स्वल्पोऽपि भवतु । ऋणं तु सर्वं सम्यक् संशोध्यं, विशिष्य च देवादिविषयम् यदवादिष्म—

**ऋणं ह्येकक्षणं नैव धार्यमार्येण कुत्रचित् । देवादिविषयं तत्तु कः कुर्यादतिदुस्सहम् ॥**

तस्मात् सर्वत्र वैविक्त्यं कार्यं सुधिया । आह च —

१. तस्यान्येन इति को० ह० प्र० पाठः ।

**प्रतिपच्चन्द्रं [1]सुरभि, नकुलीं नकुलः पयश्च कलहंसः । चित्रकवल्लीं पक्षी सूक्ष्मं धर्मं सुधीर्वेत्ति ॥**

इत्यलं प्रसङ्गेन ।

अथ गाथोत्तरार्द्धव्याख्या—एवं जिनार्चां विधाय, **दृढा** न तु शिथिलाः **पञ्च** ज्ञानादय **आचाराः**, '**काले विणए बहुमाणे** इत्याद्यागमोक्ता यस्य सः । तथा आचारपञ्चकव्याख्या त्वस्मदुपज्ञादाचारप्रदीपग्रन्थाद् ज्ञेया । एवंविधस्य **गुरो**राचार्यादेः **पार्श्वे प्रत्याख्यानं** स्वयं यत्प्राक्कृतं तदेव विशिष्टं वा विधि**नोच्चारयति,** गुरुमुखेन प्रतिपद्यते इत्यर्थः । त्रिविधं हि प्रत्याख्यान-विधानम् आत्मसाक्षिकं देवसाक्षिकं गुरुसाक्षिकं च । तद्विधिश्चायं, चैत्ये देववन्दनार्थमागतानां स्नात्रादिदर्शनधर्मदेशनाद्यर्थं तत्रैव स्थितानां वसतौ वा चैत्यवन्नैषेधिकीत्रयाभिगमपञ्चकादियथार्हविधिना गत्वा सद्गुरूणां धर्मदेशनायाः प्राक् पश्चाद्वा यथाविधि पञ्चविंशत्यावश्यकविशुद्धं द्वादशावर्त्तवन्दनं दत्ते । महाफलं चेदम् । यतः—

**नीआगोअं खवे कम्मं, उच्चागोअं निबंधए । सिढिलं कम्मगंठिं तु, वंदणेणं नरो करे ॥**

**तित्थयरत्तं सम्मत्तखाइअं सत्तमीइ तइआए । आउं वंदणएणं, बद्धं च दसारसीहेण ॥**

शीतलाचार्यस्य वन्दनार्थागतविकालबहिःस्थितरात्रिजातकेवलचतुर्भागिनेयानां प्राक्क्रुधा द्रव्यवन्दनं, तद्गिरा भाववन्दने तु केवलम् । गुरुवन्दनं च त्रिधा । यद् भाष्यं—

१. सुरनी इति को० ह० प्र० पाठः ।

**गुरुवंदणमह तिविहं, तं फिट्टा-थोभ-बारसावत्तं । सिरनमणाइसु पढमं, पुन्नखमासमणदुगि बीअं ॥** (१)

**तइअं तु छंदणदुगे, तत्थमिहो आइमं सयलसंघे । बीअं तु दंसणीण य पयट्ठिआणं च तइअं तु ॥** (गु. भा. ३८-३९)

येन च प्रतिक्रमणं कृतं न स्यात्तेन विधिना वन्दनं दातव्यम् । यद्भाष्ये–

**इरिआकुसुमिणुस्सग्गो चिइवंदण पुत्ति वंदणालोयं । वंदण खामण वंदण संवरचउथोभदुसज्झाओ ॥**

**इरिआचिइवंदणपुत्तिवंदणं चरिमवंदणालोअं । वंदणखामणचउथोभदिवसुसग्गो दुसज्झाओ ॥**

अनयोर्व्याख्या–

ईर्यापथिकी प्रथमं प्रतिक्रम्यते, तदनु कुसुमिणेत्यादि कायोत्सर्गः शतोच्छ्वासमानः, कुस्वप्नाद्युपलम्भे त्वष्टोत्तरशतोच्छ्वासमानः, ततश्चैत्यवन्दना, ततः पुत्तित्ति' मुखवस्त्रिकाक्षमाश्रमणपूर्वं प्रतिलेख्या, ततो वन्दनकद्वयमालोचनं च, पुनर्वन्दनकद्वयं क्षामणकं च, पुनर्वन्दनकद्वयं 'संवरत्ति' प्रत्याख्यानं च, 'चउथोभत्ति' भगवन् इत्यादीनि चत्वारि क्षमाश्रमणानि, ततः सज्झायसन्दिसावउं, सज्झायकरउं इति क्षमाश्रमणद्वयं दत्त्वा स्वाध्यायः कार्यः । इति प्रातस्त्यवन्दनकविधिः ।

प्रथममीर्यापथिकी प्रतिक्रमणं, ततश्चैत्यवन्दना, क्षमाश्रमणपूर्वं मुखवस्त्रिका प्रतिलेखनं, वन्दनकद्वयं, दिवसचरिमं इति प्रत्याख्यानं च, ततो वन्दनकद्वयमालोचनं च वन्दनकद्वयं क्षामणं च, भगवन् इत्यादि थोभवन्दनानि चत्वारि, ततो

देवसिअपायच्छित्तेत्ति कायोत्सर्गः ततः प्राग्वत् क्षमाश्रमणद्वयं दत्त्वा स्वाध्यायः । अयं सान्ध्यवन्दनकविधिः । गुरोर्व्याक्षिप्तत्वादिना द्वादशावर्त्तवन्दनकायोगे थोभवन्दनेनापि गुरुं वन्दते । एवं वन्दनपूर्वं गुरुपार्श्वे प्रत्याख्यानं कार्यम् । उक्तञ्च–

**प्रत्याख्यानं यदासीत्तत्करोति गुरुसाक्षिकम् । विशेषेणाथ गृह्णाति, धर्मोऽसौ गुरुसाक्षिकः ॥**

गुरुसाक्षित्वे हि दृढता 'गुरुसक्खिओ' इति जिनाज्ञाराधनं गुरुवाक्योद्भूतशुभाशयादधिकः क्षयोपशमः, तस्माच्चाधिका प्रतिपत्तिरित्यादिर्गुणः । तत्प्रोक्तं श्रावकप्रज्ञप्तौ–

**संतम्मिवि परिणामे, गुरुमूलपवज्जणंमि एस गुणो । दढया आणाकरणं, कम्मखओवसम वुड्ढी अ ॥**

एवं च दैवसिकचातुर्मासिकनियमाद्यपि सम्भवे गुरुसाक्षिकं स्वीकार्यम् । अत्र द्वादशावर्त्तवन्दनविधिः । पञ्चनामादिभिर्द्वाविंशत्या मूलद्वारैर्द्विनवत्यधिकचतुःशतीप्रतिद्वाररूपः । प्रत्याख्यानविधिश्च दशप्रत्याख्यानादिनवमूलद्वारैर्नवतिप्रतिद्वारात्मको भाष्यादेरभ्यूह्यः । प्रत्याख्यानस्य स्वरूपं किञ्चित्प्रागुक्तम् । फलं तु षण्मास्याचाम्लतपोऽनन्तरमहेभ्यनृपखेचरेन्द्रादि-द्वात्रिंशत्कन्या-परिणेतृधम्मिलादीनामिवेहलोके, परलोके तु चतुर्हत्यादिमहापातककृत्षण्मासीतपस्तद्भवसिद्धदृढप्रहार्यादेरिव प्रतीतम् । उक्तमपि–

**पच्चक्खाणम्मि कए, आसवदाराइं हुंति पिहिआईं । आसववुच्छेअेण य, तण्हावुच्छेअणं हवइ ॥**

**तण्हावुच्छेएणं, अउलोवसमो भवे मणुस्साणं । अउलोवसमेण पुणो, पच्चक्खाणं हवइ सुद्धं ॥**

**तत्तो चरित्तधम्मो, कम्मविवेगो अपुव्वकरणं तु । तत्तो केवलनाणं तत्तो मुक्खो सयासुक्खो ॥**

ततो वन्दते यथाविधि चतुर्विधं साध्वादिसङ्घम् । चैत्यादौ गुर्वागमनाद्यवसरे चाभ्युत्थानादिप्रतिपत्तिः कार्या । यदाहुः—

**अभ्युत्थानं तदालोकेऽभियानं च तदागमे । शिरस्यञ्जलिसंश्लेषः स्वयमासनढौकनम् ॥**

**आसनाभिग्रहो भक्त्या वन्दना पर्युपासनम् । तद्यानेऽनुगमश्चेति प्रतिपत्तिरियं गुरोः ॥**

आसनाभिग्रह इति आसने उपविष्टेषु गुर्वादिषु स्वयमासितव्यमित्यभिग्रहः । ततश्च—

**न पक्खओ न पुरओ नेव किच्चाण पट्ठओ । न य उरुं समाज्ज, चिट्ठिज्जा गुरुणंतिए ॥** दश० ८-४६

'पक्खओत्ति' पक्षतः पार्श्वयोरविनयसम्भवात् । 'किच्चाणत्ति' कृत्यानां गुरूणाम् ।

**नेव पल्हत्थिअं कुज्जा, पक्खपिण्डं च संजए । पाए पसारिए वावि न चिट्ठे गुरुणंतिए ॥**

'पल्हत्थिअंति' पर्यस्तिकां 'पक्षपिण्डं' बाहुपर्यस्तिकां, 'संजएत्ति' प्रस्तावाद्देशसंयतः ।

**पर्यस्तिका अवष्टम्भं तथा पादप्रसारणम् । विकथाः प्रबलं हास्यं वर्जयेद् गुरुसन्निधौ ॥**

**निद्दाविकहापरिवज्जिएहिं गुत्तेहिं अंजलिउडेहिं । भत्तिबहुमाणपुव्वं उवउत्तेहिं सुणेअव्वं ॥**

इत्यादिश्रुतोक्तविधिना गुरोराशातनावर्जनार्थमर्द्धचतुर्थहस्तप्रमाणादवग्रहक्षेत्राद् बहिर्निर्जन्तुभूभागेऽवस्थाय धर्मदेशना श्रोतव्या ।

यतः—

**धन्यस्योपरि निपतत्यहितसमाचरणधर्मनिर्वापी । गुरुवदनमलयनिःसृतवचनसरसचन्दनस्पर्शः ॥** प्रशमरतिः-

धर्मदेशनाश्रवणे चाज्ञानमिथ्याज्ञानव्यपगम-सम्यक्तत्त्वावगम-निःसंशयत्व-धर्मदृढत्व-व्यसनाद्युन्मार्गनिवृत्ति-सन्मार्गप्रवृत्ति-कषायादि-दोषोपशम-विनयादिगुणार्जनोपक्रम-कुससर्गपरिहार-सुसंसर्गाङ्गीकार-भवनिर्विण्णता-संविग्नता-सम्यक्श्राद्धसाधु-धर्माभ्युपगमन-सर्वाङ्गीणतदैकाग्र्याराधनादयोऽनेके गुणा नास्तिकप्रदेशिनरेश-श्रीमदाम-कुमारपाल-थावच्चापुत्रादीनामिव मन्तव्याः । तदाह—

**मोहं धियो हरति कापथमुच्छिनत्ति, संवेगमुन्नमयति प्रशमं तनोति ।**
**सूते विरागमधिकं मुदमादधाति, जैनं वचः श्रवणतः किमु [1]वा न दत्ते ॥**

**पिण्डःपाती बन्धवो बन्धभूताः सूतेऽनर्थानर्थसंपद्विचित्रान् ।**
**संवेगाद्या जैनवाक्यप्रसूताः कं कं कुर्युर्नोपकारं नराणाम् ॥**

प्रदेशिनरेशनिदर्शनलेशश्चायम् । श्वेताम्बीपुर्यां प्रदेशी राजा, चित्रो मन्त्री, श्रावस्त्यां चतुर्ज्ञानिकेशिगणेन्द्राद् गृहीतसुश्राद्ध-

१. यन्न इति को० ह० प्र० पाठः ।

धर्मस्तद्गिरा केशिगुरोः श्वेताम्ब्यामागतस्य पार्श्वेऽश्ववाहिकाव्याजतश्चित्रेण प्रदेशी नीतः सगर्वमूचे—महर्षे ! मा मृषा कष्टं कार्षीः, धर्माद्यभावात्, मम माता श्राविकाऽभूत्, पिता तु नास्तिकः, अन्ते मया बहूक्तावपि ताभ्यां मृताभ्यां स्वर्गसुखनरकदुःखलाभादि न किमप्यावेदितं मम । एकश्च चौरस्तिलखण्डशः, कृतो न त्वात्मा क्वापि दृष्टो, जीवनमृततोलनेऽपि नान्तरं ज्ञातं, निश्छिद्रकुम्भ्यन्तश्चैकः क्षिप्तो मृतस्तद्देहे चासङ्ख्याः कृमयो दृष्टाः । निर्गमप्रवेशद्वारं तु जन्तूनां क्वापि न दृष्टम् । एवं बहु परीक्ष्य नास्तिकीभूतोऽस्मि । गुरुणोक्तं-सुखदुःखोत्कर्षाक्रान्त्या तव पित्रोरत्र नागमनम् । अरणिकाष्ठान्तर्भूताग्नि-वायुभृतदृति-तोलनकुम्भ्यन्तःक्षिप्तशङ्खवादकध्वन्यादिदृष्टान्तैर्जीवोऽप्यस्तीत्यादियुक्तिभिर्बोधितोऽभ्यधात्-सत्यमिदं परं कुलक्रमागतां नास्तिकतां कथं मुञ्चे ? गुरुणोक्तं—दौस्थ्यव्याधिदुःखादिवत् क्रमागतापि सा त्याज्यैव । ततः सुश्राद्धीभूतः । कदाचित्-पौषधोपवासपारणेऽन्यपुरुषासक्तसूर्यकान्तया दत्तविषो ज्ञाततद्व्यतिकरश्चित्रमन्त्रिगिरा सुसमाहितः कृताराधनाधनार्जनः[१] सौधर्म-सूर्याभविमाने सुरोऽभूत्। सूर्यकान्ता तु विपदा ज्ञातास्मीति भीता नष्टाऽरण्ये । फणिना दष्टा नरकं प्राप । आमलकल्पापुर्यां समवसृतश्रीवीरस्याग्रे सूर्याभदेवः सव्याऽपसव्यबाहुभ्यामशष्टोत्तरशतखेलखेलिकाप्रकटनादिना दिव्यनाट्यं कृत्वा गतो, गौतमपृष्टश्च स्वाम्याख्यत् तत्प्राग्भवमहाविदेहसिद्ध्यादि ॥ इति प्रदेशिदृष्टान्तः ।

श्रीआमनृपः श्रीबप्पभट्ट्याचार्यस्य, कुमारपालस्तु श्रीहेमसूरेः प्रतिबुद्धः प्रसिद्ध एव । थावच्चापुत्रस्तु द्वारवत्यां प्रौढतरर्द्धि-

१. राधनानशनः इति को० ह० प्र० पाठः ।

थावच्चासार्थवाहीपुत्रो द्वात्रिंशत्कन्यापतिः श्रीनेमिदेशनया प्रबुद्धः । मात्रा वारितोऽपि न स्थितः । माता दीक्षोत्सवाय कृष्णं राजचिह्नानि याचते । कृष्णोऽपि गृहमागत्य थावच्चापुत्रं प्राह—मा प्राव्राजीर्भोगान् भुङ्क्ष्व । तेनोक्तं—भीताय न स्वदन्ते भोगाः । हरिः प्राह—कुतो भयं मयि सति ? स प्राह—मृत्योः । ततः कृष्णकृतोत्सवः सहस्रेभ्यादियुतः प्राव्राजीत् । चतुर्दशपूर्वी जातः । सेलकपुरे सेलकनृपं मन्त्रिपञ्चशतीयुतं श्रावकीकृत्य सौगन्धिकापुर्यां प्राप्तः । त्रिदण्ड-कुण्डिका-छत्र-षण्णालक-अङ्कुश-पवित्रक-केसरीहस्तो, धातुरक्तवस्त्रवेषः, साङ्ख्यशास्त्रलब्धार्थः, प्राणातिपातविरमणादि पञ्चयम-शौचसन्तोषतपः स्वाध्याये-श्वरप्रणिधानरूपपञ्चनियमात्मकं शौचमूलं दशप्रकारं परिव्राजकधर्मं च प्ररूपयन्, सहस्रशिष्यपरिवृत्तो व्यासपुत्रः शुको नाम परिव्राजकस्तत्समयेऽभूत् । तेन प्राक् शौचमूलं स्वधर्मं ग्राहितः सुदर्शनाख्यो नगरश्रेष्ठी । थावच्चापुत्राचार्येण विनयमूलं स्वधर्मं स्वीकारितः । तत्समक्षं शुकप्रश्ना यथा—'**सरिसवया भन्ते । किं भक्खा अभक्खा ? सुआ ! भक्खा वि अभक्खा वि । ते दुविहा, मित्तसरिसवया धन्नसरिसवया । पढमा तिविहा, सहजाया सहवड्ढिया सहपंसुकीलिआ । एए समणाणं अभक्खा । धन्नसरिसवया दुविहा, सत्थपरिणिया इअरे अ । पढमा दुविहा, फासुगा अन्ने अफासुगा वि जाइआ अजाइआ य । जाइआ वि एसणिज्जा अन्ने अनेसणिज्जा वि लद्धा अलद्धा य । बिइआ सव्वत्थ अभक्खा, पढमा भक्खा । एवं कुलत्था वि मासा वि, नवरं मासा तिविहा, काल-अत्थ-धन्नभेआ ।** ज्ञाता० ५-५५ एवं प्रबोधे सहस्रयुतशुकदीक्षा। थावच्चापुत्रः शत्रुञ्जये सिद्धः सहस्रयुतः । सेलकपुरेशं सेलकं पन्थकादिमन्त्रिपञ्चशतीयुतं दीक्षित्वा शुकोऽपि तथैव सिद्धः । सेलक एकादशाङ्गी पन्थकादिभिः पञ्चशत्या शिष्यैः सह विहरन् रूक्षाद्याहारैः कण्डूपित्तादिरोगाक्रान्तः सेलकपुरे प्राप्तः। पुत्रमण्डूकनृपेण स्वयानशालायां स्थापितः । प्रासुकौषधपथ्यैः पटूकृतोऽपि

स्निग्धाहारगृद्ध्या बहिर्न विहरति । ततः शिष्याः पन्थकं तद्वैयावृत्ये नियोज्य विजहुः । अन्यदा कार्त्तिकचतुर्मासकदिने सेलको यथेष्टं भुक्त्वा सुप्तः प्रतिक्रमणवेलायां पन्थकेन श्रामणार्थं पादयोः शिरसा घट्टितः प्रबुद्धो रुष्टः। पन्थकः प्राह– चतुर्मासकापराधक्षामणाय मया पादौ स्पृष्टौ । सेलको वैराग्यप्राप्तो व्यचिन्तयत्, धिग् मां रसगृद्धं, ततो विजहार। अन्येऽपि शिष्या मिलिताः । शत्रुञ्जये तैः सह सिद्धः। इति थावच्चापुत्रकथा । तस्मात् प्रत्यहं सद्गुरुभ्यः शृणोति धर्मोपदेशम्। श्रुत्वा चानुतिष्ठति तदादिष्टमर्थं यथाशक्ति । यतो नौषधभक्ष्यादिज्ञानमात्रेणाऽऽरोग्यतृप्त्यादि किन्तु क्रियोपयोग एव । आह च

**क्रियैव फलदा पुंसां न ज्ञानं फलदं मतम् । यतः स्त्री-भक्ष्य-भोगज्ञो न ज्ञानात् सुखितो भवेत् ॥**

**जाणंतो वि अ तरिउं, काइअजोगं न जुंजइ नइए । सो बुज्झइ सोएणं एवं नाणी चरणहीणो ॥**

दशाचूर्णावपि–**जो अकिरिआवाइ सो भविओ अभविओ वा निअमा किण्हपक्खिओ । किरिआवादी निअमा भविओ, निअमा सुक्कपक्खिओ, अंतो पुग्गलपरिअट्टस्स नियमा सिज्झहिइ, सम्मदिट्ठी वा हुज्जा ।**

न च ज्ञानरहिता क्रियापि परिणतिरहिता । यतः–

**अन्नाणा कम्मखओ, जायइ मण्डुक्कचुण्णतुल्लत्ति । सम्मकिरिआइ सो पुण, नेओ तच्छारसारिच्छो ॥**

**जं अन्नाणी कम्मं, खवेइ बहुआहिं वासकोडीहिं । तं नाणी तिहिं गुत्तो, खवेइ ऊसासमित्तेण ॥**

अत एव तामलिपूरणादीनां बहुतपःक्लेशेऽपीशानेन्द्रत्वचमरेन्द्रत्वाद्यल्पफलम् । ज्ञानवतोऽपि श्रद्धानं विनाऽङ्गारमर्दकादेरिव

न सम्यक्क्रियायां प्रवृत्तिः । पठ्यते च—

**अज्ञस्य शक्तिरसमर्थविधेर्निबोधस्तौ चारुचेरियममू तुदती न किञ्चित् ।**

**अन्धाङ्घ्रिहीनहतवाञ्छितमानसानां दृष्टा न जातु हितवृत्तिरनन्तरायाः ॥** (वसन्ततिलका)

ततो ज्ञानदर्शनचारित्रयोगे मोक्ष इति तत्त्रयाराधनाय यतेतेति तात्पर्यम् । तथा पृच्छति यतिकृत्यनिर्वाहम् । यथा निर्वहति युष्माकं संयमयात्रा ? सुखरात्रिर्भवतां ? निराबाधाः शरीरेण यूयं ? न बाधते वः कश्चिद् व्याधिः ? नः योग्यं किमपि वैद्यादेर्वः प्रयोजनं किञ्चिदौषधादिना ? नार्थित्वं किञ्चित्पथ्यादिना ? इत्यादि । एवं प्रश्नश्च महानिर्जराहेतुः । यतः—

**अभिगमणनवंदणनमंसणेण पडिपुच्छणेण साहूणं । चिरसंचिअंपि कम्मं, खणेण विरलत्तणमुवेइ ॥**

प्राग्वन्दनाऽवसरे सामान्यतः—सुहराईसुहतपसरीरनिराबाधेत्यादिप्रश्नकरणेऽपि विशेषेणात्र प्रश्नः सम्यक्स्वरूपपरिज्ञार्थ-स्तदुपायकरणार्थश्च । अत एव[१] पदोर्लगित्वा, 'इच्छाकारि भगवन् पसाउ करी फासुएणं एसणिज्जेणं असणपाणखाइमसाइमेणं वत्थपडिग्गहकम्बलपायपुच्छणेणं पाडिहारिअपीढफलगसिज्जसंथारेणं ओसहभेसज्जेणं भयवं अणुग्गहो कायव्वो ।' इति व्यक्त्या निमन्त्रणं च कार्यम् । अत्र शय्या सा यत्र प्रसारितपादैः सुप्यते, संस्तारकस्तु किञ्चिल्लघुः । औषधमेकद्रव्याश्रयम् । भैषज्यं तु

१. एवात्र इति को० ह० प्र० पाठः ।

द्रव्यसमुदायरूपम् । इदं च निमन्त्रणं सम्प्रति गुरूणां बृहद्वन्दनकप्रदानानन्तरं श्राद्धाः कुर्वन्ति । येन च प्रतिक्रमणं गुरुभिः सह कृतं भवति, स सूर्योदयादनु यदा स्वगृहादौ याति तदा तत् करोति । यस्य च प्रतिक्रमणवन्दनकयोगो न स्यात्तेनापि वन्दनाद्यवसरे एवं निमन्त्रणं क्रियते । मुख्यवृत्त्या तु द्वितीयवारदेवपूजानैवेद्यढौकनानन्तरमुपाश्रये गत्वा साधून्निमन्त्रयेत् । श्राद्धदिनकृत्यसूत्रादौ तथा दर्शनात् । ततो यथावसरयोगं कारयति चिकित्सां, ददात्यौषधादि, विहारयति यथार्हं पथ्यादि, सारयति सर्वप्रयोजनानि । यतः—

**दाणं आहाराई, ओसहवत्थाइं जस्स जं जोगं । णाणाईण गुणाणं, उवठंभणहेउ साहूणं ॥**

गृहागतानां च साधूनां यद् यद्योग्यं तत्तत्सर्वं विहारयितुं प्रत्यहं नामग्राहं कथयति, अन्यथा प्राक्तनिमन्त्रणस्य वैफल्यापत्तेः, नामग्राहं कथने तु यदि साधवो न विहरन्ति, तदापि कथयितुः पुण्यं स्यादेव । यदवोचाम—

**मनसाऽपि भवेत्पुण्यं वचसा च विशेषतः । कर्त्तव्येनापि तद्योगे स्वर्द्रुमोऽभूत् फलेग्रहिः ॥**

अकथने तु विलोक्यमानमपि साधवो न विहरन्ति इति महती हानिः । एवं निमन्त्रणेऽपि जातु साधवो नायान्ति तदापि निमन्त्रयितुः पुण्यं स्याद्, भावविशेषे त्वधिकतरमिति[१] । यथा—वैशाल्यां छाद्मस्थ्ये चतुर्मासीतपसा प्रतिमास्थस्य श्रीवीरस्य प्रत्यहं

१. मपि इति को० ह० प्र० पाठः ।

पारणार्थनिमन्त्री जीर्णश्रेष्ठी चतुर्मासीप्रान्तेऽद्य पारणं भाव्येवेति दृढं निमन्त्र्य गृहे गतो धन्योऽहं स्वामी अद्य मद्गृहे पारणं कर्त्तेत्यादि भावनयैवाच्युतस्वर्गायुर्बबन्ध । पारणं तु स्वामी मिथ्यादृगभिनवश्रेष्ठिना भिक्षाचररीत्या दासीपार्श्वाद् दापित-कुल्माषैश्चक्रे । तदा देवदुन्दुभिध्वनिं जीर्णश्रेष्ठी यदि नाश्रोष्यत्तदा केवलमप्यार्जिष्यदिति ज्ञानिनोक्तम् । इति निमन्त्रणे ज्ञातम् । आहारादिदाने श्रीशालिभद्रादिः, औषधदाने च श्रीवीरौषधदात्री बद्धजिनकर्मा रेवती ज्ञातम् । ग्लानस्य प्रतिचरणे च महत् फलम्। यदागमः—

**'गोअमा ! जे गिलाणं पडिअरइ से मं दंसणेणं पडिवज्जइ । जे मं दंसणेणं पडिवज्जइ से गिलाणं पडिअरइ । आणाकरणसारं खु अरिहंताणं दंसणं'** इत्यादि ।

अत्र कृमिकुष्ठोपद्रुतयतिप्रतिक्रियाकृत् श्रीऋषभजीवजीवानन्दवैद्यो ज्ञातम् ।

तथा ददाति सुस्थाने योग्यमुपाश्रयादि । यतः—

**वसहीसयणासणभत्तपाणभेसज्जवत्थपत्ताई । जइवि न पज्जत्तधणो, थोवा वि हु थोवयं देइ ॥**

**जो देइ उवस्सयं जइवराण तवनियमजोगजुत्ताणं । तेणं दिन्ना वत्थन्नपाणसयणासणविगप्पा ॥**

**जयन्तीवङ्कचूलाद्याः कोशा चाश्रयदानतः । अवन्तिसुकुमालश्च तीर्णाः संसारसागरम् ॥**

तथा निवारयति सर्वशक्त्या जिनप्रवचनप्रत्यनीकान् साधुनिन्दादिपरान् । यतः—

**तम्हा सइ सामत्थे, आणाभट्ठम्मि नो खलु उवेहा । अणुकूलेहिअरेहि अ, अणुसट्ठी होइ दायव्वा ॥**

यथाऽभयकुमारेण द्रमकमुनिनिन्दाकृज्जनो बुद्ध्या निवारितः । एवं साधुवत्साध्वीनामपि सुखकृत्यनिर्वाहप्रश्नादि सर्वं कार्यम् । एतच्चाधिकं यत् साध्वीनां दुःशीलेभ्यो नास्तिकेभ्यो गोपनम् । स्वगृहप्रत्यासत्तौ समन्ततो गुप्ताया गुप्तद्वारवसतेर्दानम् । स्वस्त्रीभिश्च तासां परिचर्याविधापनम् । स्वपुत्रिकाणां च तत्सन्निधौ धारणम् । व्रतोद्यतानां स्वपुत्र्यादीनां च प्रत्यर्पणम् । तथा विस्मृतकरणीयानां तत्स्मारणम्, अन्यायप्रवृत्तिसम्भवे तन्निवारणम् । सकृदन्यायप्रवृत्तौ शिक्षणम् । पुनः पुनः प्रवृत्तौ निष्ठुरभाषणादिना ताडनम्, उचितेन वस्तुनोपचरणं चेति ।

तथा गुरुपार्श्वे करोति किञ्चिदपूर्वपठनम् । यतः—

**अञ्जनस्य क्षयं दृष्ट्वा वल्मीकस्य च वर्द्धनम् । अवन्ध्यं दिवसं कुर्याद्दानाध्ययनकर्मसु ॥**

**संतोषस्त्रिषु कर्त्तव्यः स्वदारे भोजने धने । त्रिषु चैव न कर्तव्यो दाने चाध्ययने तपे ॥**

**गृहीत इव केशेषु मृत्युना धर्ममाचरेत् । अजरामरवत् प्राज्ञो विद्यामर्थञ्च चिन्तयेत् ॥**

**जह जह सुअमवगाहइ, अइसयरसपसरसंजुअमपुव्वं । तह तह पल्हाइ मुणी, नवनवसंवेगसद्धाए ॥**

**जो इह पढइ अपुव्वं, स लहइ तित्थंकरत्तमन्नभवे । जो पुण पाढेइ परं, सम्मसुअं तस्स किं भणिमो ॥**

स्वल्पतरप्रज्ञतायामपि पाठोद्यमे माषतुषादीनामिव तद्भवेऽपि केवलज्ञानलाभादिफलं विभावनीयमिति षष्ठगाथार्थः ॥

ततो यदि राजादिस्तदा धवलगृहम् यदा त्वमात्यादिस्तदा करणम्, अथ वणिगादिस्तदानीमापणादिकम्, एवं स्वस्वोचितस्थानं गत्वा धर्माविरोधेनार्थचिन्तां कुर्यात् । धर्माविरोधश्च राज्ञां दरिद्रेश्वरयोर्मान्यामान्ययोरुत्तमाधमयोश्च माध्यस्थ्येन न्यायदर्शनाद् बोद्धव्यः । अत्र ज्ञातं यथा–

कल्याणकटकपुरे यशोवर्मा नृपो न्यायैकनिष्ठः, तेन निजधवलगृहद्वारि न्यायघण्टा बन्धिता । एकदा राज्याधिष्ठात्री देवी नृपतिन्यायव्रतपरीक्षार्थं धेनुरूपं तत्कालजातवत्सरूपं च कृत्वा राजमार्गे स्थिता । अत्रान्तरे नृपपुत्रो वेगवत्तरवाहिनीमारूढस्तत्र प्राप्तो, वेगवशाच्च वाहिनी वत्सचरणयोरुपरि गता । वत्सो मृतः धेनुः कोकूयतेऽश्रूणि च मोमुच्यते । केनाप्युक्तं, 'राजद्वारे गत्वा न्यायं याचस्व' । सा गता । तया शृङ्गाग्रेण घण्टा चालिता । नृपस्तदानीं भोक्तुमुपविष्टः शब्दं श्रुत्वा बभाषे, 'रे ! कोऽयं घण्टां चालयति ?' सेवकैर्विलोक्योक्तं–'देव ! कोऽपि न, भुज्यतां ।' नृपः प्राह–निर्णयं विना कथं भुञ्जे ? । नृपः स्थालं त्यक्त्वा प्रतोल्यामागत्याऽन्यं कमप्यदृष्ट्वा धेनुं प्राह–किं केनापि पराभूताऽसि ? दर्शय मम तम् । साऽग्रे भूता । नृपः पृष्ठे लग्नः, तया वत्सो दर्शितः । नृपेणोक्तं–येनेयं वाहिनी वाहिता स पुरो भवतु । कोऽपि किमपि न वक्ति । राज्ञोक्तं–तदा भोक्ष्ये यदा स स्फुटीभविष्यति । राज्ञो लङ्घने जाते कुमारेण प्रातरुक्तं–'देवाऽहमपराधी मम दण्डं कुरु यथार्हम् । राज्ञा स्मृतिज्ञाः पृष्टाः, कोऽस्य

दण्डः ? तैरुक्तं—देव ! राज्यार्ह एक एव पुत्रः, तस्य को दण्डः ?' नृपः प्राहः—''कस्य राज्यम्? कस्य वा सुतो ? मम न्याय एव गरीयान् ।'' यतः —

**दुष्टस्य दण्डः स्वजनस्य पूजा न्यायेन कोशस्य च संप्रवृद्धिः । अपक्षपातो रिपुराष्ट्ररक्षा पञ्चैव यज्ञाः कथिता नृपाणाम् ॥**

सोमनीतावप्युक्तं—**अपराधानुरूपो हि दण्डः पुत्रेऽपि प्रणेतव्यः ।** इति । ततो यदस्य योग्यं स्यात्तत्कथयतेत्युक्तेऽपि तेष्ववदत्सु, 'योऽन्यस्य यद्यथा कुरुते तत्तस्य तथा विधीयते । कृते प्रतिकृतं कुर्याद् इत्यादिवचनात् ।' इति स्वयं नृपेण वाहिनीमानाय्य पुत्रस्योक्तम्—'इह स्वपिहि ।' सोऽपि विनीतः सुप्तः । राज्ञोक्तम्, अस्योपरि वेगेन वाहिनीं वाहयत । कोऽपि न वाहयति । ततो नृपः सर्वैर्निवार्यमाणोऽपि यावत् स्वयमुपविश्य तां पुत्रचरणयोरुपरि वाहयति, तावद्देवी प्रकटीभूय पुष्पवृष्टिं चक्रे । न गौर्न वत्सः । देव्योक्तं, 'राजन् ! मया तव परीक्षा कृता, प्राणप्रियैकपुत्रादपि तव न्यायः प्रियतमः इति राज्यं चिरं निर्विघ्नं कुरु ।'

**इति न्याये दृष्टान्तः ।**

नियोगिनां तु धर्माविरोधो राजार्थप्रजार्थयोः साधनेनाऽभयकुमारचाणक्यादिवत् । यतः—

**नरपतिहितकर्त्ता द्वेष्यतामेति लोके जनपदहितकर्ता मुच्यते पार्थिवेन ।**
**इति महति विरोधे वर्त्तमानेऽसमाने नृपतिजनपदानां दुर्लभः कार्यकर्त्ता ॥**

वणिगादिनां च धर्माविरोधो व्यवहारशुद्ध्यादिना तथैव चाह–

**ववहारसुद्धि-देसाइविरुद्धचाय-उचिअचरणेहिं ।**
**तो कुणइ अत्थचिंतं, निव्वाहिंतो निअं धम्मं ॥७॥**

**ततः** प्रागुक्तकृत्यानन्तरं **व्यवहारस्य** धनार्जनाद्युपायस्य **शुद्धि**र्निर्दोषता मनोवाक्कायाऽवक्रतेत्यर्थः । तथा **देशादिविरुद्ध-कृत्यानां त्यागः** परिहारः । **उचितकृत्याचरणं** च । एभिस्त्रिभिरपि वक्ष्यमाणलक्षणं **निजं धर्मं** स्वीकृतव्रताभिग्रहादिरूपं **निर्वाहयन्,** नतु क्वचन किञ्चनापि लोभाधिक्यविस्मृत्यादिना बाधयन्, **अर्थचिन्तां** धनार्जनाद्यौपयिकं **करोति** । यदाह–

**नहि तद्विद्यते किञ्चिद्यदर्थेन न सिद्ध्यति । यत्नेन मतिमांस्तस्मादर्थमेकं प्रसाधयेत् ॥**

अत्र चार्थचिन्तामित्यनुवाद्यं, तस्याः स्वयंसिद्धत्वात् । धर्मं निर्वाहयन्निति तु विधेयम्, अप्राप्तत्वात् । तदुक्तं–

**इह लोइअम्मि कज्जे, सव्वारंभेण जह जणो जयइ । तह जइ लक्खंसेण वि, धम्मे ता किं न पज्जत्तं ॥**

आजीविका च सप्तभिरुपायैः स्याद् । वाणिज्येन, विद्यया, कृष्या, पाशुपाल्येन, शिल्पेन, सेवया, भिक्षया च । तत्र वाणिज्येन वणिजां, विद्यया वैद्यादीनां, कृष्या कौटुम्बिकादीनां, पाशुपाल्येन गोपालाऽजापालादीनां, शिल्पेन चित्रकारादीनां,

सेवया सेवकानां, भिक्षया भिक्षाचराणाम् ।

तत्र वाणिज्यं धान्य-घृत-तैल-कर्पास-सूत्र-वस्त्र-धातु-मणि-मौक्तिक-नाणकादिक्रयाणक भेदैरनेकविधम् । लोके हि षष्ठ्यधिका त्रिशती क्रयाणकानि इति प्रसिद्धिः । भेदप्रभेदादिव्यक्तिविवक्षायां त्वलब्धसङ्ख्यान्यपि तानि। कलान्तर-व्यवहारोऽपि वाणिज्येऽन्तर्भवति १।

विद्याप्यौषध-रस-रसायन-चूर्णाञ्जन-वास्तु-शकुन-निमित्त-सामुद्र-चूडामणि-धर्मार्थ-काम-ज्योतिस्तर्कादिभेदैर्नानाविधा । इह वैद्यविद्या गान्धिकत्वं च प्रायो दुर्ध्यानसम्भवादिना विशेषगुणाय न दृश्यते । यद्यपि सधनमान्द्यादौ वैद्यगान्धिकयोर्भूरिलाभः स्थाने बहुमानादि च स्यात् । यतः—**आतुरे हि पिता वैद्यः** । तथा—

**रोगिणां सुहृदो वैद्याः प्रभूणां चाटुकारिणः । मुनयो दुःखदग्धानां गणकाः क्षीणसंपदाम् ॥**

**पण्यानां गान्धिकं पण्यं किमन्यैः काञ्चनादिकैः । यत्रैकेन गृहीतं यत्तत्सहस्रेण दीयते ॥**

तथापि यस्य यथा लाभः स प्रायस्तथैवेहते । तदुक्तं—

**विग्रहमिच्छन्ति भटा वैद्याश्च व्याधिपीडितं लोकम् । मृतकबहुलं च विप्राः क्षेमसुभिक्षं च निर्ग्रन्थाः ॥**

**यो व्याधिभिर्ध्यायति बाध्यमानं जनौघमादातुमना धनानि ।**
**व्याधीन् विरुद्धौषधतोऽस्य वृद्धिं नयेत् कृपा तत्र कुतोऽस्तु वैद्ये ॥**

केचिच्च दर्शनि-दरिद्राऽनाथम्रियमाणादिभ्योऽपि प्रसह्य द्रव्यं जिघृक्षन्ति । अभक्ष्यौषधाद्यपि कारयन्ति । विविधौषधादिक-पट्टवृत्त्या जनान् विप्रतारयन्ति । द्वारवतीवैद्याऽभव्यधन्वतरिवत् । ये तु सत्प्रकृतयः स्वल्पलोभाः परोपकारिणस्तेषां वैद्यविद्या श्रीऋषभस्वामिजीवजीवानन्दवैद्यवद् भवद्वयेऽपि गुणाय २।

कृषिर्जलदजलकूपादिजलोभयजलनिष्पाद्यभेदात् त्रिविधा ३।

पशुपाल्यं गो-महिष्यजा-करभ-वृषभ-हय-गजाजीविकादिभेदादनेकप्रकारम् ४।

कृषिपाशुपाल्ये च न विवेकिजनोचिते । उच्यते हि—

**रायाण दंतिदंते बइल्लखंधेसु पामरजणाणं । सुहडाण मण्डलग्गे, वेसाण पओहरे लच्छी ॥**

अनिर्वहंस्तु यदि कुर्यात्तदा वापकालाद्याकलनदयालुत्वादि धार्यम् । यदाह—

**वापकालं विजानाति भूमिभागं च कर्षकः । कृषिं साध्यां पथि क्षेत्रं यश्चोज्झति स वर्द्धते ॥**

**पाशुपाल्यं श्रियो वृद्ध्यै कुर्वन्नोज्झेद्दयालुताम् । तत्कृत्येषु स्वयं जाग्रच्छविच्छेदादि वर्जयेत् ॥**

शिल्पं शतधा । यतः—

**पंचेव य सिप्पाइं, घडलोहेचित्तऽणंतकासवए । इक्किक्कस्स य इत्तो, वीसं वीसं भवे भेआ ॥**

व्यक्तिविवक्षया त्वधिकभेदमपि शिल्पं स्यात् । इह चाचार्योपदेशजं शिल्पं ऋषभस्वाम्युपदेशेन प्रवृत्तत्वात् । आचार्योपदेशं विना परम्परया प्रवृत्तं तु कृषिवाणिज्यादि कर्मोच्यते । यदार्षे—

**कम्मं जमणायरिओवएसियं सिप्पमन्नहाऽभिहिअं । किसिवाणिज्जाइअं, घडलोहाराइभेअं च ॥**

अत्र कृषिवाणिज्यपाशुपाल्यानि साक्षादुक्तानि । शेषकार्याणि प्रायः सर्वाणि शिल्पादौ । स्त्रीपुरुषकलास्तु काश्चिद् विद्यायां, काश्चिच्च शिल्पेष्वन्तर्भवन्ति । कर्म च सामान्यतश्चतुर्भेदम् । यदाह—

**उत्तमा बुद्धिकर्माणः करकर्मा च मध्यमः । अधमाः पादकर्माणः शिरःकर्माऽधमाधमः ॥**

बुद्धिकर्मत्वे ज्ञातम् । यथा—चम्पायां श्रेष्ठिधनसुतो मदनो विशिष्टे बुद्धिहट्टे 'यत्र द्वौ कलहायेते तत्र न स्थेयम्' इति बुद्धिं द्रम्मपञ्चशत्या गृहीत्वा मित्रोपहासे पित्रा भर्त्सितः । स्वधनं लातुं बुद्धेः पश्चादर्पणे 'द्वौ यत्र कलहायेते तत्र स्थेयमेव' इति तेन स्वीकारिते नृपभटयोः पथि कलहे पार्श्वे स्थितः, ताभ्यां साक्षीकृतो नृपेण तयोर्न्यायान्वेषणे साक्ष्याकारणे त्वत्सुतो मद्धितं साक्ष्यं यदि न वक्ष्यति, तदा तवाऽनर्थो भावीति द्वाभ्यां भापितो धनोऽत्याकुलः 'स्वसुतं ग्रहिलं कुरू' इति बुद्धिं बुद्धिदात्कोट्या लात्वा सुखी जज्ञे इति बुद्धौ कथा । करकर्मा वाणिज्यादिकृत्, पादकर्मा दूतादिः, शिरःकर्मा भारवाहकादिः ५।

सेवा नृपति-नियोगि-महेभ्येतरसेवाभेदाच्चतुर्भेदा । नृपादिसेवा च नित्यपारवश्यादिना येन तेन दुःसाधा । यतः-

**मौनान्मूकः प्रवचनपटुर्वातिको जल्पको वा धृष्टः पार्श्वे भवति च तथा दूरतश्चाप्रगल्भः ।**
**क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥**

**प्रणमत्युन्नतिहेतोर्जीवितहेतोर्विमुञ्चति प्राणान् । दुःखीयति सुखहेतोः को मूर्खः सेवकादन्यः ॥**

**सेवा श्ववृत्तिर्यैरुक्ता न तैः सम्यगुदाहृतम् । श्वानः कुर्वन्ति पुच्छेन चाटु मूर्ध्ना तु सेवकाः ॥**

एवं सत्यप्यन्यनिर्वाहोपायाभावे सेवयाऽपि निर्वाहं करोति । यतः—

**धणवं वाणिज्जेणं, थोवधणो करिसणेण निव्वहइ । सेवावित्तीइ पुणो, तुट्टे सयलम्मि ववसाए ॥**

विज्ञत्वकृतज्ञत्वादिगुणवांश्च सेवार्हः । उक्तं हि—

**अकर्णदुर्बलः शूरः कृतज्ञः सात्त्विको गुणी । वदान्यो गुणरागी च प्रभुः पुण्यैरवाप्यते ॥**

**क्रूरं व्यसनिनं लुब्धमप्रगल्भं सदामयम् । मूर्खमन्यायकर्त्तारं नाधिपत्ये नियोजयेत् ॥**

**अविवेकिनि भूपाले करोत्याशां समृद्धये । योजनानां शतं गन्तु करोत्याशां स मृद्धये[१] ॥**



१. मृण्मये अश्वे ।

कामन्दकीये नीतिसारेऽपि—

**वृद्धोपसेवी नृपतिः सतां भवति सम्मतः । प्रेर्यमाणोऽप्यसद्वृत्तैर्नाकार्येषु प्रवर्त्तते ॥**

स्वामिना च सेवकानुरूपं सन्मानादि कार्यम् । यतः—

**निर्विशेषं यदा राजा समं भृत्येषु वर्त्तते । तत्रोद्यमसमर्थानामुत्साहः परिहीयते ॥**

सेवकेनापि भक्तिचातुर्यादिगुणयुजा भाव्यम् । यतः—

**अप्राज्ञेन च कातरेण च गुणः स्यात्सानुरागेण कः ?, प्रज्ञाविक्रमशालिनोऽपि हि भवेत् किं भक्तिहीनात् फलम् ? ।
प्रज्ञाविक्रमभक्तयः समुदिता येषां गुणा भूतये, ते भृत्या नृपतेः कलत्रमितरे संपत्सु चापत्सु च ॥**

**राजा तुष्टोऽपि भृत्यानां मानमात्रं प्रयच्छति । ते तु सन्मानितास्तस्य प्राणैरप्युपकुर्वते ॥**

सेवां च सततमप्रमत्तः कुर्यात् । तदाह—

**सर्पान् व्याघ्रान् गजान् सिंहान् दृष्ट्वोपायैर्वशीकृतान् । राजेति कियती मात्रा धीमतामप्रमादिनाम् ॥**

तद्विधिश्च नीतिशास्त्रादावेवम्—

**आसीत स्वामिनः पार्श्वे तन्मुखेऽक्षीकृताञ्जलिः । स्वभावं चास्य विज्ञाय दक्षः कार्याणि साधयेत् ॥**

**नात्यासन्नो न दूरस्थो न समोच्चासनस्थितः । न पुरस्थो न पृष्टस्थस्तिष्ठेत् सदसि न प्रभोः ॥**

**आसन्ने स्यात् प्रभोर्बाधा दूरस्थेऽप्यप्रगल्भता । पुरस्थितेऽन्यकोपोऽपि तस्मिन् पश्चाददर्शनम् ॥**

**श्रान्तं बुभुक्षितं क्रुद्धं व्याकुलं शयनोन्मुखम् । पिपासुमन्यविज्ञप्तं नैव विज्ञापयेद् विभुम् ॥**

**राजमातरि देव्यां च कुमारे मुख्यमन्त्रिणि । पुरोहिते प्रतीहारे वर्त्तितव्यं महीशवत् ॥**

**आदौ मयैवायमदीपि नूनं न तद्दहेन्मामवहीलितोऽपि । इति भ्रमादङ्गुलिपर्वणाऽपि स्पृश्येत नो दीप इवावनीपः ॥**

राज्ञो मान्यत्वेऽपि गर्वः सर्वथा न कार्यो, **'गव्वो मूलं विणासस्स'** इत्युक्तेः । श्रूयतेऽपि ढिल्ल्यां मान्यप्रधानेन गर्वितेन मयैव राज्यं निवर्हति इति कस्याप्यग्रे उक्तं श्रुत्वा सुरत्राणस्तं निष्कास्याऽऽसन्नं चर्मकारं रांपडीहस्तं तत्पदे न्यवीविशत्, तस्य लेखादौ रांपड्येवाभिज्ञानम् । तदन्वयोऽद्यापि मान्योऽस्ति । एवं सेवया च नृपत्यादिप्रसत्त्सम्भवे ऐश्वर्यादिलाभोऽपि न दुःसम्भवः । यदूचे–

**इक्षुक्षेत्रं समुद्रश्च योनिपोषणमेव च । प्रसादो भूभुजां चैव सद्यो घ्नन्ति दरिद्रताम् ॥**

**निन्दन्तु मानिनः सेवां राजादीनां सुखैषिणः । स्वजनाऽस्वजनोद्धारसंहारौ न तया विना ॥**

कुमारपालनृपो नष्टचर्यायां सम्यक्सेवातुष्टो वोसिरिविप्राय लाटदेशं ददौ । जितशत्रुनृपो यामिकाय राजपुत्रदेवराजाय

सर्पोपद्रवटालनतुष्टः स्वराज्यं दत्वा प्रव्रज्य सिद्धः । मन्त्रिश्रेष्ठिसेनान्यादिव्यापारश्च सर्वोऽपि नृपसेवायामन्तर्भवति, स च पापमयत्वात् पर्यन्तविरसत्वाच्च मुख्यवृत्त्या श्रावकेण वर्जनीयः । वदन्ति च–

**नियोगे यत्र यो मुक्तस्तत्र स्तेयं करोति सः । किं नाम रजकः क्रीत्वा वासांसि परिधास्यति ॥**

**अधिकाधयोऽधिकाराः कारा एवाग्रतः प्रवर्त्तन्ते । प्रथमं न बन्धनं तदनुबन्धनं नृपनियोगजुषाम् ॥**

सर्वप्रकारं च नृपव्यापारं त्यक्तुमशक्तोऽपि गुप्तिपाल-कोट्टपाल-सीमपालादिव्यापारमत्यन्तपापमयं निस्त्रिंशजनोचितमास्तिकस्त्यजेदेव । यदुक्तं–

**गोदेवकरणरक्षतलावर्त्तकपट्टकाः । ग्रामोत्तरश्च न प्रायः सुखाय प्रभवन्त्यमी ॥**

शेषमपि व्यापारं यदि स्वीकुर्यात्तदा मन्त्रिवस्तुपालसाधुश्रीपृथ्वीधरादिवत्सुकृतकीर्त्येकमयं कुर्यात् । यद्वदन्ति–

**नृपव्यापारपापेभ्यः स्वीकृतं सुकृतं न यैः । तान् धूलिधावकेभ्योऽपि मन्ये मूढतरान्नरान् ॥**

**प्रभोः प्रसादे प्राज्येऽपि प्रकृतीनेव कोपयेत् । व्यापारितश्च कार्येषु याचेताऽध्यक्षपुरुषम् ॥**

एवं विधिनापि सम्भवे सेवा सुश्रावकस्यैव नृपादेरुचिता । यतः–

**सावयवरम्मि वर हुज्ज चेडओ नाणदंसणसमेओ । मिच्छत्तमोहिअमई, मा राया चक्कवट्टी वि ॥**

जातु अन्यथा निर्वाहाभावे सम्यक्त्वप्रतिपत्तौ **'वित्तीकंतारेणं'** इत्याकारकरणान्मिथ्यादृशोऽपि यदि सेवां कुर्यात्तदापि यथाशक्तियुक्तिस्वधर्मबाधां टालयति । अन्यप्रकारेण स्वल्पेऽपि निर्वाहयोगे तु तत्सेवामपि त्यजति ६।

भिक्षा धातुधान्यवसनादीभैक्ष्यभेदादनेकभेदा । तत्र च धर्मोपष्टम्भमात्रहेतुराहारवस्त्रपात्रादिभिक्षा सर्वसङ्गपरित्यागवतामौचितीमञ्चति । यदुच्यते—

**प्रतिदिनमयत्नलभ्ये ! भिक्षुकजनजननि ! साधुकल्पलते !! नृपनमनि ! नरकवारिणि ! भगवति ! भिक्षे ! नमस्तुभ्यम् ॥**

शेषभिक्षा तु [१]न्यक्षाऽप्यत्यन्तलाघवहेतुरेव । वदन्ति च—

**ता रूवं ताव गुणा लज्जा सच्चं कुलक्कमो ताव । तावच्चिअ अभिमाणं, देहि त्ति न जंपए जाव ॥**

**तृणं लघु तृणात्तूलं तूलादपि च याचकः । वायुना किं न नीतोऽसौ मामयं याचयिष्यति ॥**

**रोगी चिरप्रवासी परान्नभोजी परावसथशायी । यज्जीवति तन्मरणं यन्मरणं सोऽस्य विश्रामः ॥**

भिक्षाभोजिनश्च निश्चिन्ततया बह्वशनाऽऽलस्यनिद्रादिप्राचुर्यसम्भवेनाकिञ्चित्करत्वं नासुलभम् ।

१. सर्वा इति को० ह० प्र० पाठः ।

श्रूयते हि कस्यचित्कपालिनो भिक्षाकर्परे तैलिकवृषभेण मुखे प्रक्षिप्ते बहुहाहारवादिपूर्वं कपालिनोक्तं, मम पुनर्भूयस्यपि भिक्षा भवित्री परमेष वृषभो भिक्षाभाजनमुखप्रक्षेपात् मा भवतामकिञ्चित्करोऽभूत्, इति बहु दूनोऽस्मीति । उक्तञ्च भिक्षात्रैविध्यं श्रीहरिभद्रसूरिभिः पञ्चमाष्टके–

**सर्वसंपत्करी चैषा पौरुषघ्नी तथा परा । वृत्तिभिक्षा च तत्त्वज्ञैरिति भिक्षा त्रिधोदिता ॥** (१)

**यतिर्ध्यानादियुक्तो यो गुर्वाज्ञायां व्यवस्थितः । सदाऽनारम्भिणस्तस्य सर्वसंपत्करी मता ॥** (२)

**प्रव्रज्यां प्रतिपन्नो यस्तद्विरोधेन वर्त्तते । असदारम्भिणस्तस्य पौरुषघ्नी च कीर्त्तिता ॥** (४)

अत्र तस्येति विशेष्यम्, असदारम्भिण इति विशेषणम् । यद्वा चस्य गम्यत्वात्तस्य प्रव्रज्याविरोधवर्त्तिनः प्रव्रजितस्य असदारम्भिणो गृहस्थस्य च ।

**धर्मलाघवकृन्मूढो भिक्षयोदरपूरणात् । करोति दैन्यात्पीनाङ्गः पौरुषं हन्ति केवलम् ॥** अष्ट० ५-५

**निःस्वान्धपङ्गवो ये तु न शक्ता वै क्रियान्तरे । भिक्षामटन्ति वृत्त्यर्थं वृत्तिभिक्षेयमुच्यते ॥** अष्ट० ५-६

इयं च नातिदुष्टा निःस्वान्धादीनां धर्मलाघवकारित्वाभावेनानुकम्पानिमित्तत्वात्, तस्माद् भिक्षावृत्तिर्गृहस्थेन वर्जनीया, विशिष्य च धर्मवता, विशिष्टस्यापि धर्मानुष्ठानस्य, तया दुर्जनसौहार्दस्येवाऽवज्ञानिन्दास्पदत्वाद्यापत्तेः । धर्मनिन्दानिमित्ततायां च

बोधिदुष्प्रापतादिदोषः । यदुक्तमोघनिर्युक्तौ साधुमाश्रित्य–

**छक्कायदयावंतो वि संजओ दुल्लहं कुणइ बोहिं । आहारे नीहारे, दुगुंछिए पिण्डगहणे अ ॥** (गा० ४४१)

न भिक्षया कस्यचिल्लक्ष्मीसुखादिसम्पत्तिः । यतः–

**लक्ष्मीर्वसति वाणिज्ये किंचिदस्ति च कर्षणे । अस्ति नास्ति च सेवायां भिक्षायां न कदाचन ॥**

उदरभरणादिनिर्वाहमात्रं तु भिक्षया भवतीत्येषाप्याजीविकोपायतया प्रोक्ता ७।

मनुस्मृतौ चतुर्थाध्याये त्वेवमुक्तं–

**ऋताऽमृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा । सत्यानृतेन चैवापि न श्ववृत्त्या कदाचन ॥**

**ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् । मृतं तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम् ॥**

**सत्यानृतं तु वाणिज्यं तेन चैवापि जीवति । सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत् ॥**

एषु च वणिजां वाणिज्यमेव मुख्यवृत्त्याऽर्थार्जनोपायः । पठ्यतेऽपि–

**महुमहणस्सयवत्थे न चेव कमलायरे सिरी वसइ । किंतु पुरिसाण ववसायसायरे तीइ सुहठाणं ॥**

वाणिज्यमपि स्वसहायनीवीबलस्वभाग्योदयदेशकालाद्यनुरूपमेव कुर्याद्, अन्यथा सहसा त्रुट्याद्यापत्तेः । उक्तं चास्माभिः–

**स्वकशक्त्यानुरूपं हि प्रकुर्यात् कार्यमार्यधीः । नो चेदसिद्धिह्लीहासहीलाश्रीबलहानयः ॥**

अन्यैरपि–**को देशः कानि मित्राणि कः कालः कौ व्ययागमौ । कश्चाहं का च मे शक्तिरिति चिन्त्यं मुहुर्मुहुः ॥**

**लघूत्थानान्यविघ्नानि सम्भवत्साधनानि च । कथयन्ति पुरः सिद्धिं कारणान्येव कर्मणाम् ॥**

**उद्भवन्ती विना यत्नमभवन्ती च यत्नतः । लक्ष्मीरेव समाख्याति विशेषं पुण्यपापयोः ॥**

वाणिज्ये व्यवहारशुद्धिश्चतुर्धा, द्रव्य-क्षेत्र-काल-भावभेदात् । तत्र द्रव्यतः पञ्चदशकर्मादानादिनिदानं भाण्डं सर्वात्मना त्याज्यम् । यतः–

**धर्मबाधकरं यच्च यच्च स्यादयशस्करम् । भूरिलाभमपि ग्राह्यं पण्यं पुण्यार्थिभिर्न तत् ॥**

निष्पन्नवस्त्रसूत्रनाणकस्वर्णरूप्यादि पण्यं प्रायो निर्दोषम् । वाणिज्ये च यथा यथा स्वल्प आरम्भः स्यात्तथा तथा यतनीयम्। दुर्भिक्षादावनिर्वाहे तु यदि बह्वारम्भं खरकर्माद्यपि करोति, तदाऽनिच्छुः स्वं निन्दन् सशूकतयैव करोति । यदुक्तमागमोक्तभावश्रावकलक्षणे–

**वज्जइ तिव्वारंभं कुणइ अकामो अनिव्वहंतो उ । थुणइ निरारंभजणं, दयालुओ सव्वजीवेसु ॥**

**धन्ना हु महामुणिणो, मणसावि करंति जे न परपीडं । आरंभपापविरिया, भुंजंति तिकोडिपरिसुद्धं ॥**

अदृष्टमपरीक्षितं च पण्यं न स्वीकार्यम् । समुदितं शङ्कास्पदं च समुदितैरेव ग्राह्यं न त्वेकाकिना, विषमपाते तथैव साहाय्यकादिभावात् । उक्तं—

**क्रयाणकेष्वदृष्टेषु न सत्यङ्कारमर्पयेत् । दद्याच्च बहुभिः सार्द्धमिच्छेल्लक्ष्मीं वणिग् यदि ॥**

क्षेत्रतः स्वचक्रपरचक्रमान्द्यव्यसनाद्युपद्रवरहिते धर्मसामग्रीसहिते च क्षेत्रे व्यवहार्यं, न त्वन्यत्र बहुलाभेऽपि । कालतो-ऽष्टाह्निकात्रयपर्वतिथ्यादिकं वक्ष्यमाणं वर्षादिकालविरुद्धं च त्याज्यम् । भावतोऽनेके भेदाः ।

तद्यथा—क्षत्रियव्यापारिनृपाद्यैः सह व्यवहारः स्वल्पोऽपि न प्रायो गुणाय । स्वहस्तदत्तवित्तयाचनेऽपि येभ्यो भीयते, तैः सह शुभोदर्कः कथं नाम स्वल्पोऽपि व्यवहारः ? । तदाह—

**व्यापारिभिश्च विप्रैश्च सायुधैश्च वणिग्वरः । श्रियमिच्छन्न कुर्वीत व्यवहारं कदाचन ॥**

उद्धारके च विरोधकारकैः कैरपि सह न व्यवहार्यम् । यतः—

**सङ्ग्रहेऽर्थोऽपि जायेत प्रस्तावे तस्य विक्रयात् । उद्धारे नोचितः सोऽपि वैरविग्रहकारिणि ॥**

**नटे विटे च वेश्यायां द्यूतकारे विशेषतः । उद्धारके न दातव्यं मूलनाशो भविष्यति ॥**

कलान्तरव्यवहारोऽपि समधिकग्रहणकादानादिनैवोचितः, अन्यथा तन्मार्गणादिहेतुकक्लेशविरोधधर्महानिधरणाद्यनेका-

नर्थापत्तेः । श्रूयते हि श्रेष्ठिजिनदत्तसुतो नाम्नापि मुग्धः पितृप्रसादाल्लीलावान् ? पित्रा दशनरीशुद्धकुलां श्रेष्ठिनन्दिवर्द्धनकन्यां प्रौढोत्सवैः परिणायितः, प्रान्ते तथैव गुणदर्शनाद् गूढार्थवचोभिरेवं शिक्षितः–'वत्स ! सर्वतो दन्तैर्वृत्तिः कार्या १। परस्य लाभार्थं धनादि दत्त्वा याच्यं न २। भार्या बद्धवैव ताड्या ३। मिष्टमेव भोज्यं ४। सुखेनैव शेयं ५। ग्रामे ग्रामे गृहं कार्यं ६। दौस्थ्ये गङ्गातटं खननीयं ७। एतदर्थसन्देहे पाटलीपुत्रे मन्मित्रं श्रेष्ठिसोमदत्तः प्रष्टव्यः ८ इति ।' भावार्थानभिज्ञः क्रमात्तथैव स कुर्वन् खेदवान् निःस्वो भार्याद्यनिष्टः सीदत्कार्यस्त्रुटद्वित्तो महामूर्खोऽयमिति सर्वेषां हास्योऽभूत् । ततः पाटलीपुत्रे गत्वा श्रेष्ठिसोमदत्तं भावार्थं पप्रच्छ । तेनोक्तं 'सर्वेषां प्रियं हितं च वाच्यं १। समधिकग्रहणकादानादिना तथा धनादि देयं, यथा स्वयं परोऽर्पयति २। सापत्यैव प्रिया ताड्या अन्यथा रुष्टा पितुर्गृहादौ यायात्, कूपपातादि वा कुर्यात् ३। अनादरे गृहे न भोज्यं, भोजने आदरस्यैव मिष्टत्वात् ४। निःशङ्के स्थाने वस्तव्यं यथा सुखं स्वापः स्यात्, यद्वा बुभुक्षयैव भुञ्जीत, यथा सर्वं मिष्टं स्यात् । निद्रालुरेव शयीत, यथा यत्र तत्रापि सुखं निद्रैति ५। ग्रामे ग्रामे मैत्री कार्या यथा स्वगृहवद् भोजनादि सर्व सुसाधं स्यात् ६। दौस्थ्ये त्वद्गृहस्थगङ्गाख्यगोस्थाने खननीयं, यथा पित्रा प्राङ्न्यस्तं निधिं लभसे ७। इति ।' सोऽपि तथा कुर्वन् धनी सुखी महनीयश्च जज्ञे । इति पुत्रशिक्षादृष्टान्तः । तस्मादुद्धारे क्वापि न व्यवहार्यम् । अनिर्वहंस्तु यदि तथापि व्यवहरति, तदा सत्यवादिभिरेव सह कलान्तरमपि देशकालाद्यपेक्षयैकद्विकत्रिकचतुष्कपञ्चकवृद्ध्यादिरूपं शिष्टजनानिन्दितमेव ग्राह्यम् । दायकेनापि प्रोक्तवेलाया अर्वागेव तद्देयं, सज्जननिर्वाहाधीनत्वात्पुंसः प्रतिष्ठायाः । उक्तमपि–

**तत्तिअमित्तं जंपह जत्तिअमित्तस्स निक्कयं वहह । तं उक्खिवेह भारं जं अद्धपहे न छंडेइ ॥**

जातु धनहान्यादिना दातुमशक्तः, शनैः शनैस्तदर्पणस्वीकारादिनोत्तमर्णः सन्तोष्यः, अन्यथा विश्वासहान्या व्यवहारभङ्ग-प्रसङ्गः । ऋणच्छेदे सर्वशक्त्या यतितव्यम् । को हि मूढधीर्भवद्वयपराभवकारणमृणं क्षणमात्रमपि धारयेत् । यदुक्तं—

**धर्मारम्भे ऋणच्छेदे, कन्यादाने धनागमे । शत्रुघातेऽग्निरोगे च, कालक्षेपं न कारयेत् ॥**

**तैलाभ्यङ्गमृणच्छेदं कन्याभरणमेव च । एतानि सद्योदुःखानि, परिणामे सुखानि तु ॥**

स्वनिर्वाहाऽक्षमतया ऋणदानाशक्तेन तूत्तमर्णगृहे यथार्हकर्मकरणादिनापि ऋणमुच्छेद्यम्, अन्यथा भवान्तरे तद्गृहे कर्मकर-महिष-वृषभ-करभ-रासभ-वेसर-तुरगादित्वस्यापि सम्भवात् । उत्तमर्णेनापि सर्वथा ऋणदानाशक्तो न याच्यो, मुधैव क्लेशपाप-वृद्ध्यादिभावात् । किन्तु 'यदा शक्नोषि तदा दद्याः, नो चेदिदं धर्मपदे मे भूयात्' इति वाच्यः । न तु ऋणसम्बन्धश्चिरं स्थाप्यः, तथा सत्यायुःसमाप्तौ भवान्तरे द्वयोर्मिथः सम्बन्धवैरवृद्ध्याद्यापत्तेः । श्रूयते हि श्रेष्ठिभावडस्य ऋणसम्बन्धेन पुत्रभवनादि । यथा-दुःस्वप्नदुर्दोहदादिहेतुर्दुष्टः प्रथमपुत्रो मृत्युयोगोत्पन्नो माल्हणीसरित्तीरे शुष्कद्रुमस्याधस्त्यक्तो रुदित्वा हसित्वा चाह—स्वर्णलक्षं मे लभ्यं दत्त, नो चेद्वोऽनर्थो भावीति । ततो जन्मोत्सवादिना षष्ठीदिने लक्षपूर्त्तौ स मृतः । एवं द्वितीयस्त्रिलक्षीपूर्त्तौ मृतः । सुस्वप्नादिहेतुस्तृतीयपुत्रस्त्वेकोनविंशतिस्वर्णलक्षा मया देया इति वादी जावडिः पित्रोर्धर्मव्यये तावद्धनं मानयित्वा काश्मीरे नवलक्ष्या ऋषभपुण्डरीकचक्रेश्वरीमूर्तीर्लात्वा, दशलक्ष्या च प्रतिष्ठाप्याऽष्टादशपोतार्जितासङ्ख्यस्वर्णं शत्रुञ्जये लेप्यमयं

बिम्बमुत्थाप्य मम्माणिमणिमयं तत्त्रयं स्थापयामास । ऋणसम्बन्धे हि प्रायः कलहाऽनिवृत्तेर्वैरवृद्ध्याद्यपि प्रतीतम् । तस्माद्दण-सम्बन्धस्तद्भवे एव यथाकथञ्चिन्निर्वाल्यः । अन्यत्रापि व्यवहारे निजस्वस्याचटने धर्मार्थमिदमिति चिन्त्यं धर्मार्थिना । अतः साधर्मिकैरेव सह मुख्यवृत्त्या व्यवहारो न्याय्यः, तत्पार्श्वे स्थितस्य निजस्वस्य धर्मोपयोगित्वसम्भवात् । म्लेच्छादिपार्श्वाल्लभ्ये तु यत्र कोऽपि पुण्योपयोगो न स्यात्, तस्य प्राप्त्यसम्भवे व्युत्सर्जनमेव युक्तम् । व्युत्सर्गादनुप्राप्तं तु तत्सङ्घस्यैव धर्मव्ययार्थमर्प्यम् । एवं स्वकीयं गतमपि वित्तवस्तु शस्त्रादिप्राप्त्यसम्भवे व्युत्सृज्यम्, यथा तदुत्थं पापं न लगेत् । इत्थं युक्त्यानन्तभवसत्कं गेहदेहकुटुम्बवित्तशस्त्रादि सर्वं पापहेतु विवेकिना व्युत्सर्जनीयम्, अन्यथा तदुत्थदुष्कृतस्यानन्तैरपि भवैरनिवृत्तेः । न चैतद-नागमिकम्, पञ्चमाङ्गे पञ्चमशते षष्ठोद्देशके व्याधेन मृगे हते धनुःशरज्यालोहादिजीवानामपि हिंसादिक्रियाया उक्तत्वात् । न च क्वचित् किञ्चिद्धनहान्यादिना निर्वेदं यायाद्, अनिर्वेदस्यैव श्रियो मूलत्वात् । उच्यते च—

**सुव्यवसायिनि कुशले, क्लेशसहिष्णौ समुद्यतारम्भे । नरि पृष्ठतो विलग्ने, यास्यति दूरं कियल्लक्ष्मीः ? ॥**

यत्र च धनमर्ज्यते तत्र किञ्चिद् यात्यपि, बीजनाशपूर्विकैव हि कर्षकस्यापि धान्यसम्पत्तिः । दुर्दैववशाच्च बहुधनादिहानावपि न दैन्याद्याश्रयेत्, किन्तु धर्मकरणादियथार्हतत्प्रतिक्रियायै प्रयतेत । आह हि —

**म्लानोऽपि रोहति तरुः, क्षीणोऽप्युपचीयते पुनश्चन्द्रः । इति विमृशन्तः सन्तः सन्तप्यन्ते न विपदाऽपि ॥**

**विपदां संपदां चापि, महतामेव सम्भवः । कृशता पूर्णता चापि, चन्द्र एव न चोडुषु ॥**

**विच्छायतां व्रजसि किं ? सहकारशाखिन् ! यत्फाल्गुनेन सहसाऽपहृता मम श्रीः ।**
**प्राप्ते वसन्तसमये तव सा विभूतिर्भूयो भविष्यतितरामचिरादवश्यम् ॥**

अत्र दृष्टान्तोऽयम्- पत्तने श्रीमालनागराजश्रेष्ठी कोटीध्वजः, प्रिया मेलादेवी, तस्यां साधानायां श्रेष्ठी विशूचिकया मृतः नृपेणाऽपुत्र इति कृत्वा सर्वस्वं गृहीतम् । श्रेष्ठीनी धवलक्कके पितृगृहे गता, अमारिदोहदे पित्रा पूरिते पुत्रो जज्ञे अभयाख्यो, जने 'आभड' इति ख्यातः । पञ्चवर्षः पठन् निस्तात इति बालैरुक्ते निर्बन्धान्मात्रा स्वरुपे उक्ते साग्रहं समहं पत्तने गतः । स्वगृहे स्थित्वा वाणिज्यं कुर्वन् लाछलदेवीं परिणिन्ये । ततः प्राक्तननिधानलाभादिना कोटीध्वजो जज्ञे । सुतत्रयं जातम् । क्रमाद्दुष्कर्मणा निर्धनत्वे सपुत्रां पत्नीं तत्पितृगृहे प्रेष्य मणिकारहट्टे मणिकादीन् घर्षन् यवमानकं लभते तत् स्वयं पिष्ट्वा पक्त्वा चाऽत्ति ।

यतः—**वार्धिमाधवयोः सौधे, प्रीतिप्रेमाङ्कधारिणोः । या न स्थिता किमन्येषां, स्थास्यति व्ययकारिणाम् ? ॥**

अन्यदा श्रीहेमसूरिपार्श्वे इच्छापरिमाणग्रहणे बहुसङ्क्षेपे गुरुभिर्निषिद्धे नवद्रम्मलक्षाः कृताः, तन्मानेनान्यदपि नियमितम् । शेषं धर्मव्यये कार्यम् । क्रमाद् द्रम्मपञ्चकं ग्रन्थौ जातम् । अथाजां सेन्द्रनीलकण्ठाभरणां पञ्चद्रम्मैः क्रीत्वोपलक्ष्येन्द्रनीलस्य लक्षमूल्या मणयः कारिताः । क्रमाद्धनी प्राग्वज्जज्ञे । कुटुम्बं मिलितम् । साधूनां विहारणे प्रत्यहं घृतघटः । प्रत्यहं साधर्मिकवात्सल्यसत्रागारमहापूजादि । प्रतिवर्षं सर्वदर्शनसङ्घार्चाद्वयनानापुस्तकलेखनचैत्यजीर्णोद्धारबिम्बकरणादि । एवं चतुरशीतिवर्षायुः प्रान्ते धर्मवहिकावाचनेऽष्टनवतिभीमप्रियद्रम्मलक्षव्ययं श्रुत्वा विषण्णः प्राह, —हा ! कृपणेन मया कोट्यपि न

व्ययिता । ततः पुत्रैस्तदैव दशलक्षीं व्यय्याऽष्टोत्तरा कोटी कृताऽष्टौ लक्षाः पुनर्मानिताः । सोऽनशनात् स्वर्गतः । **इत्याभड-प्रबन्धः ।**

प्राक्कृतदुष्कृतदौरात्म्यात् पूर्वावस्थाया अप्राप्तावपि धैर्यमेवावलम्ब्यम् । विपदब्धौ तस्यैव पोतायमानत्वात् । कस्य वा सर्वे दिवसाः सदृशाः स्युः ? । भण्यतेऽपि—

**को इत्थ सया सुहिओ, कस्सव लच्छी थिराइं पिम्माइं । को मच्चुणा न गसिओ, को गिद्धो नेव विसएसु ॥**

ईदृशि विषमे च सन्तोष एव सर्वसुखमूलमालम्बनीयः, अऽन्यथा तच्चिन्तार्त्या भवद्वयकार्येभ्योऽपि परिभ्रश्येत । तत उक्तम्—

**चिंता नामेण नई, आसासलिलेण पूरिआ वहई । बुड्डेसि मंद तारुअसंतोसतरंडए लग्ग ॥**

यदा च विविधोपायकरणेऽपि स्वभाग्यदशाया हीनत्वमेवानुभवति, तदा कस्यचिद्भाग्यवतः सुयुक्त्या कथमप्याधारं गृह्णीयात् । काष्ठाधारेण हि लोहपाषाणाद्यपि तरति ।

श्रूयते हि भाग्यवानेकः श्रेष्ठी, तस्य वणिक्पुत्रो दक्षः । श्रेष्ठिसान्निध्याद्धनी क्रमान्निर्धनः । श्रेष्ठिनि मृते तत्पुत्रेभ्यः सान्निध्यमीहते । ते च तं निर्धनत्वादालापयन्त्यपि न । ततस्तेन द्वित्राप्तसमक्षं श्रेष्ठिजीर्णवहिकायां सहस्रटण्कद्वयं श्रेष्ठिनो मया देयमिति रहः कथमपि स्वहस्तेन लिलिखे । अन्यदा तद् दृष्ट्वा तैस्तन्मार्गणे तेनोक्तं,—"व्यवसायार्थं कियद्धनमर्प्यतां, यथा

शीघ्रं युष्मदीयं देयं दीयते ।'' ततस्तैः स्वद्रव्येण वाणिज्यमकार्यत । बहुधनार्जने तैः स्वलभ्यमार्गणे तेन साक्षिपूर्वं सम्यक्स्वरूपं प्रारूपि । एवं तदाधारेण स महर्द्धिर्जज्ञे ।

**निर्दयत्वमहङ्कारस्तृष्णा कर्कशभाषणम् । नीचपात्रप्रियत्वं च पञ्च श्रीसहचारिणः ॥**

इत्युक्तिर्ह्यसत्प्रकृत्यपेक्षा । तेन भूरिद्रव्यलाभेऽपि न गर्वादि कुर्वीत । यतः—

**विपदि न दीनं संपदि न गर्वितं सव्यथं परव्यसने । हृष्यति चात्मव्यसने येषां चेतो नमस्तेभ्यः ॥**

**जं जं खमइ समत्थो, धणवंतो जं न गव्विओ होइ । जं च सविज्जो नमिओ, तिहिं तेहिं अलंकिआ पुहवी ॥**

न च केनापि सह स्वल्पमपि कलहायेत, विशिष्य च महद्भिः । यतः—

**वर्जयेत् कासवांश्चौर्यं, निद्रावान् चर्मचोरिकाम् । रोगवान् रसनालौल्यं, धनवानन्यतः कलिम् ॥**

**अत्थवइणा निवइणा, पक्खवया बलवया पयंडेण । गुरुणा नीएण तवस्सिणा य सह वज्जए वायं ॥**

जातु महता सहार्थादिसम्बन्धः स्यात्तदा प्रणिपातादिनैव स्वकार्यसिद्धिर्न तु बलकलहादिना । पञ्चाख्यानेऽप्याख्यातं—

**उत्तमं प्रणिपातेन शूरं भेदेन योजयेत् । नीचमल्पप्रदानेन स्वतुल्यं तु पराक्रमैः ॥**

धनार्थी धनवांश्च विशिष्य क्षमामाद्रियेत् । क्षमा हि श्रीवृद्धिरक्षयोः क्षमा । तदाह—

**होममन्त्रबलं विप्रे, नीतिशास्त्रबलं नृपे । राजा बलमनाथानां, वणिक्पुत्रे क्षमा बलम् ॥**

**अर्थस्य मूलं प्रियवाक् क्षमा च, कामस्य वित्तं च वपुर्वयश्च । धर्मस्य दानं च दया दमश्च, मोक्षस्य सर्वार्थनिवृत्तिरेव ॥**

दन्तकलहस्तु सर्वत्र सर्वथा परिहार्यो, यदुक्तं श्रीदारिद्र्यसंवादे–

**गुरवो यत्र पूज्यन्ते, वित्तं यत्र नयार्जितम् । अदन्तकलहो यत्र, तत्र शक्र वसाम्यहम् ॥**

**द्यूतपोषी निजद्वेषी धातुवादी सदालसः । आयव्ययस्यानालोची तत्र तिष्ठाम्यहं सदा ॥**

लभ्यमार्गणाद्यप्यकठिनानिन्दितवृत्त्यैव युक्तम्, अन्यथाऽधर्मणदाक्षिण्यलज्जादिलोपेन धनधर्मप्रतिष्ठाहान्याद्यापत्तेः । अतः स्वयं लङ्घनेऽपि परलङ्घनादि वर्ज्यम् । स्वयं मुक्त्वा परलङ्घनं तु सर्वथाऽनर्हम् । भोजनाद्यन्तरायस्य ढण्ढणकुमारादिवद्दृशं दुस्सहत्वात् । यावच्च कार्यं साम्ना सिद्ध्यति न तावदसाम्ना, विशिष्य वणिगादीनाम् । वदन्त्यपि–

**यद्यप्युपायाश्चत्वारः, प्रथिताः साध्यसाधने । सञ्ज्ञामात्रं फलं तेषां सिद्धिः साम्नि प्रतिष्ठिता ॥**

**मार्दवेनैव वश्याः स्युर्येऽपि तीक्ष्णाः सुनिष्ठुराः । जिह्वामुपासते पश्य दन्ताः कर्मकरा इव ॥**

लभ्यदेयादिसम्बन्धे भ्रान्तिविस्मृत्यादिवैमत्योत्पत्तावपि मिथः सर्वथा विवादं न कुर्यात्, किन्तु न्यायकरचतुर-चतुष्पञ्च आप्तप्रतिष्ठाप्राप्तपुरुषा यथा कथयन्ति तथा मान्यम्, अन्यथा विवादभङ्गाभावात् । यतः–

**परैरेव निवर्तेत, विवादः सोदरेष्वपि । विरलात्कङ्कतः कुर्यात्, अन्योऽन्यं गूढमूर्द्धजान् ॥**

तैरप्यपक्षपातेन मध्यस्थतयैव न्यायः कार्यः । सर्वं सम्यक् परीक्ष्यं स्वजनसाधर्मिकादिकार्ये, न तु सर्वत्र । यतो निर्लोभतयैव सम्यक् न्यायकरणेऽपि यथा विवादभङ्गमहत्त्वादिर्गुणस्तथा दोषोऽपि महान् । विवादापनोदाय कस्याप्यसदपि देयं क्रियते, अन्यस्य च सदापि भज्यते सम्यगपरिज्ञानादिना ।

श्रूयते कोऽपि महर्द्धिः प्रसिद्धश्रेष्ठी महत्त्वबहुमानार्थी विज्ञविधवमान्यपुत्र्या निवार्यमाणोऽपि सर्वत्र न्यायकरणार्थं व्रजति । अन्यदा पुत्र्या पितुर्बोधाय कूटं झटकं मण्डितम् । ''प्राग् न्यासीकृते स्वर्णसहस्रे मदीये दत्तेऽहं भोक्ष्य'' इत्युक्त्वा लङ्घयन्ती कथमपि न पर्यवस्यति । तातपादा वृद्धा अपि मद्धने लुब्धा इत्यादि यत्तद्वदति च । ततो ह्रीणेन पित्रा न्यायकरा आकारिताः, तैर्विमृश्य स्वर्णसहस्रं श्रेष्ठीसकाशात्तस्यै दापितं, पुत्रीत्वाद् विशिष्य बालविधवत्वादिना च । ततः 'श्रेष्ठी कथं मुधैव धनमनया गृहीतं ? जनेऽपवादादि च दुःसहं जातम्' इति खिन्नः । क्षणान्तरे पुत्र्या सम्यगुक्त्या स्वर्णं पश्चादर्पितम् । ततः श्रेष्ठी हृष्टः प्रबुद्धश्च । प्रायो न्यायकरत्वं तत्याज । तस्मान्न्यायकरैरपि न्यायो यत्र तत्र यथा तथा न कार्यः । इति न्यायकरज्ञातम् ।

तथा परमत्सरं क्वापि न कुर्यात् । कर्मायत्ता हि भूतयः, किं मुधा मत्सरेण भवद्वयेऽपि दुःखाकरेण ? । आचक्ष्महि च–

**यादृशं चिन्त्यतेऽन्यस्य तादृशं स्वयमाप्यते । इति जानन् कथं कुर्यात् परवृद्धिषु मत्सरम् ? ॥**

तथा धान्यौषधवस्त्रादिवस्तुविक्रयार्त्तावपि दुर्भिक्षव्याधिवृद्धिवस्त्रादिवस्तुक्षयादि जगद्दुःखकृत् सर्वथा नाभिलषेत्, नापि

दैवात्तज्जातमनुमोदेत, मुधा मनोमालिन्याद्यापत्तेः । यथा द्वौ सुहृदौ घृतचर्माऽऽदित्सया यान्तौ वृद्धया रन्धन्या तादृग् मनो ज्ञात्वा घृतार्थी गृहेऽन्तश्चर्मार्थी तु बहिर्भोजितौ । वलने व्यत्ययः कृतः ताभ्यां प्रश्ने मनःशुद्धिमालिन्ये हेतू उक्तौ । तदाहुः—

**उचिअं मुत्तूण कलं, दव्वाइकमागयं च उक्करिसं । निवडिअमवि जाणंतो, परस्स संतं न गिण्हिज्जा ॥**

अस्या व्याख्या—उचिकला शतं प्रति चतुष्कपञ्चकवृद्ध्यादिरूपा । **'व्याजे स्याद् द्विगुणं वित्तम्'** इत्युक्तेः द्विगुणद्रव्यत्रि-गुणधान्यादिरूपा वा तां, तथा द्रव्यं गणिमधरिमादि, आदिशब्दात्तत्तद्गतानेकभेदग्रहः, तेषां द्रव्यादीनां क्रमेण द्रव्यक्षय-लक्षणेनागतः सम्पन्नो य उत्कर्षोऽर्थवृद्धिरूपः, तं मुक्त्वा शेषं न गृह्णीयात् । कोऽर्थः ? यदि कथञ्चित् पूगफलादिद्रव्याणां क्षयाद् द्विगुणादिलाभः स्यात्तदा तमदुष्टाशयतया गृह्णाति । न त्वेवं चिन्तयेत् सुन्दरं जातं यत् पूगफलादीनां क्षयोऽभूदिति। तथा निपतितमपि परसक्तं जानन्न गृह्णीयात् । कलान्तरादौ क्रयविक्रयादौ च देशकालाद्यपेक्षया य उचितः शिष्टजनानिन्दितो लाभः स एव ग्राह्य इत्युक्तमाद्यपञ्चाशकवृत्तौ । तथा कूटतूलामान-न्यूनाधिकवाणिज्य-रसमेल-वस्तूमेलानुचितमूल्य-वृद्ध्यनुचित-कलान्तरग्रहण-लञ्चाप्रदानग्रहण-कूटकरकर्षण-कूटघृष्टनाणकाद्यर्पण-परकीयक्रयविक्रयभञ्जन-परकीयग्राहकव्युद् ग्राहन-वर्णिका-न्तरदर्शन-सान्धकारस्थानवस्त्रादिवाणिज्य-मषीभेदादिभिः सर्वथा परवञ्चनं वर्ज्यम् । यतः—

**विधाय मायां विविधैरुपायैः, परस्य ये वञ्चनमाचरन्ति । ते वञ्चयन्ति त्रिदिवापवर्गसुखान्महामोहसखाः स्वमेव ॥**

न चैवं निस्वानां निर्वाहस्यैव दौष्कर्यम् । निर्वाहो हि स्वकर्मणैव स्यात्, व्यवहारशुद्धौ तु बहुग्राहकागमनादिना विशिष्य ।

अत्र दृष्टान्तोऽयम्—एकत्र नगरे हेलाकः श्रेष्ठी पुत्रचतुष्कादियुतास्त्रिपञ्चसेरादिमितमानकादिना दानादानादौ त्रिपुष्करपञ्च-पुष्करादिपुत्रगालिदानसङ्केतादिना च कूटं व्यवहरति । अन्यदा तत्स्वरूपं ज्ञात्वा चतुर्थवध्वा विदुष्या श्रेष्ठी भृशमुपालब्धो-ऽभ्यधात्, किं क्रियते निर्वाहस्य दौष्कर्यम् ? । बुभुक्षितः किं न करोति पापम् ? । तयोक्तं—तात ! मैवं वादीर्यतो व्यवहार-शुद्धिरेव सर्वार्थसाधनी । उक्तमपि—

**धम्मत्थिआण दव्वट्ठिआण नाएण वट्टमाणाणं । धम्मो दव्वं सव्वं संपज्जइ नन्नहा कहवि ॥**

ततः मैवं क्रियतां षण्मासीं यावत्परीक्षार्थं, यथा धनवृद्ध्यादि स्यात् । परीक्षाप्राप्तौ त्वग्रतोऽपि कार्या । तद्गिरा श्रेष्ठ्यपि तथा चक्रे । ततो बहुग्राहकागमनादिना सुखनिर्वाहे पलप्रमाणं सुवर्णं ववृधे । ततो न्यायार्जितं धनमप्यायातीति वधूवचसा तत्सुवर्णं लोहवेष्टितं नामाङ्कं कट्टलकं कृत्वा षण्मासीं तेन व्यवहृत्य ह्रदमध्ये क्षिप्तम् । मत्स्येन भक्ष्यबुद्ध्या गिलितं । मत्स्यो धीवरेण गृहीतः, तदुदरात्स्फुटीभूतं नाम्नोपलक्ष्य श्रेष्ठिनोऽर्पितम् । ततः श्रेष्ठी सकुटुम्बः सञ्जातसत्यप्रत्ययः प्रबुद्धः । सम्यग् व्यवहारशुद्ध्या भृशं समृद्धो राजमान्यः परमः श्राद्ध सर्वजने प्रसिद्धस्तथाऽभूद्यथा तन्नाम्नापि परेषां विघ्नादि टलति । श्रूयते ह्यद्यापि महापोतचालनादौ हेला हेला इत्याद्युच्चैर्भाषमाणः । **इति व्यवहारशुद्धौ निदर्शनम् ।**

स्वामिमित्रविश्वस्तदेवगुरुवृद्धबालद्रोहन्यासापहारादीनि तु तद्धत्याप्रायाणि महापातकानि सर्वथा विशिष्य वर्जनीयानि ।

यतः—**कूटसाक्षी दीर्घरोषी, विश्वस्तघ्नः कृतघ्नकः । चत्वारः कर्मचाण्डाला, पञ्चमो जातिसम्भवः ॥**

अत्र विसेमिरासम्बन्धो यथा—

विशालायां नन्दो राजा विजयपालः सुतः । बहुश्रुतनामा मन्त्री । भानुमती राज्ञी । राजा तदासक्तः । सभायामपि भानुमतीं पार्श्वे स्थापयति ।

**वैद्यो गुरुश्च मन्त्री च यस्य राज्ञः प्रियंवदाः । शरीरधर्मकोशेभ्यः क्षिप्रं स परिहीयते ॥**

इत्युक्तेर्मन्त्री प्रोचे, देव ! राज्याः पार्श्वे स्थापनमनुचितम् । यतः—

**अत्यासन्ना विनाशाय दूरस्था न फलप्रदाः । सेव्या मध्यमभावेन राजावह्निगुरुस्त्रियः ॥**

अतो राज्ञीरूपं चित्रस्थं कारय । तथा कृतं स्वगुरोः शारदानन्दस्य दर्शितं च । तेन स्वविज्ञताज्ञापनायोक्तं:—

''वामोरुप्रदेशे तिलकोऽस्ति स न कृतः'' । राज्ञा सविकल्पेन मन्त्रिण उक्तमयं मार्य एव । मन्त्रिणा तु—

**सगुणमपगुणं वा कुर्वता कार्यजातं, परिणतिरवधार्या यत्नतः पण्डितेन ।**
**अतिरभसकृतानां कर्मणामाविपत्तेर्भवति हृदयदाही शल्यतुल्यो विपाकः ॥**

**सहसा विदधीत न क्रियामविवेकः परमापदां पदम् । वृणुते हि विमृश्यकारिणं, गुणलुब्धाः स्वयमेव संपदः ॥**

इति नीतिशास्त्रोक्तं स्मृत्वा स रहः स्वगृहे स्थापितः । अन्यदा राजसुतः पापर्द्ध्यै शूकरमनुव्रजन् दूरं गतः । सायं सरसि

जलं पीत्वा व्याघ्रभिया वृक्षे व्यन्तराधिष्ठितवानरेण स्वोत्सङ्गे पूर्वं शायितः । पश्चात्तदुत्सङ्गे कपिः सुप्तः क्षुधार्त्तव्याघ्रवचसा तेन मुक्तो व्याघ्रमुखे पतितो, हसिते व्याघ्रे मुखान्निर्गतो रुदन् व्याघ्रपृष्टः प्राहः—

**निजजातिं परित्यज्य, परजातिषु ये रताः । तानहं रोदिमि व्याघ्र ! कथं ते भाविनो जडाः ॥**

कुमारो लज्जितः, तेन ग्रहिलीकृतः । सर्वत्र विसेमिरा इत्येव वदन् अश्वागमनाज्ज्ञात्वा राज्ञा संशोध्य गृहे आनीतः । कथमपि गुणो न, तदा शारदानन्दनः स्मृतः । ततो राज्यार्द्धदानपटहे मन्त्रिणोक्तं, मत्पुत्री किञ्चिद्वेत्ति । राजा सुपुत्रो मन्त्रिगृहे प्राप्तस्ततो जवनिकान्तरितेन शारदानन्दनेनोक्तं—

**विश्वासप्रतिपन्नानां, वञ्चने का विदग्धता । अङ्कमारुह्य सुप्तानां, हन्तुं किन्नाम पौरुषम् ॥** इति श्रुत्वाद्याक्षरं मुक्तम्—

**सेतुं गत्वा समुद्रस्य, गङ्गासागरसङ्गमे । ब्रह्महा मुच्यते पापैर्मित्रद्रोही न मुच्यते ॥** द्वितीयं मुक्तम् ।

**मित्रद्रोही कृतघ्नश्च, स्तेयी विश्वासघातकः । चत्वारो नरकं यान्ति, यावच्चन्द्रदिवाकरौ ॥** तृतीयं मुक्तम् ।

**राजंस्त्वं राजपुत्रस्य, कल्याणं यदि वाञ्छसि । देहि दानं सुपात्रेषु, गृही दानेन शुद्ध्यति ॥** तुर्यं मुक्तम् ।

कुमारः सुस्थो जातो व्याघ्रादिवृत्तान्तमूचे । राजा—

**ग्रामे वससि हे बाले ! वनस्थं चरितं खलु । कपिव्याघ्रमनुष्याणां, कथं जानासि ? पुत्रके ! ॥**

स प्राह—**देवगुर्वोः प्रसादेन, जिह्वाग्रे मे सरस्वती । तेनाहं नृप ! जानामि, भानुमतीतिलकं( तिलं ) यथा ॥**

ततो गुरुराजानौ मिलितौ हृष्टौ । **इति विश्वस्तवञ्चने दृष्टान्तः ।**

इह पापं द्विधा, गोप्यं स्फुटं च । गोप्यमपि द्विधा, लघु महच्च। लघु कूटतुलामानादि, महद्विश्वासघातादि । स्फुटमपि द्विधा, कुलाचारेण निर्लज्जत्वादिना च । कुलाचारेण गृहिणामारम्भादि म्लेच्छानां हिंसादि च । निर्लज्जत्वादिना तु यतिवेषस्य हिंसादि । तत्र निर्लज्जत्वादिना स्फुटेऽनन्तसंसारित्वाद्यपि प्रवचनोड्डाहादिहेतुत्वात् । कुलाचारेण पुनः स्फुटे स्तोकः कर्मबन्धो गोप्ये तु तीव्रतरोऽसत्यमयत्वात् । असत्यं च मनोवाक्कायैस्त्रिविधमपि महत्तमं पातकं, तद्वद्भिरेव गोप्यपापकरणात् । न ह्यसत्यत्यागी गोप्यपापे क्वापि प्रवर्त्तते । असत्यप्रवृत्तेश्च निःशूकता स्यात् । निःशूकतायां च स्वामिमित्रविश्वस्तद्रोहादीन्यपि महापातकानि कुर्यात्, तत एवोक्तं योगशास्त्रान्तरश्लोकेषु—

**एकत्राऽसत्यजं पापं पापं निःशेषमन्यतः । द्वयोस्तुलाविधृतयोराद्यमेवातिरिच्यते ॥** २.६४-१०

एवं चासत्यमयगोप्यपापरूपस्य परवञ्चनस्य वर्जने सर्वशक्त्या यतनीयम् । न्याय एव हि परमार्थतोऽर्थोपार्जनोपायोपनिषद् । दृश्यते हि सम्प्रत्यपि न्यायानुसारिणां स्वल्पस्वल्पार्थोपार्जनेऽपि धर्मस्थानादौ प्रत्यहं तद्व्ययेऽपि च कूपादीनामिवाक्षयद्रव्य-त्वादि । परेषां तु पापपराणां बहुबहुद्रव्यलाभेऽपि तादृग्व्ययाभावेऽपि च मरुसरोवरादीनामिव द्रागेव क्षीणद्रव्यत्वादि । आह च—

**आत्मनाशाय नोन्नत्यै, छिद्रेण परिपूर्णता । भूयो भूयो घटीयन्त्रं निमज्जत् किं न पश्यसि ? ॥**

ननु न्यायधर्मैकनिष्ठा अपि केचिद् दौस्थ्यादिना नित्यं दुःखिता एव दृश्यन्ते, अन्ये तु अन्यायाधर्मैकनिष्ठा अप्यैश्वर्यादिना सुखिताश्च तत्कथं न्यायस्यैव प्राधान्यम् ? उच्यते—अयं प्राक्कर्मकृतो विपाकविशेषो न तु एतद्भवकर्मकृतः । कर्म च चतुर्द्धा । यदाहुः श्रीधर्मघोषसूरिपादाः—

**पुण्णाणुबंधि पुण्णं, तहेव पावाणुबंधि पुण्णं च । पुण्णाणुबंधि पावं, पावं पाण्वाणुबंधि तहा ॥**

**अविराहियजिणधम्मा, निरवायं निरूवमं च भवसायं । भरहुव्व लहंति जओ, पुण्णं पुण्णाणुबंधि तयं ॥**

**नीरोगाइगुणजुआ, महिड्ढिआ कोणिउव्व पावरया । पावाणुबंधिपुण्णा, हवंति अन्नाणकट्ठेण ॥**

**जं पुण पावस्सुदया, दरिद्दिणो दुक्खिआवि पावंति । जिणधम्मं तं पुण्णाणुबंधिपावं दयाइलवा ॥** द्रमकमहर्षिवत् ।

**पावापयंडकम्मा, निद्धम्मा निग्घिणा निरणुतावा । दुहिआवि पावनिरया, पावं पावाणुबंधि तयं ॥** कालशौकरिकादिवत् ।

**बहिरंतरंगरिद्धी, जायइ पुण्णाणुबंधिपुण्णेणं । इक्कावि न जेसिं पुणो, धिद्धी मणुअत्तणं तेसिं ॥**

**जे खण्डभावणा पुण, करिंति न जिआ अखण्डिअं पुण्णं । ते अन्नभवे पावंति, संपया आवयाहिं जुआ ॥**

एवं च यद्यपि कस्यचित्पापानुबन्धिपुण्यकर्मवशादैहलौकिकी विपन्न दृश्यते, तथाप्याऽऽयत्यामवश्यं भाविन्येव ।

यतः—**पापेनैवार्थरागान्धः, फलमाप्नोति यत् क्वचित् । बडिशामिषवत्तत्तमविनाश्य न जीर्यति ॥**

अतः स्वामिद्रोहहेतुं शुल्कभङ्गाद्यप्यत्राऽमुत्राऽप्यनर्थकृत्सर्वथा परिहरेत् । यत्र च स्वल्पोऽपि परोपतापस्तं व्यवहारं गृहाट्टकारणग्रहणस्थित्यादि च सर्वं वर्जयेत् । न हि परनिःश्वासैः समृद्धिसुखादिवृद्धिः । यतः—

**शाठ्येन मित्रं कपटेन धर्मं, परोपतापेन समृद्धिभावम् । सुखेन विद्यां परूषेण नारीं, वाञ्छन्ति ये व्यक्तमपण्डितास्ते ॥**

यथा च जनानुरागः स्यात्तथैव यतितव्यम् । यतः—

**जितेन्द्रियत्वं विनयस्य कारणं, गुणप्रकर्षो विनयादवाप्यते । गुणप्रकर्षेण जनोऽनुरज्यते, जनानुरागप्रभवा हि संपदः ॥**

न च धनहानिवृद्धिसङ्ग्रहादि गुह्यं परेभ्यः प्रकाशयेत् ।

यतः—**स्वकीयं दारमाहारं, सुकृतं द्रविणं गुणम् । दुष्कर्म मर्म मन्त्रञ्च, परेषां न प्रकाशयेत् ॥**

नापि तत्स्वरूपं केनापि पृष्टः कूटं वदेत्, किन्तु किमनेन प्रश्नेनेत्यादिभाषासमित्या प्रत्युत्तरयेत् । नृपगुर्वादिप्रश्ने तु यथास्थितमेव वाच्यम् ।

यतः—**सत्यं मित्रैः प्रियं स्त्रीभिरलीकं मधुरं द्विषा । अनुकूलं च सत्यञ्च, वक्तव्यं स्वामिना सह ॥**

सत्यवादो हि पुंसः परा काष्टा, तत एव विश्वासाद्युत्पत्तेः । श्रूयते हि ढिल्ल्यां साधुमहणसिंहः सत्यवादीति ख्यातिं श्रुत्वा

परीक्षार्थं सुरत्राणेन तव कियत्सङ्ख्यं धनमस्तीति ? पृष्टो लेख्यकं विलोक्य विज्ञपयिष्यामित्युक्त्वा सर्व लेख्यकं सम्यक् कृत्वा राज्ञोऽग्रे चतुरशीतिटङ्कलक्षा (सहस्रा) मद्गृहे सम्भविनोऽनुमानेनेत्यूचे । मया स्तोकं श्रुतमनेन बहूक्तं इति सत्योक्तिहृष्टो नृपस्तं कोशाध्यक्षं चक्रे । तथा स्तम्भतीर्थे विषमेऽपि सत्यवादी सौवर्णिकभीमस्तपाश्रीजगच्चन्द्रसूरिभक्तः श्रीमल्लिचैत्यान्तः शस्त्रीकरैर्बाहुजैर्बन्दीकृतः । तत्सुतैः पितृमोचनार्थं चतुःसहस्रीकूटटङ्कानयने बाहुजैः परीक्षाकारणे यथास्थितोक्त्या तुष्टैर्मुक्तः ।

विषमे साहाय्यार्थं च समानधर्मधनप्रतिष्ठादिगुणं सुबुद्धिमन्नि(न्तं नि)र्लोभं च मित्रमेकं कुर्यात् । यदुक्तं रघुकाव्ये—

**हीनान्यनुपकर्तॄणि, विवृद्धानि विकुर्वते । राज्ञा मध्यमशक्तीनि, मित्राणि स्थापितान्यतः ॥** अन्यत्रापि—

**तत्र तिष्ठति न भ्राता, न पिताऽन्योऽपि वा जनः । पुंसामापत्प्रतीकारं, सन्मित्रं यत्र तिष्ठति ॥**

**ईश्वरेण समं प्रीतिर्न मे लक्ष्मण ! रोचते । गते च गौरवं नास्ति, आगते च धनक्षयः ॥**

इति युक्तोक्तिसद्भावेऽपि यदि महता सह कथमपि प्रीतिः स्यात्तदा दुःसाधकार्यसिद्ध्यादयोऽनेके गुणाः । यतः—

**आपण पइं प्रभु होइ, इकि प्रभु किज्जइ हत्थि । कज्जकरे वा माणुसह अवरउ मग्ग न अत्थि ॥**

लघुरपि च मित्रीकृतो महतोऽप्यवसरे महते गुणाय स्यात् । उक्तञ्च पञ्चाख्याने—

**कर्त्तव्यान्येव मित्राणि, सबलान्यबलान्यपि । हस्तियूथं वने बद्धं, मूषकेण विमोचितम् ॥**

नहि लघुसाध्यानि कार्याणि महद्भिः समुदितैरपि साधयितुं शक्यानि । सूचीकार्यं हि सूच्यैव सिद्ध्यति न तु खड्गादिभिः, तृणकार्यं तृणेनैव न तु गजादिभिः । तदवादिष्म—

**तृणकणलवणानलकज्जलगोमयमृदश्मभस्मायः । सूचीचूर्णौषधकुञ्चिकादि चानन्यसमकार्यम् ॥**

मुखदाक्षिण्यादि तु दुर्जनादिभिरपि न जह्यात् । यतः—

**सद्भावेन हरेन् मित्रं, सन्मानेन च बान्धवान् । स्त्रीभृत्यान् प्रेमदानाभ्यां, दाक्षिण्येनेतरं जनम् ॥**

क्वचिच्च स्वकार्यसिद्ध्यै खलानपि पुरस्कुर्यात् । यदभ्यधिष्म—

**खलान् क्वापि पुस्कृत्य, स्वकृत्यं साधयेत् बुधः । रसभुक् क्लेशरसिकान्, रसना दशनानिव ॥**

**प्रायः कण्टकसण्टङ्कं, विना निर्वाह एव न । क्षेत्रग्रामगृहाराममुख्यरक्षा हि तद्वशा ॥**

प्रीतिपदे च सर्वथाऽर्थसम्बन्धादि वर्जयेत् । यतः—

**कुर्यात्तत्रार्थसम्बन्धमिच्छेद्यत्र न सौहृदम् । यद्दच्छया न तिष्ठेच्च, प्रतिष्ठाभ्रंशभीरुकः ॥**

सोमनीतावपि—अर्थसम्बन्धः सहवासश्च नो अकलहः । न च साक्षिणं विना मित्रगृहेऽपि स्थापनिकास्थापनं, मित्रादिहस्ते न स्वद्रव्यप्रेषणाद्यपि युक्तम्, अविश्वासस्यार्थमूलत्वाद्विश्वासस्य चानर्थमूलत्वात् । यदाह—

**न विश्वसेदविश्वस्ते, विश्वस्तेऽपि न विश्वसेत् । विश्वासाद्भयमुत्पन्नं, मूलादपि निकृन्तति ॥**

गुप्तमुक्तस्थापनिकया च को वा सुहृदपि न लोलुभ्यते ? भण्यतेऽपि—

**निक्षेपे पतिते हर्म्ये, श्रेष्ठी स्नौति स्वदेवताम् । यदीशो म्रियतामाशु, तुभ्यं दास्यामि याचितम् ॥** अस्माभिरप्युक्तं—

**अत्थो नूणमणत्थो, अग्गीव परं गिहीण तेण विणा । कहमवि न हु निव्वाहो, ता तं जुत्तीइ रक्खिज्जा ॥**

अत्र श्रेष्ठिधनेश्वरसम्बन्धः । यथा स स्वगृहसारमेकीकृत्य कोटिकोटि स्वर्णमूल्यान्यष्टौ रत्नानि स्वप्रियापुत्रादिभ्योऽपि प्रच्छन्नं मित्रहस्ते न्यासीकृत्य धनार्जनार्थं विदेशे गतो, बहुकालं स्थितो, दुर्दैवादाकस्मिकमान्द्येनाऽन्त्यावस्थां प्राप्तः । यतः—

**अन्नह परिचिंतिज्जइ, सहरिसकुन्दुज्जलेण हिअएण । परिणमइ तं तु अन्नह, कज्जारंभो विहिवसेणं ॥**

तदा चासन्नसुजनैर्द्रव्यादिस्वरूपं पृष्टः प्राह, विदेशार्जितं मद्धनं भूयस्तरमपीतस्ततः स्थितं पुत्रादिभिर्दुर्ग्रहं, परं मित्रहस्तन्यस्तं रत्नाष्टकं प्रियापुत्रादीनां दाप्यमित्युक्त्वा स मृतः । तैस्तत्स्वरूपे ज्ञापिते पुत्रादिभिर्विनयस्नेहबहुमानदोदूया[दायाद]भय-दर्शनाद्यनेकप्रकारैर्मार्गणेऽपि लुब्धेन मित्रेण तन्न मानितं नार्पितञ्च । व्यवहारकरणे साक्षिणो लिखिताद्यभिज्ञानस्य चाभावाद् भूपत्यमात्यादिभिरपि दापयितुं न शक्तम् । यस्य तस्यापि साक्षिणः करणे चौरादिगृहीतमपि जातु पश्चाद्वलते यथा बहुवित्तवणिजा धूर्त्तेन विदेशे मार्गे तस्करधाटीमिलने जोत्कारकरणे तैर्द्रव्यं मार्गितम् । तेनोक्तं, साक्षिणं कृत्वा सर्व गृह्णन्तु । पुनरवसरे

भवद्भिर्ममार्प्यम्, अहं च न मार्यः । ततस्तैर्वैदेशिको मुग्धोऽयमिति मत्वाऽरण्यमार्जारं कर्बुरं साक्षीकृत्य सर्वस्वं लात्वा मुक्तः । स परम्परया तत्स्थानाद्यवगत्य स्वग्रामं गतः । कियति काले तद्वासग्रामसत्काः सतस्कराः केऽपि बहु वस्तु लात्वा तत्रागताः । तेन स्वद्रव्यमार्गणे मिथः कलहे न्यायकरादिभिः साक्षी कोऽ प्यस्ति ? इति पृष्टे वणिजा कृष्णमार्जारमेकं सउडिमध्ये क्षित्वोक्तं, 'एष साक्षी' तस्करैरूक्तं विलोक्यते । भोः कीदृशः साक्षी ? ततस्तेन स दर्शितः तैरूक्तं, एष स न, कृष्णत्वात्, स तु कर्बुरोऽभूत् इति स्वमुखेनैव माननान्न्यायकरादिबलेन[१] सर्वं स्वद्रव्यं पश्चाद् गृहीतं तेनेति **साक्षिकरणे कथानकम् ।**

तस्मात्स्थापनिका गुप्तवृत्त्या न मोच्या न ग्राह्या वा, किन्तु कियत्स्वजनसमक्षमेव मोच्या ग्राह्या च । न च धनिकानुमतिं विना सा चालयितुमपि युज्यते, किं पुनर्वाणिज्यादौ व्यापारयितुम् । जातु न्यासकृदन्यत्र मृतस्तदा तत्सुतादेः सार्पणीया । तत्सुताद्यभावे तु सर्वसमक्षं धर्मस्थाने व्यययितव्याः ।

नाप्युद्धारनिक्षेपादि-समग्राऽऽयव्ययटिप्पनादौ स्वल्पमप्यालस्यं कुर्यात् । यत उक्तं—

**ग्रन्थिबन्धे परीक्षायां, गणने गोपने व्यये । लेख्यके च कृतालस्यो, नरः शीघ्रं विनश्यति ॥**

भ्रान्तिबहुलो हि जन्तुः, टिप्पनादि विना भ्रान्तौ मुधा कर्मबन्धादिदोषोऽपि । योगक्षेमादिसिद्ध्यर्थं च रविरिवेन्दुना राजादिः

१. छलेन इति को० ह० प्र० पाठः ।

कश्चिन्नायकोऽप्यनुसरणीयः, अन्यथा पदे पदे पराभवादिभावात् । उक्तश्च–

**सुहृदामुपकारकारणाद् द्विषतां चाप्यपकारकारणात् । नृपसंश्रय इष्यते बुधैर्जठरं को न बिभर्त्ति केवलम् ॥**

मन्त्रिवस्तुपालसाधुपेथडाद्यैरपि नृपाश्रयेणैव प्रासादाद्यनेकतत्तत्पुण्यकृत्यानि चक्रिरे । तथा द्यूतधातुवादादि दूरतः परिवर्जयेत् । यतः–

**जूअं धाउव्वाओ, अंजणसिद्धीरसायणे तण्हा । जक्खिणिविवरपवेसो, दइवे रुट्ठे मई होइ ॥**

यथा तथा शपथादिकं च न विदध्याद्, विशिष्य च देवगुर्वादिविषयम् । तदभिहितं–

**अलिएणवि सच्चेणवि, चेइअसम्मं करेइ जो मूढो । सो वमइ बोहिबीअं, अणंतसंसारिओ होइ ॥**

नापि परप्रतिभूत्वादिसङ्कटे प्रविशेत् । यत्कार्पासिकः–

**अनीश्वरस्य द्वे भार्ये, पथि क्षेत्रं द्विधा कृषिः । प्रातिभाव्यं च साक्ष्यञ्च, पञ्चाऽनर्थाः स्वयं कृताः ॥**

तथा मुख्यवृत्त्या निवासग्रामे एव वाणिज्यादि कार्यम् । तथा सति कुटुम्बावियोगगृहकार्यधर्मकार्याद्यसीदनादयो गुणाः । तथा निर्वाहाभावे निवासदेशान्तर्व्यवहरेद्, एवमपि शीघ्रं शीघ्रं निजस्थानाऽऽगमनसम्भवादिना प्रायः पूर्वोक्ता गुणाः । को नाम हि नाम पामरोऽपि निजस्थाने निर्वाहसम्भवे देशान्तरक्लेशमाश्रयेत् । उक्तमपि–

**जीवन्तोऽपि मृताः पञ्च श्रूयन्ते किल भारत ! । दरिद्रो व्याधितो मूर्खः प्रवासी नित्यसेवकः ॥**

अन्यथा च निर्वोढुमशक्तो यदि देशान्तरे व्यवहारं कुर्यात्तथापि न स्वयं नापि पुत्रादिभिः, किन्तु सुपरीक्षितवणिक्-पुत्रादिभिः । जातु स्वयमेव देशान्तरे यायात्, तदापि सुमुहूर्त्तशकुननिमित्तदेवगुरुवन्दनादिमाङ्गल्यविधिना बहुभाग्यवत्सार्थ-मध्यवर्त्ती निद्रादिप्रमादवर्जी कियद्भिः स्वकीयज्ञातीयसुपरिचितादिभिः सहैव सुयत्नेनैव व्रजेद् व्यवहरेत्तिष्ठेच्च । भाग्यवता चैकेनापि सार्थस्य विघ्नं टलति । यथैकविंशतिः पुरुषाः वर्षासु ग्रामान्तरे यान्तः सायं देवकुले स्थितास्तदा विद्युद् द्वारमागत्यागत्य याति तैश्च भीत्योक्तं, कोऽप्यात्मसु निर्भाग्योऽस्ति इत्येकैको देवकुलात् परितो भ्रान्त्वा आयातु तथा कृत्वा विंशतिः प्रविष्टाः । एकविंशे बलाद्बहिः कृष्टे विंशतेर्मूर्ध्नि विद्युत्पपात । तेष्वेक एव भाग्यवांस्ततो भाग्यवत्सार्थो ग्राह्यः । लभ्यदेयनिध्यादि च सर्वं पितृभ्रातृपुत्रादीनां च सर्वदापि ज्ञापयेत्, विशिष्य च प्रस्थानावसरे, अन्यथा दुर्दैवात्तस्यायुःसमाप्तौ सत्यपि विभवे पित्रादीनां मुधा दारिद्र्यादिदुःखं कृतं स्यात्, स्वकीयांश्च सर्वानपि यथार्हचिन्ताकरणशिक्षाप्रदानपूर्वं सबहुमानं सम्भाष्यैव प्रतिष्ठते । उक्तञ्च—

**अवमन्य माननीयान्निर्भर्त्स्य स्त्रीं च कमपि सन्ताड्य । बालमपि रोदयित्वा जिजीविषुर्नैव निर्गच्छेत् ॥**

आसन्नं च विशेषपर्वोत्सवादि कृत्वा व्रजति । यतः—

**उत्सवमशनं स्नानं प्रगुणं चोपेक्ष्य मङ्गलमशेषम् । असमापिते च सूतकयुगेऽङ्गनर्त्तौ च नो यायात् ॥**

एवमन्यदपि शास्त्राद्यनुसारेण यथोचितं चिन्तनीयम् । तथा चाह—

क्षीरं भुक्त्वा रतं कृत्वा स्नात्वाऽऽहत्य गृहाङ्गनाम् । वान्त्वा निष्ठीव्य चाक्रोशं, श्रुत्वा च प्रचलेन्न हि ॥
कारयित्वा नरः क्षौरमश्रुमोक्षं विधाय च । गच्छेद् ग्रामान्तरे नैव, शकुनाऽपाटवेन च ॥
कार्याय चलितः स्थानाद् वहन्नाडिपदं पुरः । कुर्वन् वाञ्छितसिद्धीनां भाजनं जायते नरः ॥
रोगिवृद्धद्विजान्धानां, धेनुपूज्यक्षमाभुजाम् । गर्भिणीभारभुग्नानां, दत्वा मार्गं व्रजेद्बुधः ॥
धान्यं पक्वमपक्वं वा, पूजार्हं मन्त्रमण्डलम् । न त्यक्तोद्वर्तनं लङ्घ्यं, स्नानाम्भोऽसृक्शवानि च ॥
निष्ठ्यूतश्लेष्मविण्मूत्रज्वलद्वह्निभुजङ्गमान् । मनुष्यमायुधं धीमान्, कदाऽप्युल्लङ्घयेन्न च ॥
नदीतीरे गवां गोष्ठे, क्षीरवृक्षे जलाश्रये । आरामेषु च कूपादाविष्टबन्धुं विसर्जयेत् ॥
क्षेमार्थी वृक्षमूलं न, निशीथिन्यां समाश्रयेत् । नासमाप्ते नरो दूरं, गच्छेदुत्सवसूतके ॥
नासहायो न चाज्ञातैर्नैव दासैः समं तथा । नातिमध्यन्दिने नार्द्धरात्रे मार्गे बुधो व्रजेत् ॥
क्रूरैरारक्षकैः कर्णेजपैः कारुजनैस्तथा । कुमित्रैश्च समं गोष्ठी, चर्यां चाकालिकीं त्यजेत् ॥
महिषाणां खराणाञ्च, धेनूनां चाधिरोहणम् । खेदस्पृशाऽपि नो कार्यमिच्छता श्रियमात्मनः ॥
गजात् करसहस्रेण, शकटात्पञ्चभिः करैः । श्रृङ्गिणोऽश्वाच्च गन्तव्यं, दूरेण दशभिः करैः ॥

नाशम्बलश्चलेन्मार्गे, भृशं सुप्यान्न वासरे । सहायानां च विश्वासं, विदधीत न धीधनः ॥
एकाकिना न गन्तव्यं, यदि कार्यशतं भवेत् । पश्य कर्कटमात्रेण, ब्राह्मणः परिरक्षितः ॥
एकाकिना न गन्तव्यं, कस्याप्येकाकिनो गृहे । नैवापरपथेनापि, विशेत् कस्यापि वेश्मनि ॥
न जीर्णां नावमारोहेन्नद्यामेको विशेन्न च । न चातुच्छमतिर्गच्छेत् सोदर्येण समं पथि ॥
न जलस्थलदुर्गाणि विकटामटवीं न च । न चागाधानि तोयानि, विनोपायं विलङ्घयेत् ॥
भूयांसः कोपना यत्र, भूयांसः सुखलिप्सवः । भूयांसः कृपणा यत्र, स सार्थः स्वार्थनाशकः ॥
सर्वे यत्र च नेतारः, सर्वे पण्डितमानिनः । सर्वे महत्त्वमिच्छन्ति, तद्वृन्दमवसीदति ॥
बद्धवध्याश्रये द्यूतस्थाने परिभवास्पदे । भाण्डागारे न गन्तव्यं, परस्याऽन्तःपुरे न च ॥
अमनोज्ञे श्मशाने च, शून्यस्थाने चतुष्पथे । तुषशुष्कतृणाकीर्णे, विषमावकरोषरे ॥
वृक्षाग्रे पर्वताग्रे च, नदीकूपतटे स्थितिम् । न कुर्याद् भस्मकेशेषु, कपालाङ्गारकेषु च ॥
कालकृत्यं न मोक्तव्यमतिखिन्नैरपि ध्रुवम् । नाप्नोति पुरुषार्थानां, फलं क्लेशाऽजितः पुमान् ॥
भवेत् परिभवस्थानं पुमान् प्रायो निराकृतिः । विशेषाडम्बरस्तेन, न मोच्यः सुधिया क्वचित् ॥

देशान्तरगतश्च विशिष्य यथार्हाऽऽडम्बरसर्वाङ्गीणधर्मनिष्ठो भूयात्, तथैव महत्त्वबहुमानविलोक्यमानकार्यसिद्ध्यादिसम्भवात् । विदेशे च बहुबहुलाभाप्तावपि नातिबहु तिष्ठेद् बहुस्थितौ गृहसूत्रवैसंस्थूल्यादिदोषापत्तेः, काष्ठश्रेष्ठ्यादेरिव । समुदितक्रय-विक्रयादिप्रारम्भे चाविघ्नेनाभिमतलाभादिकार्यसिद्ध्यर्थं पञ्चपरमेष्ठिस्मरणश्रीगौतमादिनामग्रहणकियत्तद्वस्तुश्रीदेवगुर्वाद्युपयोगित्व-करणादि कर्त्तव्यं, धर्मप्राधान्येनैव सर्वत्र साफल्यभावात् । धनार्जनार्थमुपक्रमं कुर्वाणेन च सप्तक्षेत्रीव्ययादिधर्ममनोरथा निरन्तरं महान्त एव कर्त्तव्याः । ऊचुश्च—

**उच्चैर्मनोरथाः कार्याः, सर्वदैव मनस्विना । विधिस्तदनुमानेन, संपदे यतते यतः ॥**

**यत्नः कामार्थयशसां, कृतोऽपि विफलो भवेत् । धर्मकर्मसमारम्भसङ्कल्पोऽपि न निष्फलः ॥**

लाभसम्भवे च तदनुरूपं तान् मनोरथान् सफलीकुर्यात् । यतः—

**ववसायफलं विहवो, विहवस्स फलं सुपत्तविणिओगो । तयभावे ववसाओ, विहवोवि अ दुग्गइनिमित्तं ॥**

एवञ्च निजऋद्धेर्धर्मर्द्धित्वं स्यादन्यथा तु पापर्द्धित्वम् । उक्तञ्च—

**धम्मिड्ढी भोगिड्ढी, पाविड्ढी इअ तिहा भवे इड्ढी । सा भन्नइ धम्मिड्ढी, जा दिज्जइ धम्मकज्जेसु ॥**

**सा भोगिड्ढी गिज्जइ, सरीरभोगम्मि जीइ उवओगो । जा दाणभोगरहिआ, सा पाविड्ढी अणत्थफला ॥**

**पाविड्ढी पाविज्जइ, फलेण पावस्स पुव्वविहिअस्स । पावेण भाविणा वा, इत्थत्थे सुणह दिट्ठंतं ॥**

वसन्तपुरे चत्वारो मित्राणि क्षत्रिय-ब्राह्मण-वणिक्-स्वर्णकाराः । देशान्तरेऽर्थार्थं गताः । रात्रावुद्याने स्थिताः । तत्र शाखायां लम्बमानं स्वर्णपुरुषं ददृशुः । एकेनोक्तम्, अर्थः । स्वर्णपुरुषेणोक्तम्, अर्थः पुनरनर्थप्रदः । तत् श्रुत्वा सर्वैर्भीत्या त्यक्तः । स्वर्णकारेणोक्तं पत, पश्चात्पतितः । तेनाङ्गुलिं कर्त्तयित्वा गर्त्तायां क्षिप्तः सर्वैरपि दृष्टः । तेषां मध्ये द्वयं भोजनानयनाय पुरान्तर्गतम् । द्वयं तु बहिः स्थितं । मध्यगतद्वयेन बहिःस्थतन्मारणाय विषान्नमानीतम् । बहिःस्थितेन मध्यादागच्छद्द्वयं खड्गेन हत्वा विषान्नं भुक्तम् । सर्वे मृताः एषा पापर्द्धिः ।

अतो देवपूजाऽन्नदानादिकैः प्रत्यहं पुण्यैः सङ्घपूजासाधर्मिकवात्सल्यादिकैरवसरपुण्यैश्च निजर्द्धिः पुण्योपयोगिनी कार्या । यद्यप्यवसरपुण्यानि बहुव्ययसाध्यत्वेन महान्ति, प्रत्यहं पुण्यानि च लघूनि तथापि प्रत्यहं पुण्येषु निरन्तरं भवत्सु भूयस्तरं फलं, तत्पूर्वकमेवावसरपुण्यकरणस्यौचित्यात् । न च धनस्तोकत्वादिना धर्मकार्यविलम्बादि कार्यम् । यदुवाच–

**देयं स्तोकादपि स्तोकं, न व्यपेक्ष्यो महोदयः । इच्छानुसारिणी शक्तिः, कदा कस्य भविष्यति ॥**

**श्वःकार्यमद्य कुर्वीत, पूर्वाह्णे चापराह्णिकम् । न हि मृत्युः प्रतीक्षेत, कृतं चास्य न वा कृतम् ॥**

अर्थार्जनार्थमपि यथार्हं प्रत्यहं प्रयतते । यतः–

**वणिग् वेश्या कविर्भट्टस्तस्करः कितवो द्विजः । यत्रोऽपूर्वार्थलाभो न, मन्यते तदहर्वृथा ॥**

न च स्वल्पसम्पदैव तदुद्यमान्निवर्त्तते । यन्माघः–

**संपदा सुस्थितम्मान्यो, भवति स्वल्पयापि यः । कृतकृत्यो विधिर्मन्ये, न वर्द्धयति तस्य ताम् ॥**

नाप्यतितृष्णां कुर्यात् । यल्लोकेऽप्युक्तं-

**अतिलोभो न कर्तव्यो, लोभं नैव परित्यजेत् । अतिलोभाभिभूतात्मा, सगरः सागरं गतः ॥**

न च यावदित्थं कस्यापि प्राप्तिसम्भवो, नहि रङ्कश्चक्रित्वाद्युच्चैरभिलषन् अपि कदाप्याप्नोति । भोजनाच्छादनादि तु प्राप्नोत्यपि । तदवादिष्म–

**स्वानुमित्या मितीकुर्यादिच्छामिच्छाफलार्थिकः । लोकेऽपि लभ्येत मितं, मार्गितं नाऽमितं क्वचित् ॥**

ततः स्वभाग्याद्यनुसारेणैवेच्छां कुर्याद्, अधिकाधिकेच्छायां तु तदलाभात्तदर्त्याऽतिदुःखितैव स्यात् । कोटीपूरणार्थ-बहुक्लेशसासहिनवनवतिटङ्कलक्षाधिपधनश्रेष्ठ्यादिवत् । आख्यातं च–

**आकाङ्क्षितानि जन्तूनां, सम्पद्यन्ते यथा यथा । तथा तथा विशेषाप्तौ, मनो भवति दुःखितम् ॥**

**आशादासस्तु यो जातो, दासस्त्रिभुवनस्य सः । आशा दासीकृता येन, तस्य दास्ये जगत्त्रयी ॥**

गृहस्थेन चान्योन्याप्रतिबन्धेन त्रिवर्गोऽपि साध्यः । यतः–

**धम्मो अत्थो कामो, पुरिसत्था वन्निया तओ लोए । तिण्हंपि जहावसरं, सेवा संसिज्जइ बुहेहिं ॥**

तत्र धर्मार्थयोरुपघातेन तादात्विकविषयसुखलुब्धो वनगज इव को नाम न भवत्यास्पदमापदाम् । न च तस्य धनं धर्मः शरीरं वा यस्य कामेऽत्यन्तासक्तिः । धर्मकामातिक्रमाद्धनमुपार्जितं परेऽनुभवन्ति, स्वयं तु परं पापस्य भाजनं सिंह इव सिन्धुरवधात्। अर्थकामातिक्रमेण च धर्मसेवा यतीनामेव धर्मो न गृहस्थानाम् । न च धर्मबाधयाऽर्थकामौ सेवेत, यतो बीजभोजिनः कुटुम्बिन इव नास्त्यधार्मिकस्यायत्यां किमपि कल्याणम् । उक्तञ्च सोमनीतावपि—

**स खलु सुखी योऽमुत्रसुखाविरोधेनेहलोकसुखमनुभवतीति ।**

एवमर्थबाधया धर्मकामौ सेवमानस्य ऋणाधिकत्वं, कामबाधया धर्मार्थौ सेवमानस्य गार्हस्थ्यसुखाद्यभावः स्यात् । एवं तादात्विक-मूलहर-कदर्येषु धर्मार्थकामानामन्योन्यबाधा सुलभैव । तथाहि—यः किमप्यसञ्चिन्त्योत्पन्नमर्थमपव्येति स तादात्विकः १। यः पितृपैतामहमर्थमन्यायेन भक्षयति स मूलहरः २। यो भृत्यात्मपीडाभ्यामर्थं सञ्चिनोति, न च क्वचिदपि व्ययते स कदर्यः ३। तत्र तादात्विकमूलहरयोरर्थभ्रंशेन धर्मकामयोर्विनाशान्नास्ति कल्याणम् । कदर्यस्य त्वर्थसङ्ग्रहो राजदायादभूमितस्कारादीनां निधिः, न तु धर्मकामयोर्हेतुः । यतः—

**दायादाः स्पृहयन्ति तस्करगणा मुष्णन्ति भूमिभुजो, गृह्णन्तिच्छलमाकलय्य हुतभुग् भस्मीकरोति क्षणात् ।**
**अम्भः प्लावयते क्षितौ विनिहितं यक्षा हरन्ते हठात्, दुर्वृत्तास्तनया नयन्ति निधनं धिग् बह्वधीनं धनम् ॥**

**मृत्युः शरीरगोप्तारं, रक्षितारं धनं धरा । दुश्चारिणीव हसति, स्वपतिं पुत्रवत्सलम् ॥**

**कीटकासञ्चितं धान्यं मक्षिकासञ्चितं मधु । कृपणोपार्जिता लक्ष्मीः परैरेवोपभुज्यते ॥**

अतस्त्रिवर्गस्य बाधा गृहस्थस्य कर्त्तुमनुचिता, यदा तु दैववशाद्भवति, तदोत्तरोत्तरबाधायां पूर्वपूर्वबाधा रक्षणीया । तत्र कामबाधायां धर्मार्थयोर्बाधा रक्षणीया, तयोः सतोः कामस्य सुकरोत्पादत्वात् । कामार्थयोर्बाधायां धर्मो रक्षणीयो धर्ममूलत्वादर्थ-कामयोः । उक्तञ्च–

**धर्मश्चेन्नावसीदेत, कपालेनापि जीवतः । आढ्योऽस्मीत्यवगन्तव्यं, धर्मवित्ता हि साधवः ॥**

**त्रिवर्गसंसाधनमन्तरेण, पशोरिवायुर्विफलं नरस्य । तत्रापि धर्मं प्रवरं वदन्ति, न तं विना यद्भवतोऽर्थकामौ ॥**

आयोचितश्च व्ययः । यन्नीतिशास्त्रम्–

**पादमायान्निधिं कुर्यात् पादं वित्ताय कल्पयेत् । धर्मोपभोगयोः पादं, पादं भर्त्तव्यपोषणे ॥** केचित्त्वाहुः–

**आयादर्द्धं नियुञ्जीत, धर्मे समधिकं ततः । शेषेण शेषं कुर्वीत, यत्नतस्तुच्छमैहिकम् ॥**

निर्द्रव्यसद्द्रव्ययोरयं विभाग इत्यप्येके । तथा–

**जीअं कस्स न इट्ठं, कस्स य लच्छी न वल्लहा होइ । अवसरपत्ताइं पुणो दुन्नवि तणयाउ लहुअंति ॥**

**यशस्करे कर्मणि मित्रसङ्ग्रहे, प्रियासु नारीष्वधनेषु बन्धुषु ।**
**धर्मे विवाहे व्यसने रिपुक्षये, धनव्ययोऽष्टासु न गण्यते बुधैः ॥**

**यः काकणीमप्यपथप्रपन्नामन्वेषते निष्कसहस्त्रतुल्याम् ।**
**काले च कोटिष्वपि मुक्तहस्तस्तस्यानुबन्धं न जहाति लक्ष्मीः ॥**

यथा कस्यापीभ्यस्य नव्या स्नुषा श्वसुरं दीपात्पतिततैलच्छटया उपानहमभ्यञ्जन्तं वीक्ष्य किमिदमतिकार्पण्यमुतातिवैविक्त्यमिति सन्दिहाना परीक्षार्थं मे शीर्षं दुष्यति इति मिषात्सुप्ता भृशं क्रन्दति । श्वशुरेण बहुप्रतिकारकरणे तयोक्तं, मम प्रागप्यन्तराऽन्तरा एवं मान्द्यं स्याद् । गुणस्तु जात्यमुक्ताफलचूर्णलेपेनैव स्यात् । तदा श्वशुरो हृष्टः तान्यानीय यावद्वर्त्तयति, तावत्तया सम्यक् स्वरूपमुक्तम् ।

धर्म्ये व्ययश्च श्रीवशीकरणं तेनैव तस्याः स्थिरीभावात् । भाष्यतेऽपि—

**मा मंस्थाः क्षीयते वित्तं, दीयमानं कदाचन । कूपारामगवादीनां, ददतामेव संपदः ॥**

यथाहि—विद्यापतिश्रेष्ठि बहुसमृद्धो दशमदिने यास्यामीति स्वप्नान्तर्लक्ष्म्योक्तः कान्तागिरा तद्दीन एव सर्व धनं सप्तक्षेत्रादौ व्यय्य कृतपरिग्रहमानः सुखं सुप्तः, प्रातर्गृहं प्राग्वत् पूर्णं दृष्ट्वा पुनः सर्व व्ययति स्म । एवं नवदिनी गता, दशमदिने

त्वत्पुण्यैरहं सुस्थिरीभूता इति लक्ष्म्योक्ते व्रतभङ्गभिया पुरं त्यक्त्वा बहिःस्थोऽपुत्रनृपमृतेरधिवासितगजेनाभिषिक्तो दिव्यगिरा [1]निजं राजानं कृत्वा राज्यं निर्वाह्य पञ्चमभवे सिद्धः । एवं चार्थोपार्जननमशङ्कनीयत्व-प्रशंसनीयत्व-हान्यविषयत्व-सुखसमाधि-वृद्धिहेतुत्व-पुण्यकार्योपयोगित्वादिनेहलोकपरलोकहितं । पठितञ्च—

**सर्वत्र शुचयो धीराः, स्वकर्मबलगर्विताः । कुकर्मनिहतात्मानः, पापाः सर्वत्र शङ्किताः ॥**

अत्र ज्ञातम् । यथा—देव-यशोनामानौ द्वौ वणिजौ मिथः प्रीत्या सह व्यवहरन्तौ क्वापि पुरे मार्गे मणिकुण्डलं पतितं ददृशतुः । आद्यः सुश्रावकत्वाद् दृढव्रतः परद्रव्यं सर्वथाऽनर्थभूतं मन्वानः पश्चादेव निवृत्तः । द्वितीयोऽपि सह निवृत्तः परं न पतितग्रहणेऽधिकदोषः इति ध्यात्वा वृद्धस्य दृष्टिं वञ्चयित्वा तज्जगृहे । दध्यौ च, धन्योऽयं यस्येदृशी निःस्पृहता । परं मित्रत्वात् संविभागिनं करिष्याम्येनं सुयुक्त्या इति । तद् गुप्तीकृत्याऽन्यत्र पुरे गत्वा तेन कुण्डलेन प्रभूतभाण्डमाददे । क्रमात्-स्वस्थानमागतौ तौ । आनीतभाण्डविभजनेऽतिप्रभूतं भाण्डं दृष्ट्वा देवेन निर्बन्धात् पृष्टः स यथावदाचष्ट । देवेनोक्तम्, अन्या-यार्जितमिदं सर्वथा न ग्रहणार्हम् । अनेन न्यायार्जितस्वधनस्याप्यवश्यं विनाशः स्यात्, काञ्जिकेनेव दुग्धस्य इत्युक्त्वा तत्सर्वं पृथक् कृत्य तस्मै दत्तं । एवमागतं वित्तं कथं त्यज्यते ? इति लोभात् सर्व स्वं भाण्डशालायां गृहीत्वा गतः । रात्रौ च चौरैः

१. जिनं इति को० ह० प्र० पाठः ।

सर्वं मुषितं । प्रभाते तद्वस्तुग्राहकैरतिप्रभूतैरागतैर्देवस्य द्विगुणमूल्यादिनाऽतिलाभो जातः । ततो द्वितीयोऽपि सुश्रावकीभूय व्यवहारशुद्ध्या धनार्जनात् सुखी जज्ञे । **इति न्यायान्यायधनार्जने मित्रद्वयवृत्तम् ।**

अत्रैव लौकिकं ज्ञातं यथा—चम्पायां सोमः क्ष्मापतिः, सूर्यपर्वणि दानार्थं शुभं द्रव्यं योग्यं च पात्रं मन्त्रिपार्श्वे प्रपच्छ । मन्त्र्याह, पात्रमेकोऽत्र विप्रोऽस्ति परं शुभद्रव्यं दुर्लभं, विशिष्य च राज्ञः यतः—

**दातुर्विशुद्धवित्तस्य, गुणयुक्तस्य चार्थिनः । दुर्लभः खलु संयोगः, सुबीजक्षेत्रयोरिव ॥**

ततो नृपः पर्वोपरि पात्रदानायाष्टदिनै रात्रौ नष्टचर्यया वणिजां हट्टेषु वणिक्पुत्रार्हं कर्म निर्माय तन्मूल्येऽष्टौ द्रम्मानर्जयामास । पर्वणि च सर्वान् द्विजानाकार्य पात्रविप्राऽऽकारणाय प्रधानं प्रैषीत् । तेन गत्वा स आकारितः । प्रत्याह—

**यो राज्ञः प्रतिगृह्णाति, ब्राह्मणो लोभमोहितः । तमिस्त्रादिषु घोरेषु, नरकेषु स पच्यते ॥**

**राज्ञः प्रतिग्रहो घोरो, मधुमिश्रविषोपमः । पुत्रमासं वरं भुक्तं, न तु राज्ञः प्रतिग्रहः ॥**

**दशशूनासमश्चक्री, दशचक्रिसमो ध्वजः । दशध्वजसमा वेश्या, दशवेश्यासमो नृपः ॥**

इति पुराणस्मृत्यादिवचनाद् दुष्टं राजप्रतिग्रहं न गृह्णामि । प्रधानेनोक्तं, राजा न्यायेन स्वभुजार्जितं सद्वित्तमेव दास्यति, तद्ग्रहणे तव न कश्चिद्दोषः इत्याद्युक्त्या प्रबोध्य तं राज्ञोऽन्तिकमानयत् । राज्ञा हृष्टेन स्वासनढौकनपादधावनादिबहुविनयेन तेऽष्टौ द्रम्मास्तन्मुष्टिमध्येऽक्षिप्यन्त । अस्मै किञ्चित्सारमर्पितम् इति किञ्चित्सरुषोऽप्यन्ये विप्रा हेमादिदानतः समतोष्यन्त । सर्वे च

विसृष्टाः । षण्मास्यादिना तत्सर्वं क्षीणं तेषाम् । ते त्वष्टौ द्रम्माः पात्रद्विजेन भोजनवेषप्रमुखकार्येषु व्यापार्यमाणा अपि न्यायार्जितत्वेन नाक्षीयन्त । चिरेणाप्यक्षयनिधिवत् सुबीजवच्च श्रियो वृद्धयै जज्ञिरे । **इति न्यायार्जितवित्ते सोमनृपप्रबन्धः ।**

इह न्यायार्जितवित्तसत्पात्रविनियोगाभ्यां चतुर्भङ्गी । तत्र न्यायागतविभवसत्पात्रविनियोगरूपः प्रथमो भङ्गोऽक्षेपेण पुण्यानुबन्धिपुण्यहेतुत्वात्सुदेवत्व-भोगभूमिमनुष्यसम्यक्त्वादिप्राप्त्या आसन्नसिद्धिफलो धनसार्थवाहशालिभद्रादिवत् १। न्यायागतद्रव्य-यत्तत्पात्रपोषरूपो द्वितीयो भङ्गः, पापानुबन्धिपुण्यहेतुत्वाद्यत्र तत्र भवेषु भोगमात्रफलोऽपि प्रान्ते विरसफल एव, यथा लक्ष्य-भोज्यकृद् विप्रो बहुभवेषु किञ्चिद्भोगादिसुखानि भुक्त्वा सेचनकनामा सर्वाङ्गसुलक्षणो भद्रहस्ती जातो, लक्षभोज्योद्धरितान्नादि-सुपात्रदानदायिनिःस्वद्विजजीवं सौधर्मे सुरीभूय च्युतं श्रेणिकसुतं राजकन्यापञ्चशतीपरिणेतारं नन्दिषेणकुमारं दृष्ट्वा जातजातिस्मृतिरपि प्रथमनरकगामी २। अन्यायायातविभव-सत्पात्रपरिपोषरूपस्तृतीयः, सुक्षेत्रोप्तसामान्यबीज-फलप्ररोहवदायतौ सुखप्रसवानुबन्धितया राज्ञां व्यापारिणां बह्वारम्भोपार्जितद्रव्याणां चानुज्ञातः । यतः—

**काशयष्टिरिवैषा श्रीरसारा विरसाऽप्यहो । नीतेक्षुसमतां धन्यैः सप्तक्षेत्रीनिवेशनात् ॥**

**खलोऽपि गवि दुग्धं स्याद् दुग्धमप्युरगे विषम् । पात्रापात्रविशेषेण, तत्पात्रे दानमुत्तमम् ॥**

**सा साइ तं पि जलं, पत्तविसेसेण अंतरं गुरुअं । अहिमुहपडिअं गरलं, सिप्पउडे मुत्तअं होइ ॥**

अत्रार्बुदोपरि चैत्यकारमन्त्रीविमलादयो दृष्टान्ताः प्रतीताः । महारम्भाद्यनुचितवृत्तिसञ्चितं हि द्रव्यं सुक्षेत्रवापादि विना दुष्कीर्तिदुर्गतिफलमेवमम्मणश्रेष्ठ्यादिवत् ॥ अन्यायार्जितार्थकुपात्रपोषरूपश्चतुर्थ इह साधुजनगर्हितत्वत् परत्र कुगतिनिबन्धनत्वाच्च त्याज्य एव विवेकिनाम् । यतः—

**अन्यायोपात्तवित्तस्य, दानमत्यन्तदोषकृत् । धेनुं निहत्य तन्मांसैर्ध्वाङ्क्षाणामिव तर्पणम् ॥**

**अन्यायोपार्जितैर्वित्तैर्यत् श्राद्धं क्रियते जनैः । तृप्यन्ते तेन चाण्डाला, बक्कसा दासयोनयः ॥**

**दत्तः स्वल्पोऽपि भद्राय, स्यादर्थो न्यायसङ्गतः । अन्यायात्तः पुनर्दत्तः, पुष्कलोऽपि फलोज्झितः ॥**

**अन्यायोपात्तवित्तेन, यो हितं हि समीहते । भक्षणात्कालकूटस्य, सोऽभिवाञ्छति जीवितम् ॥**

इह चान्यायार्थोपजीविनो गृहस्थादेः प्रायेणाऽन्यायकलहाऽहङ्कारपापबुद्धिप्रवृत्तिरेव रङ्कश्रेष्ठ्यादिवत् । यथा—

मरुस्थल्यां पल्लीग्रामे काकुयाक-पाताकौ भ्रातरौ, तयोः कनीयान् धनी, ज्यायांस्तु निःस्वत्वेन तद्गृहे भृत्यवृत्त्या निर्वहते। एकदा वर्षारात्रौ दिवसकर्मपरिश्रान्तः काकुयाको रात्रौ प्रसुप्तः पाताकेनाभिदधे—भ्रातः ! स्वकेदाराः पयःपूरैः स्फुटितसेतवः, तव तु निश्चिन्तता इत्युपालब्धः स तदा त्यक्तस्रस्तरः स्वं दरिद्रं परगृहकर्मकारिणं निन्दन् कुद्दालं लात्वा यावत्तत्र याति, तावत् कर्मकरान् स्फुटितसेतुबन्धरचनापरान् दृष्ट्वा के यूयं ? इति पृष्टाः भवद्भ्रातुः कर्मकराः इति तैरुक्ते, क्वापि मदीयास्ते

सन्तीति ? पृष्टे, वलभीपुर्यां सन्तीति ते प्राहुः । अथ कालक्रमेण प्रस्तावं प्राप्य वलभ्यां गतः सकुटुम्बः । तत्र गोपुरासन्नवास्याभीराणां सन्निधौ निवसन्नत्यन्तकृशतया तै रङ्क इति दत्ताभिधानस्तार्णमुटजं कृत्वा तेषामवष्टम्भेन हट्टं मण्डयित्वा तस्थौ । एकदा कश्चित्कार्पटिकः कल्पप्रमाणेन रेवतशैलादलाबुना सिद्धरसमादाय मार्गे काकुतुम्बडी इति सिद्धरसादशरीरिणि वाणी निशम्य जातभीर्वलभीपरिसरे तस्य सच्छद्मनो वणिजः सद्मनि तदलाबु तत्र न्यासीचक्रे । स स्वयं सोमनाथयात्रार्थं गतः । कस्मिन्नपि पर्वणि पाकविशेषाय चुल्लीनिहितां तापिकामलाबुरन्ध्राद् गलितरसबिन्दुना हिरण्यमयीं निभाल्य स वणिक् तं सिद्धरसं निर्णीय तदलाबुसहितं गृहसारमन्यत्र स्थापयित्वा स्वगृहं ज्वालयित्वा परस्मिन् गोपुरे गृहं कृत्वा स्थितः । तत्र निवसन् प्राज्यक्रयकारिण्याः स्वयं घृतं तोलयंस्तदक्षीणतादर्शनाद् घृतपात्रस्याधः कृष्णचित्रकुण्डलिकां निश्चित्य केनापि च्छद्मना तां गृहीतवान् । एवं कपटकूटतुलामानव्यवहारादिभिः पापानुबन्धिपुण्यबलेन व्यवसायपरस्य रङ्कश्रेष्ठिनो मिलितं बहु द्रव्यम् । एकदा कश्चित्स्वर्णसिद्धिकर्त्ता मिलितः । सोऽपि कपटवृत्त्या वञ्चितो, गृहीता सुवर्णसिद्धिः । एवं त्रिविधसिद्ध्याऽनेककोटिधनेश्वरो जातः । परम् अन्यायार्जितविभवपरिशीलनेन पूर्वनिर्धनस्य पश्चाद्धनसम्पत्त्युत्सेकतया च क्वापि तीर्थे सत्पात्रेऽनुकम्पास्थाने वा स्वश्रियो न्यासो दूरे तिष्ठतु, प्रत्युत सकललोकोच्चाटननवनवकरवर्द्धनाऽहङ्कारपोषाऽन्यधनिस्पर्धामत्सरादिभिस्तां रमां काल-रात्रिरूपां लोकायाऽदर्शयत् । अथान्यदा स्वसुतारत्नखचितकङ्कतिकायां राज्ञा स्वपुत्रीकृते मार्गितायां पश्चात्प्रसभमपहृतायां तद्विरोधात्स्वयं म्लेच्छमण्डले गत्वा कनककोटीर्दत्वा मुद्गलान् समानयत् । तैर्देशभङ्गे कृते रङ्केन राज्ञः सूर्यमण्डला-

गच्छत्तुरगरक्षकान् रहोदानैर्विभेद्य कूटप्रपञ्चः कारितः । पुरा हि राजा सूर्यवरप्राप्तं दिव्यतुरगमारोहति तदनु सङ्केतितपुरुषैः, पञ्चशब्दवादनं क्रियते । तुरगो व्योम्नि याति । तमारूढो नृपो वैरिणो हन्ति । सङ्ग्रामसमाप्तौ तुरगः सूर्यमण्डलं प्रविशति । तदा च रङ्कभेदितपञ्चशब्दवादकै राज्ञस्तुरगारोहणात्पूर्वमेव पञ्चशब्दनादः कृतः । तुरगः समुड्डीय गतः । शिलादित्यनृपः किंकर्तव्यता–मूढस्तैर्निजघ्ने । तदनु सुखेन वलभीभङ्गः सूत्रितः । उक्तञ्च–

**पणसयरीवासायं तिभि सयाहिं अइक्कमेऊणं । विक्कमकालाउ तओ, वलहीभंगो समुप्पन्नो ॥**

मुद्गला अपि निर्जले पातयित्वा मारिताः । **इति रङ्कश्रेष्ठिसम्बन्धः** । एवमन्यायवित्तविलसितं ज्ञात्वा न्यायेनार्थार्जने यतनीयम् । यतः–

**विहाराहारव्याहारव्यवहारास्तपस्विनाम् । गृहिणां तु व्यवहार, एव शुद्धो विलोक्यते ॥**

व्यवहारशुद्ध्यैव च सर्वोऽपि धर्मः सकलः । यद्दिनकृत्यकृत्–

**ववहारसुद्धि धम्मस्स, मूलं सव्वन्नु भासए । ववहारेणं तु सुद्धेणं, अत्थसुद्धी जओ भवे ॥** १५९

**सुद्धेणं चेव अत्थेणमाहारो होइ सुद्धओ । आहारेणं तु सुद्धेणं, देहसुद्धो जओ भवे ॥** १६०

**सुद्धेणं चेव देहेणं, धम्मजुग्गो अ जायई । जं जं कुणइ किच्चं तु, तं तं से सफलं भवे ॥** १६१

**अन्नहा अफलं होइ, जं जं किच्चं तु सो करे । ववहारसुद्धिरहिओ अ, धम्मं खिंसावए जओ ॥** १६२

**धम्मखिंसं कुणंताणं, अप्पणो अ परस्स य । अबोही परमा होइ, इअ सुत्ते विभासिअं ॥** १६३

**तम्हा सव्वपयत्तेणं, तं तं कुज्जा विअक्खणो । जेण धम्मस्स खिंसं तु, न करे अबुहो जणो ॥** १६४

लोकेऽप्याहारानुसारेण पिण्डप्रकृतिबन्धो दृश्यते । यथा तुरङ्गमा बाल्ये महिष्याः पीतपयस्काः पयसि पतन्ति । गवां पीतदुग्धाः पानीयात् दूर एव तिष्ठन्ति । तथा मनुष्योऽपि बाल्याद्यवस्थाभुक्ताहारानुसारिप्रकृतिर्जायते । अतो व्यवहारशुद्धयै सम्यगुपक्रम्यम् । इति व्यवहारशुद्धिस्वरूपम् ।

तथा देशादिविरूद्धपरित्यागो, देशकालनृपादिविरूद्धवर्जनम् । यदुक्तं हितोपदेशमालायां—

**देसस्स य कालस्स य, निवस्स लोगस्स तहय धम्मस्स । वज्जंतो पडिकूलं, धम्मं सम्मं च लहइ नरो ॥**

तत्र सौवीरेषु कृषिकर्म, लाटेषु सुरासन्धानं देशविरुद्धम् । अन्यदपि यद्यत्र देशे शिष्टजनैरनाचीर्णं तत् तत्र देशविरुद्धम् । जातिकुलाद्यपेक्षया वानुचितं देशविरुद्धं, यथा ब्राह्मणस्य सुरापानं तिललवणादिविक्रयश्च । उक्तं हि तत्समये—

**तिलवल्लघुता तेषां, तिलवच्छ्यामतां पुनः । तिलवच्च निपीड्यन्ते, ये तिलव्यवसायिनः ॥**

कुलमपेक्ष्य च चौलुक्यानां मद्यपानं देशविरुद्धम् । अन्यदेशिकानां पुरस्तद्देशनिन्दाविधानादि वा देशविरुद्धम् ।१

कालविरुद्धं त्वेवं शीततौं हिमालयपरिसरेऽत्यन्तशीते, ग्रीष्मर्त्तावन्तजाङ्गले मरुस्थले, वर्षास्वत्यन्तपिच्छलपङ्काकुलेष्वपरदक्षिण-समुद्रपर्यन्तभागेषु, तथातिदुर्भिक्षे, मिथो नृपद्वयविरोधे, धाट्यादिना मार्गरोधे, दुरुत्तारमहारण्ये, यामिनीमुखादिभयवेलायां वा तादृक्सामर्थ्यसहायादिदृढबलं विना प्रस्थानं प्राणधननाशाद्यनर्थकृत् करोति । यद्वा फाल्गुनमासाद्यनन्तरं तिलपीलनतिलव्यव-वसायतिलभक्षणादि, वर्षासु वा तन्दुलीयकादिपत्रशाकग्रहणादि, बहुजीवाकुलभूमौ शकटखेटनादि वा महादोषहेतुं करोति, तच्च कालविरुद्धम् २। राजादेर्दोषग्रहणं, राज्ञः सम्मतानामसम्माननं, राज्ञोऽसम्मतानां सङ्गतिः, वैरिस्थानेषु लोभाद् गतिः, वैरि-स्थानागतैः सह व्यवहारादि, राज्ञः प्रसादे स्वच्छन्देन राजकृत्येष्वपि विधिनिषेधकरणं, नागराणां प्रतिकूलाचरणं, स्वामिद्रोहादि च राज-विरुद्धं। दुस्सहोदर्कं भुवनभानुकेवलिजीवरोहिण्यादेरिव । सा हि नैष्ठिक्यधीतस्वाध्यायलक्षाऽपि विकथारसान्मुधा राज्ञ्या दुःशीलतादिवादिनी रुष्टनृपेण मान्योत्तमश्रेष्ठिपुत्रीत्वादिना जिह्वाच्छेदादिभिः खण्डशोऽकृता (?) देशनिर्वासनादिदुःखिनी नाना भवेषु जिह्वाच्छेदादि सेहे ३।

लोकस्याऽनिन्दा, विशिष्य च गुणसमृद्धस्य । इयमात्मोत्कर्षश्च लोकविरुद्धौ । यतः—

**संतेहिं असंतेहिं अपरस्स किं जंपिएहिं दोसेहिं । अत्थो जसो न लंभइ, सोवि अमित्तो कओ होइ ॥**

**सुट्ठुवि उज्जममाणं, पंचेव करिंति रित्तयं समणं । अप्पथुई परनिंदा, जिब्भोवत्था कसाया य ॥**

**जइ संति गुणा नणु, अभणिआवि काहिंति अत्तउक्करिसं । अह तेवि न संति मुहा, अत्तुक्करिसेण किं तेण ॥**

**मित्ता हसंति निंदति, बंधवा गुरुजणा उविक्खंति । पिअरोपि न बहु मन्नंति, अप्पबहुमाणिणं पुरिसं ॥**

**परपरिभवपरिवादादात्मोत्कर्षाच्च बध्यते कर्म । नीचैर्गोत्रं प्रतिभवमनेकभवकोटिदुर्मोचम् ॥**

**परनिन्दा महापापं, परपापान्यहो यतः । अकर्तृत्वेऽपि लुम्पन्ति, तत्कर्त्री जरती यथा ॥**

सुग्रामे सुन्दरश्रेष्ठी, धर्मी, यात्रिकादीनां भोजनवासस्थानाद्युपकारी । तत्प्रातिवेश्मिकी जरद्विप्री तं निन्दति, यात्रिका विदेशे म्रियन्ते, तन्न्यासादिलोभात्तानेष सत्यापयतीति । अन्यदा क्षुत्तृषार्त्तः कार्पटिको गृहेऽभावादाभीर्याः तक्रमानाय्य पायितो मृतः, आभीरीशिरःस्थतक्रभाण्डे शकुनिकाधृताहिमुखपतितगरलेन । विप्री हृष्टोचे, अहो ! धर्मित्वं तदा खे स्थिता हत्या दध्यौ, दाता शुद्धः, सर्पोऽज्ञः परवशश्च, शकुनिका सर्पाशना, आभीर्यज्ञा, तत्कस्य लगामि ? इति ध्यात्वा विप्रीं विवेश । तया सा श्यामा कुब्जा कुष्ठिनी जज्ञे । **इत्यसद्दोषोक्तौ लौकिकज्ञातम् ।** सद्दोषोक्तौ राज्ञोऽग्रे वैदेशिकानीतत्रिकपालीपरीक्षा पण्डितकृता । यथा– एकस्य कर्णे क्षिप्तं सूत्रं मुखे निर्गतं तस्य श्रुतप्रलापिनो मूल्यं काणकपर्दिका । अन्यस्याऽन्यकर्णे निर्गतं तस्य श्रुतविस्मृतस्य लक्षम् । तृतीयस्य गले गतं तस्य हृदि श्रुतस्थितेर्न मूल्यम् । तथा ऋजूनामुपहासो गुणवत्सु मत्सरः, कृतघ्नत्वं, बहुजनविरुद्धैः सह सङ्गतिः, जनमान्यानामवज्ञा, सदाचाराणां व्यसनोपनिपाते तोषः, शक्तौ तदप्रतीकारः, देशाद्युचिताचारलङ्घनं, वित्ताद्यनुसारेणात्युद्भटातिमलिनवेषादिकरणम्, एवमादिलोकविरुद्धमिहाप्यपकीर्त्त्यादिकृत् । यदुवाच वाचकमुख्यः–

**लोकः खल्वाधारः, सर्वेषां धर्मचारिणां यस्मात् । तस्माल्लोकविरुद्धं, धर्मविरुद्धञ्च सन्त्याज्यम् ॥** प्रशमरति

तत्त्यागे च जनानुरागस्वधर्मसुखनिर्वाहादयो गुणाः । आह च—

**एआइं परिहरंतो, सव्वस्स जणस्स वल्लहो होइ । जणवल्लहत्तणं पुण, नरस्स सम्मत्ततरूबीअं ॥**

तथा मिथ्यात्वकृत्यं, निर्दयं गवादेस्ताडनबन्धनादि, निराधारं यूकादेरातपे च मत्कुणादेः क्षेपः, शीर्षे महाकङ्कतक्षेपः, लिक्षास्फोटनादि, उष्णकाले त्रिः शेषकाले च द्विर्दृढबृहत्गलनकसङ्खारकसत्यापनादियुक्त्या जलगालने धान्येन्धनशाक-ताम्बूलफलादिशोधनादौ च सम्यक्प्रवृत्तिः । अक्षत-पूग-खारिक-वाल्ह-उलिफलिकादेर्मुखे क्षेपः । नालकेन धारया वा जलादेः पानम् । चलनोपवेशन-शयन-स्नान-वस्तुमोचन-ग्रहण-रन्धन-खण्डन-पेषण-घर्षण-मलमूत्रश्लेष्मगण्डूषादिजलताम्बूलेत्यादौ सम्यगयतना, धर्मकर्मण्यनादरो, देवगुरुसाधर्मिकेषु विद्वेषः, चैत्यादिद्रव्यपरिभोगो, निर्धर्मसंसर्गो, धार्मिकादीनामुपहासः, कषाय-बहुलता, बहुदोषक्रयविक्रयः, खरकर्मसु पापमयाधिकारादौ च प्रवृत्तिः, एवमादिधर्मविरुद्धम् । इह मिथ्यात्वादीनि प्रायोऽर्थ-दीपिकायां विवृतानि । देशकालादिविरुद्धानामपि धर्मवतामाचरणे धर्मनिन्दोपपत्तेर्धर्मविरुद्धतैव । तदेवं पञ्चविधं विरूद्धं श्राद्धेन परिहार्यमिति [१]देशविरुद्धत्यागः ।

तथोचितस्योचितकृत्यस्याचरणं करणं उचिताचरणम् । तच्च पित्रादिविषयं नवविधमिहापि स्नेहवृद्धिकीर्त्यादिहेतुर्हितोपदेश-मालागतगाथाभिः प्रदर्श्यते ।

१. देशादि इति को० ह० प्र० पाठः ।

**सामन्ने मणुअत्ते, जं केई पाउणंति इह किंत्ति । तं मुणह निव्विअप्पं, उचिताचरणस्स माहप्पं ॥**

**तं पुण पिइमाइसहोअरेसु पणइणिअवच्चसयणेसु । गुरुजणनायरपरतित्थिएसु पुरिसेण कायव्वं ॥**

तत्र पितृविषयं कायवाङ्मनांसि प्रतीत्य त्रिविधमौचित्यं क्रमेणाह—

**पिउणो तणुसुस्सूसं, विणएणं किंकरुव्व कुणइ सयं । वयणंपि से पडिच्छइ, वयणाओ अपडिअं चेव ॥**

तनुशुश्रूषां चरणक्षालनसंवाहनोत्थापननिवेशनादिरूपां देशकालसात्म्यौचित्येन भोजनशयनीयवसनाङ्गरागादिसम्पादनरूपां च विनयेन, न तु परोपरोधावज्ञादिभिः, स्वयं करोति, न तु भृत्यादिभ्यः कारयति । यतः—

**गुरोः पुरो निषण्णस्य, या शोभा जायते सुते । उच्चैः सिंहासनस्थस्य, शतांशेनापि सा कुतः ॥**

**अपडिअं**ति वदनादपतितमुच्चार्यमाणमेवादेशः प्रमाणमेष करोमीति सादरं प्रतीच्छति पितृवचनप्रमाणीकरणार्थम् । राज्याभिषेकसमये एव वनवासार्थोपस्थितश्रीरामवत् न पुनरनाकर्णित-शिरोधूनन-कालक्षेपार्द्धविधानादिभिरवजानाति ।

**चित्तं पिहु अणुअत्तइ, सव्वपयत्तेण सव्वकज्जेसु । उवजीवइ बुद्धिगुणे, निअसब्भावं पयासेइ ॥**

स्वबुद्धिविचारितमवश्यविधेयमपि कार्यं तदेवारभते, यत् पितुर्मनोऽनुकूलमिति भावः । बुद्धिगुणान् शुश्रूषादीन् सकल-लौकिकलोकोत्तरव्यवहारगोचरांश्चोपजीवत्यभ्यस्यति । बहुदृश्वानो हि पितृप्रभृतयः सम्यगाराधिताः प्रकाशयन्त्येव कार्यरहस्यानि ।

तदाह—**तत्तदुत्प्रेक्षमाणानां, पुराणैरागमैर्विना । अनुपासितवृद्धानां, प्रज्ञा नातिप्रसीदति ॥**

**यदेकः स्थविरो वेत्ति, न तत्तरुणकोटयः । यो नृपं लत्तया हन्ति, वृद्धवाक्यात्स पूज्यते ॥**

**श्रव्यं वाक्यं हि वृद्धानां, प्रष्टव्या ये बहुश्रुताः । हंसयूथं वने बद्धं, वृद्धबुद्ध्या विमोचितं ॥** सद्भावं चित्ताभिप्रायम् ।

**आपुच्छिउं पयट्टइ, करणिज्जेसु निसोहिओ ठाइ । खलिए खरंपि भणिओ, विणीअयं न हु विलंघेइ ॥**

**सविसेसं परिपूरइ, धम्माणुगए मणोरहे तस्स । एमाइ उचिअकरणं, पिउणो जणणीइ वि तहेव ॥**

तस्य पितुरितरानपि मनोरथान् पूरयति, श्रेणिकचिल्लणादेरभयकुमारवत् । धर्मानुगतांस्तु देवपूजा-सद्गुरुपर्युपास्ति-धर्मश्रवण-विरतिप्रतिपत्त्यावश्यकप्रवृत्ति-सप्तक्षेत्रीवित्तव्यय-तीर्थयात्रा-दीनानाथोद्धरणादीन् मनोरथान् सविशेषं बह्वादरेणेत्यर्थः । कर्त्तव्यमेव चैतत्सदपत्यानामिहलोकगुरुषु पितृषु । न चार्हद्धर्मसंयोजनमन्तरेणात्यन्तदुष्प्रतिकारेषु तेष्वन्योऽस्त्युपकृतिप्रकारः । तथा च स्थानाङ्गसूत्रं—

**तिण्हं दुप्पडिआरं समणाउसो, तंजहा—अम्मापिउणो, भट्टिस्स, धम्मायरियस्स । संपाउविअ णं केइ पुरिसे अम्मापिअरं सयपागसहस्सपागेहिं तिल्लेहिं अब्भंगित्ता सुरभिणा गंधट्टएणं उवट्टित्ता तिहिं उदगेहिं मज्जावित्ता सव्वालंकारविभूसियं करित्ता मणुन्नथालीपागसुद्धं अट्ठारसवंजणाउलं भोअणं भोआवित्ता जावज्जीवं पिट्ठवडंसिआए परिवहिज्जा । तेणावि तस्स अम्मापिउस्स दुप्पडिआरं भवइ । अहे णं सेतं अम्मापिअरं केवलिपन्नत्ते धम्मे आघवइत्ता पन्नवइत्ता परूवईत्ता ठावइत्ता भवइ तेणामेव तस्स अम्मापिउस्स सुप्पडिआरं भवइ समणाउसो १। केई महच्चे दरिद्दं**

**समुक्कसिज्जा, तएणं से दरिद्दे समुक्किट्ठे समाणे पच्छा पुरं च णं विउलभोगमिइ समणागए आवि विहरिज्जा, तए णं से महच्चे अन्नया कयाइ दरिद्दी हूए समाणे तस्स दरिद्दस्स अंतियं हव्वमागच्छिज्जा, तए णं से दरिद्दे तस्स भट्टिस्स सव्वस्समवि दलमाणे तेणावि तस्स दुप्पडिआरं भवइ । अहे णं से तं भट्टिं केवलिपन्नत्ते धम्मे आघवइत्ता जाव ठावइत्ता भवइ, तेणामेव तस्स भट्टिस्स सुप्पडिआरं भवइ २। केइ तहारूवस्स समणस्स वा माहणस्स आव अंतिए एगमविआरियं धम्मियं सुवयणं सुच्चा निसम्म कालं मासे कालं किच्चा अन्नयरेसु देवलोगेसु देवत्ताए उववन्ने । तए णं से देवे तं धम्मायरिअं दुभिक्खाओ वा देसाओ सुभिख्खं देसं साहरिज्जा कंताराओ निक्कंतारं करिज्जा दीहकालिएण वा रोगायंकेण अभिभूअ विमोइज्जा । तेणावि तस्स धम्मायरियस्स दुप्पडिआरं भवइ । अहे णं से तं धम्मायरिअं केवलिपन्नत्ताओ धम्माओ भट्ठं समाणं भुज्जो केवलिपन्नत्ते धम्मे आघवइत्ता जाव ठावइत्ता भवइ तेणामेव तस्स धम्मायरिअस्स सुप्पडिआरं भवइ ३।** (३-१३५)

इह विषमपदव्याख्या—संपाओविअ त्ति प्रातः प्रभातं तेन समं सम्प्रातः, यदैव प्रातः संवृत्तं तदैवेत्यर्थः, अनेन कार्यान्तराव्यग्रतां दर्शयति । गन्धट्टएण त्ति गन्धाट्टकेन गन्धद्रव्यक्षोदेन । 'तिहिं ति' गन्धोदकोष्मोदकशीतोदकैः । 'थालीपाग त्ति' स्थाली पिठरी तस्यां पक्कं सुपक्कं स्यात् । 'सुद्ध त्ति' शुद्धं भक्तदोषमुक्तम् । 'पिट्ठवडंसिआए त्ति' पृष्ठावतंसिकया पृष्ठारोपितमित्यर्थः । अत्र निजान्धपित्रोः कावडया पृष्ठवाही तीर्थयात्रार्थोपस्थितः श्रवणो ज्ञातम् । 'अहे त्ति' अथ णं वाक्यालङ्कारे। 'आघवइत्त त्ति' आख्याय । 'पन्नवइत्ता' प्रज्ञाप्य बोधयित्वेत्यर्थः । परूवइत्ता' 'प्ररूप्य भेदतः । अत्र पितृदीक्षादातृश्रीआर्यरक्षितसूरिर्ज्ञातम् । केवलोत्पादेऽपि पित्रोः प्रबोधावधि निरवद्यवृत्त्या गृहे स्थितः कूर्मापुत्रो वा ॥१॥

'महच्चेति' माहत्यं महत्त्वं तद्योगान्माहत्य ईश्वर ईत्यर्थः । 'समुक्कसिज्ज त्ति' धनदानादिना समुत्कर्षयेदुत्कृष्टं कुर्यात् ।

'पुरन्ति' पूर्वकाले समुत्कर्षणकाले इत्यर्थः । 'समिइ त्ति' भोगसमुदयसमन्वायुक्तः । 'दलमाणे त्ति' ददानः । इह मिथ्यात्वि-महेभ्यस्य वणिक्पुत्रत्वेन महेभ्यीभूतः क्रमात्तं श्रेष्ठिनं दुर्दैवाद् निर्धनं महेभ्यीकृत्य श्राद्धधर्मं प्रतिपादयिता जिनदासश्राद्धो ज्ञातम् २। 'निसम्म त्ति' निशम्य मनसाऽवधार्य । इह निद्रादिप्रमत्तसेलकाचार्यबोधकः पन्थकशिष्यो ज्ञातम् ३।

मातृविषयौचित्यविशेषमाह—

**नवरं से सविसेसं, पयडइ भवाणुवित्तिमप्पडिमं । इत्थीसहावसुलहं, पराभवं वहइ नहु जेण ॥**

सविसेसंति जनकान्मातुः पूज्यत्वादपि । यन्मनुः—

**उपाध्याया दशाऽऽचार्य, आचार्याणां शतं पिता । सहस्रं तु पितुर्माता, गौरवेणातिरिच्यते ॥**

अन्यैरप्युक्तं—

**आस्तन्यपानाज्जननी पशूनामादारलम्भावधि चाधमानाम् । आगेहकृत्यावधि मध्यमानामाजीवितात्तीर्थमिवोत्तमानाम् ॥**

**माता पशूनां सुतसत्तयैव, धनार्जनैस्तुष्यति मध्यमानाम् । वीरावदातैः पुनरुत्तमानां, लोकोत्तमानां चरितैः पवित्रैः ॥**

**उचिअं एअं तु सहोअरम्मि जं निअइ अप्पसममेअं । जिट्ठं व कणिट्ठं पिहु, बहुमन्नइ सव्वकज्जेसु ॥**

निअइ त्ति पश्यति । 'जिट्ठंव त्ति' तिष्ठेत् ज्येष्ठो भ्राता पितृतुल्यस्तमिव, कनिष्ठेन तु वैमातृकेनापि ज्येष्ठः श्रीरामो

लक्ष्मणेनेवानुसरणीयः । एवं ज्येष्ठकनिष्टपत्नीपुत्राद्यैरपि चिन्त्यम् ।

**दंसइ न पुढोभावं, सब्भावं कहइ पुच्छइ अ तस्स । ववहारम्मि पयट्टइ, न निगूहइ थेवमवि दविणं ॥**

'पयट्टइ त्ति' प्रवर्त्तयति, येनासौ व्यवहारनिष्णातो, न धूर्त्तादिवञ्चनागोचरी स्यात् । 'निगूहइ त्ति' द्रोहवुद्ध्या नापह्नुते क्वचित्सङ्कटे निर्वाहार्थं धनं निधीकरोति एव । कुसंसर्गादिना बन्धाववविनीते किं कृत्यमित्याह—

**अविणीअं अणुवत्तइ, मित्तेहिं तो रहो उवालभइ । सयणजणाओ सिक्खं, दावइ अन्नावएसेण ॥**

'सयण त्ति' पितृव्य-मातुल-श्वशुर-तत्पुत्रादिभ्यो दुर्विनीतस्यान्यस्य व्यपदेशेन स्वयं तु तं न तर्जयति । तथा विहिते हि निर्लज्जतया स कदाचिदुन्मर्यादोऽपि स्यात् ।

**हिअए ससिणेहो विहु, पयडइ कुविअं च तस्स अप्पाणं । पडिवन्नविणयमग्गं, आलवइ अ छम्मपिम्मपरो ॥**

'अछम्म त्ति' निश्छद्मप्रेमवान् । एवमप्यगृहीतविनयं तु प्रकृतिरियमस्येति ज्ञाततत्त्वः सन्नुदास्त एव ।

**तप्पणइणिपुत्ताइसु, समदिट्ठी होइ दाणसम्माणे । सावक्कंमि उइत्तो, सविसेसं कुणइ सव्वंपि ॥**

'समदिट्ठी त्ति' स्वपत्न्यपत्यादिष्विव समदृष्टिः । 'सावक्कंमि त्ति' सापत्नेऽपरमातृके भ्रातरि, तत्र हि स्तोकेऽप्यन्तरे व्यक्तीकृते तस्य वैचित्त्यं जनापवादश्च स्यात् । एवं पितृमातृभ्रातृतुल्येष्वपि यथार्हमौचित्यं चिन्त्यम् । यतः—

**जनकश्चोपकर्ता च, यस्तु विद्यां प्रयच्छति । अन्नदः प्राणदश्चैव, पञ्चैते पितरः स्मृताः ॥**

**राज्ञः पत्नी गुरोः पत्नी, पत्नी माता तथैव च । स्वमाता चोपमाता च, पञ्चैता मातरः स्मृताः ।**

**सहोदरः सहाध्यायी, मित्रं वा रोगपालकः । मार्गे वाक्यसखा यस्तु, पञ्चैते भ्रातरः स्मृताः ॥**

भातृभिश्च मिथो धर्मकार्यविषये स्मारणादि सम्यक् कार्यम् । यतः—

**भवगिहमज्झंमि पमायजलणजलिअम्मि मोहनिद्दाए । उट्ठवइ जो सुअंतं, सो तस्स जणो परमबंधू ॥**

भ्रातृणां मिथः प्रीतौ श्रीऋषभपुत्रा भरतदूतागमे श्रीऋषभं प्रष्टुं सह प्राप्ता अष्टानवतिर्ज्ञातम् । भ्रातृवन्मित्रेऽप्येवमनुसर्त्तव्यं ।

**इय भाइगयं उचिअं, पणइणिविसयंपि किंपि जंपेमो । सप्पणयवयणसम्माणणेण तं अभिमुहं कुणइ ॥**

प्रियप्रणयवचनं हि सञ्जीवनं समग्रापरापरप्रेमप्रकाराणां, प्रस्तावे च प्रयुक्तं दानादिभ्योऽपि गुरुतरं गौरवमारोपयति । यतः पठ्यते—

**न सद्वाक्यात् परं वश्यं, न कलायाः परं धनम् । न हिंसायाः परोऽधर्मो, न सन्तोषात् परं सुखम् ॥**

**सुस्सूसाइ पयट्टइ, वत्थाभरणाइ समुचिअं देइ । नाडयपिच्छणयाइसु जणसम्मद्देसु वारेइ ॥**

शुश्रूषायां स्वस्य स्नानदेहसंवाहनादिरूपायां तां प्रवर्त्तयति । तथाकृते विश्रब्धा सती निष्कृत्रिमप्रेमवती न जातु

विप्रियमाचरति । 'देइ त्ति' देशकालकुटुम्बविभवाद्यौचित्येन अलङ्कृता हि गृहिण्यो गृहमेधिनां श्रियमेधयन्ति । यतः—

**श्रीर्मङ्गलात् प्रभवति, प्रागल्भ्याच्च प्रवर्द्धते । दाक्ष्यात्तु कुरुते मूलं, संयमात् प्रतितिष्ठति ॥**

मूलमित्यनुबन्धं, प्रतितिष्टतीति प्रतिष्ठां लभते ।

'सम्मद्देसु त्ति' सम्मर्देषु । तत्र ह्यशिष्टजनचेष्टिताश्लीलालापचापलप्रवृत्तिविलोकनान्निसर्गनिर्मलमपि जलदवाताहतं मुकुरतलमिव मनः प्रायो विकरोति ।

**रंभइ रयणिपयारं, कुसीलपासण्डिसंगमवणेइ । गिहकज्जेसु निओअइ, न विओअइ अप्पणा सद्धिं ॥**

रजन्यां प्रचारं राजमार्गवेश्मगमनादिकं निरुणद्धि । मुनीनामिव कुलवनितानामपि महते दोषाय (दोषाप्रचारः) । धर्मावश्यकादिप्रवृत्तिनिमित्तं च जननीभगिन्यादिसुशीलललनावृन्दमध्यगतामनुमन्यत एव ।

गृहकृत्यानि दानस्वजनसम्मानरसवतीप्रयोगादीनि । यतः—

**शय्योत्पाटनगेहमार्जनपयःपावित्र्यचुल्लीक्रिया, स्थालीक्षालनधान्यपेषणभिदागोदोहतन्मन्थने ।**
**पाकस्तत्परिवेषणं समुचितं पात्रादिशौचक्रिया, श्वश्रूभर्तृननान्द्रदेवृविनयाः कृत्यानि वध्वा इति ॥**

तेषु नियमादेनां प्रयुङ्क्ते । अनियुक्ता ह्यसौ सर्वथोदास्ते । उदासीनायां च गृहिण्यां सीदन्त्येव गृहकृत्यानि । निर्व्यापारा च

सती चापल्याद्विक्रियां भजते । व्यापारव्यग्रत्वादिना हि स्त्रीणां गोपायनम् । यदुमास्वातिः प्रशमरतौ –

**पैशाचिकमाख्यानं, श्रुत्वा गोपायनं च कुलवध्वाः । संयमयोगैरात्मा, निरन्तरं व्यापृतः कार्यः ॥**

न विओअइ त्ति यतो दर्शनसाराणि प्रायः प्रेमाणि । यथोक्तं–

**अवलोअणेण आलावएण गुणकित्तणेण दाणेण । छंदेण वट्टमाणस्स निब्भरं जायए पिम्मं ॥**

**अद्दंसणेण अइदंसणेण दिट्ठं अणालवंतेण । माणेणऽपमाणेण य पंचविहं डिज्झए पिम्मं ॥**

अत्यन्तप्रवासवैमनस्ये च सा कदाचिदनुचितमप्याचरेत् ।

**अवमाणं न पयंसइ, खलिए सिक्खेइ कुविअमणुणेइ । धणहाणिवुड्ढिघरमंतवइअरं पयडइ न तीसे ॥**

अपमानं निर्हेतुकमेव क्रोधादिना सपत्नीसंयोजनादिकं नास्यै प्रदर्शयति । को हि मूढधीः पत्नीक्रोधादिमात्रेण स्त्रीद्वयसङ्कटे पतति । यतः–

**बुभुक्षितो गृहाद्याति, नाप्नोत्यम्बुच्छटामपि । अक्षालितपदः शेते, भार्याद्वयवशो नरः ॥**

**वरं कारागृहे क्षिप्तो, वरं देशान्तरभ्रमी । वरं नरकसञ्चारी, न द्विभार्यः पुनः पुमान् ॥**

जातु पुष्टालम्बनेन पत्नीद्वयमपि स्यात्, तदा तयोस्तत्सुतादिष्वपि सर्वत्र समदृष्टित्वाद्येव कार्यं न तु वारकविलोपादि ।

स्त्रियाः सपत्नीकावारकं विलुप्य स्वपतिं भुञ्जानायास्तुर्यव्रतद्वितीयातिचारस्योक्तवात् । स्खलिते किञ्चिदपराधे निभृतं तथा शिक्षयति यथा न पुनस्तत्र प्रवर्त्तते । कुपितां चानुनयति, अन्यथा सहसाकारितया कूपपाताद्यमप्यनर्थं कुर्यात्, सोमभट्टभार्यावत् । अत एव स्त्रीषु सर्वकार्येषु सामवृत्तिरेव कार्या न तु क्वापि काठिन्यम् । **पाञ्चालः स्त्रीषु मार्दवमि**त्युक्तत्वादपि । मार्दवसाध्या हि स्त्रियः, तथैव ताभ्यः सर्वत्र सर्वकार्यसिद्धिदर्शनाद्, अन्यथा तु तद्वैपरीत्यस्याऽप्यनुभवात् । निर्गुणस्त्रीयोगे च विशिष्यैवं यतनीयमाजन्मनिबिडनिगडहडिकल्पयापि तयैव हि यथाकथञ्चिद् गृहसूत्रं स्थाप्यं । सर्वोऽपि निर्वाहश्च कर्त्तव्यो, **गृहं हि गृहिणीं विदु**रित्युक्तेः । 'पयडइ त्ति' प्रकटिते हि धनहानिव्यतिकरे तुच्छतया सर्वत्र तद्वृत्तं व्यञ्जयन्ती चिरार्जितं महत्त्वं निर्गमयति । धनवृद्धिव्यतिकरे च व्यक्तीकृते निरर्गलं व्यये प्रवर्त्तते । गृहमन्त्रप्रचारे चाविष्कृते प्रकृतिकोमलहृदयतया मन्त्रोष्माणं धारयितुमसमर्थतया स्वविश्रम्भस्थानेषु प्रकाश्याऽऽयतिचिन्तितानि कार्याणि विफलयति । कदाचिद्राजद्विष्टमपि सङ्घटयति । तत एव गृहे स्त्रियाः प्राधान्यं न कार्यम् । **'स्त्री पुंवच्च प्रभवति यदा तद्धि गेहं विनष्टम्'** इत्याद्युक्तेरपि ।

यथा क्वापि पुरे मन्थरो नाम कोलिको वेमादिकाष्टार्थं शिंशपामहावृक्षं तदधिष्टातृव्यन्तरेण निषिद्धोऽपि साहसी तं छिन्दंस्तेनोक्तो 'वरं वृणु' । स स्त्रीवशः स्त्रीं प्रष्टुं गृहं गच्छन् 'राज्यं याचस्वैति' मित्रनापितेनोक्तोऽपि पत्नीं प्रपच्छ । तया तुच्छया—

**प्रवर्द्धमानः पुरुषस्त्रयाणामुपघातकृत् । पूर्वोपार्जितमित्राणां, दाराणामथ वेश्मनाम् ॥**

इत्युक्तिं विमृश्योक्तं, किं राज्येन क्लेशप्राज्येन ? द्वितीयं बाहुयुगं शिरश्च मार्गय, यथा युगपत् पटद्वयवानं स्यात् । सोऽपि तथा व्यन्तरप्रार्थनया तादृग्रूपो ग्राममागच्छन् लोकै राक्षसभ्रान्त्या काष्ठदृषद्भिर्निजघ्ने । तथाह–

**यस्य नास्ति स्वयं प्रज्ञा, मित्रोक्तं न करोति यः । स्त्रीवश्यः स क्षयं याति, यथा मन्थरकोलिकः ॥**

इदं च प्रायिकं तेनोत्तमसुबुद्धिस्त्रियाः प्रश्ने विशेषगुणाद्येव । यथाऽनुपमदेव्या वस्तुपालतेजःपालयो ।

**सुकुलुग्गयाहिं परिणयवयाहिं निच्छम्मधम्मनिरयाहिं । सयणरमणीहिं पीइं, पाउणइ समाणधम्माहिं ॥**

'सुकुल त्ति' अकुलीनसंसर्गो हि कुलवनितानां मूलबीजमपवादपादस्य । 'पाउणइ त्ति' प्रापयति ।

**रोगाइसु नोविक्खखइ, सुसहाओ होइ धम्मकज्जेसु । एमाइ पणइणिगयं, उचिअं पाएण पुरिसस्स ॥**

धर्मकार्येषु तपश्चरणोद्यापन-दानदेवपूजा-तीर्थयात्रादिषूत्साहवर्द्धनधनार्पणादिना सुसहायी स्याद्, न त्वन्तरायकृत् । तत्पुण्येषु तस्याप्यंशहरत्वात् पुण्यकृत्यकारणस्यैव च परोपकारत्वात् ।

**पुत्तं पइ पुण उचिअं, पिउणो लालेइ बालभावम्मि । उम्मीलिअबुद्धिगुणं, कलासु कुसलं कुणइ कमसो ॥**

'लालेइ त्ति' वृष्याहारस्वेच्छाविहारविविधक्रीडनकादिभिः तदा सङ्कोचितो ह्यसौ न कदाचिदङ्गोपचयमाकलयेत् । पठन्ति च–

**लालयेत् पञ्च वर्षाणि, दशवर्षाणि ताडयेत् । प्राप्ते षोडशमे वर्षे, पुत्रं मित्रमिवाचरेत् ॥**

**गुरुदेवधम्ममुहिसयणपरिचयं कारवेइ निच्चंपि । उत्तमलोएहिं समं, मित्तीभावं रयावेइ ॥**

गुर्वादिपरिचये ह्याबाल्यात्सद्वासनावासित एव स्याद्वल्कलचीरिवत् । कुलजातिवृत्ताद्युत्तममैत्री जातु दैवान्नार्थं सम्पादयेत्तथाप्यनर्थपरिहाराय जायत एव । अभयकुमारमैत्री त्वार्द्रकुमारस्यानार्यदेशोपन्नस्यापि तद्भवसिद्ध्यै जज्ञे ।

**गिण्हावेइ अ पाणिं, समाणकुलजम्मरूवकन्नाणं । गिहभारम्मि निजुंजइ, पहुत्तणं विअरइ कमेण ॥**

'समाण त्ति' अननुगुणयोगे हि दम्पत्योर्विम्डम्बनैव गृहवासः । मिथो विरक्तत्वे चानुचितप्रवृत्त्याद्यपि स्यात् । श्रूयते हि धारायां भोजराज्ये एकत्र गृहे पुमानत्यन्तं कुरूपो निर्गुणश्च स्त्री चात्यन्तं सुरूपा सगुणा च । गृहान्तरे तु तद्वैपरीत्यं । अन्यदा चौरेण तद्गेहयोः खात्रप्रदाने उक्त्यादिनानुगुणौ दम्पती दृष्ट्वा सुप्तस्त्रीद्वयपरावर्त्तश्चक्रे । ययोः सुयोगो जज्ञे, तौ प्रागत्युद्विग्नौ तदा हृष्टौ मिलितौ । अन्येन तु नृपसमे तद्विवादे पटहोद्घोषे चौरेणोक्तं—

**मया निशि नरेन्द्रेण, परद्रव्यापहारिणा । लुप्तो विधिकृतो मार्गो रत्नं रत्नेन योजितम् ॥**

हसितेन राज्ञा तथैव प्रमाणीचक्रे । विवाहभेदाद्यग्रे वक्ष्यते । 'गिह त्ति' गृहभारनियुक्तश्च सुतो निरन्तरतच्चिन्ताक्रान्ततया स्वाच्छन्द्योन्मादादेरपदमेव स्यात् । बहुक्लेशायासलभ्यानि च धनानि जानन्नानुचिते व्यये धियं धत्ते । 'पहुत्तणं त्ति' गृहे प्रभुत्वं

च दत्ते । प्रतिष्ठा हि गुरुदत्तैव स्यात् । गृहभारारोपणादि च लघावपि पुत्रे सुपरीक्ष्य योग्ये एव कार्यम् । तथैव निर्वाहशोभादि-सम्भवात् । यथा प्रसेनजिन्नृपेण तत्तत्परीक्षापूर्वं शततमे पुत्रे श्रेणिके राज्यं न्यस्तम् । पुत्रवत् पुत्रीभ्रातृव्यादिष्वपि यथार्हमौचित्यं ज्ञेयम् एवं स्नुषाया अपि । यथा धनश्रेष्ठिना पञ्च पञ्च शालिकणार्पणेन परीक्ष्य तुर्या वधू रोहिणी गृहस्वामिनी चक्रे । वृद्धास्तूज्झिताभोगवतीरक्षिताः छगणाद्युज्झनरन्धनकोशचिन्तासु नियुक्ता यथाक्रमम् ।

**पच्चक्खं न पसंसइ, वसणोवहयाण कहइ दुरवत्थं । आयं वयमवसेसं, च सोहए सयमिमेहिं तो ॥**

**प्रत्यक्षे गुरवः स्तुत्याः, परोक्षे मित्रबान्धवाः । कर्मान्ते दासभृत्याश्च, पुत्रा नैव मृतास्त्रियः ॥**

इति वचनात् पुत्रप्रशंसामयुक्तामप्यन्यथानिर्वाहादर्शनादिहेतुना चेत्कुर्यात्तदापि न प्रत्यक्षं, गुणवृद्ध्यभावाभिमानादिदोषापत्तेः । द्यूतादिव्यसनिनां निर्धनत्व-न्यत्कार-तर्जन-ताडनादिदुरवस्थाश्रवणे तेऽपि नैव व्यसने प्रवर्त्तन्ते । आयं व्ययं व्ययादुत्कलितं शेषं च पुत्रेभ्यः स्वयं शोधयति । एवं स्वस्य प्रभुत्वं पुत्राणां च स्वच्छन्दत्वमपास्तं भवति ।

**दंसेइ नरिंदसभं, देसंतरभावपयडणं कुणइ । इच्चाइ अवच्चगयं उचिअं पिउणो मुणेयव्वं ॥**

अपरिचितराजसभो हि दैवादतर्कितापतिते व्यसने कान्दिशीक एव स्यात्तथाविधश्च निष्कारणद्वेषिभिः परसम्पदसहिष्णुभिः खलजनैरुपहन्यते । तत्पठन्ति—

**गन्तव्यं राजकुले, द्रष्टव्या राजपूजिता लोकाः । यद्यपि न भवन्त्यर्थास्तथाप्यनर्था विलीयन्ते ॥**

देशान्तराचारव्यवहारानभिज्ञो हि प्रयोजनवशाद्देशान्तरगतस्तत्रत्यैर्वैदेशिक इति सुखं व्यसनादौ पात्यते । एवं पुत्रवत्पुत्र्यादेः, पितृवच्च मात्राऽपि, पुत्रस्नुषादेर्यथासम्भवमौचित्यं सत्याप्यम् । विशिष्य च सापत्नस्य । स हि प्रायो न्यूनमानी विमातृदत्त-मासपेयावान्तिकृतपुत्रवत् ।

**सयणाण समुचिअमिणं, जं ते निअगेहवुड्ढिकज्जेसु । सम्माणिज्ज सयावि हु, करिज्ज हाणीसु वि समीवे ॥**

पितृमातृपत्नीपक्षोद्भवाः पुंसां स्वजनाः । वृद्धिकार्याणि पुत्रजन्मादीनि ।

**सयमवि तेसिं वसणूसवेसु होअव्व मंतिअम्मि सया । खीणविहवाण रोगाउराण कायव्वमुद्धरणं ॥**

वसणि त्ति —

**आतुरे व्यसने प्राप्ते, दुर्भिक्षे शत्रुसङ्कटे । राजद्वारे स्मशाने च, यस्तिष्ठति स बान्धवः ॥** इति वचनात् ।

स्वजनोद्धरणं हि तत्त्वत आत्मोद्धरणमेव । यतोऽरघट्टघटीनामिव प्राणिनां प्रायोऽनैकान्तिकी रिक्तता पूर्णता च । ततः कदा-चिद्दुर्दैवादात्मनोऽप्युपस्थितायां दुरवस्थायामुपकृतचरेभ्यस्तेभ्य एवोद्धृतिः स्याद्, अतः समयं प्राप्य स्वजनोद्धारो विधेय एव ।

**खाइज्ज पिट्ठिमंसं, न तेसि कुज्जा न सुक्ककलहं च । तदमित्तेहिं मित्तिं, न करिज्ज करिज्ज मित्तेहिं ॥**

शुष्ककलहो हास्यादिना वाग्वादश्चिरप्ररूढप्रीतिलतालवित्ररूपः ।

**तयभावे तग्गेहं, न वइज्ज चइज्ज अत्थसम्बन्धं । गुरुदेवधम्मकज्जेसु एगचित्तेहिं होअव्वं ॥**

प्रोषितपुरुषे केवलोषितयोषिति स्वजनगृहे एकाकी न प्रविशेत् । स्वजनैः सह द्रव्यव्यवहारोऽपि प्रथमं किञ्चित् प्रणयं प्रपञ्चयन्नपि पर्यन्ते प्रथयत्येव प्रतिपन्थिताम् । तथाह—

**यदीच्छेद्विपुलां प्रीतिं, त्रीणि तत्र न कारयेत् । वाग्वादमर्थसंबंधं, परोक्षे दारदर्शनम् ॥** (भाषणम्)

ऐहिककार्येष्वपि स्वजनादिभिरेकचित्ततैवायातिहिता । चैत्यादिकार्येषु तु विशिष्य, बह्वधीनत्वात्तेषाम् । तथैव च निर्वाहशोभादिसम्भवाद्, अतस्तानि सर्वसाम्मत्येन कार्याणि । स्वजनैः सहैक्ये पञ्चाङ्गुल्यो ज्ञातम् । यथा लिखनचित्रणादिषु प्रायः सर्वकार्येष्वस्या वस्तुदर्शने उत्कृष्टवर्णने परतर्जने चुञ्चुपुटिकादौ च विशिष्य पटुर्गर्विता तर्जनी मध्यमां प्राह । तव के गुणाः ? तयोक्तं—'मुख्याऽहं महती मध्यस्था तन्त्रीगीततालादिकुशला कार्यौत्सुक्ये चप्पुटिकया सङ्केतकृत्, तथैव दोषच्छलादिहन्त्री टिप्परिकया शिक्षाकृच्च' । एवं तृतीयाऽप्यूचे—'देवगुरुस्थापनाचार्यसाधर्मिकादीनां नवाङ्गचन्दनपूजामाङ्गल्यस्वस्तिकनन्दा-वर्त्तादिकरणजलचन्दनवासाद्यभिमन्त्रणादि मदायत्तम्' । तुर्याप्यूचे—'अहं सूक्ष्मा कर्णान्तः कण्डूयनादिसूक्ष्मकार्यक्षमा, देहकष्टे छेदादिपीडासहा शाकिन्यादिदोषनिग्रहहेतुः, जापसङ्ख्याकरणादौ च धुरि वर्ते' । ततस्ताभिर्मिथः सखीत्वमादृत्याक्षिप्तोऽङ्गुष्ठकः प्राह—'रे ! रे ! अहं वो भर्त्ता मां विना लिखनचित्रणादि-कवलग्रहण-चिप्पुटिका-चञ्चुपुटिका-टिप्परिका-मुष्टिबन्ध-ग्रन्थिबन्ध-

शस्त्रादि-व्यापारण-श्मश्रुसमारचन-कर्त्तन-लोचनपिञ्जन-वानधावन-कण्डन-पेषण-परिवेषण-कण्टक-कर्षण-गवादिदोह-जापसङ्ख्या-करण-केशपुष्प-ग्रथन-पुष्पपूजादि किमपि न स्यात् । वैरिगलग्रहतिलककरणश्रीजिनामृतपानाङ्गुष्ठप्रस्नावि मदेकायत्तम्' । ततस्तास्तमाश्रित्य सर्वकार्याण्यसाधयन् ।

**एमाई सयणोचिअमह धम्मायरिअसमुचिअं भणिमो । भत्तिबहुमाणपुव्वं, तेसिं तिसंज्झंपि पणिवाओ ॥**

भक्तिरान्तरी प्रीतिः । बहुमानस्तु वाचिकः कायिकश्च ।

**तद्दंसिअ नीईए, आवस्सयपमुहकिच्चकरणं च । धम्मोवएससवणं, तदंतिए सुद्धसद्धाए ॥**

**आएसं बहु मन्नइ, इमेसि मणसावि कुणइ नावन्नं । रुंभइ अवन्नवायं, थुइवायं पयडइ सयावि ॥**

अवर्णवादमधार्मिकैर्विधीयमानं यथाशक्ति नियमेन रुणद्धि नोपेक्षते ।

**न केवलं यो महतां विभाषते शृणोति तस्मादपि यः स पापभाग्**-इति श्रुतेः । 'पयडइ त्ति' समक्षमसमक्षं वाऽगण्यपुण्यानुबन्धित्वात्तस्य ॥

**न हवइ छिद्दपेही, सुहिव्व अणुअत्तए सुहदुहेसु । पडिणीअ पच्चवायं, सव्वपयत्तेण वारेइ ॥**

'सुहिव्व त्ति' सुहृदिवानुवर्त्तते, तत्सुखेन सुखी तद्दुःखेन दुःखी चेत्यर्थः । ननु कथमप्रमत्तेषु निर्ममत्वेषु च गुरुषु

छिद्रान्वेषित्वं सुहृदादयो भावाः श्रावकाणां सम्भवन्ति ? सत्यम्, इदृशा एव ते, परं भिन्नभिन्नप्रकृतीनामुपासकानामुन्मीलन्त्येव तेष्वपि स्वस्वप्रकृतिसमुचिता भावाः । यत्स्थानाङ्गसूत्रम्—

'**गोयमा ! चउव्विहा सावया पन्नत्ता, मायापिअरसमाणे भायसमाणे मित्तसमाणे सवसिमाणे**' इत्याद्युक्तं प्राक् । (अ० ४-३२१)

पडिणीय त्ति प्रत्यनीकोपप्लवञ्च सर्वशक्त्या वारयति । उक्तं हि—

**साहूण चेइआण य, पडिणीअं तह अवन्नवायं च । जिणपवयणस्स अहिअं, सव्वत्थामेण वारेइ ॥**

अत्र सगरचक्रिपौत्रभगीरथस्य जीवः, प्रान्तग्रामवासिषष्टिसहस्रमनुष्यैर्यात्रार्थिसङ्घोपद्रवे तन्निवारकः कुम्भकारो ज्ञातम् ।

**खलिअम्मि चोइओ गुरुजणेण मन्नइ तहत्ति सव्वं पि । चोएइ गुरुजणं पि हु, पमायखलिएसु एगंते ॥**

'चोएइ त्ति' भगवन् ! किमिदमुचितं सच्चरित्रवतां तत्रभवतां भवताम् ? इत्यादिना ।

**कुणइ विणओवयारं, भत्तीए समयसमुचिअं सव्वं । गाढं गुणाणुरायं, निम्मायं वहइ हिअयम्मि ॥**

'सव्वं ति' सम्मुखागमनाभ्युत्थानासनदानसंवाहनादि शुद्धवस्त्रपात्राहारादिप्रदानादिकञ्च ।

**भावोवयारमेसिं, देसंतरठिओ वि सुमरइ सयावि । इअ एवमाइगुरुजणसमुचिअमुचिअं मुणेअव्वं ॥**

भावोपकारः सम्यक्त्वदानादि ।

**जत्थ सयं निवसिज्जइ, नयरे तत्थेव जे किर वसंति । ससमाणवत्तिणो ते, नायरया नाम वच्चंति ॥**

स्वसमानवृत्तयो वणिग्वृत्तिजीविनः ।

**समुचिअमिणमो तेसिं, जमेगचित्तेहिं समसुहदुहेहिं । वसणूसवतुल्लगमागमेहिं निच्चं पि होअव्वं ॥**

'तुल्ल त्ति' तद्व्यसनागमे स्वयमपि व्यसनावलीढैरिव तदुत्सवे च सोत्सवैरिव भाव्यम् । अन्यथाऽन्योऽन्योदासीना नृपनियोगि[१]मृगयूनामामिषमेव पौरलोकाः ।

**कायव्वं कज्जं वि हु, न इक्कमिक्केण दंसणं पहुणो । कज्जे( ज्जो )न मंतभेओ, पेसुन्नं परिहरेअव्वं ॥**

महत्यपि कार्ये पृथक् पृथग् महत्त्वेच्छया राज्ञो दर्शनेऽन्यवैमनस्यादयो दोषाः, तस्मात्समुदितैरेव तुल्यत्वेऽपि यवनवत्कस्यचिन्मुख्यत्वप्रदानादिना मिथः सापेक्षैः, पुनर्नृपादेशात्परीक्षार्थमन्त्र्यर्पितैकशय्याशाय्यवलगकपञ्चशतीवदबद्धैर्नृपदर्शनविज्ञप्त्यादि विधेयम् । यतः—

**बहूनामप्यसाराणां, समुदायो जयावहः । तृणैरावेष्टिता रज्जुर्यया नागोऽपि बध्यते ॥**

१. नियोगे इति को० ह० प्र० पाठः ।

मन्त्रभेदे च कार्यविपत्तिनृपप्रकोपादयो दोषाः, तस्मात्संवृतमन्त्रैर्भाव्यम् । राजादीनां पुरः परस्परदूषणोद्घोषणे च **लब्धमध्यत्वान्नृपाद्यपमानदण्डा**दयो दोषाः । एकवृत्तीनामसंहतत्वस्य विनाशहेतुत्वात् । पठ्यतेऽपि—

**एकोदराः पृथग्ग्रीवा, अन्यान्यफलकाङ्क्षिणः । असंहता विनश्यन्ति, भारुण्डा इव पक्षिणः ॥**

**परस्परस्य मर्माणि, ये न रक्षन्ति जन्तवः । त एव निधनं यान्ति, वल्मीकोदरसर्पवत् ॥**

**समुवट्ठिए विवाए, तुलासमाणेहिं चेव ठायव्वं । कारणसाविक्खेहिं, विहुणेअव्वो न नयमग्गो ॥**

कारण त्ति स्वजनसम्बन्धिज्ञातेयलञ्चोपकारादिसापेक्षैर्नयमार्गो न विधूनयितव्यः ।

**बलिएहिं दुब्बलजणो, सुंककराईहिं नाभिभविअव्वो । थेवावराहदोसे वि दंडभूमिं न नेअव्वो ॥**

शुल्ककराधिक्यनृपदण्डादिभिरपि हन्यमाना जना मिथो विरक्ताः संहतिमुज्झन्ति । संहतिविनाकृताश्च बलवत्तरा अपि वनसंहतिविरहिताः सिंहा इवाभिभूयन्ते एव । तस्मात् परस्परसंहतिरेव श्रेयस्करी । उक्तञ्च–

**संहतिः श्रेयसी पुंसां, स्वपक्षे तु विशेषतः । तुषैरपि परिभ्रष्टा, न प्ररोहन्ति तन्दुलाः ॥**

**गिरयो येन भिद्यन्ते, धरा येन विदार्यते । संहतेः पश्य माहात्म्यं, तृणैस्तद्वारि वार्यते ॥**

**कारणिएहिं पि समं, कायव्वो ता न अत्थसंबंधो । किं पुण पहुणा सद्धिं, अप्पहिअं अहिलसंतेहिं ॥**

कारणिकैः श्रीव्ययराजदेवधर्मोपपदकरणादिनियुक्तैस्तदुपजीविभिरन्यैरपि सह द्रव्यव्यवहारः कदापि न कार्यः । ते हि धनदानावसर एव प्रायः प्रसन्नमुखरागाः प्रकटितकृत्रिमालापसम्भाषणासनताम्बूलप्रदानादिबाह्याडम्बराः सौमनस्यमाविर्भावयन्तः, प्रस्तावे च स्वदत्तमपि वित्तं याचितास्तिलतुषमात्रमपि स्वोपकारं प्रकटमुद्धट्टयन्तस्तदैव दाक्षिण्यमुन्मुञ्चन्ति । स च स्वभाव एव तेषाम् । यतः—

**द्विजन्मनः क्षमा मातुर्द्वेषः प्रेम पणस्त्रियाः । नियोगिनश्च दाक्षिण्यमरिष्टानां चतुष्टयम् ॥**

पूर्वोपात्तवित्तनिर्नाशाय च कृत्रिमानपि दोषानुत्पाद्य प्रत्युतैतान् नृपतिग्राह्यान् विदधति । यतः—

**उत्पाद्य कृत्रिमान् दोषान्, धनी सर्वत्र बाध्यते । निर्धनः कृतदोषोऽपि, सर्वत्र निरुपद्रवः ॥**

किंपुण त्ति । यतः सामान्योऽपि क्षत्रियो वित्तार्थमभियुक्तः खड्गं दर्शयति किं पुनः प्रकृत्यमर्षणाः क्षोणिभुजः ? । एवं समानवृत्तिनागरवदसमानवृत्तिनागरेष्वपि यथार्हमौचित्यं चिन्त्यम् ।

**एयं परुप्परं नायराण पाएण समुचिआचरणं । परतित्थिआण समुचिअमह किंपि भणामि लेसेणं ॥**

**एएसिं तित्थिआणं, भिक्खट्ठमुवट्ठिआण निअगेहे । कायव्वमुचिअकिच्चं, विसेसओ रायमहिआणं ॥**

उचितकृत्यं यथार्हदानादि ।

**जइवि न मणम्मि भत्ती, न पक्खवाओ अ तग्गयगुणेसु । उचिअं गिहागएसुत्ति तह वि धम्मो गिहीण इमो ॥**

पक्षपातोऽनुमोदना । धम्मोत्ति आचारः ।

**गेहागयाणमुचिअं, वसणावडिआण तह समुद्धरणं । दुहिआण दया एसो, सव्वेसिं सम्मओ धम्मो ॥**

पुरुषमपेक्ष्य मधुरालपनासननिमन्त्रणकार्यानुयोगतन्निर्माणादिकमुचितम् । दुःखितानां दीनानाथान्धबधिरव्याधितादीनां दया यथाशक्ति तत्प्रतीकारश्च । ये किलानन्तरोक्ते लौकिकेऽप्युचिताचरणमात्रे कर्मणि न कर्मठास्ते कथं लोकोत्तरे=लोकोत्तर नरसूक्ष्ममतिग्राह्ये च जैने धर्मे प्रवीणाः स्युः, तस्मादवश्यं धर्मार्थिभिरुचिताचरणनिपुणैर्भाव्यम् । अन्यत्राऽप्यूचे–

**सव्वत्थ उचिअकरणं, गुणाणुराओ रई अ जिणवयणे । अगुणेसु अ मज्झत्थं, सम्मद्दिट्ठिस्स लिंगाइं ॥**

**मुचंति न मज्जायं, जलनिहिणो नाचला वि हु चलंति । न कयावि उत्तमनरा, उचिआचरणं विलंघंति ॥**

**तेण चिअ जयगुरुणो, तित्थयरा विहु गिहत्थभावम्मि । अम्मापिऊणमुचिअं, अब्भुट्ठाणाइ कुव्वंति ॥** इति नवधौचित्यम् ।

अवसरे चोचितं वचनमपि महते गुणाय । यथा मल्लिकार्जुनं जित्वा चतुर्दशरैकोटिमुक्ताषण्मूढकचतुर्दशभारमित-द्वात्रिंशद्वैकुम्भशृङ्गारकोटीशाटीमाणिक्यपटविषापहशुक्त्यादितत्कोशढौकनतुष्टः कुमारनृपो मन्त्रि-आम्बडाय राजपिता-महबिरुदकोटीद्रव्यचतुर्विंशतिजात्याश्वादि ददे । स तु तत्सर्वं गृहादर्वागर्थिभ्यो ददौ । पैशुन्याद् राज्ञः कोपे किं मत्तोऽप्यधिकं

दत्से ? इत्युक्तौ तव पिता द्वादशग्रामस्वामी मम त्वष्टादशदेशस्वामीत्युचितोक्त्या तुष्टो नृपः पुत्रपदं द्विगुणं च प्रसादं तस्मै ददौ । तदवादिष्म–

**दाने याने माने, शयनासनपानभोजने वचने । सर्वत्राऽन्यत्रापि हि, भवति महारसमयः समयः ॥**

अतः समयज्ञता सर्वत्रौचित्यबीजम्–

**औचित्यमेकमेकत्र, गुणानां कोटिरेकतः । विषायते गुणग्राम, औचित्यपरिवर्जितः ॥** इत्युक्तेः ।

सर्वमनौचित्यं च त्याज्यम् । येन च कृतेन मूर्खत्वव्यपदेशस्तदप्यनुचितमिति परीहार्यम् । तदपि लौकिकशास्त्रोक्तं बहूपकारित्वात् प्रदर्श्यते । यथा–

**शृणु मूर्खशतं राजंस्तं तं भावं विवर्जय । येन त्वं राजसे लोके दोषहीनो मणिर्यथा ॥**

**सामर्थ्ये विगतोद्योगः स्वश्लाघी प्राज्ञपर्षदि । वेश्यावचसि विश्वासी प्रत्ययी दम्भडम्बरे ॥**

**द्यूतादिवित्तबद्धाशः कृष्याद्यायेषु संशयी । निर्बुद्धिः प्रौढकार्यार्थी विविक्तरसिको वणिक् ॥**

**ऋणेन स्थावरक्रेता स्थविरः कन्यकावरः । व्याख्याता चाश्रुते ग्रन्थे प्रत्यक्षार्थेऽप्यपह्नवी ॥**

**चपलापतिरीर्ष्यालुः शक्तशत्रुरशङ्कितः । दत्वा धनान्यनुशयी कविना हठपाठकः ॥**

अप्रस्तावे पटुर्वक्ता प्रस्तावे मौनकारकः । लाभकाले कलहकृन् मन्युमान् भोजनलक्षणे ॥
कीर्णार्थः स्थूललाभेन लोकोक्तौ क्लिष्टसंस्कृतः । पुत्राधीने धने दीनः पत्नीपक्षार्थयाचकः ॥
भार्याखेदात् कृतोद्वाहः पुत्रकोपात्तदन्तकः । कामुकस्पर्धया दाता गर्ववान् मार्गणोक्तिभिः ॥
धीदर्पान्न हितश्रोता कुलोत्सेकादसेवकः । दत्वार्थान् दुर्लभान् कामी दत्वा शुल्कममार्गगः ॥
लुब्धे भूभुजि लाभार्थी न्यायार्थी दुष्टशास्तरि । कायस्थे स्नेहबद्धाशः क्रूरे मन्त्रिणि निर्भयः ॥
कृतघ्ने प्रतिकार्यार्थी नीरसे गुणविक्रयी । स्वास्थ्ये वैद्यक्रियाशोषी रोगी पथ्यपराङ्मुखः ॥
लोभेन स्वजनत्यागी वाचा मित्रविरागकृत् । लाभकाले कृतालस्यो महर्द्धिः कलहप्रियः ॥
राज्यार्थी गणकस्योक्त्या मूर्खमन्त्रे कृतादरः । शूरो दुर्बलबाधायां दृष्टदोषाङ्गनारतिः ॥
क्षणरागी गुणाभ्यासे सञ्चयेऽन्यैः कृतव्ययः । नृपानुकारी मौनेन जने राजादिनिन्दकः ॥
दुःखे दर्शितदैन्यार्त्तिः सुखे विस्मृतदुर्गतिः । बहुव्ययोऽल्परक्षायै परीक्षायै विषाशनः ॥
दग्धार्थो धातुवादेन रसायनरसः क्षयी । आत्मसंभावनास्तब्धः क्रोधादात्मवधोद्यतः ॥
नित्यं निष्फलसञ्चारी युद्धप्रेक्षी शराहतः । क्षयी शक्तविरोधेन स्वल्पार्थः स्फीतडम्बरः ॥

**पण्डितोऽस्मीति वाचालः सुभटोऽस्मीति निर्भयः । उद्वेजनोऽतिस्तुतिभिर्मर्मभेदी स्मितोक्तिभिः ॥**
**दरिद्रहस्तन्यस्तार्थः सन्दिग्धेऽर्थे कृतव्ययः । स्वव्यये लेख्यकोद्वेगि दैवाशात्त्यक्तपौरुषः ॥**
**गोष्ठीरतिर्दरिद्रश्च क्षैब्यविस्मृतभोजनः । गुणहीनः कुलश्लाधी गीतगायी खरस्वरः ॥**
**भार्याभयान्निषिद्धार्थी कार्पण्येनाऽऽप्तदुर्दशः । व्यक्तदोषजनश्लाघी सभामध्यार्द्धनिर्गतः ॥**
**दूतो विस्मृतसन्देशः कासवांश्चौरिकारतः । भूरि भोज्यव्ययः कीर्त्तेः श्लाघायै स्वल्पभोजनः ॥**
**स्वल्पभोज्येऽतिरसिको विक्षिप्तश्छद्मचाटुभिः । वेश्यासपत्नकलही द्वयोर्मन्त्रे तृतीयकः ॥**
**राजप्रसादे स्थिरधीरन्यायेन विवर्द्धिषुः । अर्थहीनोऽर्थकार्यार्थी जने गुह्यप्रकाशकः ॥**
**अज्ञातप्रतिभूः कीर्त्यै हितवादिनि मत्सरी । सर्वत्र विश्वस्तमना न लोकव्यवहारवित् ॥**
**भिक्षुकश्चोष्णभोजी च गुरुश्च शिथिलक्रियः । कुकर्मण्यपि निर्लज्जः स्यान् मूर्खश्च सहासगीः ॥** इति मूर्खशतम् । अन्यदप्येवंविधं कुशोभाकृत्त्याज्यम् । उक्तं च विवेकविलासादौ ।

**विजृम्भणक्षुतोद्गारहास्यादीन् पिहिताननः । कुर्यात् सभासु नो नासाशोधनं हस्तमोटनम् ॥**
**कुर्यात् पर्यस्तिकां नैव न च पादप्रसारणम् । न निद्रां विकथां नापि सभायां कुक्रियां न च ॥**

प्रस्तावेऽपि कुलीनानां हसनं स्फुरदोष्ठकम् । अट्टहासोऽतिहासश्च सर्वथाऽनुचितौ पुनः ॥
स्वाङ्गवाद्यं तृणच्छेदं व्यर्थं भूमेर्विलेखनम् । नैव कुर्यान्नखैर्दन्तनखानामपि घर्षणम् ॥
न गर्वः सर्वथा कार्यो भट्टादीनां प्रशंसया । व्युत्पन्नश्लाघया कार्यः स्वगुणानां तु निश्चयः ॥
अवधार्या विशेषोक्तिः परवाक्येषु कोविदैः । नीचेन स्वं प्रति प्रोक्तं यत्तन्नानुवदेत्सुधीः ॥
कालत्रयेऽपि यत्किञ्चिदात्मप्रत्ययवर्जितम् । एवमेतदिति स्पष्टं न वाच्यं चतुरेण तत् ॥
प्रारभ्यते नरैर्यच्च कार्यं कारयितुं परैः । दृष्टान्तान्योक्तिभिर्वाच्यं तदग्रे पूर्वमेव तत् ॥
यदि चान्येन केनापि तत्तुल्यं जल्पितं भवेत् । प्रमाणमेव तत्कार्यं स्वप्रयोजनसिद्धये ॥
यस्य कार्यमशक्यं स्यात्तस्य प्रागेव कथ्यते । नैहिरेयाहिरां कार्यो वचोभिर्वितथैः परः ॥
वैभाष्यं नैव कस्यापि वक्तव्यं द्विषतां तु चेत् । उच्यते तदपि प्राज्ञैरन्योक्तिच्छन्नभङ्गिभिः ॥
मातृपित्रातुराचार्यातिथिभ्रातृतपोधनैः । वृद्धबालाबलावैद्यापत्यदायादकिङ्करैः ॥
स्वसृसंश्रितसम्बन्धिवयस्यैः सार्द्धमन्वहम् । वाग्विग्रहमकुर्वाणो विजयेत जगत्त्रयीम् ॥ युग्मम् ।
न पश्येत् सर्वदादित्यं ग्रहणं चार्कसोमयोः । नेक्षेताम्भो महाकूपे सन्ध्यायां गगनं तथा ॥

मैथुनं मृगयां नग्नां स्त्रियं प्रकटयौवनाम् । पशुक्रीडां च कन्याया योनिं चाऽऽलकयेन्न हि ॥
न तैले न जले नास्त्रे न मूत्रे रुधिरे न च । वीक्षेत वदनं विद्वानित्थमायुस्त्रुटिर्यतः ॥
प्रतिपन्नस्य न त्यागः शोकश्च गतवस्तुनः । निद्राच्छेदश्च कस्यापि न विधेयः कदाचन ॥
अकुर्वन् बहुभिर्वैरं दद्याद् बहुमते मतम् । गतास्वादानि कृत्यानि कुर्याच्च बहुभिः समम् ॥
शुभक्रियासु सर्वासु मुख्यैर्भाव्यं मनीषिभिः । नराणां कपटेनापि निस्पृहत्वं फलप्रदम् ॥
द्रोहप्रयोजने नैव भाव्यमत्युत्सुकैर्नरैः । कदाचिदपि कर्तव्यः सुपात्रेषु न मत्सरः ॥
स्वजातिकष्टं नोपेक्ष्यं तदैक्यं कार्यमादरात् । मानिनां मानहानिः स्यात्तद्दोषादयशोऽपि च ॥
स्वजातिं ये परित्यज्य परजातिषु ये रताः । ते नरा निधनं यान्ति यथा राजा कुकर्दमः ॥
नश्यन्ति ज्ञातयः प्रायः कलहादितरेतरम् । मिलिता एव वर्द्धन्ते कमलिन्य इवाम्भसि ॥
दारिद्र्योपद्रुतं मित्रं नरं साधर्मिकं सुधीः । ज्येष्ठं ज्ञातिगुणैर्जामिमनपत्यां च यापयेत् ॥
सारथ्यायाऽन्यवस्तूनां विक्रयाय क्रयाय च । कुलानुचितकार्याय नोद्यच्छेद् गौरवप्रियः ॥
महाभारतादावप्येवमुक्तम्—

ब्राह्मे मुहूर्त्ते बुध्येत धर्मार्थौ चानुचिन्तयेत् । नेक्षेताऽऽदित्यमुद्यन्तं नास्तं यान्तं कदाचन ॥
उदङ्मुखो दिवा रात्रावुत्सर्गं दक्षिणामुखः । आबाधासु यथाकामं कुर्यान् मूत्रपुरीषयोः ॥
देवार्चनादिकार्याणि तथा गुर्वभिवादनम् । कुर्वीत च समाचम्य तद्वदेव[१] भुजिक्रियाम् ॥
अर्थस्योपार्जने यत्नः कार्य एव विपश्चिता । तत्संसिद्धौ हि सिद्ध्यन्ति धर्मकामादयो नृप ! ॥
पादेन कार्यं पारत्र्यं पादं कुर्याच्च सञ्चये । अर्द्धेन चात्मभरणं नित्यनैमित्तिकान्वितम् ॥
केशप्रसाधनादर्शदर्शनं दन्तधावनम् । पूर्वाह्ण एव कार्याणि देवतानां च पूजनम् ॥
दूरादावसथान् मूत्रं दूरात्पादावसेचनम् । उच्छिष्टोत्सर्जनं दूरात्सदा कार्यं हितैषिणा ॥
लोष्ठमर्दी तृणच्छेदी नखखादी च यो नरः । नित्योच्छिष्टः शकृन्मूत्रैर्नेहायुर्विन्दते महत् ॥
न चासीताऽऽसने भिन्ने भिन्न[२]कांश्यं च वर्जयेत् । न मुक्तकेशैर्भोक्तव्यमनग्नः स्नानमाचरेत् ॥
स्वप्तव्यं नैव नग्नेन न चोच्छिष्टश्च संवसेत् । उच्छिष्टो न स्पृशेच्छीर्षं सर्वप्राणास्तदाश्रयाः ॥
केशग्रहान् प्रहारांश्च शिरस्येतानि वर्जयेत् । नान्यत्र पुत्रशिष्याभ्यां शिक्षार्थं ताडनं स्मृतम् ॥

१. वदन्नभुजि इति को० ह० प्र० पाठः । २. कांस्यं इति को० ह० प्र० पाठः ।

न पाणिभ्यामुभाभ्यां तु कण्डूयेज्जातु वै शिरः । न चाभीक्ष्णं शिरःस्नानं कार्यं निष्कारणं नरैः ॥
न प्रशस्तं निशि स्नानं राहोरन्यत्र दर्शनात् । न भुक्तोत्तरकालं च न गम्भीरजलाशये ॥
दुष्कृतं न गुरोर्ब्रूयात् क्रुद्धं चैनं प्रसादयेत् । परिवादं न शृणुयादन्येषामपि जल्पताम् ॥
गुरोः पतिव्रतानां च तथा धर्मतपस्विनाम् । परिवादं न कुर्वीत परिहासेऽपि भारत ! ॥
किञ्चित्परस्वं न हरेन्नाल्पमप्यप्रियं वदेत् । प्रियं च नानृतं ब्रूयान्नान्यदोषानुदीरयेत् ॥
पतितैश्च कथां नेच्छेदासनं च विवर्जयेत् । पतितान्नं न रोचेत पतितैर्न सहाचरेत् ॥
विद्विष्टपतितोन्मत्तबहुवैरिशठैः सह । बुधो मैत्रीं न कुर्वीत नैकः पन्थानमाश्रयेत् ॥
न दुष्टयानमारोहेत् कूलच्छायां न संश्रयेत् । नावगाहेज्जलौघस्य वेगमग्रेसरो नरः ॥
प्रदीप्तं वेश्म न विशेन्नारोहेच्छिखरं गिरेः । नासंवृतमुखो जृम्भेत् श्वासकासौ च वर्जयेत् ॥
नोर्ध्वं तिर्यग् न दूरं वा निरीक्षेत् पर्यटन् बुधः । युगमात्रं महीपृष्ठं नरो गच्छेद्विलोकयन् ॥
नोच्चैर्हसेत्सशब्दं च न मुञ्चेत्पवनं बुधः । नखान्न रदनैश्छिन्द्यात्पादं पादेन नाक्रमेत् ॥
न श्मश्रु भक्षयेच्चौष्ठान्न गृह्णीयाद्विचक्षणः । नोच्छिष्टो भक्षयेत्किञ्चिन्नाऽद्वारेण विशेत्क्वचित् ॥
ग्रीष्मे वर्षासु च च्छत्री दण्डी रात्रौ वनेषु च । उपानद्वस्त्रमाल्यं च धृतमन्यैर्न धारयेत् ॥

न चेर्ष्या स्त्रीषु कर्त्तव्या दारा रक्ष्याः प्रयत्नतः । अनायुष्या भवेदीर्ष्या तस्मात्तां परिवर्जयेत् ॥
पानीयस्य क्रिया नक्तं तथैव दधिसक्तवः । वर्जनीया महाराज ! निशीथे भोजनक्रिया ॥
नोर्ध्वजानुश्चिरं तिष्ठेन्न भवेदुत्कटासनः । तद्वन्नोपविशेत्प्राज्ञः पादेनाऽऽकृष्य चासनम् ॥
नातिकल्यं नातिसायं न च मध्यन्दिने तथा । नाऽज्ञातैः सह गन्तव्यं नैको न बहुभिः सह ॥
अवलोक्यो न चादर्शो मलिनो बुद्धिमन्नरैः । न च रात्रौ महाराज ! दीर्घमायुरभीप्सता ॥
वर्जयित्वा तु कमलं तथा कुवलयं नृप ! । रक्तमाल्यं न धार्यं स्यात् शुक्लं धार्यं तु पण्डितैः ॥
अन्यदेव भवेद्वासः शयनीये नरोत्तम ! । अन्यदर्चासु देवानामन्यद्धार्यं सभासु च ॥
वाक्पाणिपादचापल्यं वर्जयेच्चातिभोजनम् । शय्यादीपाऽधमस्तंभच्छायां दूरेण संत्यजेत् ॥
न नासिकां विकुश्लीयात् स्वयं नोपानहौ हरेत् । शिरसा न हरेद्भारं न प्रभावेत्प्रवर्षति ॥
भिन्ने भाण्डे कलिः प्रायः खट्वायां वाहनक्षयः । नाश्नन्ति पितरस्तत्र यत्र कुक्कुरकुर्कुटौ ॥
सुवासिनीं गुर्विणीं च वृद्धं बालातुरौ तथा । भोजयेत् संस्कृतान्नेन प्रथमं चरमं गृही ॥
अघं स केवलं भुङ्क्ते बद्धे गोवहनादिके । यो भुङ्क्ते पाण्डवश्रेष्ठ ! प्रेक्षतामप्रदाय च ॥

वृद्धो ज्ञातिस्तथा मित्रं दरिद्रो यो भवेदिह । गृहे वासयितव्यास्ते गृहवृद्धिमभीप्सता ॥
अपमानं पुरस्कृत्य मानं कृत्वा च पृष्ठतः । स्वार्थमभ्युद्धरेत् प्राज्ञः स्वार्थभ्रंशो हि मूर्खता ॥
न स्वल्पस्य कृते भूरि नाशयेन् मतिमान्नरः । एतदेव च पाण्डित्यं यत् स्वल्पाद् भूरिरक्षणम् ॥
आदानस्य प्रदानस्य कर्त्तव्यस्य च कर्मणः । क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम् ॥
नाभ्युत्थानक्रिया यत्र नालापो मधुराक्षरः । गुणदोषकथा नैव तस्य हर्म्ये न गम्यते ॥
अनाहूतः प्रविशति अपृष्टो बहु भाषते । अदत्तमासनं भुङ्क्ते स पार्थ ! पुरुषाधमः ॥
अशक्तः कुरुते कोपं निर्धनो मानमिच्छति । अगुणी च गुणद्वेषी पृथिव्यां लकुटत्रयम् ॥
मातापित्रोरभरकः क्रियामुद्दिश्य याचकः । मृतशय्याप्रतिग्राही न भूयः पुरुषो भवेत् ॥
बलीयसा समाक्रान्तो वैतसीं वृत्तिमाश्रयेत् । वाञ्छन्नभ्रंशिनीं लक्ष्मीं न भौजङ्गीं कथञ्चन ॥
ऋमाद्वेतसवृत्तिस्तु प्राप्नोति महतीं श्रियम् । भुजङ्गवृत्तिमापन्नो वधमर्हति केवलम् ॥
कूर्मः सङ्कोचमासाद्य प्रहारानपि मर्षयेत् । काले काले च मतिमानुत्तिष्ठेत् कृष्णसर्पवत् ॥
बलिनापि न बाध्यन्ते लघवोऽप्येकसंश्रयाः । विपक्षेणापि मरुता यथैकस्था न वीरुधः ॥

उच्छेदयन्ति विद्वांसो वर्द्धयित्वाऽरिमेकदा । गुडेन वर्द्धितः श्लेष्मा यतो निःशेषतां व्रजेत् ॥

सर्वस्वहरणे शक्तं शत्रुं बुद्धियुता नराः । तोषयन्त्यल्पदानेन वाडवं सागरो यथा ॥

शत्रुमुत्पाटयेत् प्राज्ञस्तीक्ष्णं तीक्ष्णेन शत्रुणा । पादलग्नं करस्थेन कण्टकेनेव कण्टकम् ॥

अविमृश्य स्वपरयोः शक्तिमुत्तिष्ठते तु यः । सोऽब्दशब्दे शरभवत् प्रोल्ल्लन्नङ्गभङ्गभाक् ॥

उपायेन हि तत्कुर्याद्यन्न शक्यं पराक्रमैः । काक्या कनकसूत्रेण कृष्णसर्पो निपातितः ॥

नखिनां च नदीनां च शृङ्गिणां शस्त्रपाणिनाम् । विश्वासो नैव कर्त्तव्यः स्त्रीषु राजकुलेषु च ॥

सिंहादेकं बकादेकं शिक्षेच्चत्वारि कर्कुटात् । वायसात्पञ्च शिक्षेत षट् शूनस्त्रीणि गर्दभात् ॥

प्रभूतकार्यमल्पं वा यो नरः कर्तुमिच्छति । सर्वारंभेण तत्कुर्यात् सिंहस्यैकं पदं यथा ॥

बकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमम् । वृकवच्चावलुम्पेत शशवच्च पलायनम् ॥

प्रागुत्थानं च युद्धं च संविभागं च बन्धुषु । स्त्रियमाक्रम्य भुञ्जीत शिक्षेच्चत्वारि कुर्कुटात् ॥

गूढं च मैथुनं धार्ष्ट्यं काले चालयसङ्ग्रहः । अप्रमादमविश्वासं पञ्च शिक्षेत वायसात् ॥

बह्वाशी चाल्पसन्तुष्टः सुनिद्रो लघुचेतनः । स्वामिभक्तश्च शूरश्च षडेते श्वानतो गुणाः ॥

**आरूढं तु वहेद्भारं शीतोष्णं न च विन्दते । सन्तुष्टश्च भवेन्नित्यं त्रीणि शिक्षेत गर्दभात् ॥**

इत्याद्यन्यदपि नीतिशास्त्राद्युक्तं सर्वमौचित्यं सुश्रावकेण सम्यक् चिन्त्यम् । यतः–

**हितमहितमुचितमनुचितमवस्तु वस्तु स्वयं न यो वेत्ति । स पशुः शृङ्गविहीनः संसारवने परिभ्रमति ॥**

**नो वक्तुं न विलोकितुं न हसितुं न क्रीडितुं नेरितुं, न स्थातुं न परीक्षितुं न पणितुं नो राजितुं नार्जितुम् ।**

**नो दातुं न विचेष्टितुं न पठितुं नानन्दितुं नैधितुं, यो जानाति जनः स जीवति कथं निर्लज्जचूडामणि ॥**

**आसितुं शयितुं भोक्तुं परिधातुं प्रजल्पितुम् । वेत्ति यः स्वपरस्थाने विदुषां स नरोऽग्रणी ॥** इत्यलं प्रसङ्गेन ।

व्यवहारशुद्ध्यादित्रयेणार्थचिन्तायां ज्ञातम् । यथा–विनयपुरे इभ्यवसुभद्रापुत्रो धनमित्रो बाल्ये पित्रोर्मृत्या धनहान्या निःस्वो दुःखी यौवने कन्याया अप्राप्तौ ह्रिया धनार्जनार्थं गतः । खन्यवादधातुवादरसमन्त्रजलस्थलयात्राविविधवाणिज्यनृपादिसेवादावपि धनाप्राप्त्याऽत्युद्विग्नो गजपुरे केवलिनं प्राग्भवं पप्रच्छ । सोऽप्यूचे 'विजयपुरे गङ्गदत्तो गृहपतिः, कृपणो मत्सरी दान-लाभादावन्येषामपि विघ्नकृत्, सुन्दरश्राद्धेन मुनिपार्श्वे नीतः । किञ्चिद्भावाद् दाक्षिण्याच्च प्रत्यहं चैत्यवन्दनापूजादिधर्मकरणं स्वीचक्रे । कार्पण्यादिना च पूजादौ शिथिलश्चैत्यवन्दनाभिग्रहं पालितवान् । तत्पुण्येनेभ्यपुत्रस्त्वं जातः, अस्माकं मिलितश्च । प्राग्दुष्कृताच्चातिनिःस्वो दुःखी च–

**यद्यथा क्रियते कर्म तत्तथैवोपभुज्यते । सहस्त्रगुणमप्येवं ज्ञात्वा कुर्याद्यथोचितम् ॥**

ततः स प्रबुद्धो गृहिधर्मं प्रपेदे, दिननिशाऽऽद्ययामयोर्धर्म एव कार्य इत्यभिग्रहं च । ततः श्राद्धगृहे उत्तीर्णः । प्रातर्मालिकेन सह पुष्पाणि भागेनाऽवचित्य गृहे चैत्ये चार्हन्तं भक्त्याऽर्चति, द्वितीययामादौ तस्य व्यवहारशुद्धिदेशादिविरुद्धत्या-गौचित्याचरणादिविधिना व्यवहारतोऽकृच्छ्रेण भोजनादि स्यात् । एवं यथा यथा धर्मे स्थैर्यं तथा तथाऽधिकाधिकधनमर्जयति धर्मे च व्ययति । क्रमात् पृथग् गृहे स्थितो धर्मिष्ठतया महेभ्यदत्तां कन्यां परिणिन्ये । अन्यदोच्चलति गोकुले गुडतैलादि विक्रेतुं गतो गोकुलाधिपमङ्गारधिया त्यक्तनिधिस्वर्णं दृष्ट्वा 'स्वर्णमिदं कस्मात् त्यज्यते ?' इत्यूचे । तेनोक्तं–'प्राग् वयं पित्रा स्वर्णोक्त्या वञ्चितास्त्वमपि वञ्चयसे ?' तेनोक्तम्, अहं कूटं न ब्रुवे' । सोऽप्याह–'तर्हि गुडादि दत्वा त्वमेव गृहाण । ततस्तेन तथा कृतम् । त्रिंशत्सहस्त्रमानेन तेनान्येनापि बह्वर्जितेन स महेभ्यो जज्ञे । अहो तद्भवेऽपि धर्ममाहात्म्यम् । अन्येद्युः सुमित्रमहेभ्यगृहे कर्मवशादेकाकी स गतः । तदा कोटिमूल्यरत्नैः कृतं हारं बहिर्भुक्त्वा किञ्चित् कार्येण सुमित्रो मध्ये गत्वा पश्चादागतो हारमदृष्ट्वाऽत्राऽन्याभावात्त्वयैवात्त इत्युक्त्वा तं राजकुले निन्ये । तेन जिनार्चासद्दृष्टिसुरकायोत्सर्गपूर्वं दिव्यप्रारम्भे तु रत्नावली सुमित्रस्य ओटितः पतिता । सर्वेषां विस्मयः । ज्ञानी पृष्ट : प्राह–''गङ्गदत्तो गृहपतिस्तद्भार्या मगधा श्रेष्ठिपत्न्याः प्रच्छन्नं लक्षमूल्यं रत्नं जगृहे । तया बहु बहु मार्गणे भार्यामोहाद् गङ्गदत्तः तव स्वैरेवात्तं इत्यालं ददौ । ततः सा खिन्ना तापसीभूय व्यन्तरो जज्ञे । मगधा तु मृत्वा सुमित्रः, गङ्गदत्तस्तु धनमित्रः । तेन व्यन्तरेण क्रुधा सुमित्रस्याऽष्टौ पुत्रा निहताः । रत्नावली

सम्प्रति हृता, अद्यापि सर्वस्वं हरिष्यति । बहुभवेषु वैरं निर्यातयिष्यति वैरपाकस्य अहह ! दुस्सहदुरन्तत्वम्, आलदानाद्ध-नमित्रेणाऽऽलं प्राप्तम् । पुण्याकृष्टसुदृष्टिसुरैस्तद्व्यन्तरात्प्रसह्य रत्नावली मोचिता। श्रुत्वेति संविग्नौ नृपधनमित्रौ ज्येष्ठपुत्रं स्वपदे न्यस्य प्रव्रज्य सिद्धौ ॥ **इति धनमित्रकथा ॥ इति सप्तमगाथार्थः ॥**

**मज्झण्हे जिणपूआ, सुपत्तदाणाइजुत्ति भुंजिता ।**
**पच्चक्खाइ अ गीअत्थ-अंतिए कुणइ सज्झायं ॥८॥**

**मध्याह्ने** पूर्वोक्तविधिना विशिष्य च प्रधानशाल्योदनादिनिष्पन्ननिःशेषरसवतीढौकनादिना द्वितीयवारं **जिनपूजा** सुपात्र-दानादियुक्त्यनतिक्रमेण **भुक्त्वा** भोजनं कृत्वेत्यनुवादः । माध्याह्निकपूजाभोजनयोश्च न कालनियमः, तीव्रबुभुक्षो हि 'बुभुक्षाकालो भोजनकाल' इति रूढेर्मध्याह्नादर्वागपि गृहीतप्रत्याख्यानं तीरयित्वा देवपूजापूर्वकं भोजनं कुर्वन्न दुष्यति । आयुर्वेदे त्वेवमुक्तं—

**याममध्ये न भोक्तव्यं यामयुग्मं न लङ्घयेद् । याममध्ये रसोत्पत्तिर्युग्मादूर्ध्वं बलक्षयः ॥**

सुपात्रादानादियुक्तिश्चेयम् भोजनवेलायां सभक्ति साधून् निमन्त्र्य तैः सह गृहमायाति । स्वयमागच्छतो वा मुनीन् दृष्ट्वा

सम्मुखं गमनादिकं करोति । ततः सविनयं संविग्नभाविताभावितक्षेत्र-सुभिक्षदुर्भिक्षादिकाल-सुलभदुर्लभादिदेयद्रव्य-आचार्योपाध्यायगीतार्थतपस्विबालवृद्धग्लानसहाऽसहादिपुरुषाद्यपेक्षया स्पर्धा-महत्त्व-मत्सर-स्नेह-लज्जा-भय-दाक्षिण्य-परानुवर्तना-प्रत्युपकारेच्छामायाविलम्बाऽनादरविप्रियोक्तिपश्चात्तापादिदानदोषवर्जमेकान्तात्मानुग्रहबुद्ध्या द्विचत्वारिंशद्भिक्षादोषाद्यदूषितनिःशेषनिजान्नपानवस्त्रादेर्भोजनाद्यनुक्रमेण स्वयं स्वहस्तपात्रधरणादिना पार्श्वे स्थित्वा भार्यादिपार्श्वाद्वा दानं दत्ते । द्विचत्वारिंशद् भिक्षादोषाः पिण्डविशुद्ध्यादिभ्योऽभ्यूह्याः । ततो वन्दित्वा स्वगृहद्वारादि यावदनुव्रज्य च निवर्त्तते । साध्वभावे त्वनभ्रवृष्टिवत्साध्वागमनं जातु स्यात्तदा कृतार्थः स्यामिति दिगालोकं कुर्यात् । तथा चाहुः—

**जं साहूण न दिन्नं, कहिं पि तं सावया न भुंजंति । पत्ते भोअणसमए, दारस्सालोअणं कुज्जा ॥**

**संथरणम्मि असुद्धं, दुह्नवि गिण्हंत दिंतयाणहियं । आउरदिट्ठंतेणं, तं चेव हिअं असंथरणे ॥**

**संथरणम्मि**त्ति संस्तरणे साधूनां निर्वाहे सति, असंस्तरणे अनिर्वाहे दुर्भिक्षग्लानाद्यवस्थायामित्यर्थः । तथा—

**पहसंतगिलाणेसु, आगमगाहीसु तहय कयलोए । उत्तरपारणगम्मि अ, दिन्नं सुबहुप्फलं होइ ॥**

**एवं देसं तु खित्तं तु विआणित्ता य सावओ । फासुअं एसणिज्जं च देइ जं जस्स जुग्गयं ॥**

**असणं पाणगं चेव, खाइमं साइमं तहा । ओसहं भेसजं चेव, फासुअं एसणिज्जयं ॥**

औषधमेकमेव द्रव्यं, भेषजं तु बह्वौषधसंयोगः । साधुनिमन्त्रणभिक्षाग्रहणादिविधिविशेषो मत्कृतश्राद्धप्रतिक्रमण-सूत्रवृत्तेरवधार्यः । इदं च सुपात्रदानमितिथिसंविभाग उच्यते । यदागमः-**अतिहिसंविभागो नाम नायागयाणं कप्पणिज्जाणं अन्नपाणाईणं दव्वाणं देसकालसद्धासक्कारकम्मजुयं पराए भत्तिए आयाणुग्गहबुद्धीए संजयाणं दाणं**' इति । सुपात्रदानं च दिव्यौदारिकाद्यद्भुतभोगाभीष्ट-सर्वसुखसमृद्धिसाम्राज्यदिसंयोगप्राप्तिपूर्वकनिर्विलम्बनिर्वाणशर्मप्राप्तिफलम् । यतः—

**अभयं सुपत्तदाणं, अणुकंपाउचिअकित्तिदाणं च । दोहि वि मुक्खो भणिओ, तिन्नि वि भोगाइअं दिंति ॥**

पात्रता त्वेवमुक्ता—

**उत्तमपत्तं साहू, मज्झिमपत्तं च सावया भणिआ । अविरयसम्मदिट्ठी, जहन्नपत्तं मुणेअव्वं ॥**

तथा—

**मिथ्यादृष्टिसहस्रेषु वरमेको ह्यणुव्रती । अणुव्रतिसहस्रेषु वरमेको महाव्रवी ॥**

**महाव्रतिसहस्रेषु वरमेको हि तात्त्विकः । तात्त्विकस्य (केन) समं पात्रं न भूतं न भविष्यति ॥**

**सत्पात्रं महती श्रद्धा काले देयं यथोचितम् । धर्मसाधनसामग्री बहुपुण्यैरवाप्यते ॥**

**अनादरो विलम्बश्च वैमुख्यं विप्रियं वचः । पश्चात्तापश्च पञ्चापि सद्दानं दूषयन्त्यमी ॥**

**भिउडी उद्धालोअणं अंतोवत्ता परम्मुहं ठाणं । मोणं कालविलंबो नक्कारो छव्विहो होइ ॥**

**आनन्दाश्रूणि रोमाञ्चो बहुमानः प्रियं वचः । किञ्चाऽनुमोदना पात्रदाने भूषणपञ्चकम् ॥**

सुपात्रदाने परिग्रहपरिमाणनियमपालने च रत्नसारकुमारकथा । यथा—

**रत्नविशाला नगरी गरीयः संपदां पदम् । यथार्थनामा समरसिंहस्तत्र नरेश्वरः ॥१॥**

**व्यवहारी दुःस्थदुःखापहारी तत्र चाभवत् । वसुसार श्रिया सारः प्रियाऽस्य च वसुन्धरा ॥२॥**

**रत्नसारगुणश्रेणी रत्नसारस्तयोः सुतः । सवयोभिः समेतोऽसौ समेतो वनमन्यदा ॥३॥**

**विनयन्धरसूरीन्द्रान् प्रेक्षावान् प्रेक्ष्य तत्र च । नत्वाऽप्राक्षीत्प्रभोऽत्रापि प्राप्यते सुखिता कथम् ? ॥४॥**

**मुमुक्षुमुख्या आचख्युर्दक्ष ! सन्तोषपोषतः । भवेऽत्रापि भवेज्जीवः सुखी न त्वन्यथा क्वचित् ॥५॥**

**सन्तोषश्च भवेद् द्वेधा देशतः सर्वतस्तथा । तत्र स्याद्देशसन्तोषः सौख्याय गृहमेधिनाम् ॥६॥**

**परिग्रहपरिमाणग्रहणे गृहिणां पुनः । देशसंतोषपोषः स्यादतुच्छेच्छानिवृत्तितः ॥७॥**

**सर्वसन्तोषपोषस्तु यतीनामेव संभवेत् । अनुत्तरसुरेभ्योऽप्यत्राऽप्यनुत्तरसौख्यदः ॥८॥**

उक्तञ्च पञ्चमाङ्गे—**एगमासपरिआए समणे वाणमंतराणं, दोमासपरिआए भवणवईणं, एवं तिचउप्पंचछसत्त-अट्ठनवदसएगारसमासपरिआए**

असुरकुमाराणं जोइसिआणं चंदसूराणं सोहम्मीसाणाणं सणंकुमारमाहिंदाणं बंभलंतगाणं सुक्कसहस्साराणं आणयाइचऊणं गेविज्जाणं जाव बारसमासपरिआए समणे अणुत्तरोववाइयदेवाणं तेउलेसं वीईवयइ त्ति ।

इह तेजोलेश्या चित्तसुखलाभलक्षणा चारित्रस्य परिणतत्त्वे सतीति शेषः ।

**प्राज्यैर्न हि महाराज्यैर्धनैर्नातिघनैरपि । समग्रैर्नापि भोगाङ्गैरसन्तोषजुषः सुखम् ॥९॥**

**सुभूमकूणिकमुखा मम्मणाद्याश्च जज्ञिरे । हासाप्रहासापत्याद्याश्चासन्तोषण दुःखिताः ॥१०॥**

प्रोक्तमपि—**असन्तोषवतः सौख्यं न शक्रस्य न चक्रिणः । जन्तोः संतोषभाजो यदभयस्येव जायते ॥११॥**

**उपर्युपरि पश्यन्तः सर्व एव दरिद्रति । अधोऽधः पश्यत कस्य महिमा नोपजायते ॥१२॥**

**तत्सौख्यपोषिसन्तोषसाधनाय धनादिकम् । परिग्रहं परिमितीकुरुष्वाऽऽपि यदृच्छया ॥१३॥**

**धर्मः स्वल्पोऽपि नियमपूर्वोऽनन्तफलप्रदः । अनल्पोऽपि विना तेन स्यादल्पफलदः पुनः ॥१४॥**

**कूपेऽल्पायामपि सरौ वहन्त्यां नित्यमक्षयि । नीरं नीरन्ध्रनीरौघैः पूर्णे सरसि नो पुनः ॥१५॥**

**विधुरेऽपि निजं धर्मं न त्यजेन्नियमे सति । जातु त्यजति सौस्थ्येऽपि विना तु नियमार्गलाम् ॥१६॥**

**उपात्त एव नियमे धर्मे स्याद् दृढताऽपि च । पशूनामपि सुस्थैर्यं दामन्यामेव संभवेत् ॥१७॥**

**धर्मे दार्ढ्यं फलं वृक्षे जलं नद्यां बलं भटे । खलेऽसत्यं जले शैत्यं घृतं भोज्ये च जीवितम् ॥१८॥**

तद्धर्मनियमे धर्मदृढत्वे च दृढं बुधैः । यतितव्यं यथाऽभीष्टसुखप्राप्तिः सुखं भवेत् ॥१९॥
रत्नसारः कुमारस्तां निशम्य सुगुरोर्गिरम् । सम्यक्त्वपूर्वं जग्राह परिग्रहमिति व्रतम् ॥२०॥
तद्यथा—रत्नानां लक्षमेकं मे दश लक्षाश्च काञ्चनम् । मुक्तानां विद्रुमाणां च प्रत्येकं मूढकाष्टकम् ॥२१॥
बद्धनाणकसङ्ख्यायां त्वष्टौ कनककोटयः । भारायुतं च रूप्यादेः शतं धान्यस्य मूढकाः ॥२२॥
शेषक्रयाणकं भारलक्षं षट् गोकुलानि च । गृहाट्टानां पञ्चशती यानानां च चतुःशती ॥२३॥
हयाः सहस्रं हस्तीन्द्राः शतमेकमितोऽधिकम् । न सङ्ग्राह्यं न च ग्राह्यं राज्यं व्यापारिताऽपि च ॥२४॥
पञ्चातिचारसंशुद्धं च पञ्चममणुव्रतम् । प्रतिपद्येति सश्रद्धः श्राद्धधर्ममपालयत् ॥२५॥
सुहृद्भिः सह सत्याह्वैः स भ्रमन् समयान्तरे । रोलम्बरोलनामानं जगामाराममादृतः ॥२६॥
आरामश्रियमुत्पश्य पश्यन् क्रीडागिरिं गतः । दिव्यगीतरवं दिव्य-नेपथ्यं दिव्यरूपभृत् ॥२७॥
तस्मिन् किन्नरमिथुनं हयास्यं नरविग्रहं । अदृष्टपूर्वं दृष्ट्वासौ विस्मितः स्मितवागवक् ॥२८॥ युग्मम् ।
यद्येष मर्त्योऽमर्त्यो वा तत्किमश्वमुखस्ततः । न नरो न सुरः किन्तु तिर्यङ्द्वीपान्तरोद्भवः ॥२९॥
किं वा कस्यापि देवस्य वाहनं संभवेदिदं । इत्याकर्ण्याऽभणत्कर्णाम्रेडदूनो नु किं नरः ॥३०॥
कुमार ! कुविचारान्मां विडम्बयसि किं मुधा । स्वैरं विलासवान् विश्वेऽप्यहं हि व्यन्तरः सुरः ॥३१॥

त्वमेव तिर्यक्प्रायोऽसि यत्पित्रापि बहिष्कृतः । देवानामपि दुष्प्रापाद् भृत्यवद्दिव्यवस्तुनः ॥३२॥
रे रे द्वीपान्तरे दूरे प्राप्तः पित्रा तव क्वचित् । [१]समन्धरकारनामा हि नीलाभस्तुरगोत्तमः ॥३३॥
कृशवक्रमुखः कर्णदुर्बलश्चञ्चलस्थितिः । स्कन्धार्गलः सरोषश्च कुनरेन्द्र इवैष च ॥३४॥
तथाप्ययं विश्वजनस्पृहणीयस्तु कौतुकं । सर्वाङ्गीणसमग्रर्द्धिर्हेतुर्नेतुर्निजस्य च ॥३५॥
यतः—निर्मांसं मुखमण्डले परिमितं मध्ये लघु कर्णयोः स्कन्धे बन्धुरमप्रमाणमुरसि स्निग्धं च रोमोद्गमे ।
पीनं पश्चिमपार्श्वयोः पृथुतरं पृष्ठे प्रधानं जवे, राजा वाजिनमारुरोह सकलैर्युक्तं प्रशस्तैर्गुणैः ॥३६॥
अश्वारोहमनःस्पर्धादिवैकदिवसेन सः । योजनानां शतं याति जवनः पवनादपि ॥३७॥
संपत्प्ररोहेऽत्र महारोहेऽश्वारोहतां वहन् । प्राप्नोत्यहो सप्तमेऽह्नि वस्तु विश्वेऽप्यनुत्तरे ॥३८॥
त्वमरे स्वगृहस्यापि रहस्यं नावबुध्यसे । ज्ञंमन्यत्वेन मामेवं मुधैव च विभाषसे ॥३९॥
ज्ञास्यते तव धीरत्वं वीरत्वं विज्ञता च चेत् । त्वमाप्स्यसीति गीः खेऽगात्किन्नरः किन्नरीयुतः ॥४०॥
तदपूर्वतरं श्रुत्वा कुमारो गृहमागमत् । अत्युच्चैर्वञ्चितम्मन्यो मन्युमानुन्मनायितः ॥४१॥

---

१. समरान्धकारनामा नीला० इति को० ह० प्र० पाठः ।

मध्येऽगारं गतो द्वारं दत्वा मञ्चकमाश्रितः । जगदे सविवादेन पित्रो किं वत्स ! बाधते ॥४२॥
यः कश्चिद्व्याधिराधिर्वा ब्रूहि तं यत्प्रतिक्रियाम् । कुर्वेऽवश्यं न मुक्तानामप्यर्थः स्फुटतां विना ॥४३॥
तद्वाक्यतुष्टस्तद्द्वारं झटित्युद्घाट्य सोऽब्रवीत् । यथावृत्तं यथाचित्तं पित्रे चित्रेण सोऽप्यवक् ॥४४॥
अस्माद्विश्वोत्तमादश्वाद्विश्वायामयमिच्छया । सञ्चरिष्णुश्चिरं मा स्मान् वियोगार्त्तान् व्यवधान्मुधा ॥४५॥
इत्याद्याशङ्क्य तुरगो गोपितः प्राक् प्रयत्नतः । अर्प्य एव त्विदानीं ते कुर्याः किन्तु यथोचितम् ॥४६॥
इत्युदित्वा ददौ सौऽस्मै तं तुरङ्गं सरङ्गहृत् । याञ्चायामपि नार्प्यं चेद्दत्तः स्नेहे तदाऽनलः ॥४७॥
सोऽप्युच्चैर्मुमुदे तेन निधानेनेव निर्धनः । अभीष्टस्य विशिष्टस्य प्राप्तौ माद्यति वा न कः ॥४८॥
मणीखचितसौवर्णवर्यपर्याणमार्यधीः । कुमारोऽथ तमारुक्षदुदयाद्रिमिवांशुमान् ॥४९॥
ससमानवयःशीलैः सवयःप्रवरैर्वृतः । ह्यारूढरङ्गत्तुरगैर्निरगान्नगराद् बहिः ॥५०॥
उच्चैरुच्चैःश्रवस्तुल्यमतुल्योत्तमलक्षणम् । [1]बाह्याल्यां वाहयामास स वाहेन्द्रं सुरेन्द्रवत् ॥५१॥
धोरितं वल्गितं प्लुत्युत्तेजिते च गतीः क्रमात् । चतस्रस्तेन दक्षेण साक्षेपं खेल्यते स्म सः ॥५२॥

१. वोह्याल्यां इति को० ह० प्र० पाठः ।

स पञ्चमीं गतिं शुक्लध्यानेनेवामुना पुनः । नीयमानः परान्सर्वान् सिद्धजीव इवामुचत् ॥५३॥
अत्रान्तरे श्रेष्ठ्यगारे कीरराट् पञ्जरस्थितः । अवधार्य कार्यसारं वसुसारं सुधीर्जगौ ॥५४॥
भ्राता तात ! ममेदानीं रत्नसारकुमारराट् । तं तुरङ्गममारूढः प्रौढवेगः प्रयात्ययम् ॥५५॥
कौतूहलैकरसिकः कुमारश्चञ्चलाशयः । जङ्गालः प्रबलोत्फालः तुरङ्गश्च कुरङ्गवत् ॥५६॥
अतिविद्युद्विलसितं विधेर्विलसितं पुनः । न जानीमः परिणामः कार्यस्यार्य ! कथं त्विति ॥५७॥
भाग्यैकसिन्धोर्मद्बन्धोर्न यद्यप्यशुभं क्वचित् । तदप्यनिष्टाशङ्कीनि स्वान्तानि स्नेहलात्मनाम् ॥५८॥
याति यत्रापि पञ्चास्यः स्यात्तत्रापि प्रभुत्वभाक् । सिंही तदपि ही सूनोरनिष्टाशङ्क्यार्त्तिभृत् ॥५९॥
सत्यप्येवं यथाशक्ति प्राग्यत्नकरणं वरम् । पालिबन्धस्तडागेऽपि सज्ज एव सुयौक्तिकः ॥६०॥
तत्तात ! तावकीनः स्याद्यद्यादेशस्तदा द्रुतम् । यामि स्वामिन् ! कुमारस्य शुद्धिहेतोः पदातिवत् ॥६१॥
कदाचिद्विषमायां च दशायां दैवयोगतः । स्यां सखापि कुमारस्य सुखकृद्वचनादिना ॥६२॥
एवं स्वस्वान्तसंवादिवादिनं वदति स्म तम् । हृष्टः श्रेष्ठी शुकश्रेष्ठ ! साधु साधु त्वयोदितम् ॥६३॥
गच्छ गच्छतरां स्वच्छमतेऽतुच्छगतेर्द्रुतम् । वत्स ! वत्सस्य भूयास्त्वं सहायश्च महाऽध्वनि ॥६४॥
त्वया प्रियसखेनासौ सुखेनाप्ता निजं पदम् । लक्ष्मणेनेव संपूर्णकामः श्रीरामवद् ध्रुवम् ॥६५॥

कृतार्थमानी मानीति सोऽनुज्ञादानमात्रतः । निर्ययौ पञ्जरात् कीरः संसारादिव सन्मतिः ॥६६॥
यायावरः स पत्रीव पतत्री मिलितः क्षणात् । प्रेम्णाऽऽलाप्य कुमारेण निन्येऽङ्के लघुबन्धुवत् ॥६७॥
अश्वरत्नं नृरत्नाप्त्याऽखर्वगर्वमिवोद्व्रजन् । पुरस्यैव परिसरेऽमुञ्चन्मित्रतुरङ्गमान् ॥६८॥
अप्रज्ञा इव सप्रज्ञात्ते पश्चात्पतितास्ततः । आदावेव हतोत्साहास्तस्थुस्तत्रैव दुःस्थिताः ॥६९॥
अथोच्चैरुत्पतत्काय एव प्रायः प्रयानयम् । उर्वीमपि न पस्पर्श रजःस्पर्शभयादिव ॥७०॥
सरिद्गिरिवनोर्व्यादि कुमारस्याखिलं तदा । हयेशस्पर्द्धयेवोद्यत्प्रतिभाति स्म सर्वतः ॥७१॥
कौतुकोत्ककुमारान्तःकरणप्रेरणादिव । महीं क्रामन्नविश्रामं नामंस्त क्वापि स श्रमम् ॥७२॥
भूयः शबरसेनाभिर्भ्रमन्तीभिः सुभीषणाम् । प्राप्तः शबरसेनाह्वां स क्रमेण महाटवीम् ॥७३॥
नादैः कृतभयोन्मादैः श्वापदानां सुदुःसहैः । मुख्याटवीष्वहमिति या गर्वेणेव गर्जति ॥७४॥
मिथः करिहरिव्याघ्रवराहमहिषादयः । कुमारकौतुकायेव युध्यन्ते यत्र सर्वतः ॥७५॥
अपूर्ववस्तुलाभार्थी कौतुकार्थी च चेत्तदा । द्रागेहीति कुमारं याह्वयतीव शिवारवैः ॥७६॥
द्रुमा यत्राभितोऽप्यश्ववेगवत्ताचमत्कृताः । मूर्द्धानं धूनयन्तीव कम्प्रशाखाशिखामिषात् ॥७७॥
यस्यां शबर्यः किन्नर्य इव वर्यतरैः स्वरैः । कुमाररञ्जनायेव गायन्त्युद्भटगीतिकाः ॥७८॥

तस्यां पुरः प्रयानेकं स तापसकुमारकम् । दोलाधिरूढं पातालकुमारमिव भूमिगम् ॥७९॥
स्निग्धबन्धुमिव स्निग्धदृशं दर्शनमात्रतः । ददर्श दर्शनीयानामवधिं स्निग्धया दृशा ॥८०॥ युग्मम् ॥
स तापसकुमारोऽपि कुमारं माररूपिणम् । वरं कन्येव वीक्ष्याऽभूद् व्रीडौत्सुक्यमुदादिभाक् ॥८१॥
तैस्तैर्विकारैर्विधुरोऽप्यवष्टभ्य स धृष्टताम् । आर्यः कथञ्चिदुत्तीर्य दोलातः प्रजजल्प तम् ॥८२॥
विश्ववल्लभ ! सौभाग्यनिधे ! दृष्टौ निधेहि नः । धेहि स्थैर्यं प्रसादं नो विधेहि अभिधेहि च ॥८३॥
को नाम विषयः श्लाघाविषयः क्रियते त्वया । स्ववासकरणात्किं वा पुरं विश्वेऽप्यनुत्तरम् ॥८४॥
उत्सवैराकुलं किं वा कुलं यस्मिन्नवातरः । का जातिर्जातिवल्लेभे सौरभ्यं सङ्गतेस्तव ॥८५॥
त्रैलोक्यानन्दजनकं जनकं तव कं स्तुमः । जननी माननीयानां माननीया च का त्वया ॥८६॥
स्वजनाः के जनानन्ददायिनः सज्जना इव । स्वाजन्यं मन्यसे यैस्त्वं समग्रसुभगाग्रणीः ॥८७॥
माहात्म्यधाम ! किं नाम येन त्वं हन्त कीर्त्त्यसे । को हेतुरिष्टसंयोगे केतुर्येनासि निःसखः ॥८८॥
परावगणनाहेतुः परा केयमपि त्वरा । किं वा प्रयोजनं प्रीतियोजनं यच्चिकीर्षसि ॥८९॥
तज्जल्पितं सुललितं तूणमाकर्णयन्निति । न केवलं कुमारोऽभूदुत्कर्णस्तुरगोऽपि सः ॥९०॥
कुमारमनसा सार्द्धं तत्र तस्थौ च वाजिराट् । अश्ववारानुवृत्त्यैवाऽश्ववराणां हि चेष्टितम् ॥९१॥

तस्य रूपोक्तिलालित्यमोहितात्मा महेभ्यभूः । सर्वत्रानुत्तरत्वान्नु यावन्नैवोत्तरं ददौ ॥९२॥
उच्चैरुवाच वाचाल इव तावत्स कीरराट् । सर्वावसरवित् प्राप्यावसरं किं विलम्बते ? ॥९३॥
भो महर्षिकुमारेन्द्र ! कुमारस्य कुलादिना । कोऽर्थो न ह्यधुनारब्धं कर्म वैवाहिकं त्वया ॥९४॥
औचित्यकृत्यं त्वौचित्यचतुरस्यापि वच्मि ते । सर्वथाऽप्यतिथिः पूज्यः सर्वेषां व्रतिनामपि ॥९५॥ उक्तञ्च लौकिकैः—
गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः । पतिरेको गुरुः स्त्रीणां सर्वस्याऽभ्यागतो गुरुः ॥९६॥
तत्तश्चेत्ते कुमारेन्द्रायत्तं चित्तं तदा मुदा । प्रथीयः प्रथयातिथ्यं विचारैरपरैरलम् ॥९७॥
इत्युक्तिचातुरीतुष्टः कण्ठे कीरस्य तापसः । मणिस्रजमिवाक्षेपाच्चिक्षेपाऽब्जस्रजं निजाम् ॥९८॥
व्याहरच्च कुमारेन्द्र ! विश्वश्लाघ्यस्त्वमेव हि । यस्यैवं चतुरोत्तंसः कीरोऽपि चतुरोक्तिषु ॥९९॥
द्रुतमुत्तर सौभाग्यैरनुत्तरतुरङ्गमात् । अतिथीभव भावज्ञ ! चरितार्थी कुरुष्व नः ॥१००॥
इदं पल्वलमुत्फुल्लकमलं निर्मलं जलैः । वनखण्डोऽप्यखण्डोऽयं त्वद्दृशा वयमप्यथ ॥१०१॥
तपस्विनाऽत्र ते कीदृश्यातिथेयी मया भवेत् । नग्नक्षपणकस्थाने भूजानेर्भक्तिरस्तु का ? ॥१०२॥
तथापि ते यथाशक्ति भक्तिं कामपि दर्शये । स्वच्छायया करीरोऽपि न किं विश्रामकृत् क्वचित् ॥१०३॥
सद्यः प्रसद्य विज्ञप्तिं प्रपद्यस्व तदद्य नः । न सन्तः पथिकाः क्वापि प्रार्थनाव्यर्थनापथे ॥१०४॥

तथैव कर्त्तुकामः प्राक् प्रेरितः शकुनैरिव । इति तद्वचनैरश्वादुत्ततार कुमारराट् ॥१०५॥
मनसा प्राक् तदानीं तु वपुषापि सुखाकृता । प्रीते संयुयुजाते तौ जन्मतः सुहृदाविव ॥१०६॥
मिथः प्रीतिस्थिरीकारव्यभिचाराय किन्तु तौ । किञ्चिद्विचेरतुस्तत्र परस्परकरार्पिणौ ॥१०७॥
प्रीत्या मिथः करस्पर्शकारिणौ चित्तहारिणौ । कलभौ शुशुभाते तौ काननान्तर्विहारिणौ ॥१०८॥
तस्मै गिरिसरित्पद्माकरक्रीडास्पदादिकम् । स्वं सर्वस्वमिवाटव्यां तापसः शंसति स्म सः ॥१०९॥
सोऽपूर्वांश्च तरून् कांश्चिन् फलपुष्पर्द्धिभिर्गुरून् । गुरूनिव निजांस्तस्मै नामादेशमुपादिशत् ॥११०॥
ततः श्रमापनोदाय विनोदाय च पल्वले । स्नानं चकार करिवत् कुमारः स ऋषेर्गिरा ॥१११॥
तत सौस्नातिकीभूय कुमाराय समानयत् । ऋषिः पक्वा अपक्वाश्च द्राक्षाः साक्षात्सुधा इव ॥११२॥
पक्वान्याम्राणि कम्राणि यानि प्रेक्ष्यापि चक्षुषा । क्षिप्रं कम्प्राणि जायन्ते चेतांसि व्रतिनामपि ॥११३॥
फलानि नालिकेरीणां कदलीनां च नैकशः । पक्वक्षुधाकरिणाञ्च खर्जूरीणां च भूरिशः ॥११४॥
राजादनानि स्वादुत्वसदनानि घनानि च । पचेलिमानि च क्षीरामलकान्यप्यनेकशः ॥११५॥
स्निग्धान्तश्चारकुलिकाकुलाश्चारफलावलीः । प्रस्फुरच्चारुबीजानि चारुबीजफलानि च ॥११६॥
साधुमाधुर्यपूराणि बीजपूराणि भूरिशः । नारङ्गाणि सुरङ्गाणि दाडिमान्यसमानि च ॥११७॥

जम्बीराणां सजम्बूनां परिपाकमुपेयुषाम् । बदरीगुन्दपीलूनां पनसानां फलानि च ॥११८॥
शृङ्गाटकानां च घटाश्चिर्भटीश्चिर्भटानि च । पक्वापक्वादिभेदेन वालुंकादिफलानि च ॥११९॥
पेयानि मृदुमृद्वीकापानकान्यब्जिनीदलैः । नीराणि नालिकेराणां सरस्याः सरसानि च ॥१२०॥
शाकस्थानेऽप्यपक्वाम्लाम्लिकौघान्निम्बुकादि च । स्वादनीयपदेऽप्यार्द्रानार्द्राः पूगीफलावलीः ॥१२१॥
पृथुलानि निर्मलानि नागवल्लीदलानि च । एलालवङ्गलवलीफलजातिफलाद्यपि ॥१२२॥
भोगार्थं तु शतपत्राशोकचम्पककेतकीः । मालतीमल्लिकाकुन्दमुचुकुन्दादिकानि च ॥१२३॥
सौरभ्यपद्मसद्मानि पद्मानि विविधानि च । माद्यद्दमनकादीनि निस्समानि सुमानि च ॥१२४॥
कर्पूरपूरपारीश्च कर्पूरतरुसंभवाः । यथाप्राप्तं प्रशस्तं च वस्तु कस्तूरीकाद्यपि ॥१२५॥ चतुर्दशभिः कुलकम् ।
सर्वर्त्तुकपुष्पफले तत्र सर्वमवाप्यते । भक्त्या प्रीत्या च यत्किञ्चित् क्रियते स्तोकमेव तत् ॥१२६॥
विचित्राः किञ्च चित्तानां रुचयो रुचिशालिनाम् । इत्यसौ वस्तुविस्तारात्तस्मै सर्वमढौकयत् ॥१२७॥
ततः स तद्भक्तिभङ्गीरङ्गीकुर्वन्नखर्वहृत् । दृष्टीर्व्यापारयामास तेषु सर्वेषु सादरम् ॥१२८॥
अपूर्वाणीव सर्वाणि किञ्चित्किञ्चिच्च तानि सः । यथोपयोगं बुभुजे दातुरेवं ह्यनुग्रहः ॥१२९॥
कीरोचितैश्च कीरोऽपि तेनाभोज्यत तैः फलैः । अनन्तरं कुमारेन्द्रान्नरेन्द्रादिव सेवकः ॥१३०॥

अश्वोऽप्यश्वोचितैः कृत्यैर्दातव्यैश्च गतश्रमः । ऋषिणा प्रीणयामाहे (?) महान्तो नौचितीमुचः ॥१३१॥
अथ कीरः कुमारस्य सम्यग् भावं विभावयन् । चक्रे पृच्छामतुच्छात्मा सप्रीति प्रतितापसं ॥१३२॥
महर्षे ! प्रस्फुरल्लोमहर्षेऽस्मिन् नवयौवने । ईदृक्षेऽपि किमीदृक्षं तवासंभावितं व्रतम् ॥१३३॥
क्वायं सारस्तवाकारः प्राकारः सर्वसंपदाम् । क्व संसारतिरस्कारकारीदं दुष्करं व्रतम् ॥१३४॥
अस्याश्चातुर्यसौन्दर्यसंपदोऽप्यादितः कुतः । अरण्ये मालतीपुष्पस्येव निष्फलता कृता ॥१३५॥
दिव्यालङ्कृतवेषार्हं मृद्वङ्गं पद्मतोऽप्यदः । कथं नु सहते हन्त भृशकर्कशवल्कलम् ॥१३६॥
द्रष्टृदृष्टिमृगीपाशः केशपाशः सुकोमलः । नैवोत्कटजटाबन्धसम्बन्धमयमीहते ॥१३७॥
एतच्च चारुतारुण्यं पुण्यं लावण्यमप्यदः । नव्यभोगफलैः शून्यं कारुण्यं कुरुतेऽद्य नः ॥१३८॥
ततः किमङ्गवैराग्यात् किं वा कपटपाटवात् । यद्वा दैववशाद्यद्वा दुर्दैवाद्यभियोगतः ॥१३९॥
महातपस्विना केनाप्यथवा शापदानतः । प्रपेदिषे वद कुतस्तपस्विन् ! दुस्तपं तपः ॥१४०॥ सन्दानितकम् ।
अथातुलगलन्नेत्रजलैरविरलैर्व्रती । वमन्निवान्तरं दुःखं स जगाद सगद्गदम् ॥१४१॥
भोः कीरेन्द्र ! कुमारेन्द्र ! को विश्वेऽप्यस्तु वां समः । ययोर्मयि कृपापात्रे कृपा ह्येवं विजृम्भते ॥१४२॥
स्वदुःखे स्वीयदुःखे वा दृश्यन्ते के न दुःखिनः ? । त्रैधेऽपि जगति द्वित्राः परदुःखे तु दुखिनः ॥१४३॥

तदुक्तं—शूराः सन्ति सहस्रशः प्रतिपदं विद्याविदोऽनेकशः, सन्ति श्रीपतयोऽप्यपास्तधनदास्तेऽपि क्षितौ भूरिशः ।
किन्त्वाकर्ण्य निरीक्ष्य वान्यमनुजं दुःखार्दितं यन्मनस्ताद्रूप्यं प्रतिपद्यते जगति ते सत्पूरुषाः पञ्चषाः ॥१४४॥
अबलानामनाथानां दीनानामथ दुःखिनाम् । परैश्च परिभूतानां त्राता कः ? सत्तमात्परः ॥१४५॥
यथावत्कथयिष्यामि कुमार ! त्वत्पुरस्ततः । गोप्यं निर्दम्भविश्रम्भसंरंभैकपदे नु किम् ? ॥१४६॥
अत्रान्तरे महोत्पातदुर्वात इव दुस्सहः । मत्तेभ इव मूलेभ्योऽप्युच्चैः प्रोन्मूलयन् वनम् ॥१४७॥
उच्छलद्धूलिपटलैः कुर्वन्नविरलैरलम् । जगत्त्रयीमपि स्फूर्जद्धूमाद्वैतमयीमिव ॥१४८॥
घुघुत्कारमहाघोरविरावैरतिदुःश्रवैः । अपि दिग्वारणेन्द्राणां कुर्वाणः श्रवणे ज्वरम् ॥१४९॥
तपस्विनः स्ववृत्तान्तकथनैकमनोरथम् । रथं प्रति यथार्था प्रभञ्जनेत्यभिधां भजन् ॥१५०॥
आकस्मिकमहासिन्धुनीरपूर इवाखिलम् । प्लावयन् पवनः प्रोच्चैर्वातुं प्रववृतेतराम् ॥१५१॥ पञ्चभिः कुलकम् ।
धूल्या दृशोर्मन्त्रमुद्रां दत्त्वा कीरकुमारयोः । समीरः सिद्धचौरस्तमपजह्रे तपोनिधिम् ॥१५२॥
हा हा विश्वजनाधार ! वराकार ! कुमार ! हा ! । हा विश्वस्वान्तविश्राम ! सत्पराक्रमधाम ! हा ॥१५३॥
रक्ष रक्ष जगद्रक्षादक्ष ! दुर्वैशसादितः । प्रलापः केवलं ताभ्यां तदेत्यश्रावि दुःश्रवः ॥१५४॥ युग्मम् ।
हृत्वा कुत्र प्रयाताऽसि रे मज्जीवितजीवितम् । इत्युच्चैर्विब्रुवन् क्रोधाद्योद्धुकामः कुमारराट् ॥१५५॥

आकृष्टदृग्विषव्यालकरालकरवालभृत् । जवाद्धाव तत्पृष्ठे निष्ठेयं वीरमानिनाम् ॥१५६॥ युग्मम् ।
तडिद्दण्ड इवोद्दण्डवेगतः स गतः कियत् । कीरेणाद्भुततद्वृत्तविस्मितेनेत्यजल्प्यत ॥१५७॥
किं कुमार ! मुधा मौग्ध्याद्विदग्धोऽप्यनुधावसि ? । स तपस्विकुमारः क्व ? क्व वातः पुरतश्च सः ? ॥१५८॥
कृतान्तवज्जीवितव्यं तं महर्षिं महाबलः । अपहृत्य कृतार्थः सन् को वेद क्व कथं ययौ ॥१५९॥
इयता च योजनानां स लक्षाण्यप्यसङ्ख्यशः । कुमार ! दूरेऽन्तरधात् तन्निवर्त्तस्व सत्वरम् ॥१६०॥
ततो निष्फलसंरंभारंभाद् बिभ्रदपत्रपाम् । पश्चात्प्रापद् व्यलापीच्च कुमारः खेदमेदुरः ॥१६१॥
हा गन्धवाह ! किं दावहव्यवाहायितं त्वया । यन्मम प्रेमसर्वस्वं मुनिमेनमपाहरः ॥१६२॥
हा मुनीन्द्र ! कुमारेन्द्र ! वक्त्रचन्द्रान्मदीयके । प्रोन्निद्रतां प्रपत्स्येते नेत्रे नीलोत्पले कदा ? ॥१६३॥
हा स्निग्धमुग्धमधुरा दृग्विलासाः सुधोर्मयः । सौमनस्यपुषस्तेऽपि कथं प्राप्याः ? पुनर्मया ॥१६४॥
जितामृतानि ही तानि भाषितानि मुहुर्महुः । कल्पद्रुकुसुमानीव कथं लब्धाऽस्मि ? रङ्कवत् ॥१६५॥
एवं विलापान् विविधान् कुर्वन् कान्तावियुक्तवत् । कुमारः कीरराजेन जजल्पे कल्पितेतरत् ॥१६६॥
नूनं स तापसपुमान् स कश्चित् किंतु केनचित् । स्वशक्तितश्छन्नरूपमन्यत्किञ्चिद्विचार्यताम् ॥१६७॥
तैस्तैर्विकारैराकारैः प्रकारैश्च सदुक्तिजैः । प्रेक्षणैर्लक्षणैश्चैनं जाने काञ्चन कन्यकाम् ॥१६८॥

कुतोऽन्यथा तदा पृष्टः सोऽभूद् बाष्पाम्बुपूर्णदृग् । अबलानामिदं चिह्नं नोत्तमे पुंसि संभवेत् ॥१६९॥
न घोरः समि( मी )रः सोऽपि किन्तु दिव्यं किमप्यदः । नो चेन्महर्षिमेवैषोऽपाहार्षीन्न तु नौ कुतः ? ॥१७०॥
धन्या कन्यापि सा कापि दैवतादिकदुर्ग्रहात् । विडम्ब्यते ध्रुवमेवं दुर्दैवं प्रति कः प्रभुः ? ॥१७१॥
दुष्टग्रहाद्विमुक्ता च सा त्वामेव वरिष्यति । दृष्टपूर्वी सुपर्वद्रुं कोऽन्यत्र कुरुते रतिम् ॥१७२॥
दुष्टग्रहाद्विमोक्षोऽपि तस्याः संभाव्यते द्रुतम् । रात्रिग्रहादिवाब्जिन्यास्तव शूर ! शुभोदयात् ॥१७३॥
संगंस्यते च ते सद्यः सापि दैववशात् क्वचित् । आवश्यकी ह्यभीष्टार्थसिद्धिः सद्भाग्यशालिनाम् ॥१७४॥
संभाव्याऽपि प्रोच्यमानं माननीयमिदं त्वया । ज्ञास्यते चाल्पकालेन सत्यासत्यत्वनिर्णयः ॥१७५॥
तद्विपालान् दुरापालान् कुमार ! सुविचारवित् ! किमङ्ग कुरुषे धीर ! पुरुषेष्विति नौचिती ॥१७६॥
इति कीरगिरं युक्तियुक्तां मनसिकृत्य सः । कृत्यवित्त्यक्तशोकोऽभूद् विज्ञोक्तिः किं न साधयेत् ? ॥१७७॥
तमिष्टदैवतामिव स्मरन्तौ तौ यतीश्वरम् । वाजिराजमथारुह्य पथि प्राग्वत् प्रचेलतुः ॥१७८॥
काननानि नगानैकानाकरान्नगराणि च । सरांसि सरितोऽप्युच्चैः समुल्लङ्घ्य सहस्त्रशः ॥१७९॥
निरन्तरप्रयाणेन प्रयान्तौ तौ क्रमात् पुरः । प्रकाममभिरामद्रुमाराममालुलोकताम् ॥१८०॥ युग्मम् ।
यो निस्सीमद्रुमसुमभ्रमद्भ्रमरझङ्कृतैः । स्वागतं निजगादेव कुमारेन्द्राय सादरम् ? ॥१८१॥

प्रविशन्तौ च तौ तत्र प्रीतौ प्रेक्षां बभूवतुः । प्रासादमादिदेवस्य दीव्यन्नव्यमणीमयम् ॥१८२॥
भो भवद्वयलाभस्ते भाव्यत्रेति कुमारराट् ! । दूरादाकारयाञ्चक्रे कम्पया यत्पताकया ॥१८३॥
तिलकद्रुममूलेऽश्वं नियम्य कुसुमाद्यथ । प्रगुणीकृत्य चैत्यान्तः कुमारः कीरयुग् ययौ ॥१८४॥
विधिविद्विधिवत्पूजां विधाय विविधैः सुमैः । विनिद्रधीर्जिनेन्द्रं स स्तोतुमित्युपचक्रमे ॥१८५॥
श्रीमद्युगादिदेवाय सेवाहेवाकिनाकिने । नमो देवाधिदेवाय विश्वविश्वैकदृश्वने ॥१८६॥
परमानन्दकन्दाय परमार्थैकदेशिने । परमब्रह्मरूपाय नमः परमयोगिने ॥१८७॥
परमात्मस्वरूपाय परमानन्ददायिने । नमस्त्रिजगदीशाय युगादीशाय तायिने ॥१८८॥
योगिनामप्यगम्याय प्रणम्याय महात्मनाम् । नमः श्रीशम्भवे विश्वप्रभवेऽस्तु नमो नमः ॥१८९॥
इत्युल्लासेन पनसफलवत्स्फुटकण्टकः । जिनं स्तुत्वाऽऽप्ततत्त्वार्थः प्रवासं सोऽकृतार्थयत् ॥१९०॥
सतृष्ण इव तच्चैत्यमभितः सुषमामृतम् । पायं पायं व्यपायं स सौहित्यसुखमन्वभूत् ॥१९१॥
निविष्टश्च विशिष्टश्रीकारणे मत्तवारणे । शुशुभे स्वर्विभुरिवैरावणे मत्तवारणे ॥१९२॥
कुमारः कीरमूचे च किमद्यापि न लभ्यते । तत्तापसकुमारस्य शुद्धिः कापि प्रमोदकृत् ॥१९३॥
शुकोऽप्याख्यत् सखे ! खेदं माकार्षीर्हर्षमावह । आसन्नशकुनान्नूनमद्य स्यात्तस्य सङ्गमः ॥१९४॥

अथ च–**शिखामणीयितशिखाजुषं प्रेक्षकमुत्पुषम् । कमनीयकलापश्रीसकलं कलभाषिणम्**[१] ॥१९५॥
**शिखण्डिनः परान् स्वश्रीविशेषेण शिखण्डिनः । कुर्वाणं वज्रिणोऽर्वाणं न्यत्कुर्वाणं स्ववेगतः ॥१९६॥**
**शिखण्डिवरमारूढा दिव्यं दिव्यतनुद्युतिः । श्रीधर्माराधनप्राज्ञा प्रज्ञप्तीव सुरीश्वरी ॥१९७॥**
**पद्मिनीव समग्राङ्गपद्मसौरभ्यवर्षिणी । प्रस्फुरच्चारुतारुण्या लावण्यामृतसारणी ॥१९८॥**
**सर्वाङ्गदिव्याभरणैर्दिशस्तेजोमयीरिव । तन्वाना तत्र तन्व्येका सुमुखी समुपेयुषी ॥१९९॥** पञ्चभिः कुलकम् ।
**श्रीनाभेयविभुं भक्त्याऽभिवन्द्य स्वककेकियुक् । साऽथ नर्त्तितुमारेभे रंभेव भुवमीयुषी ॥२००॥**
**प्रशस्तैर्हस्तकैर्नैकाङ्गहारैः करणैरपि । भावैश्च विविधैर्हृद्यं नर्त्तकीव ननर्त्त सा ॥२०१॥**
**कुमारकीरयोश्चित्ते तथा तत्र चमत्कृते । सर्व विस्मृत्य संप्राप्ते यथा तन्मयतामिव ॥२०२॥**
**रूपसारं कुमारं तं सापि प्रेक्ष्य मृगेक्षणा । सोल्लासा सविलासाऽऽसीच्चमत्कृतिमयी चिरम् ॥२०३॥**
**भणिता च कुमारेण करभोरु ! भवेन्न चेत् । मनागपि मनःखेदस्तदा पृच्छामि किञ्चन ॥२०४॥**
**ओमित्युक्तवती सापि तेन पृष्टा विशिष्टवाक् । आमूलचूलमूचे स्वं वृत्तान्तमिति तान्तिहृत् ॥२०५॥**

१. भाषिणी इति को० ह० प्र० पाठः ।

कनकश्रीभिः कनकपुर्यामहार्यसंपदि । कनकध्वजरूपोऽभूत्स्वकुले कनकध्वजः ॥२०६॥
तृणान्यप्यमृतीचक्रे यः प्रसत्तिस्पृशा दृशा । यद्वैरिणो रणेऽजीवंस्तान्यास्वाद्याऽन्यथा कथम् ? ॥२०७॥
सारमन्तः पुरे तस्य प्रशस्यगुणभूषणा । सुरेन्द्रसुन्दरी मूर्त्या कान्ता कुसुमसुन्दरी ॥२०८॥
साऽन्यदा प्रमदारत्नं प्रमदाप्तिकरं परम् । लेभे स्वप्नं सुखस्वप्नेऽप्यस्वप्नेव स्फुटं यथा ॥२०९॥
मैनाङ्कमङ्कमुत्सृज्य रतिप्रीतिप्रदायि मे । रतिप्रीतिद्वयं प्रीतिरङ्गादुत्सङ्गमागमत् ॥२१०॥
द्राग् विबुद्धा विबुद्धाब्जलोचना वचनातिगम् । पूर्यते स्म प्रीतिपूरैर्वारिपूरैरिवापगा ॥२११॥
सापि स्वप्नं यथादृष्टं गत्वाऽभाषिष्ट भुभूजे । सोऽप्येवमूचिवान् स्वप्नफलं स्वप्नविचारवित् ॥२१२॥
सारं सारङ्गशावाक्षि ! कन्यायुग्मं जगत्यपि । भावि ते भविता येन स्त्रष्टुः सृष्टे प्रकृष्टता ॥२१३॥
सा श्रुत्वेति कनीलाभेऽप्यभूद् भूरिप्रमोदभाग् । द्वावपीष्टौ प्रकृष्टौ चेत् पुत्रो वा पुत्रिकापि वा ॥२१४॥
सा ततः प्राप्ततद्गर्भा क्रमाद् गर्भानुभावतः । वपुःपाण्डिमदम्भेन लेभे निर्मलतां किल ॥२१५॥
मालिन्यं जलगर्भायाः कादम्बिन्याः भवेद्यदि । तस्या अजडगर्भायास्तर्हि युक्तैव शुभ्रता ॥२१६॥
युगपद्युगलं पुत्र्योः सुषुवे च सुखेन सा । सम्यग् नीतिरिव द्वैतमद्वैतं कीर्तिपद्मयोः ॥२१७॥
अशोकमञ्जरीत्याख्यां प्रथमायाः क्षमापतिः । द्वितीयस्यास्तु तिलकमञ्जरीति व्यरीरचत् ॥२१८॥

पञ्चभिः पञ्चभिस्तत्र धात्रीभिः परिलीलिते । मेराविव कल्पलते ववृधाते क्रमेण ते ॥२१९॥

कलाकलापं सकलं कलयामासतुश्च ते । स्वल्पैर्दिनैर्विलम्बः स्याद्धीसाध्ये धीमतां हि कः ? ॥२२०॥

रूपसंपत्तयोर्नव्ययौवनेन व्यशिष्यत । अशेषापि विशेषेण वसंतेनेव सद्वनी ॥२२१॥

उत्तेजिते असिलते स्मरेण करयोर्द्वयोः । सज्जीकृते विरेजाते जगज्जयकृते नु ते ॥२२२॥

द्विजिह्वजिह्वे इव ते क्रूरग्रहदृशाविव । त्रैलोक्यक्षोभकारिण्यौ गते अप्रतिकारताम् ॥२२३॥

समैकदुःखसुखयोः समानन्दविषादयोः । समव्यापारयोः सर्वकार्येषु समरूपयोः ॥२२४॥

समानशीलयोः सर्वसमानगुणयोस्तयोः । आजन्मपरमप्रेम्णि यदि स्यादुपमा दृशोः ॥२२५॥ युग्मम् ॥

यतः—सहजग्गिराण सहसोविराण सहहरिससोअवंताणं । नयणाण वधन्नाणं आजम्मं निच्चलं पिम्मं ॥२२६॥

दध्यावथ नृपो भावी कोऽनुरूपोऽनयोर्वरः । द्वयोरेकः स चान्वेष्यो रतिप्रीत्योरिव स्मरः ॥२२७॥

यद्यन्योनर्योर्भिन्नवरवरणं जातु जायते । मिथो दुर्विरहान्नूनं मरणं शरणं तदा ॥२२८॥

उचितश्चैतयोः को वा युवाऽत्र सुकृती कृती । एकां कल्पलतां कोऽपि नैवार्हेत् किं पुनर्द्वयीम् ? ॥२२९॥

नास्त्येव भुवनेऽप्येतामेकामपि लभेत यः । तत् किं कर्ता हहा कन्याजनकः कनकध्वजः ॥२३०॥

लोकोत्तरतया हन्त हतयोरेतयोरपि । हाऽनवष्टम्भलतयोरिव का भाविनी गतिः ? ॥२३१॥

नितान्तचिन्तासन्तापतापितस्येति भूपतेः । मासा वर्षाणि वर्षाणि युगानीवातिचक्रतुः ॥२३२॥
कन्या धन्यापि हा कन्याजनकस्यैककष्टकृत् । अष्टमूर्त्तेर्यथाद्दृष्टिः पुंसः सम्मुखवासिनः ॥२२३॥
यतः–जातेति पूर्वं महतीति चिन्ता, कस्य प्रदेयेति ? ततः प्रवृद्धा ।
दत्ता सुखं स्थास्यति वा न वेति ? कन्यापितृत्वं किल हन्त कष्टम् ॥२३४॥
अथ प्रथयितुं प्रोच्चैः स्मरराजस्य गौरवम् । अन्तर्वनं पूर्णऋद्ध्याऽवततार वसंतराट् ॥२३५॥
मलयानिलसूत्कारैर्झङ्कारैरलिनां घनैः । कोलाहलैश्च वाचालकोकिलानां मनोहरैः ॥२३६॥
प्रोत्सर्पद्दर्पकन्दर्पक्ष्मापतेर्गायतीव यः । त्रिजगद्विजयोद्धुतकीर्तिगीतित्रयीं तदा ॥२३६॥ युग्मम् ।
तदा मुदा हृदाक्षेपात्ते क्षमाभृत्कुमारिके । क्रीडारसेनाकुलिते चलिते प्रतिकाननम् ॥२३८॥
कलभाऽश्वाऽश्वतरोक्षशिबिकास्यन्दनादिकान् । नानायानाश्रिता नैकसङ्ख्याः सख्यः सहाऽचलन् ॥२३९॥
सुखं सुखासनासीने ते सखीभिः परिष्कृते । लक्ष्मीब्राह्म्याविवाभातां विमानस्थे सुरीवृते ॥२४०॥
शोकनिर्णाशकाऽस्तोकविविधाशोकसङ्कुलम् । अशोककाननाह्वानं ते उद्यानं समीयतुः ॥२४१॥
भृङ्गगर्भप्रसूनानि स्फुरत्तारकलोचनैः । प्रीत्येव योजयन्त्यौ ते तमाराममपश्यताम् ॥२४२॥
ततश्च रचितां चारुहरिचन्दनदारुणा । स्वचितां सन्मणिस्वर्णैर्विस्फुराच्चामराञ्चिताम् ॥२४३॥

दृढं रक्ताशोकशाखाबद्धामशोकमञ्जरी । बाला लीलावतीचित्तलोलां दोलां समाश्रयत् ॥२४४॥ युग्मम् ।
पूर्वं तिलकमञ्जर्या सुन्दर्याऽजर्य्यधुर्य्यया । उच्चैरान्दोलयामास[१] बाला दोलाविलासिनी ॥२४५॥
तस्यास्तदा पदाघातात् प्रीतः स्वायत्तकान्तवत् । बभार पुलकाङ्कुरं कङ्केल्लिः कुसुमोद्गमैः ॥२४६॥
दोलायां दोलयन्तीयं विकारैर्विविधैः परैः । यूनां मनांसि नयनान्यप्यान्दोलितवत्यहो ! ॥२४७॥
रणज्झणन्मणिप्रेङ्खन्मेखलादिकभूषणाः । तस्या अमन्दमाक्रन्दन्निव भङ्गभयात्तदा ॥२४८॥
तरुणैः सा सरोमाञ्चं तरुणीभिरपीर्ष्यया । वीक्ष्यमाणा क्षणं जज्ञे यावत्क्रीडाप्रसक्तहृत् ॥२४९॥
तावद्दुर्दैवतश्चण्डप्रोद्दण्डाशुगवेगतः । दोला त्रटिति तुत्रोट साकं क्रीडारसेन सा ॥२५०॥
नाड्यामिवास्यां दोलायां त्रुटितायां द्रुतं हहा ! । भाव्यस्याः किमिति व्यग्राः समग्रा यावताऽभवन् ॥२५१॥
तावत् सदोला लोलाक्षी व्याकुलैस्तैर्व्यलोक्यत । उत्पतन्ती वियत्युच्चैर्द्यां व्रजन्तीव कौतुकात् ॥२५२॥
यमवत्कोऽप्यलक्षो हा हृत्वैनां याति यात्यहो ! लोकैरित्युच्चकैश्चक्रे निस्तुलस्तुमुलस्तदा ॥२५३॥
तस्या हरणमुत्पश्यैः पश्यद्भिरपि पार्श्वगैः । चण्डकोदण्डकाण्डौघधैरैरपि सुदुर्धरैः ॥२५४॥

१. माहे इति को० ह० प्र० पाठः ।

राभस्यात्तत्र धावद्भिर्धीरैर्वीरैः परैरपि । शक्तं किमपि नो कर्त्तुं कान्वदृश्ये प्रतिक्रिया ? ॥२५५॥ युग्मम् ।
कर्णशूलमिवाकर्ण्य कन्यापहरणं क्षणम् । राजा वज्राहत इवाभवद्दुस्सहदुःखभाक् ॥२५६॥
क्व गतासि ? हहा वत्से ! किं न दत्से स्वदर्शनम् ? । स्वच्छे ! धत्से न किं तुच्छेतरत्प्रेम पुरातनम् ॥२५७॥
नृपतिर्विलपत्येवं यावत्तद्विरहातुरः । केनापि सेवकेनैत्य तावदेवमभण्यत ॥२५८॥
अशोकमञ्जरीशोकजर्जरीकृतचेतना । मञ्जरीव तरोर्वाताहता तिलकमञ्जरी ॥२५९॥
स्वामिन्नतुच्छमूर्च्छाभिर्निश्चेष्टाचेष्टका यथा । कन्या कण्ठगतप्राणा निस्त्राणा पतिताऽस्ति हा ॥२६०॥ युग्मम् ।
तत्क्षतक्षारनिक्षेपदग्धस्फोटकसन्निभम् । श्रुत्वा प्राप जवाद् भूप उपतत्कन्यमन्ययुग् ॥२६१॥
कन्या च चन्दनरससेचनाद्युपचारतः । कथञ्चिच्चेतनां प्रापदित्युच्चैर्विललाप च ॥२६२॥
हाहा ! स्वामिनि ! मत्तेभगामिनि! क्वासि कुत्र वा ? मां विहाय प्रयाताऽसि निःसीमप्रेमवत्यपि ॥२६३॥
हा निस्त्राणा मम प्राणा लग्नबाणा इवाऽभितः । प्राणिष्यन्ति कथं हन्त हताशायास्त्वया विना ॥२६४॥
तात ! नातः परं किञ्चिद्विरूपं जीविताऽस्मि यत् । स्वस्वसुर्विरहं हन्त सहिष्ये दुस्सहं कथम् ? ॥२६५॥
एवं विलापिनी धूलौ व्यलोलद् ग्रहिलेव सा । उद्वर्त्तपरिवर्त्ताश्च शफरीवाऽजले व्यधात् ॥२६६॥
वल्लीव दवसंस्पर्शादूर्ध्वशोषं शुशोष च । तथा यथा जीविताशा तस्यां कस्यापि नाभवत् ॥२६७॥

अथ तत्रागतेत्युच्चैर्व्यलपत्तत्प्रसूरपि । दुःखं मे दुष्टदैवेदं निर्दयाऽदयथाः कथम् ? ॥२६८॥
एका हृता मे दुहिता परा तद्विरहातुरा । हा मरिष्यति मे साक्षाद् हा हताशा हताऽस्मि तत् ॥२६९॥
गोत्रदेव्यो वनदेव्यो नभोदेव्योऽपि सत्वरम् । सन्निधत्त विधत्तैनां कथञ्चिच्चिरजीविताम् ॥२७०॥
तस्याः सख्यश्च सैरन्ध्र्यः पुरन्ध्र्यश्च पुराश्चिरम् । तद्दुःखदुःखिता मुक्तकण्ठं चक्रन्दुरुच्चकैः ॥२७१॥
तदा तत्रत्यलोकानां शोकाद्वैते किमुच्यते । अशोकास्तरवोऽप्यासन् सशोका इव सर्वतः ॥२७२॥
तदा तद्दुःखसङ्क्रान्तदुःखोद्विग्न इवोच्चकैः । स्थातुं तत्राक्षमोऽमज्जद् भानुमान् पश्चिमाम्बुधौ ॥२७३॥
तत्र सर्वत्रगास्तोकशोकप्रकटिताध्वना । पूर्वस्या प्रसृतं ध्वान्तं प्राविशत्तरसा सुखम् ॥२७४॥
अन्तःशोकेन लोकः प्राक् सकलोऽप्याकुलीकृतः । तदा तमोभिर्बहिरप्यहो मलिनचेष्टितम् ॥२७५॥
त्रैलोक्यमलिनीकारकारणं दूरयंस्तमः । अथामृतकरः प्रादुर्बभूव द्विजनायकः ॥२७६॥
शशी ज्योत्स्नारसासारैः कन्यां तिलकमञ्जरीम् । आप्याययत् कृपयेव वल्लीमिव नवाम्बुदः ॥२७७॥
यामिन्याः पश्चिमे यामेऽथो विपश्चिदपश्चिमा । पथिकीव ज्ञातपथोत्तस्थौ किञ्चिद्विचार्य सा ॥२७८॥
सखीभिः सह साऽयासीत्सहसाराममध्यगम् । चक्रेश्वर्या गोत्रदेव्याः सद्म निश्छद्ममानसा ॥२७९॥
माहात्म्यसद्मसत्पद्ममालाभिः कुलदेवताम् । अभ्यर्च्य भूयसी भक्तिरिति कन्या व्यजिज्ञपत् ॥२८०॥

स्वामिन्यकृत्रिमतमान्तरभक्त्या मया यदि । सर्वकालं पूजिताऽसि प्रणताऽसि स्तुताऽसि च ॥२८१॥
तदानीमद्य सद्यस्त्वं प्रसद्य निरवद्यगीः । दीनाया मामकीनायाः स्वसुः शुद्धिं समादिश ॥२८२॥
नो चेन्मया भवेऽप्यस्मिन् मातरत्याजि भोजनम् । इष्टस्याऽनिष्टशङ्कायां को वा भुञ्जीत नीतिवित् ? ॥२८३॥
तस्या भक्त्या च शक्त्या चेत्युक्तियुक्त्या च तुष्टहृत् । साक्षाद्बभूव देवी द्रागैकाग्र्यात्किं न सिद्ध्यति ? ॥२८४॥
जगादाऽपि प्रसादार्द्रा भद्रे ! भद्रं तव स्वसुः । वत्से ! हृत्खेदविच्छेदं कुरु स्वीकुरु भोजनम् ॥२८५॥
मासेन लप्स्यसेऽशोकमञ्जर्याः शुद्धिमञ्जसा । तदैव दैवयोगेन तया सङ्गंस्यसेऽपि च ॥२८६॥
कदा कथं पुनः कुत्र स्वस्वसुर्मम सङ्गमः । इत्थं पर्यनुयुङ्क्षे चेदाचक्षेऽहं तदा श्रृणु ॥२८७॥
अपरेण पुरीतोऽस्या दूरेणास्ति महत्तरः । कातराणां दुरुत्तारः कान्तारस्तरुगह्वरैः ॥२८८॥
तस्मिन् समृद्धे राज्ञोऽपि न करप्रसरः क्वचित् । राजदारा इवासूर्यंपश्याश्चात्र शिवा अपि ॥२८९॥
मणीमयं च तत्रोच्चैश्चैत्यं श्रीऋषभप्रभोः । भानोर्विमानमिव यद्विभाति भुवमागतम् ॥२९०॥
जिनेन्द्रमूर्तिर्निस्तन्द्रचन्द्रकान्तमणीमयी । तदन्तर्भाति पूर्णेन्दुमण्डलीव दिवोऽन्तरे ॥२९१॥
कल्पद्रुकामसुरभीकामकुम्भादिभावतः । माहात्म्यसारमादाय या व्यधायीव वेधसा ॥२९२॥
तस्याः प्रशस्यातिशयस्फूर्तेर्मूर्त्तेस्त्वमर्चया । जामेर्निजाया वृत्तान्तं भोत्स्यसे लप्स्यसे च ताम् ॥२९३॥

तत्रान्यदपि ते सर्वं शुभं भावि सुनिश्चितम् । यद्वा देवाधिदेवस्य सेवया किं न सिद्ध्यति ? ॥२९४॥
यदि सुभ्रु ! ब्रवीष्येवं तस्मिन् दूरतरेऽन्वहम् । जिनार्चार्थं कथं यामि ? पश्चादायामि वा कथम् ? ॥२९५॥
भणामि शृणु सुश्रोणि ! तत्राप्यौपयिकं तदा । कार्योपायो ह्यसंपूर्णस्तूर्णमुक्तोऽपि निष्फलः ॥२९६॥
ममास्ति चन्द्रचूडाह्वः शक्तिमांश्चन्द्रचूडवत् । आदिष्टसर्वकार्येषु तत्परः किङ्करः सुरः ॥२९७॥
रूपं कलापिनः कृत्वा स त्वां नेतेप्सितं पदम् । मदादेशादिव ब्रह्मादेशाद् ब्राह्मीं सितच्छदः ॥२९८॥
देव्येत्युक्ते झगित्येव पतितोऽभ्रान्तरादिव । हृद्यैकलापि प्रकटोऽभूत् कलापी कुतश्चन ॥२९९॥
दिव्यं मयूरमारुह्य तमसह्यगतिक्रमम् । जिनार्चनाय देवीव यात्यायाति च सा क्षणात् ॥३००॥
तच्चेदं काननं चेतः शैत्यकृच्चैत्यमप्यदः । सा च कन्याप्यहं केकी विवेकी सैष मे पुनः ॥३०१॥
एतन् मया स्वचरितं कुमारोदीरितं तव । सौभाग्यसार ! किन्तु त्वां स्वच्छा पृच्छामि किञ्चन ॥३०२॥
ममात्र नित्यमायान्त्या अद्य मासोऽप्यपूर्यत । जामेर्नामापि नाश्रावं सुरसिन्धोर्मराविव ॥३०३॥
विश्वैकसार ! विश्वान्तर्भवता भ्रमता क्वचित् । रूपादिभिः सरूपा मे कन्या कापि न्यरूप्यत ॥३०४॥
वशंवद इवावादीत् कुमारः स्फारगीस्ततः । वित्रस्तहरिणीनेत्रे ! त्रैलोक्यतरुणीमणे ! ॥३०५॥
भ्रमतापि मया काचिन्नांशेनापि समा त्वया । प्रैक्षि प्रेक्षिष्यते नापि सदैव प्रेक्ष्यते यतः ॥३०६॥ युग्मम् ।

परं शबरसेनायामटव्यां दिव्यदेहभृत् । दोलाधिरूढः सुप्रौढयौवनश्रीमनोरमः ॥३०७॥
वाङ्माधुर्यवयोरूपस्वरूपैः सदृशस्तव । तापसेन्द्रकुमारः प्राङ्मयाऽदर्शि सुदर्शने ! ॥३०८॥ युग्मम् ।
तस्य स्वाभाविकप्रेमोपचारविरहस्मृतेः । दलच्चलज्ज्वलदिवाऽद्यापि हृन्मे मनस्विनि ! ॥३०९॥
स त्वमेव स एव त्वं यद्वा सा ते स्वसैव सः । विधेर्विलसितं हन्त ! किञ्चिद्वाचामगोचरम् ॥३१०॥
तावत्कीरः कलकलं कुर्वन्नाख्यदखर्ववाग् । हुं हुं कुमार ! प्राग् ज्ञातं मयाऽऽख्यातं च ते हृदः ॥३११॥
नूनं कन्यैव स मुनिकुमारोऽस्याः स्वसैव च । मज्ज्ञानाद् मासपूर्त्तेश्च मेलिताऽद्य कथञ्चन ॥३१२॥
विश्वसारं स्वसारं चेदद्येक्षिष्ये तदा मुदा । निमित्तज्ञाय ते कीर ! करिष्येऽर्चनमम्बुजैः ॥३१३॥
इत्थं तिलकमञ्जर्या कुमारेण तु सादरम् । साधु साध्वभ्यधाः प्राज्ञेत्युपाबृंहि विहङ्गराट् ॥३१४॥
इतश्च मणिसिञ्जानमञ्जुमञ्जीरराजिनी । वियतः प्रपतच्चन्द्रमण्डलीभ्रमदायिनी ॥३१५॥
सितच्छदाभिः सामर्षं सानुरागं सितच्छदैः । वीक्ष्यमाणा कुमाराद्यैरपि सप्रतीतिविस्मयैः ॥३१६॥
अतिदीर्घनभोमार्गोल्लङ्घनश्रमविह्वला । कुमाराङ्कसरस्येका हंसी दिव्या व्यलोलुठीत् ॥३१७॥ त्रिभिर्विशेषकम् ।
सा साध्वसवशात् कम्प्रदेहा स्नेहादिवोच्चकैः । पश्यन्त्यास्यं कुमारस्य भाषते स्म नृभाषया ॥३१८॥
सात्त्विकश्रेणिमाणिक्य ! शरणागतवत्सल ! त्रातस्त्रायस्व त्रायस्व कृपासार ! कुमार ! माम् ॥३१९॥

अहं त्वां शरणं प्राप्ता शरण्यं शरणार्थिनी । यद्वज्रपञ्जरायन्ते महान्तः शरणागते ॥३२०॥
सुमिरः सुस्थिरः शैलः प्रचलः प्रज्वलज्जलम् । अनलः शीतलश्चाणुर्मेरुर्मेरुरथाणुकः ॥३२१॥
व्योम्नि पद्मं स्वरे शृङ्गमपि स्याज्जातु कुत्रचित् । कल्पान्तेऽपि न मुञ्चन्ति धीरास्तु शरणागतम् ॥३२२॥ युग्मम् ।
प्राज्यं राज्यं रजस्यन्ति नयन्ति निधनं धनम् । धीराः प्राणास्तृणीयन्ति त्राणाय शरणार्थिनाम् ॥३२३॥
ततस्तस्याः स पिच्छानि करैः कमलकोमलैः । स्पृशन् बभाषे मा भैषीर्मा भैषीर्भीरु ! भीरुवत् ॥३२४॥
नरेन्द्रः खेचरेन्द्रश्च सुरेन्द्रश्चासुरेन्द्रयुग् । हर्त्तुं हे हंसि ! नो शक्तस्त्वां मदुत्सङ्गसङ्गताम् ॥३२५॥
शेबनिर्मुक्तनिर्मोकनिर्मलं पक्षयामलम् । प्रकम्पयसि कम्प्राङ्गी मदङ्कस्थाऽपि हंसि ! किम् ? ॥३२६॥
सरस्यास्तोयमानीय सरसानि वि[१]सानि च । सोऽपिप्रीणत्कृपालुस्तां व्याकुलां [२]वरलां ततः ॥३२७॥
केयमागात् कुतः ? कस्माद् भीताऽस्याश्च कथं नृवाग् ? । यावदेवं कुमाराद्यास्तदा संशेरते हृदि ॥३२८॥
तावत् कृतान्तं त्रैलोक्यकृतान्तं कः प्रकोपयेत् ? । को वा स्वजीवितोद्विग्नः शेषशीर्षमणिं स्पृशेत् ? ॥३२९॥
को वा कल्पान्तकालाग्निज्वालासु सहसा विशेत् ? । उक्तिर्द्विट्भटकोटीनां उत्कटाऽऽकर्णितैरिति ॥३३०॥ युग्मम् ।

१. विसानि=कमलानि । २. हंसीम् ।

साशङ्कचेताः कीरोऽथ सचेताः द्राक् समागतः । यावदर्हद्गृहद्वारे तत्स्वरूपं न्यरूपयत् ॥३३१॥
तावद्विद्याधरेन्द्रस्याऽद्राक्षीत्सैन्यं सुदुर्द्धरम् । गङ्गापूरमिवातुच्छमागच्छद् गगनाङ्गणे ॥३३२॥
प्रभावादिव तीर्थस्याऽनुभावादिव दैवतात् । भाग्यसारकुमारस्याऽद्भुतभाग्योदयादिव ॥३३३॥
किं वा कुमारसंसर्गादिव वीरव्रतोद्धुरः । धीरगीः कीर इत्युच्चैर्हक्कयामास सैनिकान् ॥३३४॥ युग्मम् ।
रे रे विद्याधराः वीराः क्व नु धावत दुर्धियः । पुरः कुमारं देवैरप्यजय्यं किं न पश्यथ ? ॥३३५॥
इतः प्रोत्सर्पिदर्पाणां सर्पाणामिव सर्पताम् । क्षिप्रं दर्पापहर्त्ता वः स्वर्णकायः कुमारराट् ॥३३६॥
रे रेऽस्मिन् यमवत् क्रुद्धे युद्धं तिष्ठतु दूरतः । पलायनोऽपि युष्माकं दुर्लङ्घ्या भूर्भविष्यति ॥३३७॥
कीरहक्कामिति श्रुत्वा वीरहक्कामिवाशु ते । विषण्णा विस्मिता भीताश्चेतस्येवं व्यचिन्तयन् ॥३३८॥
कीररूपेण कोऽप्येष देवो वा दानवोऽथवा । नो चेदित्थं कथं हन्त हक्कयेत् खेचरानपि ॥३३९॥
विद्याभृतां सिंहनादानप्यहो ! सोढपूर्विणः । कथं नु सोढुमप्रौढा हक्कामप्यस्य हा ! वयम् ॥३४०॥
यस्य कीरोऽपि वीरोऽयं क्षोभयेत् खेचरानपि । को वेद कीदृगव्यास्ते कुमारः स पुरःस्थितः ॥३४१॥

कश्चाज्ञातस्वरूपेण योद्धधुर्योऽपि युध्यताम् । पारावारं ह्यपारं किं तरेत्तारकमान्यपि ॥३४२॥ पञ्चभिः कुलकम्[1] ।
ततस्त्रस्ताः समस्तास्ते विहस्ता व्यस्तविक्रमाः । अक्रमादेव हक्कातः प्रत्यावृत्ताः शृगालवत् ॥३४३॥
गत्वा विद्याधरेन्द्रस्य सवितुर्बालका इव । यथास्थितमवोचंस्ते गोप्यं स्वस्वामिने नु किम् ? ॥३४४॥
अथ प्रथमजीमूत इव गर्जितमादधन् । कोपारुणेक्षणोत्क्षेपैस्तडिद्दण्डान् विडम्बयन् ॥३४५॥
ललाटपट्टघटितभ्रूकुटीभीषणाननः । पञ्चानन इवौजस्वी यशस्वी सैवमूचिवान् ॥३४६॥ युग्मम् ।
मुधा भयातुरान् धिग् वः कातरान् वीरमानिनः । कः कीरश्च ? कुमारश्च को वान्योऽप्यसुरः सुरः ? ॥३४७॥
साम्प्रतं मत्कृतं रे रे रङ्काः ! पश्यत पश्यत । इत्युच्चैर्विब्रुवन्नेष रूपं दशमुखं व्यधात् ॥३४८॥
लीलाग्रस्तरिपुप्राणं कृपाणं पाणिना वहन् । एकेन सोऽपसव्येन सव्येन फलकं पुनः ॥३४९॥
एवमन्येन काण्डानां काण्डं समणिसर्पवत् । यमदोर्दण्डचण्डश्रिकोदण्डमपरेण च ॥३५०॥
इतरेण स्फुरद्घोषं शङ्खं श्लोकमिव स्वकम् । नागपाशं रिपुयशोनागपाशं परेण च ॥३५१॥
कुन्तमन्तकदन्तीन्द्रदन्तमन्तकरं द्विषाम् । पर्शुं प्रत्यर्थिदुदर्शं गिरीन्द्रगुरुमुद्गरम् ॥३५२॥

१. पञ्चभिरर्थतः कुलकं इति को० ह० प्र० पाठः ।

करालं पत्रपालं च भिन्दिपालं ज्वलद्द्युतिम् । तैक्ष्ण्यादतुल्यं शल्यं चोड्डामरं तोमरं महत् ॥३५३॥
शत्रुशूलं त्रिशूलं च प्रचण्डं दण्डमायसम् । शक्तिं स्वशक्तिं मूर्तां नु पटिष्ठमपि पट्टिसम् ॥३५४॥
दुःस्फोटमथ दुःस्फोटं शतघ्नीं वैरिविघ्नदाम् । चक्रं च द्वेषिचक्रस्य कालचक्रमिवोच्चकैः ॥३५५॥
शेषैश्च चतुर्दशभिः क्रमेण कलयन् करैः । भयङ्करः करैरेवं विंशत्या जगतामपि ॥३५६॥
वक्त्रेणैकेन हुङ्कारांस्त्राट्कारानिव शण्डराट् । कुर्वन्नन्येन कल्पान्तक्षुब्धाब्धिरिव गर्जितम् ॥३५७॥
शेषैर्मुखैः क्रमात् क्ष्वेडां ह्रदाम्रेडां मृगेन्द्रवत् । अट्टहासीवाट्टहासकृतत्रासं भृशं द्विषाम् ॥३५८॥
महाशङ्खं महानादैर्वादयन् वासुदेववत् । दिव्यमन्त्रान् विचित्रांश्च मन्त्रसाधकवज्जपन् ॥३५९॥
कुर्वन् हक्कारवान् वुक्कारवानिव कपिप्रभुः । रौद्रं किलिकिलिध्वानं तन्वन्नुच्चैः पिशाचवत् ॥३६०॥
तर्जयन्निजसैन्यानि कुशिष्यानिव सद्गुरुः । निर्भर्त्सयन् कुमारं च वादीव प्रतिवादिनम् ॥३६१॥
एवं स्फुरन्नवनवव्यापारैर्दशभिर्मुखैः । दिशो दशापि युगपद् ग्रसितुं नु कृतत्वरः ॥३६२॥
सावज्ञं सतिरस्कारं द्वाभ्यां दृग्भ्यां स्वसैनिकान् । साहङ्कारं च सोत्साहं द्वाभ्यां पश्यन्निजान् भुजान् ॥३६३॥
उभाभ्यामथ सोत्कर्षं सहर्षं च निजायुधान् । उभाभ्यामपि साक्षेपं सकृपं शुकपुङ्गवम् ॥३६४॥
सप्रणयं सोपनयं दृग्द्वयेन मरालिकाम् । साभिलाषं च सौत्सुक्यं दृग्द्वयेन च कन्यकाम् ॥३६५॥

केकिनं द्वितयेनाक्ष्णा सस्पृहं च सकौतुकम् । द्वितीयेन जिनेन्द्रार्चां सोल्लासं च सभक्ति च ॥३६६॥
सामर्षं च सरोषं च, कुमारमुभयेन च । उभयेन च तत्तेजः सभयं च सविस्मयम् ॥३६७॥
एवं निजभुजस्पर्धादिव व्यापारवत्तरैः । विंशत्योद्भावयन् भावान् भिन्नान् भिन्नान् स्वलोचनैः ॥३६८॥
कृतान्त इव दुर्दान्तः कल्पान्त इव दुःसहः । विश्वक्षोभकृदुत्पात इवोत्तस्थे वियत्-पथे ॥३६९॥ एकविंशत्या कुलकम् ।
दशास्यमिव तं साक्षाद् भीषणेभ्योऽपि भीषणम् । दुःप्रेक्ष्यं प्रेक्ष्य कपिवत् कीरः स्त्रक्त्रासमासदत् ॥३७०॥
तादृक्षस्य मुखे को वाऽभिमुखीभावमावहेत् ? । को वा दावानलज्वाला ज्वलन्तीः पातुमुत्सहेत् ? ॥३७१॥
त्रस्तः कुमारं श्रीरामं शरणीचकृवांश्च सः । तादृग् भये ततः कः स्यादितरः शरणोचितः ? ॥३७२॥
हक्कयांश्चकृवांश्चैवं कुमारं खेचरेश्वरः । रे रे दूरं पलायस्व नान्यथाऽद्य भविष्यसि ॥३७३॥
रे मज्जीवितसर्वस्वं हंसीवोत्सङ्गसङ्गताम् । कुवन्ननार्य ! निर्लज्ज ! निर्मर्याद ! निरङ्कुश ! ॥३७४॥
अरे ! निर्भय ! निःशङ्क ! मत्पुरोऽद्यापि तिष्ठसि । नित्यदुःखीव वा नूनं क्षिप्रं मूर्ख ! मुमूर्षसि ॥३७५॥ युग्मम् ।
शुके पश्यति साशङ्कं कलापिनि सकौतुकम् । सत्रासं पद्मनेत्रायां हंस्यामपि ससंशयम् ॥३७६॥
हसन्नाह कुमारोऽपि किं रे भापयसे ? मुधा । बिभीषिकोन्मिषेदेषा बालं प्रति परं न तु ॥३७७॥
त्रस्यन्ति तालिकाघाताद् द्रुतमन्ये पतत्रिणः । न पुनः पटहध्वानधृष्टा मठकपोतकाः ॥३७८॥

नैव मुञ्चामि कल्पान्तेऽप्येतां रे शरणागताम् । जिघृक्षसे तथाप्येनां धिक् फणीसमणीमिव ॥३७९॥
स्पृहामस्या विहायाशु दूरेऽपसर रे न चेत् । करिष्ये दशशीर्ष्या ते दशदिक्स्वामिनां बलिम् ॥३८०॥
अत्रान्तरे कुमारेन्द्रसहायकचिकीः स्वयम् । रूपं कलापिनस्त्यक्त्वा कृत्वा रूपं सुपर्वणः ॥३८१॥
चन्द्रचूडसुरः सज्जविविधायुधधोरणिः । कुमारान्तिकमाहूत इवागात् सुकृतान्यहो ! ॥३८२॥
अवादीच्च कुमारेन्द्र ! युद्धं कुरु यथारुचि । शस्त्राणि पूरयिष्यामि चूरयिष्यामि ते द्विषम् ॥३८३॥
ततो द्विगुणमुत्साहमुवाह स सुदुःसहम् । प्राप्तपक्षरहर्यक्षपक्षयुक्तक्षकादिवत् ॥३८४॥
ततस्तिलकमञ्जर्या हंसी न्यस्य कराम्बुजे । सज्जीभूयाऽऽरुरोहाऽश्वं स सुपर्णमुपेन्द्रवत् ॥३८५॥
चन्द्रचूडश्च कोदण्डं गाण्डीवश्रीविडम्बिनम् । तस्मै तूर्णं सतूरीणं नियुक्त इव दत्तवान् ॥३८६॥
स तदोद्दण्डदोर्दण्डे चण्डकोदंडमण्डलम् । उच्चैरास्फालयन्नाप स्फालकाल इवामुना ॥३८७॥
धनुर्गुणटणत्कारमुखरीकृतदिङ्मुखम् । योधधुर्यौ शरैर्युद्धं प्रारेभाते उभावथ ॥३८८॥
बाणकर्षणसन्धानमोचनादिक्रियाक्रमः । तदा नालक्षि दक्षैरप्युभयोर्लघुहस्तयोः ॥३८९॥
किन्तु वर्षणमेवैक्षि विशिखानां शुकादिभिः । सद्यस्काम्बुधरासारे क्रमस्याधिगमः क्व वा ? ॥३९०॥
अविहस्तयोस्तयोश्च प्रकृत्या कृतहस्तयोः । सरव्यतां शरा एव शराणामैयरुर्मिथः ॥३९१॥

एवं च सेल्लवावल्लतीरीतोमरतद्बलैः । अर्द्धचन्द्रार्द्धनाराचनाराचप्रमुखैरपि ॥३९२॥
विशेषविशिखैस्तीक्ष्णशिखैः सङ्ख्यमसङ्ख्यशः । महाक्रोधौ महायोधौ विदधाते चिरेण तौ ॥३९३॥ युग्मम् ।
अदीनयोस्तदानीमप्युभयोः सांयुगीनयोः । तयोर्महाकितवयोरिवाभूज्जयसंशयः ॥३९४॥
क्रमाद्विद्याबलाद् दिव्यबलात् प्रबलयोस्तयोः । वालिपौलस्त्यवत् क्षिप्रं कथं वा जयनिर्णयः ? ॥३९५॥
न्यायधर्मबलाधिक्यात् क्रमादथ कुमारराट् । चटत्प्रकर्षतां भेजे सन्न्यायोपात्तवित्तवत् ॥३९६॥
विलक्षः खेचरेन्द्रोऽथ वहन् हारितमानिताम् । समयुद्धस्थितिं त्यक्त्वा डुढौके सर्वशक्तितः ॥३९७॥
विंशत्याऽपि हि बाहाभिर्विविधैरायुधैश्च सः । प्रहरन् सहस्त्रबाहुरिवाभूदतिदुस्सहः ॥३९८॥
नूनमन्याययुद्धेन च कश्चिद्विजयी क्वचित् । इत्युच्चकैस्तदोत्सेहे कुमारः सुविचारधीः ॥३९९॥
प्रहारान् खेचरेन्द्रस्य तुरगेन्द्रप्रयोगतः । वञ्चयंश्चाखिलान् क्षिप्रं क्षुरप्रं बाणमाददे ॥४००॥
क्षुरप्रेण क्षुरेणेव तस्य प्रहरणानि सः । चिच्छेदच्छेदमर्मज्ञोऽखिलान्यलकलीलया ॥४०१॥
अथैकेनार्द्धचन्द्रेण निस्तन्द्रेण रणेऽमुना । तस्य कोदण्डदण्डोऽपि द्राग् द्विखण्डो व्यधीयत ॥४०२॥
अपरेण च दुर्बोधोऽप्यविध्यत स वक्षसि । अहो वणिक्कुमारस्याऽप्यसमः कोऽपि विक्रमः ॥४०३॥
निरस्त्रः खेचरेन्द्रोऽभून्निष्पन्न इव पिप्पलः । विद्धोरस्कोऽद्रवदसृग् द्रवल्लाक्षाद्रवः किल ॥४०४॥

ताद्दग्विधोऽपि क्रोधान्धः स दुर्द्धरतया रयात् । विद्यया बहुरूपिण्या रूपाणि बहुधा व्यधात् ॥४०५॥
लक्षसङ्ख्यानि रूपाणि तथारूपाणि तस्य खे । जगतोऽपीतिरूपाणीवात्याहितकृतेऽभवन् ॥४०६॥
कल्पान्तानल्पभीष्माभ्रपटलैरिव तैस्तदा । अप्यन्तरिक्षं दुर्लक्षं विष्वग् व्याप्ततयाभवत् ॥४०७॥
व्यापारयत् कुमारश्च स्वनेत्राणि यतो यतः । एकं दोर्जालदुर्दर्शं तं ददर्श ततस्ततः ॥४०८॥
व्यसेष्मयीत्तथाप्येष नाभैषीदीषदप्यहो ! । किं वा कल्पान्तपातेऽपि धीराः स्युः कातराः क्वचित् ॥४०९॥
प्राहार्षीद्विष्वगप्येष लक्ष्यकक्षां विना ततः । विशिष्य व्यवसायो हि विधुरे धीरचेतसाम् ॥४१०॥
द्दष्ट्वा कुमारं विकटस्फुटसण्टङ्किसङ्कटम् । गरिष्ठमुद्गरकरः सुरस्तं हन्तुमुत्थितः ॥४११॥
तं भीमरूपमायान्तं गदापाणिमिवोचितम् । दुःशासनः खेचरेन्द्रश्चुक्षोभ रभसेन सः ॥४१२॥
धृतधैर्यप्रकर्षश्च तं सुरं प्राहरत्तराम् । रूपैः सर्वैर्भुजैः सर्वैः सर्वशक्त्या स सर्वतः ॥४१३॥
तस्मिन्नचिन्त्यशक्तित्वात्कुमाराद्भुतभाग्यतः । आसन् वन्ध्या द्विट्प्रहारा उपकाराः खले यथा ॥४१४॥
रूपं मुख्यमथाऽमुष्य मूर्ध्नि क्रोधोद्धरः सुरः । शैलं वज्रेण वज्रीव मुद्गरेण निजघ्निवान् ॥४१५॥
सुपर्वणा सर्वशक्त्या प्रदत्ताद् घाततस्ततः । निर्घातः कातरप्राणापहारी कोऽप्यभून्महान् ॥४१६॥
विद्योन्मदिष्णोस्त्रैलोक्यजिष्णोर्विष्णोरिवास्य च । तेन मूर्ध्नि द्दढो वज्रवन्न यद्यप्यभिद्यत ॥४१७॥

तदप्यस्य महाविद्या भीतेव बहुरूपिणी । काकनाशं ननाश द्राक् सुरस्याहो ! सहायता ॥४१८॥
प्रकृत्याऽपि कुमारोऽयं रक्षोवद् भीषणो द्विषाम् । दुर्निरास्यः सखा चास्य सुपर्वाग्नेरिवानिलः ॥४१९॥
इत्थं निर्धार्य निर्धैर्यधुर्यवत् खेचराधिपः । पलायते स्म प्रोक्तं च यः प्रयाति स जीवति ॥४२०॥
इष्टां प्रनष्टां स्वां विद्यां द्रष्टुं झटिति पृष्ठतः । स सावेगं दधावे च द्विधाऽपि पदिकाग्रणीः ॥४२१॥
एकापाये परापायः सन्नियोगैकशिष्टयोः । इतीव विद्यालुग्भावे सोऽपि लुग्रूपतां गतः ॥४२२॥
सह तेनैव नेशुश्च खेचरास्तस्य किङ्कराः । यद्वा प्रदीपे विध्माते तिष्ठन्ति किमु तत्त्विषः ? ॥४२३॥
सुकुमारः कुमारः क्व ? क्व कठोरश्च खेचरः ? । तमजैषीत्तदप्येष यतो धर्मस्ततो जयः ॥४२४॥
दुर्जयारिजयात्प्राप्तोत्कर्षेणाऽनिमिषेण सः । नृदेवः सेवकेनेव सह प्रासादमासदत् ॥४२५॥
कुमारस्येति चरितं चमत्कृतिकरं परम् । व्यालोक्योल्लासिपुलकाऽध्यासीत्तिलकमञ्जरी ॥४२६॥
त्रैलोक्यैकशिरोरत्नं नृरत्नं कोऽप्ययं युवा । भर्त्तेदृग् लभ्यते भाग्यैर्भगिन्याः सङ्गतिर्यदि ॥४२७॥
इत्यौत्सुक्यत्रपाचिन्ताभृतस्तस्याः सकाशतः । मरालिका बालिकावत् कुमारेण समाददे ॥४२८॥
हंसी स्माह कुमारेन्द्र ! धीर ! धीरधुरन्धर ! । वीरप्रवीरकोटीर ! चिर जीव चिरं जय ॥४२९॥
वराक्या रङ्क्याऽत्यर्थाऽऽतङ्क्याऽनार्यया मया । स्वकृते यत् खेदितोऽसि विश्वक्षम ! क्षमस्व तत् ॥४३०॥

तत्त्ववृत्त्योपकारी मे न परः खेचरेन्द्रतः । अनन्तसुकृतप्राप्यं प्राप्ताङ्कं तव यद्भयात् ॥४३१॥

अस्मादृशोऽपि विवशा दुःखिताः सुखिताश्चिरम् । सन्तु हन्त ! प्रसादात्ते सधनस्येव निर्धनाः ॥४३२॥

कुमारः स्माऽऽह काऽसि त्वं ? कथय प्रियवादिनी ! कथं त्वां खेचरोऽहार्षीदेवा भाषा च ते कथम् ? ॥४३३॥

हंसीवतंसीभूता सा हंसी प्राहाऽथ तद्यथा । उच्चैश्चैत्याढ्यवैताढ्यतुङ्गशृङ्गविभूषणम् ॥४३४॥

नगरं रथनूपुरचक्रवालं प्रपालयन् । खेचरेन्द्रोऽस्ति तरुणीमृगाङ्कस्तरुणीरतिः ॥४३५॥ युग्मम् ।

सोऽन्यदा कनकपुर्यां पुर्यां धुर्याङ्गविभ्रमाम् । अशोकमञ्जरीं राजकन्यां खे यानुदैक्षत ॥४३६॥

लीलायमानां दोलायां बालामालोक्य तां च सः । साक्षादप्सरसमिवाक्षुभ्यद्विधुमिवाम्बुधिः ॥४३७॥

वात्यां विकृत्य तेनाऽथ बाला दोलायुता हृता । स्वेष्टसिद्ध्यै प्रवर्तन्ते यथाशक्त्याऽथवा न के ॥४३८॥

हृत्वा शबरसेनाह्वमहाटव्याममोचि च । सा मृगीव भयत्रस्ती क्रन्दन्ती कुररीव च ॥४३९॥

स तामूचे स रंभोरु ! भीरु किं कम्पसे भिया ? । दिक्षु क्षिपसि किं नेत्रे ? किं वा क्रन्दसि ? सुन्दरि ! ॥४४०॥

न बन्दकृन्न चौरश्च न चाऽहं पारदारिकः । किन्त्वस्मि खेचरेन्द्रस्तेऽनन्तभाग्यवशंवदः ॥४४१॥

प्रार्थये किङ्करीभूय कुरु पाणिग्रहं मम । खेचराणामशेषाणां कामिनि ! स्वामिनी भव ॥४४२॥

धिक्काममन्धा येनैवं दुष्टाऽनिष्टैकचेष्टया । परोपतापिनोऽप्यग्निवदिच्छन्ति करग्रहम् ॥४४३॥

इत्यादि चिन्तयन्ती सा न किञ्चित्प्रत्यवोचत । स्पष्टितानिष्टचेष्टं कः प्रत्याचष्टेऽपि शिष्टधीः ॥४४४॥
जननीजनकाद्यैः स्वजनैर्विरहिताऽधुना । एषाऽऽर्द्रदुःखापि सुखान् मां क्रमात्कामयिष्यते ॥४४५॥
इत्याशया कामकरीं सर्वकामकरीं मुदा । हृद्यां विद्यां स सस्मार स्वं शास्त्रमिव शास्त्रिकः ॥४४६॥
तत्प्रभावाच्च तद्रूपगोपनार्थं स निर्ममे । तापसकुमाररूपां कन्यां नट इव स्फुटः ॥४४७॥
नानाप्रकारैः सत्कारैर्न्यक्कारैरिव तां प्रति । अपारैरुपचारैश्च प्रचारैर्विपदामिव ॥४४८॥
तां तद्रूपां तथा प्रेमालापैर्व्यापैरिवांहसाम् । निःसत्त्वः सान्त्वयामास कियत्कालं स बालधीः ॥४४९॥ यमलम् ।
तत्सर्वं भस्मनि हुतं प्रवाहे मूत्रितप्रभम् । तस्यामासीद् दूषरोर्व्यामिव वापोक्षणादिकम् ॥४५०॥
निष्फलायाः प्रक्रियाया न व्यरंसीत्तथापि सः ! जातचित्तभ्रमस्येव कामिनः कोऽप्यहो ! ग्रहः ॥४५१॥
तस्मिन्ननार्यकार्येण प्राप्ते स्वपुरमन्यदा । स तापसकुमारस्त्वां ददर्शान्दोलनोद्यतः ॥४५२॥
स विश्वस्तः स्ववृत्तं ते यावता वक्ति तावता । खेटस्तत्राप्तस्तं जह्रे सोऽर्कतूलमिवानिलः ॥४५३॥
नीत्वा निजपुरे दिव्यमन्दिरे मणिभासुरे । क्रुद्धोऽभ्यधत्त रे मुग्धे ! विदग्धेव विदग्धवाक् ॥४५४।
कुमारेण समं प्रेम्णा ब्रूषेऽन्येनापि केनचित् । मम तु त्वद्वशस्यापि दत्से प्रतिवचोऽपि न ॥४५५॥ युग्मम् ।
मामद्यापि प्रपद्यस्व मुञ्चस्व स्वकदाग्रहम् । अन्यथा ते व्यथाहेतुः कृतान्तः कुपितोऽस्म्यहम् ॥४५६॥

साऽऽह साहसमालम्ब्य भो च्छलेन बलेन च । छलिभिर्बलिभिश्चापि राजर्द्धर्याद्येव साध्यते ॥४५७॥
न पुनः प्रेम कुत्रापि छलादुत बलाद्भवेत् । चित्तयोरेव सारस्ये प्रेमाङ्कुरस्य रोहणम् ॥४५८॥
विना स्नेहं च सम्बन्धः कः स्यान्मोदकबंधवत् । द्रव्यात् सम्बन्धकादेव सम्बन्धः काष्ठयोरपि ॥४५९॥
तत्प्रार्थयेत निःस्नेहं को मूर्खादपरः परम् ? । यो ह्यस्थानेऽपि निर्बन्धी धिग् धिक् तं मन्दमेधसम् ॥४६०॥
ततः क्रुद्धः सनिस्त्रिंशः कृष्ट्वा निस्त्रिंशमञ्जसा । प्राह संप्रति हन्ताऽस्मि रे रे ! मामपि गर्हसे ॥४६१॥
साचष्ट दुष्ट रेऽनिष्टसम्बन्धान्मरणं वरम् । मां न मोक्ष्यसि चेत्तद्द्राग् मा विचारय मारय ॥४६२॥
ततस्तस्याः शुभैर्जातचिन्तश्चिन्तितवानसौ । हा धिङ्मया किमारब्धमीदृग् दुर्बुद्धिचेष्टितम् ॥४६३॥
जीवितं स्याद्यदायत्तं जीवितेशा च येप्स्यते । हन्त तस्यां कथं कुर्यात् ? पुरुषः परुषं रुषा ॥४६४॥
सामवृत्त्यैव सर्वत्र प्रेमप्रभवसंभवः । विशिष्य नार्यां यत्प्रोचे पाञ्चालः स्त्रीषु मार्दवम् ॥४६५॥
ध्यात्वेति न्यस्तवानन्तःकोशमुल्लासिमानसः । सद्यः कृपाणं कृपणाग्रणीरिव निजं धनम् ॥४६६॥
कामकर्या विद्ययाऽथ तां चकार मरालिकाम् । नृभाषाभाषिणीमेष सृष्टिकर्तेव नूतनः ॥४६७॥
ततः प्रक्षिप्य माणिक्यपञ्जरे तामजर्जरे । प्राग्वत् प्रसादयामास सादरं स निरन्तरम् ॥४६८॥
कुर्वन् पटूनि चाटूनि स्पष्टं दृष्टोऽन्यदा च सः । शङ्कितस्वान्तया तस्य कान्तया कमलाह्वया ॥४६९॥

क्षणादीर्ष्यादुर्निरीक्ष्या मूर्च्छन्मत्सरदुर्द्धरा । ततः साऽभूद्धामिनीनामियं प्रकृतिरेव हि ॥४७०॥
सख्या इव स्वविद्यायाः सा तद्वृत्तान्तमादितः । ज्ञात्वा स्वशल्यमिव तां पञ्जरान्निरकासयत् ॥४७१॥
सपत्नीभावमाशङ्क्य तया निष्कास्यते स्म सा । तस्यास्तु योगाद्भाग्यानामिष्टमेवाजनिष्ट तत् ॥४७२॥
खेचरेन्द्रगृहात्तस्मान्नरकादिव निर्गता । उद्दिश्य शबरसेनामटवीमटति स्म सा ॥४७३॥
खेटपृष्ठागमाऽऽशङ्कातङ्कात्याकुलमानसा । धनुमुक्तेषुवद् वेगाद्यान्ती श्रान्तीबभूव च ॥४७४॥
सा च भाग्यैरिवाकृष्टा विश्रामार्थमिहाययौ । त्वां चालोक्य तवैवाङ्कपङ्कजान्तर्न्यलीयत ॥४७५॥
साहं हंसी कुमारेन्द्र ! खेचरेन्द्रः स एव च । ध्रुवं मत्पृष्टमायातस्तत्क्षणाच्च जितस्त्वया ॥४७६॥
ज्ञात्वेति स्वस्वसुवृत्तं ततस्तिलकमञ्जरी । तद्दुःखाद्विललापैवं प्रोच्चैः स्त्रीणामियं स्थितिः ॥४७७॥
कथमस्थास्तापसत्वे स्वामिन्येकाकिनी हहा ! । अरण्यान्यां राजधान्यां भयानां धिग् विधेर्विधिम् ॥४७८॥
हा ! कथं ? पञ्जरे दुःखवासिनां सुखवासिनि ! । विषेहिषे दुर्विषहां पशुगर्भम् इवामरी ॥४७२॥
आर्ये ! तिर्यक्त्वभावस्ते भवेऽत्रापि हहाभवत् । धिग् धिग् विधेनर्टस्येव सत्पात्रेऽपि विडम्बना ॥४८०॥
प्राग्भवे कौतुकात् कस्याप्यकारि विरहस्त्वया । ध्रुवं मयोपेक्षितश्च फलं तस्य किमप्यदः ॥४८१॥
हा ! हन्त ! हततिर्यक्त्वं तव दुर्दैवसंभवम् । दूरीभावि कथङ्कारं दौर्भाग्यमिव जङ्गमम् ॥४८२॥

तस्यामेवं विलापिन्यां सुसखेव सखेदहृत् । चन्द्रचूडोऽम्बुना सिक्त्वा तां स्वशक्त्या कनीं व्यधात् ॥४८३॥
वाग्देवीव नवोत्पन्ना पद्मेवाब्धेर्विनिर्गता । कुमारादेर्मुदद्वैतहेतुः सा दिद्युते तदा ॥४८४॥
संरंभात्परिरेभाते भगिन्यौ ते उभे ततः । पुलकच्छलमुत्पूराङ्कुरे प्रेम्ण इयं स्थितिः ॥४८५॥
कुमारः कौतुकात् प्रोचे ततस्तिलकमञ्जरि ! । पारितोषिकमस्माभिः सुभ्रु ! लभ्यमिह ध्रुवम् ॥४८६॥
वदेन्दुवदने ! तत्किं देयं देहि च तद्द्रुतम् । औचित्यदानाद्यादाने धर्मे च चिरयेन्नु कः ? ॥४८७॥
लञ्चौचित्यादिदानर्णहुड्डासूक्तभृतिग्रहे । धर्मे रोगरिपुच्छेदे कालक्षेपो न शस्यते ॥४८८॥
क्रोधावेशे नदीपूरप्रवेशे पापकर्मणि । अजीर्णभुक्तौ भीस्थाने कालक्षेपः प्रशस्यते ॥४८९॥
ह्रीकम्पस्वेदरोमाञ्चलीलाविच्छित्तिविभ्रमैः । विकारैर्बहुधा विद्धाऽभ्यधान्मुग्धाऽथ धैर्यभृत् ॥४९०॥
सर्वस्वमेव ते देयं सर्वाङ्गीणोपकारिणे । तद्दानसत्यङ्कारस्तु स्वामिन्नेष विभाव्यताम् ॥४९१॥
इत्युदित्वा प्रमुदिता स्वं चित्तमिव मूर्तिमत् । हृदि न्यास्थत् कुमारस्य मुक्ताहारं मनोहरम् ॥४९२॥
अत्यादरान्निरीहोऽपि कुमारः स्वीचकार तम् । इष्टप्रदत्तमादातुं प्रयोक्त्री प्रीतिरेव हि ॥४९३॥
कीरोऽप्यम्भोजराजीभिरभ्यर्च्यत तया रयात् । नान्यथा स्यादुत्तमानां वाङ्मात्रमपि कुत्रचित् ॥४९४॥
औचित्यकृत्यनिस्तन्द्रश्चन्द्रचूडस्तदाऽवदत् । दत्ते तुभ्यमुभे कन्ये प्राग् दवेन मयाधुना ॥४९५॥

श्रेयांसि बहुविघ्नानि भवन्तीत्यविलम्बितम् । एते गृहीते प्राक् चित्तेऽधुना पाणौ गृहाण च ॥४९६॥
प्रोच्यैतच्चन्द्रचूडस्तं विवाहार्थं वधूयुतम् । श्रियः पुञ्जे तिलकद्रुनिकुञ्जे नीतवान् मुदा ॥४९७॥
रूपान्तरेण गत्वा च द्रुतमामूलचूलतः । चक्रे चक्रेश्वरीश्रोत्रवर्त्ति तद्वृत्तमुत्तमम् ॥४९८॥
अथो पृथुमणीघण्टाघटाटङ्काररराविणम् । सन्मणीकिङ्कणीक्वाणोद्यत्पताकाशताकुलम् ॥४९९॥
चित्तचोरणमाणिक्यतोरणश्रेणिसुन्दरम् । वाचालीकृतपाञ्चालीकुलं तौर्यत्रिकस्वनैः ॥५००॥
अपारपारिजातादिमालामालाभिरर्चितम् । हारार्द्धहारश्रीसारमुच्चलच्चारुचामरम् ॥५०१॥
सार्वरत्नमयं साक्षादिव मार्तण्डमण्डलम् । अपि चण्डतमस्काण्डं खण्डयन्तं स्वतेजसा ॥५०२॥
निस्समानं महामानं विमानं निजवेगतः । पवमानं जयमानं निस्समानन्दतः श्रिता ॥५०३॥
नानाविमानासीनाभिः समानाभिः समन्ततः । प्राप्ता चक्रेश्वरी तत्र देवताभिर्निषेविता ॥५०४॥ षड्भिः कुलकम् ।
प्रणता गोत्रदेवीव सा वधूभ्यां वरेण च । पुरन्ध्रीकुलवृद्धेव तेषामित्याशिषं ददौ ॥५०५॥
अवियुक्ताः प्रीतियुक्ताः सौख्यलक्ष्मीजुषश्चिरम् । पुत्रपौत्रादिसन्तत्या विजयध्वं वधूवराः ॥५०६॥
अथौचितीचतुरया रयाच्चतुरिकादिकाम् । कृत्वा समग्रसामग्रीमग्रणीभूतया तया ॥५०७॥
देवाङ्गनागीयमाननिस्तुलोलूलुमङ्गलः । व्यधायि विधिना तेषां पाणिग्रहमहो महान् ॥५०८॥ युग्मम् ।

ताभिस्तदा वरेन्द्रस्य कीरेन्द्रोऽनुचरस्थितिः । स्फीतैर्गीतैर्गीयते स्माहो ! महत्सन्निधेः फलम् ॥५०९॥
अहो ! कन्याकुमाराणां निस्समः सुकृतक्रमः । सुरी चक्रेश्वरी चक्रे येषामुद्वाहमङ्गलम् ॥५१०॥
तत्र प्रधानविविधक्रीडास्थानमनोहरः । सप्तभूमतया सप्तद्वीपश्रीणामिवालयः ॥५११॥
गवाक्षैरसदृक्षैश्च सहस्राक्षश्रियं श्रयन् । विन्ध्यौर्वीध्रायमाणैश्च चित्तहृन्मत्तवारणैः ॥५१२॥
क्वापि कर्केतनव्रातैः पृथुत्रिपथगायितः । कुत्रचिद् वर्यवैडूर्यैः कालिन्दीसलिलायितः ॥५१३॥
पद्मरागैः क्वचिद्रागे सन्ध्यारागसजूरिव । कुत्रापि स्वर्णविन्यासात् स्वर्णाद्रिप्रस्थवानिव ॥५१४॥
हरित्तृणानणीयः श्रीहरिन्मणिगणः क्वचित् । आकाशस्फटिकन्यासैराकाशभ्रान्तिकृत् क्वचित् ॥५१५॥
क्वचिदर्कोपलैरर्कालोकात् प्रज्वलितानलः । क्वचिच्चन्द्रोपलैश्चन्द्रातपात्पीयूषवर्षुकः ॥५१६॥
विधाय सौधः सौधर्मावतंसकः इवेतरः । सर्वरत्नमयस्तेषां प्रादायि स्थितये तया ॥५१७॥ सप्तभिः कुलकम् ।
तस्मिन् विस्मेरपुण्यश्रीस्तया पूरितवाञ्छितः । ताभ्यां समं स देवीभ्यामिव दोगुन्दुकः सुरः ॥५१८॥
विक्रीयापि तपः स्वं यत्प्रार्थ्य कैश्चित्तपस्विभिः । तदशेषं वैषयिकसुखसर्वस्वमन्वभूत् ॥५१९॥ युग्मम् ।
तत्तीर्थभक्त्या दिव्यर्द्धिभुक्त्या युक्त्या च जाययोः । तस्मिन् भवेऽपीभ्यभुवा लेभे सर्वार्थसिद्धता ॥५२०॥
शालिभद्रस्य गोभद्रसुरः सम्बन्धतः पितुः । पूरयामास सर्वाङ्गान् भोगान् किमिह कौतुकम् ? ॥५२१॥

अत्याश्चर्यं त्वपूर्यन्त चक्रेश्वर्याऽस्य यत्तदा । पितृमात्राद्यसम्बन्धेऽप्यभीष्टा भोगसंपदः ॥५२२॥
प्राचीनपीनपुण्यस्याऽभ्युदये किमु वाऽद्भुतम् ? । गङ्गादेव्याऽभुक्तभोगान्नृत्वेऽपि भरतश्चिरम् ॥५२३॥
देव्यादिष्टश्चन्द्रचूडस्तद्वधूवरवृत्ततः । नृपं वर्धापयामास कनकध्वजमन्यदा ॥५२४॥
स्फीतप्रीतिः क्षितीशोऽपि दर्शनोत्कण्ठया रयात् । प्रेर्यमाणः परप्रेम्णा निर्ययौ निजसैन्ययुक् ॥५२५॥
शुद्धशुद्धान्तसामन्तमन्त्रिश्रेष्ठ्यादिभिर्वृतः । तत्राल्पैरेव दिवसैः ससैन्यः सममागमत् ॥५२६॥
कुमारकीरकन्याद्यैः सद्यः सम्मुखमागतैः । संभ्रमेण प्रणेमेऽसौ गुरुः शिष्यवरैरिव ॥५२७॥
स्वजनन्या च ते कन्ये निःसामान्येन केनचित् । सङ्गमातेतमां प्रेम्णा धेन्वा वत्से इवोत्सुके ॥५२८॥
विश्वसारं कुमारं तं दिव्यर्द्धिं च विलोक्य ताम् । नृपः सपरिवारस्तं परमाहममानयत् ॥५२९॥
अथातिथ्यं कामगव्या इव देव्याः प्रसादतः । ससेनस्य रसेनस्य द्राक् चकार कुमारराट् ॥५३०॥
तद्भक्त्या रञ्जितो राजा नोत्सुकोऽप्यौत्सुकायत । प्रयातुं स्वपुरीं को न दिव्यर्द्ध्या प्रतिबध्यते ॥५३१॥
तत्तद्भक्त्या कुमारस्य तत्तीर्थस्य च सेवया । तान्येव सुदिनाहानि मेनिरेऽवनिपादिभिः ॥५३२॥
यथा कृतार्थिते एते कन्ये धन्येन भोस्त्वया । तथा कृतार्थयाऽद्यापि पुरीं नः पुरुषोत्तम ! ॥५३३॥
इत्थमत्यर्थमभ्यर्थ्य पार्थिवः स्वार्थविन्निजाम् । पूरीं प्रति प्रतस्थेऽथ कुमाराद्यैः सहाऽन्यदा ॥५३४॥

सहागच्छच्चन्द्रचूडचक्रेश्वर्यादिभिस्तदा । द्यौर्व्यापिभूव्यापिच[१]मूस्पर्द्धयेव विमानगैः ॥५३५॥
निरन्तरैर्विमानैस्तैरेकच्छत्रेव सा चमूः । क्वाप्याप तापं नोर्वीववीततीक्ष्णकरग्रहा ॥५३६॥
पुरीपरिसरं प्राप क्रमात् क्ष्मापः कुमारयुक् । वधूवरदिदृक्षोत्काः पौराश्च परमां मुदम् ॥५३७॥
कामिनीमिव काश्मीरकुङ्कुमद्रवपङ्किलाम् । आजानुपुष्पप्रकरामिवार्हद्देशनावनीम् ॥५३८॥
समुच्छ्रितैर्ध्वजभुजैर्नृत्यन्तीमिव मोदतः । गायन्तीमिव गीतानि रणत्तत्किङ्किणीकणैः ॥५३९॥
विश्वश्रीक्रीडनस्थानस्फुरत्तोरणधोरणीम् । मङ्गल्यहेतुमञ्चस्थस्फीतसङ्गीतसङ्गतिम् ॥५४०॥
पुरन्ध्रीजनविस्मेरवक्त्रैः पद्मसरायिताम् । तन्नेत्रपत्रैः प्रोन्मीलन्नीलोत्पलवनीयिताम् ॥५४१॥
महीपतिर्महीयोभिर्महैस्तं सप्रियाद्वयम् । सशक्तिनीतिमुत्साहमिव प्राविविशत् पुरीम् ॥५४२॥ पञ्चभिः कुलकम् ।
मान्यानामपि मान्याय राज्ञा तस्मै मुदे ददे । नानाधनाश्वभृत्यादिरीतिर्नीतिविदामियम् ॥५४३॥
निजपुण्यप्रसादेन प्रासादे श्वशुरार्पिते । स राजेवापरस्ताभ्यां विललास विलासवान् ॥५४४॥
शुकः कौतुककृत्तस्मै स्थितः काञ्चनपञ्जरे । व्यासवत्कथयामास प्रश्नाख्यानप्रहेलिकाः ॥५४५॥

१. चमूर्द्वयस्येव.... इति को० ह० प्र० पाठः ।

तत्र स्थितः कुमारेन्द्रः स्वर्गं गत इवाऽङ्गभृत् । सस्मार स्फारसारश्रीर्नैव प्राच्यस्य कस्यचित् ॥५४६॥
सौख्योत्कर्षेण तस्यैवं वर्षे हर्षेण जग्मुषि । क्षणवत्क्षणवद्दैवाद्यद्बभूव भणामि तत् ॥५४७॥
दुष्टात्मनां क्षणदायां क्षणदायां कदाचन । समासाद्य चिरं कीरश्रेष्ठगोष्ठीसुधारसम् ॥५४८॥
रत्नाकरे वासवेश्मवरे स पुरुषोत्तमः । सुखेन सुखशय्यायां सुष्वाप स्वापमाप च ॥५४९॥ युग्मम् ।
निशीथेऽथ तमोवीथीव्यर्थिताखिलचक्षुषि । यामिकेष्वपि निद्रायमाणेषु निखिलेष्वपि ॥५५०॥
दिव्याकारधरः स्फारसारशृङ्गारभासुरः । चौरचारचरः कृष्टकरवालस्फुरत्करः ॥५५१॥
सर्वतोऽपि कपाटेषु नेत्रवन्मुद्रितेष्वपि । पुरुषः सरुषस्तत्र कुतश्चित्कश्चिदाययौ ॥५५२॥ त्रिभिर्विशेषकम् ।
तस्मिन् प्रविष्टे प्रच्छन्नमपि दैवे तु दैवतः । जजागार कुमारः स्राक् स्वल्पनिद्रा हि साधवः ॥५५३॥
कोऽयं कथं किमर्थं वा प्राविशद्वासवेश्मनि ? । कुमारराजश्चित्तान्तर्यावदित्याद्यचिन्तयत् ॥५५४॥
सोऽपि कोपित्वदुर्द्धर्षः प्रावदत्तावदुच्चकैः । रे रे कुमार ! वीरश्चेत्सज्जीभव युधे तदा ॥५५५॥
मृषा पुरुषकारं ते वणिङ्मात्रस्य विश्रुतम् । धूर्त्तस्येव शृगालस्य सहेऽहं सिंहवत्कथम् ? ॥५५६॥
ब्रुवन्नेवेत्यसौ कीरमञ्जुपञ्जरमञ्जसा । हृत्वा चचाल प्रोत्तालश्छद्माऽहो ! छद्मवेदिनः ॥५५७॥
कोशान्निष्कास्य निस्त्रिंशं बिलादिव भुजङ्गमम् । कुमारोऽप्यन्वधाविष्ट क्रोधाविष्टमना द्रुतम् ॥५५८॥

स पुरस्तात्कुमारस्तु पृष्ठतः शीघ्रगामिनौ । लब्धलक्षौ ललङ्घाते लघु दुर्गगृहाद्यपि ॥५५९॥
तस्य तेजोऽनुसारेणाऽनुसरन्नथ पान्थवत् । दुष्टाग्रण्येव निन्येऽसौ तेन दूरतरं क्वचित् ॥५६०॥
कथञ्चिन्मिलितश्चायं यावद्धाव इव क्रुधा । पारिपन्थिकवज्जीवग्राहं गृह्णाति तं द्रुतम् ॥५६१॥
तावद्गरुडवद्वेगादुत्पपात नभस्तले । पश्यतोऽपि कुमारस्य स नरः पश्यतोहरः ॥५६२॥
कियद्दूरं कुमारेण दृष्टः स व्योमनि व्रजन् । ततः परं न दृष्टश्च नष्टस्तस्य भयादिव ॥५६३॥
विस्मयाच्चिन्तयामास कुमारोऽथ मम ध्रुवम् । कोऽप्येष वैरी विद्याभृद्देवो वा दानवोऽथवा ॥५६४॥
अस्तु वा योऽपि सोऽप्येष किं मामपकरिष्यति ? । कीररत्नं हरन् किन्तु द्विधा दस्यूयितं व्यधात् ॥५६५॥
हा विज्ञकोटीकोटीर ! कीर ! हा धीर ! वीर ! मे । दाता सूक्तिश्रुतिसुखं कस्त्वां प्रियसखं विना ? ॥५६६॥
विधुरे धीरधौरेय ! सहायस्त्वां विहाय मे । को भावीति ? क्षणं खेदं कृत्वाऽन्तर्विममर्श सः ॥५६७॥
मृषाकृतादमुष्माद्वा किं विषादविषादनात् ? । यथार्होपक्रमादेव नष्टप्राप्तिर्भवेद्यदि ॥५६८॥
उपक्रमेऽपि साफल्यमैकाग्र्येणैव नान्यथा । मन्त्रादयोऽपि नैकाग्र्यं विना सिद्ध्यन्ति कर्हिचित् ॥५६९॥
तस्मात्कीरेन्द्रमप्राप्य न निवर्त्ते कथञ्चन । इति निश्चित्य कृत्यज्ञस्तं भ्रमन्नन्वियेष सः ॥५७०॥
उच्चैरपि चरंश्चौरानुसृतां दिशमश्रमम् । क्वापि प्राप न तं व्योम्नि गतं भूमौ क्व वाप्यते ? ॥५७१॥

तथापि क्वापि तच्छुद्धिः स्यादित्याशावशात्क्वचित् । स विवेद न निर्वेदं सतां स्थितिरहो ! श्रिते ॥५७२॥
सहप्रवाससंवाससमयोचितसूक्तिजम् । स शुकार्थं तथा क्लिश्यमानः प्रार्णमशोधयत् ॥५७३॥
इत्थं तदर्थं पृथ्व्यन्तः स बंभ्रम्यह्निनान्तरे । पुरतः पुरमद्राक्षीत्पुरमैन्द्रमिवापरम् ॥५७४॥
स्वस्फटिकस्फुटस्फारप्राकारपरिवेष्टितम् । प्रतिप्रतोलिमाणिक्यप्रतीहारप्रतिष्ठितम् ॥५७५॥
मणीमयमहासौधसमूहै रोहणायितम् । सहस्त्रमुखभृद्गङ्गायितं सौधध्वजव्रजैः ॥५७६॥ त्रिभिर्विशेषकम् ॥
पुरस्य श्रीविशेषेणाक्षिप्तचित्तः स सत्तमः । भ्रमरः सौरभेणेवाम्भोजस्याभ्याशमासदत् ॥५७७॥
हरिचन्दनदारूद्यत्कपाटोल्लासिसौरभम् । विश्वश्रीणां मुखमिव विशेद्यावच्च गोपुरम् ॥५७८॥
तावद्गवोपरिष्ठात्र्या वरसारिकयैकया । प्रतीहार्येव नितमामार्यवर्यो न्यवार्यत ॥५७९॥
विस्मितेन ततस्तेन वितेने वाक्यमुच्चकैः । हेतुना केन मां भद्रे ! निवारयसि ? शारिके ! ॥५८०॥
सापि प्राह महाप्राज्ञ ! तवैव हितहेतुना । जिजीविषुर्यदि तदा मा विशैतत्पुराऽन्तरा ॥५८१॥
मा स्म मंस्था वृथैवेयं शारिका विनिवारिका । पक्षिजातौ हि वयमप्युत्तमत्वं लभामहे ॥५८२॥
वाङ्मात्रमपि जल्पन्ति विना हेतुं न चोत्तमाः । हेतुव्यक्तिं यदि पुनर्जिज्ञासुस्तर्हि तां शृणु ॥५८३॥
अस्मिन्पुरे रत्नपुरे पुरन्दर इवापरः । पराक्रमप्रभुत्वाभ्यामभूद्भूपः पुरन्दरः ॥५८४॥

कश्चित्पाटच्चरश्चैतन्नानावेषधरः पुरम् । मुमोष निःशेषमपि दुर्दैवमिव दुर्दमः ॥५८५॥
विचित्राणि स्म खात्राणि दत्ते चित्तेप्सितानि सः । आदत्ते स्वधनैः पात्राण्यमात्राणि भृतान्यपि ॥५८६॥
तलारक्षादिकैः रक्षाकैरप्युत्कटैर्भटैः । न कैश्चित्स्खलयाञ्चक्रे सरित्पूर इव द्रुमैः ॥५८७॥
दिनान्तरे नरेशस्य स्वास्थानीमधितस्थुषः । प्रणम्य सम्यग् विज्ञप्तः पौरैश्चौरैकविप्लवः ॥५८८॥
रोषारुणेक्षणेनाथ क्षोणिनाथेन तत्क्षणात् । आह्वानपूर्वमाक्षिप्त आख्यदारक्षकाग्रणीः ॥५८९॥
नास्मिन् व्याधाविवासाध्ये सिध्येत् कापि प्रतिक्रिया । मया नापि मदीयेन नेतस्तेनोचितं कुरु ॥५९०॥
वर्यस्तेजस्विनां राजा धुर्यश्चाथ यशस्विनाम् । तमस्विन्यां स्वयं चौरमन्वैषीन्नष्टचर्यया ॥५९१॥
क्वाप्यन्यदा दत्तखात्रं सलोप्त्रं तं तमश्चये । भूपो व्यभावयत्किं वा नाप्रमत्तैः प्रसाध्यते ॥५९२॥
तन्निर्णयाय तत्स्थानपरिज्ञानाय चान्वगात् । तं गुप्तवृत्तिर्नृपतिर्बकधूर्त्तस्तिमिं यथा ॥५९३॥
धूर्त्तेन तेन स्तेनेन कथञ्चित्पार्थिवोऽनुगः । जवादवागामि दैवेऽनुकूले वा न किं भवेत् ? ॥५९४॥
प्रत्युत्पन्नमतिः स्तेनपतिस्तत्क्षणतस्ततः । राज्ञः किञ्चिद्वञ्चयित्वा दृष्टिं धृष्टोऽविशन्मठम् ॥५९५॥
तस्मिंश्च नाम्ना कुमुदस्तपःकुमुदचन्द्रमाः । मठे शठेतरप्रष्ठस्तिष्ठन्नस्ति स्म तापसः ॥५९६॥
तस्मिंस्तदानीं निद्राणे मठान्तः स शठाग्रणीः । जीवोक्षतोत्रं लोप्त्रं तन्मुक्त्वागादन्यतः क्वचित् ॥५९७॥

इतस्ततस्तमन्विष्यन् पार्थिवः पारिपन्थिकम् । द्राक् प्रविष्टो मठेऽद्राक्षीत्सलोप्त्रं तत्र तापसम् ॥५९८॥
क्रुधोऽभ्यधाच्च वसुधाधिपतिः प्रति तापसम् । दाण्डाजिनिक ! रे दुष्ट ! रे रे तस्कर ! मस्करिन् ! ॥५९९॥
स्तेयं विधाय रे संप्रत्येव सुप्तस्य कैतवात् । अलीकनिद्रां दधतो दीर्घनिद्रां ददामि ते ॥६००॥
भाषितैरिति भूभर्त्तुर्वज्रपातैरिवोद्धतैः । भयोद्भ्रान्तः स संभ्रान्तः प्रबुद्धोऽप्यभ्यधान्नहि ॥६०१॥
सुभटैर्बन्धयित्वा च निष्कृपेण नृपेण सः । प्रातर्वध्यतयाऽऽदिष्टो धिगहो ! निर्विचारता ॥६०२॥
अविचार्य विना चौर्यमार्या ! मार्योऽस्मि किं ? हहा ! । तस्येत्युक्तिस्तदा सत्याऽप्यभूदधिकधिक्कृते ॥६०३॥
यदा दैवं विघटते तदा सङ्घटते तु कः ? । एकाक्येव हि चन्द्रोऽपि ग्रस्यते पश्य राहुणा ॥६०४॥
कृतान्तदुर्दान्तभटैरिव भूपभटैस्ततः । विडम्ब्य विविधं मौण्ड्यरासभारोपणादिना ॥६०५॥
प्राणितप्रतिकूलायां शूलायां सोऽध्यरोप्यत । अहो ! प्राक्कृतदुष्कर्मविपाकः कोऽपि दारुणः ॥६०६॥ युग्मम् ।
शान्तस्यापि तदा तस्य कोपः प्रादुरभूद् भृशम् । न किं तापितमत्युष्णं जलं स्यादपि शीतलम् ॥६०७॥
विपद्य सद्यः सोऽत्युग्रः समपद्यत राक्षसः । तथावस्थाविपन्नानां स्याद् गतिर्हि तथाविधा ॥६०८॥
तेन रुष्टेन दुष्टेन निकृष्टेन नृपः क्षणात् । एकोऽपि पञ्चतां निन्ये ही राभस्यकृतेः फलम् ॥६०९॥
पुरलोकोऽपि पुरतः सर्वोऽपि निरवास्यत । अविमृश्य कृते राज्ञा पीड्यन्ते हि प्रजा अपि ॥६१०॥

योऽद्याऽप्यन्तःपुरं याति तं निहन्ति स तत्क्षणात् । परं विषहते हन्त को वाऽन्तःपुरचारिणम् ॥६११॥
अनेन हेतुना वीर ! वारयामि पुरान्तरा । इव कीनाशवक्त्रान्तस्त्वां विशन्तं हितैषिणी ॥६१२॥
कुमारः शारिकामात्रवाक्चातुर्यहितोक्तिभिः । श्रुत्वेति विस्मयं भेजे तद्भयं न पुनर्मनाक् ॥६१३॥
नैव कौतुकिना भाव्यं भीरुणा नालसेन च । प्रत्युतेत्युत्कतां प्राप प्रवेष्टुं तत्पुरं तदा ॥६१४॥
रक्षःपराक्रमप्रेक्षाकौतुकादकुतोभयः । रणोर्वीमिव वीरः श्राक् स प्राविक्षत्ततः पुरम् ॥६१५॥
तत्र कुत्रापि मलयाचलवच्चान्दनोच्चयान् । स्वर्णाद्यमात्रामत्राणि भृङ्गाङ्गस्वर्द्रुवत्क्वचित् ॥६१६॥
क्वापि कर्पूरशाल्यादिसस्यराशीन् खलेष्विव । पूगाद्यगण्यपण्यानि क्वापि सार्थस्थितिष्विव ॥६१७॥
खाद्यापणगणं क्वापि सरोवत्परमोदकम् । क्वचिद् दौष्यिकहट्टौघं शशिवद् विशदांशुकम् ॥६१८॥
निधिवद् घनसाराढ्यान् क्वचित्सौरभिकाट्टकान् । हिमाद्रिवद् गान्धिकाट्टान् क्वचिच्च विविधौषधीन् ॥६१९॥
बुद्धिहट्टान् भावशून्यान् क्वाप्यभव्याङ्गिपुण्यवत् । सुवर्णैः शास्त्रवत्पूर्णान् क्वापि सौवर्णिकापणान् ॥६२०॥
क्वचनानन्तमुक्ताढ्यान् मुक्तिवन्मौक्तिकापणान् । वनवद्विद्रुमैः पूर्णान् क्वचिद्वैद्रुमिकापणान् ॥६२१॥
रत्नाद्रिवन्मणिवणिग्विपणीः सुमणीः क्वचित् । देवताधिष्ठितान् द्योवत् कुत्रचित्कुत्रकापणान् ॥६२२॥
सर्वत्रापि तु शून्यत्वं सुप्तप्रमत्तचित्तवत् । सश्रीकतां च श्रीकान्तवत्प्रोच्चैः सर्वतोमुखम् ॥६२३॥

प्रेक्षावान् प्रेक्षमाणोऽसौ सर्वरत्नमयं क्रमात् । जगाम क्ष्मापतेर्धाम विमानमिव नाकिराट् ॥६२४॥ नवभिः कुलकम् ॥

गजशाला-वाजिशाला-शस्त्रशालादिकाः क्रमात् । उल्लङ्घयंश्चन्द्रशालामलञ्चक्रे स चक्रिवत् ॥६२५॥

प्रेक्षाञ्चक्रे च तत्रैकं स शक्रशयनीयवत् । शयनीयमनणीयः कमनीयमणीमयम् ॥६२६॥

प्रीतेः शेते स्म तत्रैष निर्भीर्निर्भरनिद्रया । श्रमापनुत्त्यै स्वावास इव वासवसाहसः ॥६२७॥

क्रुद्धः प्रेक्ष्य मनुष्याङ्घ्रिप्रचारं स निशाचरः । तत्राऽथागान्महाव्याध इव पञ्चास्यपृष्ठगः ॥६२८॥

सुखसुप्तं च तं दृष्ट्वाऽध्यासीद्यद्ध्यातुमप्यलम् । नान्यस्तल्लीलयाप्येषोऽकार्षीदहह ! धृष्टता ॥६२९॥

तदेनं केन मारेण मारयामि स्ववैरिणम् । नखैरेव फलत्रोटं त्रोटयाम्यस्य किं शिरः ॥६३०॥

गदया यदि वा सद्यश्चूर्णपेषं पिनष्म्यमुम् । छिनद्मि चर्भटच्छेदं किं वा क्षुरिकया रयात् ॥६३१॥

ज्वलन्नेत्राग्निना रुद्रः स्मरदाहं दहामि वा । आकाशे कुन्दकोल्लालमुच्चैरुल्लालयामि वा ॥६३२॥

मध्येऽन्त्यसिन्धुसौधस्थमेवोत्पाट्य क्षिपामि वा । सुप्तमेव गिलाम्येनं यद्वाऽजगरलीलया ॥६३३॥

यद्वात्रागत्य सुप्तः सन् ही ! हन्येत कथं मया ? । गृहे गौरवमेवार्हमागतस्य रिपोरपि ॥६३४॥

यतः–आगतस्य निजगेहमप्यरेर्गौरवं विदधते महाधियः । मीनमात्मसदनं समेयुषे भार्गवाय गुरुरुच्चतां ददौ ॥६३५॥

तद्यावदेष जागर्त्ति तावद् भूतव्रजं निजम् । आकारयामि पश्चात्तु करिष्यामि यथोचितम् ॥६३६॥

ध्यात्वेति गत्वा भूतानां प्रभूतानां स संहतीः । समाहूय समायासीत्पत्तीनामिव पार्थिवः ॥६३७॥
उद्वाहितकनीतातमिव निश्चिन्तचेतसम् । तथैव तं च निद्राणं प्रेक्ष्याऽऽचिक्षेप राक्षसः ॥६३८॥
रे निर्मर्याद ! निर्बुद्धे ! रे रे निर्लज्ज ! निर्भय ! । निर्याहि मङ्क्षु मे हर्म्यान्नो चेद्युध्यस्व रे मया ॥६३९॥
तस्येत्युक्तेस्तथाभूतोद्भूतात् किलिकिलध्वनेः । त्यक्तनिद्रः कुमारेन्द्रस्तन्द्रालुरिदमब्रवीत् ॥६४०॥
रे राक्षसेन्द्र ! चकृषे विघ्नं वैदेशिकस्य किम् ? । निद्रालोर्मम निद्रायां बुभुक्षोरिव भोजने ॥६४१॥
धर्मनिन्दी पङ्क्तिभेदी निद्राच्छेदी निरर्थकम् । कथाभङ्गी वृथापाकी पञ्चैतेऽत्यन्तपापिनः ॥६४२॥
तन्नव्यसर्पिःसंपृक्तजलेन तल ! घट्टय । शीतलेन तलाङ्घ्री मे द्राग् निद्रैति यथा पुनः ॥६४३॥
रक्षोऽध्यासीत् किमप्यस्य चरितं जगदद्भुतम् । शक्रस्यापि हृदाकम्पि किं पुनः प्राकृतात्मनाम् ? ॥६४४॥
अहो ! स्वाङ्घ्रितलामर्शं मयाप्येषोऽभिलाषुकः । सिंहयानेन चलनमिवाहो निर्भयात्मता ॥६४५॥
अहो महासाहसिक्यमहो ! विक्रमशक्रता ! । अहो अस्य महाधार्ष्ट्यमहो निःशङ्कचित्तता ! ॥६४६॥
यद्वा किं बहुना ? विश्वविश्वोत्तमशिरोमणेः । सकृदुक्तं करोम्यस्य कृतिनोऽतिथिताभृतः ॥६४७॥
ध्यात्वेति राक्षसस्तस्य म्रक्षयामासिवान् क्षणम् । तलपादौ मृदुकरः ससर्पिःशीतलाम्भसा ॥६४८॥
नेक्ष्येत न निशम्येत न संभाव्येत यत् क्वचित् । सतां तदपि सुप्रापमहो ! सुकृतवल्गितम् ॥६४९॥

तं भृत्यमिव वीक्ष्याङ्घ्रितलामर्शिनमश्रमम् । रत्नसारः प्रीतिसारः समुत्थाय समालपत् ॥६५०॥
अविज्ञेन तवाऽवज्ञा नृमात्रेणापि यन्मया । व्यधायि यातुधानेन्द्र ! तत् क्षमस्वाऽखिलक्षम ! ॥६५१॥
भक्त्या ते तुष्टचित्तोऽहं नक्तञ्चर वरं वर । दुःसाध्यमपि साध्यं ते साधयामि ध्रुवं जवात् ॥६५२॥
विस्मितः स ततश्चित्ते चिन्तयाञ्चकृवानहो ! । विपरीतमिदं जज्ञे नरस्तुष्टः सुराय मे ॥६५३॥
इच्छेत् साधयितुं चैष मम दुःसाध्यमप्यहो ! । अहो ! निपानपानीयं कूपान्तः प्रविविक्षति ॥६५४॥
कल्पद्रुरद्य सेवाकृत्पार्श्वेऽभीप्सितमीप्सति । अर्कोऽप्यद्य प्रकाशार्थं किञ्चित्प्रार्थयिता परम् ॥६५५॥
किञ्च किन्नाम दाताऽयं नरः सुरवराय मे । किञ्च प्रार्थ्यममर्त्यस्य ममाऽऽस्ते मर्त्यसन्निधौ ॥६५६॥
तथापि किञ्चिद्याचिष्ये चिन्तयित्वेति चेतसि । उवाच वाचमित्युच्चैर्व्यक्तं नक्तञ्चराग्रणीः ॥६५७॥
यः परप्रार्थितं दत्ते त्रैलोक्येऽपि स दुर्लभः । तत्प्रार्थयितुकामोऽपि कुमार ! प्रार्थये कथम् ? ॥६५८॥
याचेऽहमिति चिन्तायां चेतःस्थाः सद्गुणाः क्षणात् । वचने तु तनुस्था अप्युद्व्रजन्ति भयादिव ॥६५९॥
द्वैधोऽपि मार्गणगणः परपीडाकरः परम् । चित्रमेकः प्रविष्टोऽन्तर्द्दष्टोऽपि च परः पुनः ॥६६०॥
लघुर्धूली तृणं तस्यास्तृणात्तूलं ततोऽनिलः । ततोऽपि याचकस्तस्मादपि याचकवञ्चकः ॥६६१॥
तदुक्तं–परपत्थणापवन्नं मा जणणि जणेसु एरिसं पुत्तं । मा उअरेवि धरिज्जसु पत्थिअभंगो कओ जेण ॥६६२॥

तदुदारजनाधार ! रत्नसारकुमार ! ते । प्रार्थये प्रार्थना व्यर्थीकुर्याश्चेन्न कथञ्चन ॥६६३॥
सोऽप्यभ्यधत्त भो ! वित्तचित्तवाग्विक्रमोद्यमैः । यद्देहजीविताद्यैश्च साध्यं साध्यं हि तन्मया ॥६६४॥
तदा जगाद क्रव्यादः सादरं हे महेभ्यभूः ! । यद्येवं तन्महाभाग ! पुरेऽस्मिन् भूपतिर्भव ॥६६५॥
सर्वाङ्गीणगुणोत्कर्षं सहर्षं तव वीक्ष्य भोः । दीयमानमिदं राज्यं प्राज्यं भुङ्क्ष्व यदृच्छया ॥६६६॥
दिव्यर्द्धिभोगसैन्याद्यमन्यद्वापि तवेप्सितम् । वशोऽवश्यं विधास्येऽहं नित्यभृत्य इवानिशम् ॥६६७॥
निःशेषितेषु विद्वेषिक्ष्माकान्तेषु मया रयात् । वर्द्धतां त्वत्प्रतापाग्निस्तत्प्रियाश्रुजलैर्नवः ॥६६८॥
मदादिसुरसाहाय्याद् भूतले सकलेऽपि ते । एकातपत्रसाम्राज्यमस्तु क्ष्माशक्र ! शक्रवत् ॥६६९॥
अत्र साम्राज्यसजुषः शक्रसख्यपुषः श्रिया । स्वर्गेऽप्यनर्गलं स्वर्गाङ्गना गायन्तु ते यशः ॥६७०॥
अथ चिन्तां स्वचित्तान्तश्चकार वसुसारसूः । अहो ! पचेलिमैः पुण्यैर्मह्यं राज्यं ददात्ययम् ॥६७१॥
मया तु प्राग् यतीन्द्राणां सन्निधौ धर्मसन्निधौ । पञ्चमाणुव्रतादाने राज्यादानं न्ययम्यत ॥६७२॥
संप्रति प्रतिपन्नं च पुरतोऽस्य स्वयं मया । यद्वक्ष्यसि करिष्ये तदित्यहो ! विषमं महत् ॥६७३॥
इतोऽवट इतो धाटी इतो व्याघ्र इतस्तटी । इतो व्याध इतः पाशो मामाप्यापतितं ह्यदः ॥६७४॥
एकतः प्रार्थनाभङ्गः परतः स्वव्रतक्षतिः । हा हा कुमारः किं कुर्यात् पतितोऽत्यन्तसङ्कटे ॥६७५॥

यद्वाऽप्यऽन्यप्रार्थनायामार्यः कुर्यात्तदेव हि । न यतः स्वव्रतभ्रंशस्तद्भ्रंशे किं नु तिष्ठति ॥६७६॥
दाक्षिण्येनापि किं तेन येन धर्मोऽपि बाध्यते । काञ्चनेनापि किं तेन येन स्यात् कर्णयोस्त्रुटिः ॥६७७॥
तावदेव हि कर्पूरं भक्षणीयं विचक्षणैः । यावता हन्त नो दन्तपतनोदन्तसंभवः ॥६७८॥
दाक्षिण्यलज्जालोभादि देहवद् बाह्यमेव हि । स्वजीवितं तु मन्तव्यं कृतिभिः स्वीकृतं व्रतम् ॥६७९॥
तुम्बे विनष्टे किमरैः ? राज्ञि नष्टे च किं भटैः ? । मूले दग्धे प्रतानैः किं ? पुण्ये क्षीणे किमौषधैः ? ॥६८०॥
शून्ये चित्ते च किं शास्त्रैः ? किमस्त्रैस्त्रुटिते करे ? । खण्डिते स्वव्रते किं वा दिव्यैश्वर्यसुखादिभिः ? ॥६८१॥
इति चिन्तितपूर्वी तं कुमारः स्फारसारगीः । जगौ सगौरवं युक्तं युक्तं नक्तञ्चर ! त्वया ॥६८२॥
परं पुराऽप्युपगुरु प्रपेदे नियमो मया । परित्याज्यस्य राज्यस्य प्राज्यपाप्ममयत्वतः ॥६८३॥
यमश्च नियमश्च द्वौ विराद्धौ तीव्रदुःखदौ । किन्त्वायुःप्रान्त एवैकः परस्त्वाजन्मतोऽनिशम् ॥६८४॥
तद्येन नैव नियमः क्वचिद् भज्येत भो ! मम । तदादिशापि दुःसाध्यं द्राक् साधो ! साधये यथा ॥६८५॥
यातुधानोऽभ्यधात् क्रोधाद् रे ! मुधाऽभिदधासि किम् ? । प्राक् प्रार्थनां व्यर्थयसेऽन्यां च कारयसे मया ॥६८६॥
रे तद्राज्यं परित्याज्यं यत्र युद्धादिपातकम् । राज्ये त्रिदशदत्ते तु पातकिन् ! पातकं कुतः ? ॥६८७॥
रे प्राज्यराज्यदानेऽपि मन्द ! मन्दायसेतमाम् । सुगन्धिघृतपानेऽपि छूछूत्कारं करोषि रे ॥६८८॥

रे मूढ ! सुप्रौढतया हर्म्ये मेऽमुद्रनिद्रया । सुखं शेषे तलाङ्घ्री च स्वावुन्म्रक्षयसे मया ॥६८९॥
मदुक्तं हितमप्येकं मुमूर्षो न चिकीर्षसि । तत्पश्य मम कोपस्य फलदस्यातुलं फलम् ॥६९०॥
इति क्रव्याद् ब्रुवन् क्रव्यमव्यग्र इव गृध्रराट् । कुमारमपहृत्य द्रागुत्पपात नभोङ्गणे ॥६९१॥
ततः क्रोधोद्धुरः कम्प्राधरः क्रव्याद्धुरन्धरः । क्षिप्रं चिक्षेप तं भीष्माम्बुधौ स्वं च भवाम्बुधौ ॥६९२॥
झटित्यपारेऽकूपारे कुमारेशस्तदा दिवः । निष्पपात सनिर्घातं मन्थाद्रिरिव जङ्गमः ॥६९३॥
कौतुकादिव पातालं गत्वा तत्कालमेव सः । जलोपरि प्रादुरभूज्जलस्य स्थितिरीदृशी ॥६९४॥
जगौ च कुग्रहागार ! निर्विचार ! कुमार रे ! । किं मुधा म्रियसे ? राज्यश्रियं संश्रयसे न किम् ? ॥६९६॥
रे निन्द्य ! निन्द्यमप्याधां त्वदुक्तं त्रिदशोऽप्यहम् । प्रशस्यमपि मत्प्रोक्तं नरोऽपि न करोषि रे ! ॥६९७॥
रे रे ! सद्यः प्रपद्यस्व नो चेदश्मशिलातले । आस्फाल्यास्फाल्य रजक इव वस्त्रं मुहुर्मुहुः ॥६९८॥
त्वां कृतान्तनिशान्तस्यातिथीकर्त्ताऽस्म्यसंशयम् । सुराणां न मृषारोषः स्याद्विशिष्य च रक्षसाम् ॥६९९॥ युग्मम् ।
इत्युदित्वा पदोर्धृत्वाऽधोमुखः क्रोधिनाऽमुना । आस्फालनायोपशिलं नीतोऽप्याह स साहसी ॥७००॥
निर्विकल्पं स्वसङ्कल्पं क्षिप्रमेव कुरुष्व भोः ! । कस्मिन्नर्थे मुहुः पृच्छा सतामेकैव गीर्यतः ॥७०१॥
ततस्तादृक्कुमारेन्द्रसत्त्वोत्कर्षप्रहर्षतः । प्रोल्लसत्पुलकाङ्कुरस्तेजःपूर इवोद्धुरः ॥७०२॥

इवेन्द्रजालिकः क्षिप्रं रूपं संहृत्य राक्षसम् । वैमानिकः सुरः सोऽभूद्दिव्याभरणभासुरः ॥७०३॥ युग्मम् ।
पुष्पवृष्टिं च कृतवानम्बुवृष्टिमिवाम्बुदः । तस्योपरिष्टाद् बन्दीव कुर्वन् जयजयारवम् ॥७०४॥
सविस्मयैकव्यापारं कुमारं व्याजहार च । सात्त्विकेषु तवैवाद्य रेखा नृष्विव चक्रिणः ॥७०५॥
त्वया पुरुषरत्नेन रत्नागर्भाऽद्य भूरभूत् । भवतैवैकवीरेण वीर ! वीरवती च सा ॥७०६॥
साधु साधु त्वया साधुसन्निधेर्धर्म आददे । काञ्चनाचलचूलेव यस्यैवं निश्चलं मनः ॥७०७॥
हरिसेनानीर्हरिणैगमेष्यनिमिषाग्रणीः । युक्तमेव तव श्लाघां कुरुते सुरसाक्षिकम् ॥७०८॥
वक्ति स्म विस्मयस्मेरः कुमारः स सुराग्रणीः । मामश्लाघ्यं श्लाघते किम् ? सोऽप्युवाच शृणु ब्रुवे ॥७०९॥
नव्योत्पन्नतयाऽन्यर्हि सौधर्मेशानशक्रयोः । विवादोऽभूद्विमानार्थं हर्म्यार्थमिव हर्म्यिणोः ॥७१०॥
विमानलक्षा द्वात्रिंशत्तथाष्टाविंशतिः क्रमात् । सन्त्येतयोस्तथाप्येतौ विवदेते स्म धिग् भवम् ॥७११॥
तयोरिवोर्वीश्वरयोर्विमानर्द्धिप्रलुब्धयोः । नियुद्धादिमहायुद्धान्यप्यभूवन्ननेकशः ॥७१२॥
निवार्यते हि कलहस्तिरश्चां तरसा नरैः । नराणां च नराधीशैर्नराधीशां सुरैः क्वचित् ॥७१३॥
सुराणां च सुराधीशैः सुराधीशां पुनः कथम् ? । केन वा स निवार्येत वज्राग्निरिव दुःशमः ॥७१४॥
माणवकाख्यस्तम्भस्थार्हद्दंष्ट्राशान्तिवारिणा । साधिव्याधिमहादोषमहावैरनिवारिणा ॥७१५॥

कियत्कालव्यतिक्रान्तौ सिक्तौ महत्तरैः सुरैः । बभूवतुः प्रशान्तौ तौ सिध्येत् किं वा न तज्जलात् ? ॥७१६॥ युगलम् ।
ततस्तयोर्मिथस्त्यक्तवैरयोः सचिवैर्द्वयोः । प्रोचे पूर्वव्यवस्थैवं सुधियां समये हि गीः ॥७१७॥
सा चैवं–दक्षिणस्यां विमाना ये सौधर्मेशस्य तेऽखिलाः । उत्तरस्यां तु ते सर्वेऽपीशानेन्द्रस्य सत्तया ॥७१८॥
पूर्वस्यामपरस्यां च वृत्ताः सर्वे विमानकाः । त्रयोदशापीन्द्रकाश्च स्युः सौधर्मसुरेशितुः ॥७१९॥
पूर्वापरदिशोस्त्र्यस्त्र्याश्चतुरस्राश्च ते पुनः । सौधर्माधिपतेरर्द्धा अर्द्धा ईशानचक्रिणः ॥७२०॥
सनत्कुमारे माहेन्द्रेऽप्येष एव भवेत् क्रमः । वृत्ता एव हि सर्वत्र स्युर्विमानेन्द्रकाः पुनः ॥७२१॥
इत्थं व्यवस्थया चेतःसौस्थ्यमास्थाय सुस्थिरौ । विमत्सरौ प्रीतिपरौ जज्ञाते तौ सुरेश्वरौ ॥७२२॥
तस्मिन्नवसरे चन्द्रशेखरेण सुरेण सः । हरिणैगमेषी स्वर्गिप्रष्ठः पृष्टः सकौतुकम् ॥७२३॥
विश्वविश्वेऽपि किं क्वापि कोऽप्यास्ते यो न लुब्धधीः । लुभ्यन्ति वा यदीन्द्राद्या वार्त्ताऽप्यन्यस्य तर्हि का ? ॥७२४॥
अहो ! लोभस्य साम्राज्यमेकच्छन्नं जगत्त्रये । गृहदासीकृता येन देवेन्द्रा अपि हेलया ॥७२५॥
नैगमेषी बभाषेऽथ सत्यं भो ! भाषसे सखे ! । वसुन्धरायां नवरं नैवास्ते काऽप्यनस्तिता ॥७२६॥
संप्रत्यस्ति श्रेष्ठिसारवसुसारसुतः क्षितौ । अक्षोभ्यः खलु लोभेन रत्नसारकुमारराट् ॥७२७॥
अङ्गीकृतपरिग्रहपरिमाणव्रतः स हि । अकम्प्यस्त्रिदशैः सेन्द्रैरप्यात्मनियमस्थितेः ॥७२८॥

महालोभमहावारिपूरे दूरे प्रसृत्वरे । तृण्यन्ति सर्वेऽप्यपरे स पुनः कृष्णचित्रकः ॥७२९॥
परहक्कां केसरीव तस्य वाक्यमसासहिः । शशाङ्कशेखरसुरस्त्वत्परीक्षार्थमाययौ ॥७३०॥
कीरं सपञ्जरं जह्रे चक्रे नव्यां स सारिकाम् । विचक्रे नगरं शून्यं रक्षोरूपं च भीषणम् ॥७३१॥
तेनैवाब्धौ चिक्षिपिषे शेषापि च बिभीषिका । व्यधायि वसुधारत्न ! स चाहं चन्द्रशेखरः ॥७३२॥
तदुत्तम ! क्षमस्वैतदखिलं खलचेष्टितम् । किञ्चिच्चादिश मे यस्मादमोघं देवदर्शनम् ॥७३३॥
उज्जगार कुमारस्तं नास्ति किञ्चित्प्रयोजनम् । मम सर्वार्थसिद्धस्य सम्यक्श्रीधर्मयोगतः ॥७३४॥
किन्तु त्वया द्युसद्वर्य ! कार्या नन्दीश्वरादिषु । तीर्थेषु यात्राः सफली स्यात्तवापि जनुर्यथा ॥७३५॥
आमेत्युक्त्वा कुमाराय दत्त्वा कीरं सपञ्जरम् । झटित्युत्पाट्य कनकपुर्यां तं मुमुचे सुरः ॥७३६॥
तत्र धात्रीश्वरादीनां पुरः सुरवरः परम् । तस्य प्रकाश्य माहात्म्यं सद्यः स्वं पदमासदत् ॥७३७॥
अथो कथञ्चिदापृच्छ्य पृथिवीशं कुमारराट् । द्वाभ्यां प्रियाभ्यां सहितः प्रतस्थे स्वपुरं प्रति ॥७३८॥
सैष संप्रेषणायातसामन्तसचिवैर्वृतः । बुबुधेऽपि बुधैर्मार्गे भूपभूरिभ्यभूरपि ॥७३९॥
स्थाने स्थाने मार्गभूपैः स कृती कृतसत्कृतिः । क्रमात् कियद्दिनै रत्नविशालां प्राप्तवान् पुरीम् ॥७४०॥
तां च दृष्ट्वा कुमारस्य ऋद्धिविस्तारसारताम् । समरसिंहोऽपि भूपोऽभ्यागाद्भूरिमहेभ्ययुक् ॥७४१॥

वसुसारादिमहेभ्ययुक् परर्द्ध्या पुरीं ततः । प्राविविशत्तमुर्वीशः कटरे पुण्यपाटवम् ? ॥७४२॥
कृतेष्वथौचित्यकृत्येष्वौचितीचतुरः शुकः । कुमारस्याऽखिलं वृत्तं नृपादीनां पुरोऽभ्यधात् ॥७४३॥
श्रुत्वा सत्त्वाद्भुतं तच्च ते चमच्चक्रिरेतराम् । तत्प्रशंसैकमुखराः सर्वेऽप्युर्वीश्वरादयः ॥७४४॥
प्राप्तमन्येद्युरुद्यानं विद्यानन्दगुरूत्तमम् । वन्दितुं रत्नसाराद्या नृपाद्याश्च मुदा ययुः ॥७४५॥
यथार्हदेशनाप्रान्ते क्ष्माकान्तेन सविस्मयम् । रत्नसारकुमारस्य पप्रच्छे प्राग्भवं गुरुः ॥७४६॥
सोऽप्युवाच चतुर्ज्ञानी राजन् ! राजपुत्र पुरे । धात्रीशपुत्रः श्रीसारः श्रीसारः सर्वथाऽभवत् ॥७४७॥
श्रेष्ठिमन्त्रिक्षत्रियाणां पुत्रा मित्राणि तस्य च । तैः पुमर्थैस्त्रिभिः सोऽभादुत्साह इव जङ्गमः ॥७४८॥
कलासु कौशलं मित्रत्रयस्य क्षत्रियात्मजः । दृष्ट्वा स्वं तज्जडं निन्दन्नुच्चैर्ज्ञानममानयत् ॥७४९॥
राज्ञीगृहेऽन्यदा दत्तखात्रः कश्चित्सलोप्त्रकः । बद्धश्चौरो भटैर्वध्यश्चादिष्टः क्रुद्धभूभुजा ॥७५०॥
वधार्थं वधकैर्नीयमानश्च स कुरङ्गवत् । त्रस्तदृग् ददृशे दैवात् श्रीसारेण कृपालुना ॥७५१॥
मन्मातुर्द्रव्यहर्त्ताऽयमिति हन्ताऽस्म्यमुं स्वयम् । इत्युक्त्वा घातकेभ्यस्तं लात्वा सोऽगाद् बहिः पुरात् ॥७५२॥
हृदयालुर्दयालुस्तं स्तेनं स्तैन्यान्निवार्य सः । मुमोच गुप्तवृत्त्याऽऽशु सापराधेऽप्यहो ! कृपा ॥७५३॥
सर्वेषां पञ्च सर्वत्र स्युर्मित्राणि च शत्रवः । इति कश्चित् क्षितीशस्य प्रोचे तच्चौरमोचनम् ॥७५४॥

वधः शस्त्रं विना राज्ञामाज्ञाभङ्ग इति क्रुधा । ततः क्षितीशः श्रीसारं नितरां निरभर्त्सयत् ॥७५५॥
ततोऽतिदूनः सोऽन्यूनमन्युर्द्राग् निर्ययौ पुरात् । मानिनां मानहानिर्हि प्राणहानेर्विशिष्यते ॥७५६॥
ज्ञानदर्शनचारित्रैरिवात्मा स कुमारराट् । अनुजग्मे त्रिभिर्मित्रैर्मित्रत्वाव्यभिचारिभिः ॥७५७॥
यतः—जानीयात्प्रेषणे भृत्यान् बान्धवान् व्यसनागमे । मित्रमापदि काले च भार्यां च विभवक्षये ॥७५८॥
सार्थेन यान्तस्तेऽरण्ये सार्थभ्रष्टाः क्षुधार्दिताः । त्र्यहं भ्रान्त्वा क्वचिद् ग्रामे प्राप्ता भोज्यान्यसज्जयन् ॥७५९॥
तेभ्यो भिक्षामथादातुं दातुं चाभ्युदयं परम् । जिनकल्पी मुनिस्तत्राययौ स्वल्पीभवद्भवः ॥७६०॥
भद्रकप्रकृतित्वेनोल्लसद्भावोऽवनीशसूः । तस्मै दानं ददे प्रत्याददे भोगफलं किल ॥७६१॥
द्वाभ्यां सुहृद्भ्यां प्रामोदि तत् त्रिधाऽप्यन्वमोदि च । यद्वा युक्तं सवयसां समानसुकृतार्जनम् ॥७६२॥
दीयतां दीयतां सर्वमीदृग् योगः पुनः क्व नः । तावित्युक्त्याऽधिकश्रद्धाज्ञप्त्यै मायां च चक्रतुः ॥७६३॥
क्षत्रपुत्रस्तु तुच्छात्मा तद्दानावसरेऽवदत् । स्थाप्यमस्मत्कृते किञ्चित् क्षुधार्त्ताः स्मः प्रभो ! भृशम् ॥७६४॥
दानविघ्नाद् भोगविघ्नं सेत्यबध्नान्मुधा कुधीः । राज्ञाहूताः पुनः प्रापुः स्वपदं च मुदं च ते ॥७६५॥
राज्यं श्रेष्ठिपदं मन्त्रिपदं वीराग्र्यतां क्रमात् । ते मध्यमगुणा भुक्त्वा चत्वारोऽपि विपेदिरे ॥७६६॥
श्रीसारस्तेष्वभूद्रत्नसारः सत्पात्रदानतः । श्रेष्ठ्यमात्यसुतौ चास्य पत्न्यौ स्त्रीत्वं हि मायया ॥७६७॥

क्षत्रपुत्रश्च कीरोऽभूत्तिर्यक्त्वं दानविघ्नजम् । तस्य तादृक्षवैदग्ध्यं प्राग्ज्ञानबहुमानजम् ॥७६८॥
श्रीसारमुक्तचौरश्च तापसव्रततोऽभवत् । चन्द्रचूडसुरो रत्नसारसाहाय्यकारकः ॥७६९॥
श्रुत्वेति क्षितिपालाद्याः पात्रदानेऽतिसादरा । अर्हद्धर्मं व्यधुः सम्यग् बुद्धे तत्त्वे हि कोऽलसः ? ॥७७०॥
अहो ! महीयसां धर्मः सहस्रांशुरिवोल्लसन् । तमः प्रमथ्य सन्मार्गे समग्रान् यः प्रवर्त्तयेत् ॥७७१॥
पुण्यप्राग्भारसारश्च रत्नसारकुमारराट् । सह प्रियाभ्यां बुभुजे भोगांश्चिरमनुत्तरान् ॥७७२॥
स्वभाग्यैरेव सिद्धार्थः पुमर्थद्वयमेव सः । अन्योऽन्याबाधया साधु साधयामास शुद्धधीः ॥७७३॥
रथयात्रास्तीर्थयात्रा रूप्यस्वर्णमणीमयीः । प्रतिमास्तत्प्रतिष्ठाश्च प्रासादांश्च मुदाऽर्हताम् ॥७७४॥
चतुर्द्धा सङ्घसत्कारानुपकारान्परेष्वपि । स चिरं रचयामास श्रियः फलमिदं खलु ॥७७५॥ युग्मम् ।
संसर्गात्तस्य कान्ते ते उभे अपि बभूवतुः । तद्वत्सम्यग् धर्मनिष्ठे सुसंसर्गान्न किं भवेत् ? ॥७७६॥
सप्रियाद्वितयः स्वायुःक्षये पण्डितमृत्युना । स प्रापदच्युतं कल्पं श्राद्धस्यैषा गतिः परा ॥७७७॥
ततश्च्युतो विदेहेषु सम्यक्श्रीधर्ममार्हतम् । स समाराध्य लब्धा च मङ्क्षु मोक्षसुखश्रियम् ॥७७८॥
रत्नसारचरितादुदीरितादित्थमद्भुततयाऽवधारितात् । पात्रदानविषये परिग्रहस्वेष्टमानविषये च यत्यताम् ॥७७९॥

**इति पात्रदाने परिग्रहपरिमाणे च रत्नसारकथा ।**

एवं साध्वादिसंयोगेऽवश्यं सुपात्रदानं प्रतिदिनं विवेकी विधिना विधत्ते । तथा यथाशक्ति तदवसराद्यायातसाधर्मिकान् सह भोजयति । तेषामपि पात्रत्वात्, तद्वात्सल्यविध्याद्यग्रे वक्ष्यते । तथा ददात्यौचित्येनाऽन्येभ्योऽपि द्रमकादिभ्यः । न प्रत्यावर्त्तयति तान्निराशान् । न कारयति कर्मबन्धनम् । न गर्हयति धर्मम् । न भवति निष्ठुरहृदयः । भोजनावसरे द्वारपिधानादि न हि महतां दयावतां वा लक्षणम् । श्रूयतेऽपि चित्रकूटे चित्राङ्गदनृपः, शत्रुसैन्यैर्दुर्गे वेष्टितेऽपि तत्प्रवेशभयोद्रेकेऽपि भोजनकाले प्रतोलीं प्रत्यहमुद्घाटयामास । तन्मर्मणा तु गणिकोक्तेन शत्रुभिर्दुर्गग्रहादि कृतम् । ततः श्राद्धेन भोजनसमये द्वारं न पिधातव्यं, विशिष्य च समृद्धेन । यतः–

**कुक्षिंभरिर्न कस्कोऽत्र बह्वाधारः पुमान् पुमान् । ततस्तत्कालमायातान् भोजयेद् बान्धवादिकान् ॥**

**अतिथीनर्थिनो दुःस्थान् भक्तिशक्त्यनुकम्पनैः । कृत्वा कृतार्थानौचित्याद् भोक्तुं युक्तं महात्मनाम् ॥**

आगमेऽप्युक्तं–

**नेव दारं पिहावेइ, भुंजमाणो सुसावओ । अणुकंपा जिणिंदेहिं, सड्ढाणं न निवारिआ ॥**

**दट्ठूण पाणिनिवहं, भीमे भवसायरम्मि दुक्खत्तं । अविसेसओणुकंपं, दुहावि सामत्थओ कुणइ ॥**

दुहावि त्ति—द्विधा द्रव्यभावाभ्याम् । द्रव्यतो यथार्हमन्नादिदानेन, भावतस्तु धर्ममार्गप्रवर्त्तनेन । श्रीपञ्चमाङ्गादौ तु श्राद्धवर्णके '**अवंगुअदुवारा**' इति विशेषणेन भिक्षुकादिप्रवेशार्थं सर्वदाप्यपावृतद्वारा इत्युक्तम् । दीनोद्धारश्च सांवत्सरिकदानेन जिनैरप्याचीर्णो, विक्रमादित्यनृपेणापि भुवोऽनृणीकारिणा, ततस्तत्संवत्सरः प्रववृते । दुर्भिक्षादौ तु दीनोद्धारो विशेषफलः । यतः—

**विणए सिस्सपरिक्खा, सुहडपरिक्खा य होइ संगामे । वसणे मित्तपरिक्खा, दाणपरिक्खा य दुब्भिक्खे ॥**

विक्रमात् त्रयोदशशतेभ्योऽनु पञ्चदशेऽब्दे महादुर्भिक्षे भद्रेश्वरपुरवासिश्रीमालसाधुजगडूर्द्वादशोत्तरशतसत्रागारैर्दानं ददौ तथा—

**हम्मीरस्य द्वादश, वीसलदेवस्य चाष्ट दुर्भिक्षे । त्रिःसप्त सुरत्राणे, मुडसहस्त्रानदाज्जगडूः ॥**

तथा अणहिल्लपत्तने सौवर्णिकसिङ्घाकः सौधे गजेन्द्रमहर्धिविक्रमाच्चतुर्दशशतेभ्योऽन्वेकोनत्रिंशेऽब्देऽष्टभिर्देवालयैर्महायात्राकृल्लग्नविज्ञो ज्ञाताऽऽगामिदुर्भिक्षो लक्षद्वयान्नमणसङ्ग्रहादर्जितश्रीर्धान्यमणचतुर्विंशतिसहस्रीं प्रादत्त । बन्दीसहस्रमोचनषट्पञ्चाशन्नृपमोचनचैत्योद्घाटनपूज्यश्रीजयानन्दसूरिश्रीदेवसुन्दरसूरिपदद्वयस्थापनादीनि तस्य धर्मकृत्यानि । ततो दयादानं भोजनसमये विशिष्य कार्यम् । गृहिणा हि निःस्वेनापि तथौचित्येनान्नपानादि कार्यं, यथार्थिदीनादिसत्यापनमपि कियत् स्यात् । न चैवं तस्य कोऽप्यधिकव्ययः ते च स्तोकेनापि तुष्यन्ति । तदाह—

**ग्रासाद् गलितसिक्थेन किं न्यूनं करिणो भवेत् ? । जीवत्येव पुनस्तेन कीटिकानां कुटुम्बकम् ॥**

एवं निष्पन्ननिरवद्याहारे सुपात्रदानमपि शुद्धं । तथा मातृपितृभ्रातृभगिन्यादीनामपत्यस्नुषाभृत्यादीनां ग्लानवृद्धगवादीनां च भोजनाद्युचितचिन्तां कृत्वा पञ्चपरमेष्ठिप्रत्याख्याननियमस्मरणपूर्वं सात्म्याविरोधेन भुञ्जीत । यतः—

**पितुर्मातुः शिशूनां च गर्भिणीवृद्धरोगिणाम् । प्रथमं भोजनं दत्त्वा स्वयं भोक्तव्यमुत्तमैः ॥**

**चतुष्पदानां सर्वेषां धृतानां च तथा नृणाम् । चिन्तां विधाय धर्मज्ञः स्वयं भुञ्जीत नान्यथा ॥**

सात्म्यं चैवं लक्षयन्ति—

**पानाहारादयो यस्माद्विरुद्धाः प्रकृतेरपि । सुखित्वायाऽवकल्पन्ते तत्सात्म्यमिति गीयते ॥**

आजन्म सात्म्येन च भुक्तं विषमप्यमृतं स्याद्, असात्म्येन त्वमृतमपि विषम् । परमसात्म्यमपि पथ्यं सेवेत, न पुनः सात्म्यप्राप्तमप्यपथ्यम् । न हि सर्वं बलवतः पथ्यमिति मन्वानः कालकूटं खादेत् । सुशिक्षितोऽपि विषतन्त्रज्ञो म्रियत एव कदाचिद्विषास्वादात् । तथा—

**कण्ठनाडीमतिक्रान्तं सर्वं तदशनं समम् । क्षणमात्रसुखस्यार्थे लौल्यं कुर्वन्ति नो बुधाः ॥**

इत्युक्तेर्लौल्यपरिहारेणाऽभक्ष्यानन्तकायादिबहुसावद्यं [१]वस्तु वर्ज्यम् । यथाऽग्निबलं मात्रया मितं च भुञ्जीत । यो हि मितं

१. वस्तुवर्जम् इति को० ह० प्र० पाठः ।

भुङ्क्ते। स बहु भुङ्क्ते अतिरिक्तभोजने त्वजीर्णवमनविरेचनमरणाद्यपि न दुर्लभम् । भणितमपि—

**जिहे जाण पमाणं, जिमिअव्वे तह य जंपिअव्वे अ । अइजिमिअजंपिआणं, परिणामो दारुणो होइ ॥**

**अन्नान्यदोषाणि मितानि भुक्त्वा वचांसि चेत्त्वं वदसीत्थमेव । जन्तोर्युयुत्सोः सह कर्मवीरैस्तत्पट्टबन्धो रसने ! तवैव ॥**

**हितमितविपक्वभोजी वामशयी नित्यचङ्क्रमणशीलः । उज्झितमूत्रपुरीषः स्त्रीषु जितात्मा जयति रोगान् ॥**

भोजनविधिश्च व्यवहारशास्त्राद्यनुसारेणायम्—

**अतिप्रातश्च सन्ध्यायां रात्रौ कुत्सन्नथ व्रजन् । सव्याङ्घ्रौ दत्तपाणिश्च नाद्यात्पाणिस्थितं तथा ॥**

**साकाशे सातवे सान्धकारे द्रुमतलेऽपि च । कदाचिदपि नाश्नीयादूर्ध्वीकृत्य च तर्जनीम् ॥**

**अधौतमुखवस्त्राङ्घ्रिर्नग्नश्च मलिनांशुकः । सव्येन हस्तेनाऽनात्तस्थालो भुञ्जीत न क्वचित् ॥**

**एकवस्त्रान्वितश्चार्द्रवासा वेष्टितमस्तकः । अपवित्रोऽतिगार्द्ध्यश्च न भुञ्जीत विचक्षणः ॥**

**उपानत्सहितो व्यग्रचित्तः केवलभूस्थितः । पर्यङ्कस्थो विदिग्याम्याननो नाद्यात् कृशासनः ॥**

**आसनस्थपदो नाऽद्यात् श्वचण्डालैर्निरीक्षितः । पतितैश्च तथा भिन्ने भाजने मलिनेऽपि च ॥**

अमेध्यसंभवं नाद्याद् दृष्टं भ्रूणादिघातकैः । रजस्वलापरिस्पृष्टमाघ्रातं गोश्वपक्षिभिः ॥

अज्ञातागममज्ञातं पुनरुष्णीकृतं तथा । युक्तं चवचवाशब्दैर्नाद्याद्वक्त्रविकारवान् ॥

आह्वानोत्पादितप्रीतिः कृतदेवाभिधास्मृतिः । समे पथावनत्युच्चे निविष्टो विष्ठरे स्थिरे ॥

मातृष्वस्त्रम्बिकाजामिभार्याद्यैः पक्वमादरात् । शुचिभिर्मुक्तवद्भिश्च दत्तं चाद्याज्जनेऽसति ॥

कृतमौनमवक्राङ्गं वहद्दक्षिणनासिकम् । प्रतिभक्ष्यसमाघ्राणहतदृग्दोषविक्रियम् ॥

नातिक्षारं न चात्यम्लं नात्युष्णं नातिशीतलम् । नातिशाकं नातिगौल्यं मुखरोचकमुच्चकैः ॥ कलापकम् ॥

अच्चुण्हं हणइ रसं अइअंबं इंदियाइं उवहणइ । अइलोणिअं च चक्खुं, अइणिद्धं भंजए गहणिं ॥

तित्तकडुएहिं सिंभं जिणाहि पित्तं कसायमहुरेहिं । निद्धुण्हेहिं अ वायं, सेसावाही अणसणाए ॥

अशाकभोजी घृतमत्ति योऽन्धसा, पयोरसान् सेवति नातिपोऽम्भसाम् ।
अभुग् विमुङ्मूत्रकृतां विदाहिनां, चलत्प्रमुग् जीर्णभुगल्पदेहरुग् ॥

आदौ तावन्मधुरं मध्ये तीक्ष्णं ततस्ततः कटुकम् । दुर्जनमैत्रीसदृशं भोजनमिच्छन्ति नीतिज्ञाः ॥

सुस्निग्धमधुरैः पूर्वमश्नीयादन्वितं रसैः । द्रवाम्ललवणैर्मध्ये पर्यन्ते कटुतिक्तकैः ॥

प्राग् द्रवं पुरुषोऽश्नाति मध्ये च कटुकं रसम् । अन्ते पुनर्द्रवाशी च बलारोग्यं न मुञ्चति ॥
आदौ मन्दाग्निजननं मध्ये पीतं रसायनम् । भोजनान्ते जलं पीतं तज्जलं विषसन्निभम् ॥
भोजनानन्तरं सर्वरसलिप्तेन पाणिना । एकः प्रतिदिनं पेयो जलस्य चुलुकोऽङ्गिना ॥
न पिबेत्पशुवत्तोयं पीतशेषं च वर्जयेत् । तथा नाञ्जलिना पेयं पयः पथ्यं मितं यतः ॥
करेण सलिलार्द्रेण न गण्डौ नापरं करम् । नेक्षणे च स्पृशेत् किन्तु स्प्रष्टव्ये जानुनी श्रिये ॥
अङ्गमर्दननीहारभारोत्क्षेपोपवेशनम् । स्नानाद्यं च कियत्कालं भुक्त्वा कुर्यान्न बुद्धिमान् ॥
भुक्त्वोपविशतस्तुन्दं बलमुत्तानशायिनः । आयुर्वामकटीस्थस्य मृत्युर्धावति धावतः ॥
भोजनानन्तरं वामकटिस्थो घटिकाद्वयम् । शयीत निद्रया हीनं यद्वा पदशतं व्रजेत् ॥

आगमोक्तविधिस्त्वेवम्—

निरवज्जाहारेणं, निज्जीवेणं परित्तमीसेणं । अत्ताणुसंधणपरा, सुसावगा एरिसा हुंति ॥
असरसरं अचवचवं, अदुअमलिलंबिअं अपरिसाडिं । मणवयणकायगुत्तो, भुंजइ साहुव्व उवउत्तो ॥
कउपयरच्छेएणं, भुत्तव्वं अहव सीहखइएणं । एगेण अणेगेहि च, वज्जित्ता धूमइंगालं ॥

**जह अब्भंगणलेवा सगडक्खवणाण जुत्तिओ हुंति । इअ संजमभरवहणट्ठयाइ साहूण आहारो ॥**

**तित्तगं व कडुअं व कसायं, अंबिलं च महुरं लवणं वा । एअलद्धमन्नट्ठपउत्तं, महुघयं व भुंजिज्ज संजए ॥**

**अहव न जिमिज्ज रोगे, मोहुदए सयणमाइउवसग्गे । पाणिदयातवहेउं, अंते तणुमोअणत्थं च ॥**

इदं साधुमाश्रित्योक्तं श्राद्धमाश्रित्याऽपि यथार्हं ज्ञेयम् । अन्यत्राप्युक्तम्–

**देवसाधुपुरस्वामिस्वजनव्यसने सति । ग्रहणे च न भोक्तव्यं शक्तौ सत्यां विवेकिना ॥**

एवम् '**अजीर्णप्रभवा रोगाः**' इत्यजीर्णे । तथा–

**बलावरोधि निर्दिष्टं ज्वरादौ लङ्घनं हितम् । ऋतेऽनिलश्रमक्रोधशोककामक्षतज्वरान् ॥**

इत्याद्युक्तेः ज्वराक्षिरोगादौ । तथा देवगुरुवन्दनाद्ययोगे, तथा तीर्थगुरुनमस्करणविशेषधर्माङ्गीकरणप्रौढपुण्यकार्य-प्रारम्भादिदिनेष्वष्टमीचतुर्दश्यादिविशेषपर्वसु च भोजनं त्याज्यम् । क्षपणादितपसोऽत्र परत्रापि बहुगुणत्वात् । यतः–

**अथिरं पि थिरं वंकं पि उज्जुअं दुल्लहं पि तह सुलहं । दुस्सज्जंपि सुसज्जं, तवेण संपज्जए कज्जं ॥**

वासुदेवचक्रवर्त्यादीनां तत्तद्देवसेवकीकरणाद्यैहिककार्याण्यप्यष्टमादितपसा सिध्यन्ति न त्वन्यथा । इति भोजनविधिः ।

नमस्कारस्मरणेनोत्थितश्चैत्यवन्दनया देवान् गुरूंश्च यथायोगं वन्दते । सर्वं चेदं **सुपत्तदाणाइजुत्ति** इत्यत्रोक्तादिशब्देन सूचितं

मन्तव्यम् ।

अथोत्तरार्द्धव्याख्या । भोजनानन्तरं **प्रत्याख्याय** दिवसचरिमं ग्रन्थिसहितादि वा प्रत्याख्यानं गुर्वादेर्वन्दनद्वयप्रदानपूर्वमन्यथा वा कृत्वा, **गीतार्थानां** यतीनां गीतार्थश्राद्धपुत्रादीनां वा **अन्तिके** समीपे **कुर्यात् स्वाध्यायं** वाचन-पृच्छना-परावर्त्तना-धर्मकथानुप्रेक्षालक्षणं यथायोगम् । तत्र निर्जरार्थं यथायोगं सूत्रादेर्दानं ग्रहणं च वाचना १। तस्मिंश्च शङ्किते गुरोः पृच्छनं पृच्छना २। पूर्वाधीतस्य सूत्रादेरविस्मृत्याद्यर्थमभ्यासः परावर्त्तना ३। जम्बूस्वाम्यादिस्थविरचरितस्याकर्णनं कथनं वा धर्मकथा ४। मनसैव सूत्रादेरनुस्मरणमनुप्रेक्षा ५। अत्र च तद्विद्भिः सह शास्त्रार्थरहस्यानि विचारयेदिति श्रीयोगशास्त्रोक्तेः । श्रीगुरुमुखश्रुत-शास्त्रार्थरहस्यपरिशीलनारूपः स्वाध्यायो विशेषकृत्यतया ज्ञेयः । स चात्यन्तगुणहेतुः । यतः—

**सज्झाएण पसत्थं, झाणं जाणइ अ सव्वपरमत्थं । सज्झाए वहंतो, खणे खणे जाइ वेरग्गं ॥**

पञ्चविधस्वाध्यायदृष्टान्तादि आचारप्रदीपग्रन्थे व्यवृण्महीत्यत्र नोक्तमित्यष्टमगाथार्थः ॥८॥

**संझाइ जिणं पुणरवि पूयइ पडिक्कमइ कुणइ तह विहिणा ।**
**विस्समणं सज्झायं, गिहं गओ तो कहइ धम्मं ॥९॥**

उत्सर्गतः श्रावकेणैकवारभोजिनैव भाव्यम् । यदभाणि—

**उस्सग्गेण तु सड्ढो अ, सच्चित्ताहारवज्जओ । इक्कासणगभोई अ, बंभयारी तहेव य ॥**

यश्चैकभक्तं कर्त्तुं न शक्नोति स दिवसस्याष्टमे भागेऽन्तर्मुहूर्त्तद्वयलक्षणे । यामिनीमुखादौ तु रजनीभोजनमहादोषप्रसङ्गादन्त्य-मुहूर्त्तादर्वागेव वैकालिकं करोति । उत्सूरे रात्रौ च भोजनेऽनेके दोषाः, तत्स्वरूपं सदृष्टान्तं मत्कृतार्थदीपिकातोऽवधार्यम् । वैकालिकानन्तरं च यथाशक्ति चतुर्विधाहारं त्रिविधाहारं द्विधाहारं वा दिवसचरमं सूर्योद्गमान्तं प्रत्याख्याति । मुख्यवृत्त्या दिवसे सति द्वितीयभङ्गे रात्रावपि ।

ननु दिवसचरमं निष्फलमेकाशनादिकेनैव गतार्थत्वात् ? नैवं, एकासनादिकं ह्यष्टाद्याकारम्, एतच्चतुराकारम् । अत आकाराणां सङ्क्षेपकरणात् सफलमेवेदम् । निषिद्धरात्रिभोजनानामपि दिवसशेषे क्रियमाणत्वात्स्मारकत्वाच्च फलवदेवैत्या-वश्यकलघुवृत्तौ । इदं च सुकरं बहुफलं च । दशार्णपुरे श्राविका वैकालिकं कृत्वा दिवसचरमं प्रत्यहं प्रत्याख्याति । तत्पतिश्च मिथ्यादृक् सायंकृतवैकालिको न हि कश्चिद्रात्रौ भुङ्क्ते इति महत्प्रत्याख्यानमिदमित्याद्युपहसति । अन्यदा तेनापि दिवसचरिमं प्रत्याख्यातं भंक्ष्यसीति पत्न्या निवारणेऽपि, रात्रौ सम्यग्दृष्टिसुरी परीक्षाशिक्षार्थं स्वसृरूपेण घृतपूरादिलम्भममानिन्ये । पत्न्या स निषिद्धोऽपि लौल्यात्तत्खादन् देवेन तथा शीर्षे प्रहतो यथा दृग्गोलौ भुवि पेततुः । ममापयशो भावीति कायोत्सर्गे श्राद्धी तस्थौ ।

ततस्तद्गिरा सुरी मार्यमाणैडकस्य चक्षुषी आनीय सन्दधौ । स एडकाक्ष इति ख्यातः । प्रत्ययदर्शनात् श्राद्धोऽजनि । कौतुकात्तं द्रष्टुं लोके समागच्छति तन्नाम्नां पुरमप्येडकाक्षं जज्ञे । तद्दर्शनाद् बहवः श्राद्धा जज्ञिरे । इति दिवसचरमे एडकाक्षज्ञातम् । ततः **सन्ध्याया**मन्त्यमुहूर्त्तरूपायामस्तमयति सूर्येऽर्द्धे बिम्बादर्वाक् **पुनरपि** तृतीयवारं यथाविधि **जिनं पूजयति ।**

**॥ इति श्रीतपागच्छाधिपश्रीसोमसुन्दरसूरि-श्रीमुनिसुन्दरसूरि-श्रीजयचन्द्रसूरि-**
**श्रीभुवनसुन्दरसूरिशिष्य-श्रीरत्नशेखरसूरिविरचितायां श्रीविधिकौमुदीनाम्न्यां**
**श्राद्धविधिप्रकरणवृत्तौ दिनकृत्यप्रकाशकः प्रथमः प्रकाशः ॥**

## द्वितीयः प्रकाशः

उक्तं दिनकृत्यं साम्प्रतं रात्रिकृत्यमाह–'**पडिक्कमइ त्ति**'। ततः श्राद्धः साधुपार्श्वे पौषधशालादौ वा यतनया प्रमार्जनापूर्वं सामायिककरणादिविधिना प्रतिक्रामति, षड्विधावश्यकलक्षणं प्रतिक्रमणं करोति । तत्र स्थापनाचार्यस्थापनामुखवस्त्रिका-रजोहरणादिधर्मोपकरणग्रहणसामायिककरणादिविधिः श्राद्धप्रतिक्रमणसूत्रवृत्तौ [१]कश्चिदुक्त इत्यत्र नोच्यते । प्रतिक्रमणं च सम्यक्त्वादिसर्वातिचारविशुद्ध्यर्थं प्रतिदिवसमुभयसन्ध्यमपि विधेयं श्राद्धेनाऽभ्यासाद्यर्थं च । यथाभद्रकेणापि जातु निरति-चारत्वेऽपि तृतीयवैद्यौषधकल्पमवश्यं कर्त्तव्यमिदम् । यदार्षम्–

**सपडिक्कमणो धम्मो, पुरिमस्स य पच्छिमस्स य जिणस्स । मज्झिमगाण जिणाणं, कारणजाए पडिक्कमणं ॥**

**कारणजाएत्ति** अतिचाराभावे पूर्वकोट्यामपि न प्रतिक्रामन्ति, अतिचारे मध्याह्नेऽपि कुर्युरित्यर्थः ।

**वाहिमवणेइ भावे, कुणइ अभावे तयं तु पढमंति । बिइअमवणेइ न कुणइ, तइअं तु रसायणं होइ ॥**

---

१. किञ्चिदिति को० ह० प्र० पाठः ।

**रसायणंति** रसायनं सद्भावे व्याधिं हरति । तदभावेऽपि सर्वाङ्गीणपुष्टिसुखबलवृद्धिहेतुरनागतव्याधिप्रतिबन्धकं च । एवं प्रतिक्रमणमपि सद्भावेऽतिचारान् विशोधयति । तदभावे चारित्रधर्मपुष्टिं करोति । अत्र कश्चिदाह-श्रावकस्याऽऽवश्यकचूर्ण्युक्त-सामायिकविधिरेव प्रतिक्रमणम् । षड्विधत्वस्योभयसन्ध्यमवश्यकरणीयत्वस्य चात्रैव घटमानत्वात् । तथाहि–

सामायिकं कृत्वा ईर्यां प्रतिक्रम्य कायोत्सर्गं च विधाय चतुर्विंशतिस्तवं भणित्वा वन्दनकं च दत्वा श्रावकः प्रत्याख्यानं करोति इति षड्विधत्वम् । ''**सामाइअमुभयसंझं**'' इति वचनादस्य च कालनैयत्यमिति अत्रोच्यते, न समीचीनमिदम् षड्विधत्वस्य कालनियमस्य चात्राऽसिद्धत्वात्, तत्र तावत्तवाभिप्रायेणाऽपि चूर्णिकृता सामायिकेर्यापथप्रतिक्रमणवन्दनकान्येव साक्षाद्दर्शितानि न शेषाणि, तत्रापीर्यापथप्रतिक्रमणं गमनागमनविषयं नावश्यकतुर्याध्ययनरूपम्,

**गमणागमणविहारे, सुत्ते वा सुमिणदंसणे राओ । नावा नइसंतारे, इरिआवहिआपडिक्कमणं ॥**

इत्यादिवचनात् । अथ साध्वनुसारेण श्रावकस्येर्यापथप्रतिक्रमणे कायोत्सर्गचतुर्विंशतिस्तवावपि दर्श्येते तर्हि तदनुसारेण किं न प्रतिक्रमणपि तस्योच्यते ? । किञ्च '**असइ साहुचेइयाणं पोसहसालाए वा सगिहे वा सामाइयं वा आवस्सयं वा करेइ**' इत्यावश्यक-चूर्णावपि सामायिकादावश्यकं पृथगुक्तम् । तथा सामायिकस्य न कालनैयत्यम् । '**जत्थ वा वीसमइ अत्थइ वा निव्वावारो सव्वत्थ करेइ । तथा जाहे खणिओ ताहे करेइ तो से न भज्जइ**' इति चूर्णिवचनप्रामाण्यात् । **सामाइमुभयसझं** इति तु सामायिकप्रतिमापेक्षं, तत्रैव तत्कालनियमस्य श्रूयमाणत्वात् । अनुयोगद्वारसूत्रे तु स्फुटं श्रावकस्यापि प्रतिक्रमणमुक्तम् । यथा–

**समणे वा समणी वा सावए वा साविआ वा तच्चित्ते तम्मणे तल्लेसे तदज्झवसिए तत्तिव्वज्झवसो तदट्ठोवउत्ते तदप्पिअकरणे तब्भावणभाविए उभयो कालमावस्सयं करेइ ।** तथा तत्रैव—

**समणेण सावएण य, अवस्सकायव्वयं हवइ जम्हा । अंतो अहोनिसस्स य तम्हा आवस्सयं नाम ॥**

तस्मात् साधुवत् श्राद्धेनापि श्रीसुधर्मस्वाम्यादिपूर्वाचार्यपरम्परायातं प्रतिक्रमणं कार्यम् । मुख्यवृत्त्या द्विसन्ध्यं दिवस-निशाकृतपातकविशुद्धिहेतुत्वेन महाफलत्वात् । यदभ्यधिष्महि—

**अघनिष्क्रमणं भावद्विषदा क्रमणं च सुकृतसङ्क्रमणम् । मुक्तेः क्रमणं कुर्याद् द्विः प्रतिदिवसं प्रतिक्रमणम् ॥**

श्रूयते हि ढिल्ल्यां श्राद्धः कश्चिद् द्विसन्ध्यप्रतिक्रमणाभिग्रही किञ्चिन्नृपव्यापारनिमित्तं सुरत्राणेन सर्वाङ्गं निगडितः कारागृहे क्षिप्तः । लङ्घने जातेऽपि सायं प्रतिक्रमणार्थं रक्षकेभ्यः स्वर्णटङ्कं मानयित्वा घटीद्वयावधि हस्तनिगडकर्षणपूर्वं प्रतिक्रमणं चक्रे । एवं मासेन षष्टिं सौवर्णटङ्ककान् प्रतिक्रमणार्थमेव प्रददे । तन्नियमदार्ढ्यं स्वरूपं ज्ञात्वा तुष्टेन नृपेण मुक्तः परिधापितः प्राग्वद्विशिष्य सन्मानितश्च । एवं प्रतिक्रमणविषये यतनीयं । तच्च पञ्चभेदं—दैवसिकं, रात्रिकं, पाक्षिकं, चातुर्मासिकं, सांवत्सरिकं चेति । एषां कालस्तूत्सर्गेणैवमुक्तः ।

**अद्धनिबुड्डे बिंबे, सुत्तं कड्ढंति गीयत्था । इअवयणपमाणेणं, देवसियावस्सए कालो ॥**

रात्रिकस्य चैवं—

**आवस्सयस्स समए, निद्दामुद्दं चयंति आयरिआ । तह तं कुणंति जह दस, पडिलेहाणंतरं सूरो ॥**

अपवादतस्तु दैवसिकं दिवसतृतीयप्रहरादन्वर्द्धरात्रं यावत् । योगशास्त्रवृत्तौ तु मध्याह्नादारभ्याऽर्द्धरात्रं यावदित्युक्तम् । रात्रिकमर्द्धरात्रादारभ्य मध्याह्नं यावत् । उक्तमपि—

**उग्घाडपोरिसिं जा, राइअमावस्सयस्स चुन्नीए । ववहाराभिप्पाया, भणंति पुण जाव पुरिमड्ढं ॥**

पाक्षिक—चातुर्मासिक—सांवत्सरिकाणि पक्षाद्यन्ते च स्युः । आह—पाक्षिकं चतुर्दश्यां पञ्चदश्यां वा ? चतुर्दश्यामिति ब्रूमः । यदि पुनः पञ्चदश्यां स्यात्तदा चतुर्दश्यां पाक्षिके चोपवासस्योक्तत्वात्पाक्षिकमपि षष्ठेन स्यात् । तथा च—**अट्ठमछट्ठचउत्थं संवच्छरचाउमासपक्खेसु** इत्याद्यागमविरोधः । यत्र च चतुर्दशी गृहीता न तत्र पाक्षिकं, यत्र च पाक्षिकं न तत्र चतुर्दशी । तथाहि—**अट्ठमिचउद्दसीसु उववासकरणं** इति पाक्षिकचूर्णौ ।

**सो अ अट्ठमिचउद्दसीसु उववासं करेइ** इत्यावश्यकचूर्णौ ।

**चउत्थछट्ठट्ठमकरणे अट्ठमिपक्खचउमासवरिसे अ त्ति** व्यवहारभाष्यपीठे ।

**अट्ठमिचउद्दसीनाणपंचमीचाउमास** इत्यादि महानिशीथे ।

व्यवहारषष्ठोद्देशके च—**पक्खस्स अट्ठमी खलु मासस्स य पक्खिअं मुणेयव्वं** इत्यादि व्याख्यायां वृत्तौ चूर्णौ पाक्षिकशब्देन

चतुर्दश्येव व्याख्याता । तदेवं निश्चिनुमः, पाक्षिकं चतुर्दश्यामेव । चातुर्मासिकसांवत्सरिके तु पूर्वं पूर्णिमापञ्चम्योः क्रियमाणे अपि श्रीकालिकाचार्याचरणातश्चतुर्दशीचतुर्थ्योः क्रियेते । प्रामाणिकं चैतत्, सर्वसम्मतत्वात् । उक्तं च कल्पभाष्यादौ–

**असढेण समाइन्नं, जं कत्थइ केणई असावज्जं । न निवारिअमन्नेहिं, बहुमणुमयमेअमायरिअं ॥**

तीर्थोद्गारादावपि–

**सालाहणेण रन्ना, संघाएसेण कारिओ भयवं । पज्जोसवणचउत्थी, चाउम्मासं चउदसीए ॥**

**चउमासपडिक्कमणं पक्खिअदिवसम्मि चउविहो संघो । नवसयतेणउएहिं, आयरणं तं पमाणंति ॥**

अत्र चाधिकविशेषार्थिना पूज्यश्रीकुलमण्डनसूरिप्रणीतविचारामृतसङ्ग्रहोऽवगाहनीयः । प्रतिक्रमणविधिश्च योगशास्त्र-वृत्त्यन्तर्गताभ्यश्चिरन्तनाचार्यप्रणीताभ्य एताभ्यो गाथाभ्योऽवसेयः ।

**पंचविहायारविसुद्धिहेउमिह साहु सावगो वावि । पडिक्कमणं सह गुरुणा, गुरुविरहे कुणइ एक्कोवि ॥**

**वंदित्तु चेइआइं, दाउं चउराइए खमासमणे । भूनिहिअसिरो सयलाइआरमिच्छोक्कडं देइ ॥**

**सामइअपुव्वमिच्छामिठाइउं काउसग्गमिच्चाइ । सुत्तं भणिअ पलंबिअ, भुअकुप्परधरिअपरिहरणओ ॥**

**घोडगमाईदोसेहिं विरहिअं तो करेइ उस्सग्गं । नाहि अहो जाणुड्ढं, चउरंगुलठइअकडिपट्टो ॥**

तत्थ य धरेइ हिअए, जहक्कमं दिणकए अईआरे । पारेत्तु णमोक्कारेण पढइ चउवीसथयदंडं ॥
संडासगे पमज्जिअ, उवविसिअ अलग्गबिअयबाहुजुओ । मुहणंतगं च कायं च पेहए पंचवीस इहा ॥
उठिअट्ठिओ सविणयं, विहिणा गुरुणो करेइ किइकम्मं । बत्तीसदोसरहिअं, पणवीसावस्सगविसुद्धं ॥
अह सम्ममवणयंगो करजुअविहिधरिअपुत्तिरयहरणो । परिचिंतइ अइआरे, जहक्कमं गुरुपुरो विअडे ॥
अह उवविसित्तु सुत्तं सामाइअमाइअं पढिअ पयओ । अब्भुट्ठिअम्मि इच्चाइ, पढइ दुहओ ठिओ विहिणा ॥
दाऊण वंदणं तो, पणगाइसु जइसु खामए तिन्नि । किइकम्मं करिआयरिअमाइगाहातिगं पढए ॥
इअ सामाइअउस्सग्गसुत्तमुच्चरिअ काउस्सग्गठिओ । चिंतइ उज्जोअदुगं, चरित्तअइआरसुद्धिकए ॥
विहिणा पारिअ सम्मत्तसुद्धिहेउं च पढइ उज्जोअं । तह सव्वलोअअरहंतचेइआराहणुस्सग्गं ॥
काउं उज्जोअगरं, चिंतिय पारेइ सुद्धसम्मत्तो । पुक्खवरदीवड्ढं कड्ढइ सुअसोहणनिमित्तं ॥
पुण पणवीसोस्सासं, उस्सग्गं कुणइ पारए विहिणा । तो सयलकुसलकिरिआफलाण सिद्धाण पढइ थयं ॥
अह सुअसमिद्धिहेउं, सुअदेवीए करेइ उस्सग्गं । चिंतेइ नमोक्कारं, सुणइ व देई व तीइ थुइं ॥
एवं खेत्तसुरीए, उस्सग्गं कुणइ सुणइ देइ थुइं । पढिऊण पंचमंगलमुवविसइ पमज्ज संडासे ॥

पुव्वविहिणेव पेहिअ, पुत्तिं दाऊण वंदणं गुरुणो । इच्छामो अणुसट्ठिंति भणिअ जाणूहिं तो ठाइ ॥
गुरुथुइगहणेथुइतिन्निबद्धमाणक्खरस्सरा पढइ । सक्कत्थवं थवं पढिअ, कुणइ पच्छित्त उस्सग्गं ॥
एवं ता देवसिअं, राइअमवि एवमेव नवरि तहिं । पढमं दाउं मिच्छामिदुक्कडं पढइ सक्कत्थयं ॥
उट्ठिअ करेइ विहिणा, उस्सग्गं चिंतए अ उज्जोअं । बीअं दंसणसुद्धीइ, चिंतए तत्थ इममेव ॥
तइए निसाइआरं, जहक्कमं चिंतिऊण पारेइ । सिद्धत्थयं पढित्ता, पमज्जसंडासमुवविसइ ॥
पुव्वं व पुत्तिपेहणवंदणमालोअसुत्तपढणं च । वंदण खामण वंदण गाहातिगपढणमुस्सगो ॥
तत्थ य चिंतइ संजमजोगाण न होइ जेण मे हाणी । तं पडिवज्जामि तवं छम्मासं ता न काउमलं ॥
एगाइइगुणतीसूणयंपि न सहो न पंचमासमवि । एवं चउतिदुमासं, न समत्थो एगमासम्मि ॥
जातम्मि तेरसूणं, चउतीसइमाइओ दुहाणीए । जा चउथतो आयंबिलाइजापोरिसि नमो वा ॥
जं सक्कइ तं हिअए, धरेत्तु पारेत्तु पेहए पोतिं । दाउं वंदणमसढो, तं चिअ पच्चक्खए विहिणा ॥
इच्छामो अणुसट्ठिंति भणिअ उवविसिअ पढइ तिण्णि थुई । मिउसद्देणं सक्कत्थयाइ तो चेइए वंदे ॥
अह पक्खिअं चउद्दसि, दिणम्मि पुव्वं व तत्थ देवसिअं । सुत्तंतं पडिक्कमिउं, तो सम्ममिमं कम्मं कुणइ ॥

**मुहपोती वंदणयं, संबुद्धाखामणं तहालोए । वंदणपत्तेअक्खामणं च वंदणयमहसुत्तं ॥**

**सुत्तं अब्भुट्ठाणं, उस्सग्गो पुत्तिवंदणं तह य । पज्जंतिअ खामणयं, तह च उरोथोभवंदणया ॥**

**पुव्वविहिणेव सव्वं, देवसिअं वंदणाइ तो कुणइ । सिज्जसुरी उस्सग्गे, भेओ संतिथयपढणे अ ॥**

**एवं चिअ चउमासे, वरिसे अ जहक्कमं विही णेओ । पक्खचउमासवरिसेसु नवरि नामम्मि नाणत्तं ॥**

**तह उस्सग्गोजोआ, बारसवीसासमंगलगचत्ता । संबुद्धखामणं ति पण सत्त साहूण जहसंखं ॥**

हारिभद्रावश्यकवृत्तौ तु वन्दनकनिर्युक्तिगत-चत्तारि पडिक्कमणे इति गाथाव्याख्यायामेवमुक्तं सम्बुद्धक्षमणकविषये—**जहन्नेणवि तिन्नि देवसिए, पक्खिए पंच अवस्सं, चाउम्मासिए संवच्छरिए वि सत्त अवस्सं** । पाक्षिकसूत्रवृत्तौ प्रवचनसारोद्धारवृत्त्युक्तवृद्धसामाचार्यां चाप्येवमवोक्तम् । प्रतिक्रमणानुक्रमभावना पूज्यश्रीजयचन्द्रसूरिकृतग्रन्थाद् ज्ञेया । इति प्रतिक्रमणविधिः ।

तथा आशातनापरिहारादिकेन विधिना **विश्रामणाम्** उपलक्षणत्वात् सुखसंयमयात्रापृच्छादि च करोति, अर्थान् मुनीनां विशेषधर्मनिष्ठश्राद्धादीनां च । विश्रामणाफलं प्राग्भवयतिपञ्चशतीविश्रामणाकरणोत्थचक्र्यधिकबलबाहुबल्यादेरिव भाव्यम् । इह साधुभिरुत्सर्गतः सम्बाधना न कारयितव्या, '**संबाहणं दंतपहोअणाय**' इति वचनात् । द्वितीयपदे साधुभ्यः सकाशात् कारयितव्या तदभावे तथाविधश्रावकादेरपि । यद्यपि मुख्यवृत्त्या भगवन्तो महर्षयो विश्रामणां न कारयन्ति, तथापि परिणामविशुद्ध्या तद्विषये

क्षमाश्रमणं ददतो निर्जरालाभो विनयश्च कृतो भवति । **ततः स्वाध्यायं** स्वप्रज्ञानुसारेण पूर्वाधीतदिनकृत्यादिश्रावकविध्युपदेश-मालाकर्मग्रन्थादिपरावर्त्तनरूपं शीलाङ्गादिरथनमस्कारावलकादिगुणनरूपं वा चित्तैकाग्रताद्यर्थं करोति । शीलाङ्गरथस्त्वनया गाथया विज्ञेयः ।

**करणे जोए सन्ना, इंदिअ भूमाइ समणधम्मो अ । सीलंसहस्साणं, अट्ठारसगस्स निप्फत्ति ॥**

**करणेति**–करणकारणानुमतयः । '**जोएत्ति**'–मनोवाक्काययोगाः । **सन्नत्ति** । आहारभयमैथुनपरिग्रहसञ्ज्ञा । 'इंदिअत्ति' श्रोत्रचक्षुर्घ्राणरसनस्पर्शनेन्द्रियाणि । '**भूमाइत्ति**'–पृथिव्यपतेजोवायुवनस्पतिद्वित्रिचतुष्पञ्चेन्द्रिया अजीवाश्च । '**समणधम्मोत्ति**'

**खंती मद्दव अज्जव, मुत्ती तव संजमे अ बोधव्वे । सच्चं सोअं आकिंचणं च बंभं च जइधम्मो ॥** पाठश्चैवम्–

**जे नो करंति मणसा, निज्जिअआगारसन्नसोइंदी । पुढविक्कायरंभं खंतिजुआ ते मुणी वंदे ॥**

इत्यादि । एतद्व्यक्तिश्च यन्त्रकाद्विज्ञेया । श्रमणधर्मरथपाठश्चैवं–

**न हणेइ सयं साहू, मणसा आहारसन्नसंवुडओ । सोइंदिअसंवरणो, पुढविजिए खंतिसंपन्नो ॥**

इत्यादि । एवं सामाचारीरथ-क्षामणारथ-नियमरथाऽऽलोचनारथ-तपोरथ-संसाररथ-धर्मरथ-संयमरथादिपाठा अपि विज्ञेयाः । विस्तरभयात्तु नोक्ताः । नमस्कारबलके च पञ्चपदान्याश्रित्यैका पूर्वानुपूर्वी, एका पश्चानुपूर्वी, शेषा अष्टादशोत्तरं शतमनानुपूर्व्यः ।

नवपदान्याश्रित्य पुनरनानुपूर्व्यस्तिस्रो लक्षा द्वाषष्टिः सहस्रा अष्टौ शतान्यष्टसप्ततिश्च । एतत्करणभावनाव्यक्तिः पूज्यश्रीजिनकीर्त्तिसूरिपादोपज्ञसटीकश्रीपञ्चपरमेष्ठिस्तवादवसेया । एवं नमस्कारपरावर्त्तनेऽत्रापि दुष्टशाकिनीव्यन्तरवैरिग्रहमहारोगादीनां सद्यो निवृत्त्यादिफलं, परत्र त्वनन्तकर्मक्षयादि । यदाहुः—

**जं छम्मासिअवरिसिअतवेण तिव्वेण झिज्झए पावं । नमुक्कारअणणुपुव्वीगुणणेण तयं खणद्धेण ॥**

शीलाङ्गरथादीनामपि गुणने मनोवाक्कायैकाग्र्येण त्रिविधमपि ध्यानं स्यात्तथा चागमः—भंगिअसुअं गुणंतो, वट्टइ तिविहे वि झाणम्मीति । एवं स्वाध्यायकरणे स्वपरयोः कर्मक्षयप्रतिबोधादयोऽनेके गुणा धर्मदासश्राद्धस्येव । स हि प्रत्यहं सायं प्रतिक्रम्य स्वाध्यायं करोति, अन्यदा तेन स्वपिता सुश्राद्धोऽपि प्रकृतिक्रोधनः क्रोधत्यागार्थमुपदिष्टो रुष्टः काष्ठमुद्यम्य धावन् रात्रौ स्तम्भे आस्फाल्य मृतो दुष्टाहिर्जातः । अन्येद्युस्तमसि तं दष्टुमागच्छन्—

**तिव्वंपि पुव्वकोडीकयंपि सुकयं मुहुत्तमित्तेण । कोहग्गहिओ हणिउं, हहा ! हवइ भवदुगे वि दुही ॥**

इत्यादि स्वाध्यायं तत्क्रियमाणं श्रुत्वा जातिं स्मृत्वाऽनशनं प्रपाल्य सौधर्मे सुरीभूतः सुतस्य सर्वकार्येषु सान्निध्यं विदधे । धर्मदासस्य चैवमन्यदा स्वाध्यायध्यानलीनस्यैव केवलज्ञानमुत्पेदे । अतः स्वाध्यायः कार्यः । ततः सामायिकं पारयित्वा **गृहं गतो धर्मं** सम्यक्त्वमूलदेशविरत्यादिरूपं, सर्वकृत्येषु सर्वशक्त्या यतनाकरणादिरूपं, सर्वथाऽर्हच्चैत्यसाधर्मिकवर्जितवास-

स्थानकुसंसर्गवर्जनादिरूपं, नमस्कारगुणनत्रिकालचैत्यवन्दना-पूजाप्रत्याख्यानाद्यभिग्रहरूपं, यथाशक्तिसप्तक्षेत्रीवित्तव्ययादिरूपं वा यथायोग्यं **कथयत्यु**पदिशति । कलत्र-पुत्र-मित्र-भ्रातृ-भृत्य-भगिनी-स्नुषा-पुत्री-पौत्र-पौत्री-पितृव्य-भ्रातृव्य-वणिक्पुत्रादि-स्वजनानां पुरस्तादिति शेषः । यद्दिनकृत्यम्–

**सव्वन्नुणा पणीअं तु, जइ धम्मं नावगाहए । इह लोए परलोए अ, तेसिं दोसेण लिप्पई ॥**

**जेण लोगट्ठिई एसा, जो चोरभत्तदायगो । लिप्पइ सो तस्स दोसेण, एवं धम्मे विआणह ॥**

**तम्हा हु नायतत्तेणं, सड्ढेणं तु दिणे दिणे । दव्वओ भावओ चेव, कायव्वमणुसासणं ॥**

द्रव्यतः पुत्रकलत्रदुहित्रादीनां यथायोग्यं वस्त्रादि ददाति । पोष्यपोषक इति वचनात् । भावतस्तु तेषामेव धर्मदेशनां करोति। अनुशासनं सुस्थितदुःस्थितत्वादिचिन्तनमित्यर्थः । अन्यत्राप्युक्तम्–

**राज्ञि राष्ट्रकृतं पापं, राज्ञः पापं पुरोहिते । भर्त्तरि स्त्रीकृतं पापं शिष्यपापं गुरावपि ॥**

कलत्रपुत्रादयो हि गृहकृत्यवैयग्र्यप्रमादबहुलत्वादिना गुरुपार्श्वे धर्ममशृण्वन्तोऽप्येवं धर्मे प्रायः प्रवर्त्तन्ते । यथा धन्यश्रेष्ठिनः, स हि धन्यः पुरस्थो गुरूपदेशैः सुश्राद्धीभूतः सायं नित्यं प्रियाचतुःपुत्रादीन् प्रतिबोधयति । क्रमात् प्रिया त्रयः पुत्राश्च प्रतिबुद्धाः । तुर्यस्तु नास्तिकवत् पुण्यफलं क्वेत्यादिवादी न बुध्यते । श्रेष्ठिनः तत्प्रतिबोधार्त्तिर्भृशम् । अन्यदा प्रातिवेश्मिकी सुश्राविका वृद्धा

प्रान्तसमये तेन निर्यामिता, सुरीभूतया त्वया मत्सुतः प्रतिबोध्य इति सङ्केतिता मृता सौधर्मे सुरीभूता स्वदिव्यर्द्धिदर्शनादिना तत्सुतमबूबुधत् । एवं गृहाधिपेन प्रियापुत्रादयः प्रतिबोध्याः । जात्वेवमपि यदि ते न प्रतिबुध्यन्ते, तदा गृहाधिपस्य न दोषः । यथोक्तम्—

**न भवति धर्मः श्रोतुः सर्वस्यैकान्ततो हितश्रवणात् ।**
**ब्रुवतोऽनुग्रहबुद्ध्या वक्तुस्त्वेकान्ततो भवति** ॥ इति नवमगाथार्थः ॥

**पायं अबंभविरओ, समए अप्पं करेइ तो निद्दं ।**
**निद्दोवरमे थीतणुअसुइत्ताई विचिंतिज्जा ॥१०॥**

**ततो** धर्मदेशनानन्तरं **समये** रात्रिप्रथमयामाद्यतिक्रमार्द्धरात्रादिरूपे शरीरसात्म्याद्युचितशय्यास्थानं गत्वा विधिना **निद्रामल्पां करोति** । कीदृशः सन् ? **प्रायो** बाहुल्येन **अब्रह्म** मैथुनं तस्मा**द्विरतः**, गृहस्थेन यावज्जीवं ब्रह्मव्रतं पालयितुमशक्तेनापि पर्वतिथ्यादिबहुदिनेषु ब्रह्मचारिणैव भाव्यम् नवयौवनवयःस्थेनापि, ब्रह्मचर्यस्य महाफलत्वात् । महाभारतेऽप्युक्तम्—

**एकरात्र्युषितस्यापि या गतिर्ब्रह्मचारिणः । न सा क्रतुसहस्रेण वक्तुं शक्या युधिष्ठिर ! ॥**

अत्र **निद्रा**मिति विशेष्यम् । **अल्पा**मिति च विशेषणम् । सविशेषणे हि विधिनिषेधौ विशेषणमुपसङ्क्रामत इति न्यायादल्पत्वमत्र विधेयं न तु निद्रा, तस्या दर्शनावरणीयकर्मोदयेन स्वतः सिद्धत्वाद्, अप्राप्ते हि शास्त्रमर्थवदित्युक्तं प्राग् । बहुनिद्रो हि भवद्वयकृत्येभ्योऽपि परिभ्रश्येत् । तस्करवैरिधूर्त्तदुर्जनादिभ्यश्च सुलभपरिभवः स्यात् । अल्पनिद्रत्वं च महानुभाव-लक्षणम् । चदार्षम्—

**थोवाहारो थोवभणिओ अ जो होइ थोवनिद्दो अ । थोवोवहिउवगरणो, तस्स हु देवावि पणमंति ॥**

निद्राविधिश्चायं नीतिशास्त्राद्यनुसारेण—

**खट्वां जीवाकुलां ह्रस्वां भग्नां कष्टां मलीमसाम् । प्रतिपादान्वितां वह्निदारुजातां च सन्त्यजेत् ॥**

**शयनासनयोः काष्ठमाचतुर्योगतः शुभम् । पञ्चादिकाष्ठयोगे तु नाशः स्वस्य कुलस्य च ॥**

**पूज्योर्ध्वस्थो न नार्द्राङ्घ्रिर्न चोत्तरापराशिराः । नानुवंशं न पादान्तं नागदन्तः स्वपेत् पुमान् ॥**

**देवताधाम्नि वल्मीके भूरुहाणां तलेऽपि च । तथा प्रेतवने चैव सुप्यान्नापि विदिक्शिराः ॥**

**निरोधभङ्गमाधाय परिज्ञाय तदास्पदम् । विमृश्य जलमासन्नं कृत्वा द्वारनियन्त्रणम् ॥**

**इष्टदेवनमस्कारनष्टापमृतिभीः शुचिः । रक्षामन्त्रपवित्रायां शय्यायां पृथुताजुषि ॥**

**सुसंवृतपरीधानः सर्वाहारविवर्जितः । वामपार्श्वे तु कुर्वीत निद्रां भद्राभिलाषुकः ॥** विशेषकम् ।

**क्रोधभीशोकमद्यस्त्रीभारयानाध्वकर्मभिः । परीक्लान्तैरतीसारश्वासहिक्कादिरोगिभिः ॥**

**वृद्धबालाबलक्षीणैस्तृट्शूलक्षतविह्वलैः । अजीर्णिप्रमुखैः कार्यो दिवा स्वापोऽपि कर्हिचित् ॥** युग्मम् ।

**वातोपचयरौक्ष्याभ्यां रजन्याश्चाल्पभावतः । दिवास्वापः सुखी ग्रीष्मे सोऽन्यदा श्लेष्मपित्तकृत् ॥**

**अत्यासक्त्याऽनवसरे निद्रा नैव प्रशस्यते । एषा सौख्यायुषी कालरात्रिवत् प्रणिहन्ति यत् ॥**

**प्राक्शिरःशयने विद्या धनलाभश्च दक्षिणे । पश्चिमे प्रबला चिन्ता मृत्युर्हानिस्तथोत्तरे ॥**

आगमोक्तविधिस्त्वेवम् । चैत्यवन्दनादिना देवगुरुनमस्कारकरणं । चतुर्विधाहारादिप्रत्याख्यानोच्चारणम् । ग्रन्थिसहितेन सर्वव्रतसङ्क्षेपरूपदेशावकाशिकव्रतस्वीकरणं च । यदुक्तं दिनकृत्ये—

**पाणिवहमुसादत्तं, मेहुणदिणलाभणत्थदंडं च । अंगीकयं च मुत्तुं सव्वं उवभोगपरिभोगं ॥**

**गिहमज्झं मुत्तूणं, दिसिगमणं मुत्तुमसगजूआई । वयकाएहिं न करे, न कारवे गंठिसहिएणं ॥**

**पाणिवह**त्ति मुक्त्वा मशकयूकादीनिति वाक्यं द्वितीयगाथोक्तं प्राणातिपातमित्यत्र सम्बध्यते । ततश्च प्राणातिपात-मनियतमेकेन्द्रियमशकयूकादीन् मुक्त्वा आरम्भजसापराधत्रसविषयं च । एवं मृषावादादत्तादानमैथुनान्यपि । तथा दिनलाभं

प्रातर्विद्यमानः परिग्रहो दिनलाभश्च न नियमितः, इदानीं तु तमपि नियच्छामीत्यर्थः । अनर्थदण्डं तथाङ्गीकृतं शयनाच्छादनादि मुक्त्वा सर्वमुपभोगपरिभोगं गृहमध्यं मुक्त्वा दिशिगमनं च मनसो निरोद्धुमशक्यत्वाद्वाक्कायाभ्यां न करोमि न कारयामि च ग्रन्थिसहितेन यावन्तं कालं ग्रन्थिं न मोचयामीत्यर्थः । एवं देशावकाशिकस्वीकरणं महाफलं, महर्षिवद् भृशं निःसङ्गतादि-हेतुत्वात् । तच्च वैद्यजीववानरेण यथा प्राणान्तेऽपि निर्व्यूढं निस्तुलं च तत्फलमागामिभवे प्राप्तं । तथाऽन्येनापि विशेषफलार्थिना मुख्यवृत्त्या निर्वाह्यम् । तथा निर्वोढुमशक्तौ त्वनाभोगाद्याकारचतुष्के चतुर्थाकारेण प्रदीपनादिसङ्कटे तन्मोचनेऽपि न भङ्गः । वैद्यजीववानरवृत्तान्तस्त्वस्मत्कृतादाचारप्रदीपग्रन्थादवधार्यः । तथा चतुःशरणप्रतिपत्तिः । सर्वजीवराशिक्षमणाष्टादशपाप-स्थानकव्युत्सर्जनं, दुष्कृतगर्हणं, सुकृतानुमोदनम् ।

**जइ मे हुज्ज पमाओ, इमस्स देहस्स इमाइ रयणीए । आहारमुवहिदेहं, सव्वं तिविहेण वोसिरिअं ॥**

नमस्कारोच्चारपूर्वमनया गाथया त्रिः साकारानशनस्वीकरणं पञ्चनमस्कारस्मरणं च स्वापावसरे कार्यम् । विविक्तायामेव च शय्यायां शयितव्यं न तु स्त्र्यादिसंसक्तायाम् । तथा सति सतताभ्यस्त्वाद्विषयप्रसङ्गस्योत्कटत्वाच्च वेदोदयस्य पुनरपि तद्वासनया बाध्येत जन्तुः । यथोक्तं–

**यथाऽग्निसन्निधानेन, लाक्षाद्रव्यं विलीयते । धीरोऽपि कृशकायोऽपि, तथा स्त्रीसन्निधौ नरः ॥**

यद्वासनायुक्तश्च शेते तद्वासनायुक्त एव लभ्यते यावन्न प्रतिबुध्यते इत्याप्तोपदेशः । अतः सर्वथोपशान्तमोहेन

धर्मवैराग्यादिभावनाभावितेनैव च निद्रा कार्या, यथा कुस्वप्नदुःस्वप्नोपलम्भादिपरिहारेण धर्ममयस्वप्नोपलम्भाद्येव स्यात् । एवं निस्सङ्गताद्यात्मकत्वे सुप्तस्य परायत्तत्वादापदां बहुत्वादायुषः सोपक्रमात् कर्मगतेर्विचित्रत्वाच्च जात्वायुःसमाप्तिः स्यात्तदापि सुगतिभागेव भवेत्, अन्ते या मतिः सा गतिः इति वचनात् । कपटसंयतहतपौषधिकोदायिनृपवत् ।

अथोत्तरार्द्धव्याख्या—**ततः** परिणतायां रात्रौ **निद्राया उपरमे** व्यपगमे सत्यनादिभवाभ्यासरसोल्लसद्दुर्जयकामरागजयार्थं **स्त्रीतनोरशुचित्वादि विचिन्तयेत्** । आदिशब्दाज्जम्बूस्वामिस्थूलभद्रादिमहर्षिसुदर्शनादिसुश्राद्धादीनां दुष्पालशीलपालनैकाग्रतां कषायादिदोषजयोपायं भवस्थितेरत्यन्तदुःस्थतां धर्म्यमनोरथांश्च विचिन्तयेत् । तत्र स्त्रीशरीरस्याऽपावित्र्यजुगुप्सनीयत्वादि सर्वं प्रतीतम् । तदुक्तं पूज्यश्रीमुनिसुन्दरसूरिपादैरध्यात्मकल्पद्रुमे—

**चर्मास्थिमज्जान्त्रवसास्त्रमांसामेध्याद्यशुच्यस्थिरपुद्गलानाम् ।**
**स्त्रीदेहपिण्डाकृतिसंस्थितेषु, स्कन्धेषु किं पश्यसि ? रम्यमात्मन् ! ॥**

**विलोक्य दूरस्थममेध्यमल्पं, जुगुप्ससे मोटितनासिकस्त्वम् ।**
**भृतेषु तैरेव विमूढ ! योषावपुष्षुतत्किं कुरुषेऽभिलाषम् ? ॥**

**अमेध्यभस्त्राबहुरन्ध्रनिर्यन्-मलाविलोद्यत्कृमिजालकीर्णा । चापल्यमायानृतवञ्चिका स्त्री संस्कारमोहान्नरकाय भुक्ता ॥**

सङ्कल्पयोनिश्च त्रैलोक्यविडम्बकोऽपि सङ्कल्पत्यागे सुजय एव । तदाह—

**काम ! जानामि ते रूपं, सङ्कल्पात् किल जायसे । न त्वां सङ्कल्पयिष्यामि, न च मे त्वं भविष्यसि ॥**

नवपरिणीतमहेभ्यकन्याष्टकप्रतिबोधपितृनवनवतिकाञ्चनकोटिपरिहर्तृश्रीजम्बूस्वामिनः सार्द्धद्वादशकाञ्चनकोटीः, कोशा-वेश्यासक्त्या विलसितवतः सपद्यात्तश्रामण्यस्य कोशाहर्म्ये चतुर्मासीस्थितस्य श्रीस्थूलभद्रस्य, अभयाराज्ञीविहितविविधानुकूल-प्रतिकूलोपसर्गैरपि स्वल्पमप्यक्षुब्धमनसस्सुदर्शनश्रेष्ठ्यादेश्च दृष्टान्ताः स्पष्टा एवेति न वितन्यन्ते । कषायादिदोषजयोपायस्तत्तद्दोष-प्रतिपक्षसेवादिना स्यात् । तत्र क्रोधः क्षमया, मानो मार्दवेन, माया आर्जवेन, लोभः सन्तोषेण, रागो वैराग्येण, द्वेषो मैत्र्या, मोहो विवेकेन, कामः स्त्रीशरीराशौचभावनया, मत्सरः परसम्पदुत्कर्षेऽपि चित्ताऽबाधया, विषयाः संयमेन, अशुभमनोवाक्काययोगा गुप्तित्रयेण, प्रमादोऽप्रमादेन, अविरतिर्विरत्या च सुखेन जीयन्ते । न चेदं तक्षकशीर्षमणिग्रहणपीयूषपानाद्युपदेशवदशक्यानुष्ठान-मित्याशङ्क्यम्, मुन्यादीनां तत्तद्दोषपरिहारेण गुणैकमयत्वभवनदर्शनात् । दृढप्रहारिचिलातीपुत्ररौहिणेयादीनां ज्ञातान्यपि प्रतीतान्येवात्र । उक्तमपि–

**गता ये पूज्यत्वं प्रकृतिपुरुषा एव खलु ते, जना ! दोषत्यागे जनयत समुत्साहमतुलम् ।**
**न साधूनां क्षेत्रं न च भवति नैसर्गिकमिदं, गुणान् यो यो धत्ते स स भवति साधुर्भजत तान् ॥**
**हंहो ! स्निग्धसखे ! विवेक ! बहुभिः प्राप्तोऽसि पुण्यैर्मया, गन्तव्यं कतिचिद्दिनानि भवता नास्मत्सकाशात् क्वचित् ।**
**त्वत्सङ्गेन करोमि जन्ममरणोच्छेदं गृहीतत्वरः, को जानाति पुनस्त्वया सह मम स्याद्वा न वा सङ्गमः ? ॥**

**गुणेषु यत्नसाध्येषु यत्ने चात्मनि संस्थिते । अन्योऽपि गुणिनां धुर्य इति जीवन् सहेत कः ? ॥**

**गौरवाय गुणा एव न तु ज्ञातेयडम्बरः । वानेयं गृह्यते पुष्पमङ्गजस्त्यज्यते मलः ॥**

**गुणैरेव महत्त्वं स्यान्नाङ्गेन वयसापि वा । दलेषु केतकीनां हि लघीयस्सु सुगन्धिता ॥**

कषायाद्युत्पत्तिनिमित्त-द्रव्य-क्षेत्रादिवस्तुपरित्यागेनापि तत्तद्दोषपरित्यागः स्यात् । उक्तञ्च—

**तं वत्थुं मुत्तव्वं, जं पइ उप्पज्जए कसायग्गी । तं वत्थुं घेत्तव्वं, जत्थोवसमो कसायाणं ॥**

श्रूयतेऽपि चण्डरुद्राचार्यः प्रकृतिक्रोधनः क्रोधोत्पत्तिपरित्यागाय शिष्येभ्यः पृथगेव स्थित्यादि चक्रे । भवस्थितेरत्यन्त-दुःस्थता गतिचतुष्केऽपि प्रायो दुःखप्राचुर्यानुभवाद्भावनीया । तत्र नारकतिरश्चां दुःखैकबाहुल्यं प्रतीतम् । आह च—

**सत्तसु खित्तजवियणा, अन्नुन्नकयावि पहरणेहि विणा । पहरणकयावि पंचसु तिसु परमाहम्मिअकयावि ॥**

**अच्छिनिमीलणमित्तं, नत्थि सुहं दुक्खमेव अणुबद्धं । नरए नेरइयाणं, अहोनिसं पच्चमाणाणं ॥**

**जं नरए नेरइआ, दुक्खं पावंति गोअमा ! तिक्खं । तं पुण निगोअमज्झे, अणंतगुणियं मुणेअव्वं ॥**

तिरिआ कसंकुसारा इत्यादि । मानुष्यकेऽपि गर्भजन्मजरामरणविविधार्त्तिव्याधिदौस्थ्याद्युपद्रवैर्दुःखितैव । देवत्वेऽपि च्यवनदास्यपराभवेर्ष्यादिभिः । ऊचे च—

**सूईहिं अग्गिवण्णाहिं संभिण्णस्स निरन्तरं । जारिसं गोअमा दुक्खं, गब्भे अट्ठगुणं तओ ॥**
**गब्भाओ नीहरंतस्स, जोणीजंतनिपीलणे । सयसाहस्सिअं दुक्खं, कोडाकोडीगुणं पि वा ॥**
**चारगनिरोहवहबंधरोगधणहरणमरणवसणाइं । मणसंतावो अयसो, विग्गोवणया य माणुस्से ॥**
**चिंतासंतावेहि अ, दारिद्दरुआहिं दुप्पउत्ताहिं । लद्धूण वि माणसुतं, मरंति केई सुनिव्विन्ना ॥**
**ईसाविसायमयकोहमायलोभेहिं एवमाईहिं । देवा वि समभिभूआ, तेसिं कत्तो सुहं नाम ॥**

इत्यादि । धर्म्यमनोरथभावनां चैवमभ्यधुः—

**सावयघरम्मि वरहुज्ज, चेडओ नाणदंसणसमेओ । मिच्छत्तमोहिअमई, मा राया चक्कवट्टी वि ॥**
**कइआ संविग्गाणं, गीअत्थाणं गुरूण पायमूले । सयणाइसंगरहिओ, पव्वज्जं संपवज्जिस्सं ॥**
**भयभेरवनिक्कंपो, सुसाणमाईसु विहिअउस्सग्गो । तवतणुअंगो कइआ, उत्तमचरिअं चरिस्सामि ॥**

इत्यादि । इति दशमगाथार्थः ॥

**॥ इति श्रीतपागच्छाधिपश्रीसोमसुन्दरसूरि-श्रीमुनिसुन्दरसूरि-श्रीजयचन्द्रसूरि-श्रीभुवनसुन्दरसूरिशिष्य-श्रीरत्नशेखरसूरिविरचितायां श्रीविधिकौमुदीनाम्न्यां श्राद्धविधिप्रकरणवृत्तौ रात्रिकृत्यप्रकाशको द्वितीयः प्रकाशः ॥**

## तृतीयः प्रकाशः

उक्तं रात्रिकृत्यमथ पर्वकृत्यमाह—

**पव्वेसु पोसहाई, बंभअणारंभतवविसेसाई ।**
**आसोअचित्तअट्ठाहिअपमुहेसु विसेसेणं ॥११॥**

**व्याख्या—पर्वस्व**ष्टमीचतुर्दश्यादिष्वागमोक्तेषु 'पोषं पुष्टिं प्रस्तावाद्धर्मस्य धत्ते इति पोषधः' तद्व्रतादि श्राद्धेनावश्यं कार्यमिति शेषः । यदागमः—

**सव्वेसु कालपव्वेसु, पसत्थो जिणमए हवइ जोगो । अट्ठमिचउद्दसीसु अ, नियमेण हविज्ज पोसहिओ ॥**

आदिशब्दाद्वपुरपाटवादिपुष्टालम्बनैः पोषधस्य कर्त्तुमशक्यत्वे द्विष्प्रतिक्रमणबहुबहुसामायिककरणबहुसङ्क्षेपरूप-देशावकाशिकव्रतस्वीकरणादि कार्यम् । तथा पर्वसु **ब्रह्मचर्यमनारम्भ** आरम्भवर्जनं **तपोविशेषः** प्राक् क्रियमाणतपसोऽधिकं

यथाशक्त्युपवासादि तपः । **आदि**शब्दात् स्नात्रचैत्यपरिपाटीकरणसर्वसाधुनमस्करणसुपात्रदानादिना प्राक्क्रियमाणदेवगुरु-पूजादानादिभ्यो विशिष्य धर्मानुष्ठानं तत्तत्कार्यम् । यतः—

**जइ सव्वेसु दिणेसु, पालह किरिअं तओ हवइ लट्ठं । जइ पुण तहा न सक्कह, तहवि हु पालिज्ज पव्वदिणं ॥**

यथा विजयदशमीदीपोत्सवाक्षयतृतीयाद्यैहिकपर्वसु भोजननेपथ्यादौ विशिष्य यत्यते, तथा धर्मपर्वसु धर्मेऽपि । बाह्यलोका अप्येकादश्यमावास्यादिपर्वसु कियदारम्भवर्जनोपवासादिकं सङ्क्रान्तिग्रहणादिपर्वसु सर्वशक्त्या महादानादिकं च कुर्वन्ति । ततः श्राद्धेन पर्वदिनाः सर्वे विशिष्य पालनीयाः । पर्वाणि चैवमूचुः ।

**अट्ठमि चाउद्दसि पुण्णिमा य, तहऽमावसा हवइ पव्वं । मासम्मि पव्वछक्कं, तिन्नि अ पव्वाइं पक्खम्मि ॥**

तथा ।

**बीआपंचमिअट्ठमिएगारसिचउदसी पण तिहीओ । एआओ सुअतिहीओ, गोअमगणहारिणा भणिआ ॥**

**बीआ दुविहे धम्मे, पंचमि नाणेसु अट्ठमी कम्मे । एगारसि अंगाणं, चउद्दसी चउदपुव्वाणं ॥**

एवं पञ्चपर्वी पूर्णिमावास्याभ्यां सह षट्पर्वी च प्रतिपक्षमुत्कृष्टतः स्यात् । वर्षमध्ये त्वष्टाह्निकाचतुर्मासकादीन्यनेकानि पर्वाणि । आरम्भवर्जनं सर्वथा कर्तुमशक्तेनापि स्वल्पस्वल्पतरारम्भेण पर्वसु भाव्यम् । सचित्ताहारश्च जीवहिंसात्मकतया

महानेवारम्भः, ततोऽनारम्भेति पदेन पर्वसु सर्वसचित्ताहारपरिहारोऽपि कार्यतया ज्ञेयः ।

**आहारनिमित्तेणं, मच्छा गच्छंति सत्तमिं पुढविं । सच्चित्तो आहारो, न खमो मणसो वि पत्थेउं ॥**

इति वचनान्नित्यं सचित्ताहारः श्राद्धेन परिहार्यो मुख्यवृत्त्या । जातु तथा कर्त्तुमशक्तोऽपि पर्वसु तं परिहरेत् । एवं पर्वसु स्नान-शीर्षादिशोधन-ग्रथन-वस्त्रादिधावन-रञ्जन-शकटहलादिखेटन-मूढकादिबन्धन-यन्त्रादिवाहन-दलन-कण्डन-पेषण-पत्रपुष्पफलादित्रोटन-सचित्तखटीवर्णिकादिमर्दन-धान्यादिलवन-लिम्पन-मृदादिखनन-गृहादिनिष्पादनाद्यारम्भः सर्वोऽपि यथा-शक्ति परिहार्यः । निजकुटुम्बनिर्वाहस्याऽन्यथा कर्त्तुमशक्तौ पर्वस्वपि गृहिणः कियानारम्भः स्यात् । सचित्ताहारपरिहारस्तु स्वायत्तत्वादिना सुकरतया करणीय एव । गाढमान्द्यादिना सर्वसचित्तानि त्यक्तुमशक्तस्तु नामग्राहमेकादिसचित्तमुत्कलीकरणपूर्वं शेषनिःशेषसचित्तानि नियमयेत् । तथा आश्विनाष्टाह्निकाचैत्राष्टाह्निकाप्रमुखेषु पर्वसु विशेषेण पूर्वोक्तविधिर्विधेयः । प्रमुखशब्देन चतुर्मासकवार्षिकाद्यष्टाह्निका-चतुर्मासकत्रय-सांवत्सरपर्वादिसङ्ग्रहः । उक्तञ्च—

**संवच्छरचाउम्मासिएसु, अट्ठाहिआसु अ तिहीसु । सव्वायरेण लग्गइ, जिणवरपूआतवगुणेसु ॥**

अत्र गुणा ब्रह्मव्रतादयः अष्टाह्निकासु चैत्राश्विनाष्टाह्निके शाश्वत्यौ, तयोर्वैमानिकदेवा अपि नन्दीश्वरादिषु तीर्थयात्राद्युत्सवान् कुर्वन्ति । यदाहुः—

**दो सासयजत्ताओ, तत्थेगा होइ चित्तमासम्मि । अट्ठाहिआइमहिमा, बीआ पुण अस्सिणे मासे ॥**

**एआउ दोवि सासय जत्ताउ करंति सव्वदेवा वि । नंदीसरम्मि खयरा, नरा य नियएसु ठाणेसु ॥**

**तह चउमासिअतिअगं, पज्जोसवणा य तह य इअ छक्कं । जिणजम्मदिक्खकेवलनिव्वाणाइसु असासइआ ॥**

जीवाभिगमे त्वेवमुक्तं-**तत्थ णं बहवे भवणवइवाणमंतरजोइसवेमाणिया देवा तिहिं चउमासिएहिं पज्जोसवणाए अ अट्ठाहिआओ महामहिमाओ करिंतित्ति** । तिथिश्च प्रातः प्रत्याख्यानवेलायां यः स्यात् स प्रमाणम् । सूर्योदयानुसारेणैव लोकेऽपि दिवसादिव्यवहारात् । आहुरपि-

**चाउम्मासिअवरिसे, पक्खिअ पंचट्ठमीसु नायव्वा । ताओ तिहिओ जासिं, उदेइ सूरो न अण्णाओ ॥**

**पूआ पच्चक्खाणं, पडिक्कमणं तहय निअमगहणं च । जीए उदेइ सूरो, तीइ तिहीए उ कायव्वं ॥**

**उदयम्मि जा तिही, सा पमाणमिअरीइ कीरमाणीए । आणाभंगणवत्थामिच्छत्तविराहणं पावे ॥**

पाराशरस्मृत्यादावपि-

**आदित्योदयवेलायां, या स्तोकाऽपि तिथिर्भवेत् । सा सम्पूर्णेति मन्तव्या, प्रभूता नोदयं विना ॥**

उमास्वातिवचःप्रघोषश्चैवं श्रूयते-

**क्षये पूर्वा तिथिः कार्या, वृद्धौ कार्या तथोत्तरा । श्रीवीरज्ञाननिर्वाणं, कार्यं लोकानुगैरिह ॥**

अर्हतां जन्मादिपञ्चकल्याणकदिना अपि पर्वतिथित्वेन विज्ञेयाः, द्वित्र्यादिकल्याणकदिनाश्च विशिष्य । श्रूयते हि कृष्णमहाराजेन सर्वपर्वदिनान्याराधयितुमशक्तेन वर्षमध्ये स्वामिन्नुत्कृष्टं पर्वदिनमाराध्यं किन्नाम ? इति श्रीनेमिः पृष्टः प्राह, महाभाग ! मार्गशीर्षशुक्लैकादशी जिनेन्द्रपञ्चकल्याणकीपवित्रिता, अस्यां पञ्चपञ्चभरतैरावतक्षेत्रकल्याणकानां मीलने पञ्चाशत् कल्याणकानि स्युः । ततः कृष्णेन मौनपौषधोपवासादिना तद्दिनमाराद्धम् । ततः प्रभृति यथा राजा तथा प्रजा इत्येकादशी सर्वजनेष्वाराध्यतया प्रसिद्धिं प्राप । पर्वतिथिपालनं च महाफलं शुभायुर्बन्धहेतुत्वादिना । यदागमः—

**भयवं ! बीअपमुहासु पंचसु तिहीसु विहिअं धम्माणुट्ठाणं किं फलं होइ ? गोयमा ! बहुफलं होइ । जम्हा एआसु तिहीसु पाएणं जीवो परभवाउअं समज्जिणइ, तम्हा तवोविहाणाइधम्माणुट्ठाणं कायव्वं । जम्हा सुहाउअं समज्जिणइत्ति ।**

आयुषि बद्धे तु दृढधर्माराधनेऽपि बद्धायुर्न टलति ! यथा श्रेणिकनृपस्य क्षायिकसम्यक्त्वसम्भवेऽपि प्राक् सगर्भमृगीघाते पृथग् गर्भपाते स्वस्कन्धाभिमुखमीक्षणे निबद्धम् नरकायुः । परसमयेऽपि पर्वसु स्नानमैथुनादि निषिद्धं । यदुक्तं विष्णुपुराणे—

**चतुर्दश्यष्टमी चैव, अमावास्या च पूर्णिमा । पर्वाण्येतानि राजेन्द्र ! रविसङ्क्रान्तिरेव च ॥**

**तैलस्त्रीमांससम्भोगी, पर्वस्वेतेषु वै पुमान् । विण्मूत्रभोजनं नाम प्रयाति नरकं मृतः ॥**

मनुस्मृतावपि—

**अमावास्यामष्टमीं च, पौर्णमासीं चतुर्दशीम् । ब्रह्मचारी भवेन्नित्यममृतौ स्नातको द्विजः ॥**

अतः पर्वावसरे सर्वशक्त्या धर्मे यतनीयम् । अवसरे हि धर्मकृत्यं कृतं स्वल्पमप्यनल्पफलं पानभोजनादिवत् । यद्वैद्यकशास्त्रम्—

**शरदि यज्जलं पीतं, यद् भुक्तं पौषमाघयोः । ज्येष्ठाषाढे च यत्सुप्तं, तेन जीवन्ति मानवाः ॥**

**वर्षासु लवणममृतं, शरदि जलं गोपयश्च हेमन्ते । शिशिरे चामलकरसो घृतं वसन्ते गुडश्चान्ते ॥**

पर्वमहिम्ना च प्रायो निर्धर्मिणामपि धर्मे, निर्दयानामपि दयायां, अविरतानामपि विरतौ, कृपणानामपि धनव्यये, कुशीलानामपि शीले, निस्तपसामपि तपसि मतिर्भवति । दृश्यते चैतत्सर्वदर्शनेष्वपि सम्प्रत्यपि । तदाह—

**सो जयउ जेण विहिआ, संवच्छरचाउम्मासियसुपव्वा । निद्धंधसाणवि हवइ, जेसि पभावाओ धम्ममई ॥**

ततः पर्वसु पौषधादि कार्यमेव । तत्र पौषधचातुर्विध्यादिस्वरूपं अर्थदीपिकायामुक्तमित्यत्र नोच्यते । पौषधं च त्रेधा, अहोरात्र—दिवस—रात्रिपौषधभेदात् । तत्रायमहोरात्रपौषधविधिः ।

इह जम्मि दिणे सावओ पोसहं लेइ, तम्मि दिणे घरवावारं वज्जिअ पोसहसालाए गहिअपोसहजुग्गोवगरणो पोसहसालं

साहुसमीवे वा गच्छइ । तओ अंगपडिलेहणं करिअ उच्चारपासवणथंडिले पडिलेहिअ गुरुसमीवे नवकारपुव्वं वा ठवणायरियं ठावित्ता इरियं पडिक्कमिअ खमासमणेण वंदिअ पोसहमुहपत्तिं पडिलेहेइ । तओ खमासमणं दाउं उद्धट्ठिओ भणइ । इच्छाकारेण संदिसह भगवन् पोसहं संदिसावेमि । बीएण पोसहं ठावेमित्ति भणिअ नमुक्कारपुव्वं पोसहमुच्चरेइ । करेमि भंते पोसहं आहारपोसहं सव्वओ देसओ वा, सरीरसक्कारपोसहं सव्वओ, बंभचेरपोसहं सव्वओ, अव्वावारपोसहं सव्वओ, चउव्विहे पोसहे ठामि, जाव अहोरत्तं पज्जुवासामि, दुविहं तिविहेणं, मणेणं, वायाए काएणं, न करेमि न कारवेमि, तस्स भंते पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि । एवं पुत्तिपेहणपुव्वं खमासमणदुगेण सामाइयं करिय, पुणो खमासमणदुगेण जइ वासारत्तो तो कट्ठासणगं, सेसट्ठमासेसु पाउंछणगं संदिसाविअ खमासमणदुगेण सज्झायं करेइ । तओ पडिक्कमणं करिअ खमासमणदुगेण बहुवेलं संदिसाविअ खमासमणपुव्वं पडिलेहणं करेमित्ति भणिअ, मुहपुत्तिं पाउंछणगं परिहरणगं च पेहिअ, साविआ पुण पुत्ती पाउंछणमुत्तरीअं, कंचुगं साडिअं च पेहिअ खमासमणं दाउं भणइ । इच्छकारी भगवन् पडिलेहणा पडिलेहावओ । तओ इच्छं भणिअ ठवणायरिअं पेहिअ, ठविअ खमासमणपुव्वं उवहिमुहपत्तिं पेहिअ, खमासमणदुगेण संदिसाविअ वत्थकंबलाइ पडिलेहेइ। तओ पोसहसालं पमज्जिअ कज्जयं उद्धरिअ परिठविअ इरिअं पडिक्कमिअ गमणागमणमालोइअ खमासमणपुव्वं मण्डलीइ साहुव्व सज्झायं करेइ । तओ पढइ गुणइ पुत्थयं वा वाएइ जाव पउणा पोरिसी । तओ खमासमणपुव्वं पुत्तिं पेहिअ तहेव सज्झायइ जाइ कालवेला । जइ देवा वंदिअव्वा हुंति, तो आवस्सियापुव्वं चेइअहरे गंतुं देवे वंदेइ । जइ पारणइत्तो तो

पच्चक्खाणे पुन्ने खमासमणपुव्वं पुत्तिं पेहिअ खमासमणं दाउं भणइ । पारावहं पोरिसी पुरिमड्ढो वा [1]चउहाहारकओ [2]तिहाहारकओ वा आसि । निव्विएणं आयंबिलेणं एगासणेणं पाणाहारेण वा जा कइ वेला तीए । तओ देवे वंदिअ, सज्झायं करिअ, गेहे गंतुं जइ हत्थसयाओ बाहिं तो इरिअं पडिक्कमिअ, आगमणमालोइअ, जहासंभवं अतिहिसंविभागवयं फासिअ, निच्चलासणे उवविसिअ, हत्थपाए मुहं च पेहित्ता, नमुक्कारं भणिअ, फासुअमरत्तदुट्ठो जेमेइ । पोसहसालाए वा पुव्वसंदिट्ठनिअसयणेहिं आणिअं, नो भिक्खं हिंडइ । तओ पोसहसालाए गंतुं इरिअं पडिक्कमिअ, देवे वंदिअ, वंदणं दाउं तिहाहारस्स चउहाहारस्स वा पच्चक्खइ । जइ सरीरचिंताए अट्ठो तो आवस्सिअं करिअ, साहुव्व उवउत्तो निज्जीवे थंडिले गंतुं विहिणा उच्चारपासवणं वोसिरिअ, सोअं करिअ, पोसहसालाए आगंतुं इरिअं पडिक्कमिअ, खमासमणपुव्वं भणइ, इच्छाकारेण संदिसह भगवन्, गमणागमणं आलोउं ? । इच्छं वसतिहुंता आवसीकरीअ वरदक्खिणदिसि जाइअ, दिसालोअं करिअ, अणुजाणह जस्सुग्गहुत्ति भणिअ, सण्डासए थंडिलं च पमज्जिअ, उच्चारपासवण वोसीरिअ, निसीहिअं करिअ, पोसहसालाए पविट्ठा, आवंतजंत्तेहिं जं खण्डिअं, जं विराहिअं तस्स मिच्छामि दुक्कडं । तओ सज्झायं करेइ । जाव पच्छिमपहरो । तओ खमासमणेण पडिलेहणं करेमि । बिइएण 'पोसहसालं पमज्जेमित्ति' भणिअ, सावओ पुत्तिं पाउंछणं पहिरणं च पेहेइ । साविआ

१. 'चउहारकओ' इत्यपि । २. 'तिहारकओ' इत्यपि पाठः क्वचित् ।

पुण पुत्तिं पाउंछणं साडिअं कंचुगमुत्तरिअं च पेहेइ । तओ ठवणायरिअं पेहिअ पोसहसालं पमज्जिअ, खमासमणेण उवहिमुहपुत्तिं पेहिअ, खमासमणेण मंडलीए जाणुट्ठिओ सज्झायं करिय, वंदणं दाउं पच्चक्खाणं करिअ, खमासमणदुगेण उवहिं संदिसाविअ, वत्थकंबलाइं पेहिअ, जो अभत्तट्ठी सो सव्वोवहिअंते पहिरेणं । साविआ गोसेव्व उवहिं पेहेइ । कालवेलाए पुण खमासमणपुव्वं सिज्झाए अंतो बहिं च बारस बारस काइअ उच्चारभूमीओ पेहेइ । तओ पडिक्कमणं करिअ, सइ संभवे साहूणं विस्सामणा खमासमणं दाउं सज्झायं करेइ । जावपोरिसी । तओ खमासमणपुव्वं इच्छाकारेण संदिसह भगवन् बहुपडिपुन्ना पोरिसि राईसंथारए ठामि । तओ देवे वंदिअ, सरीरचिंतं सोहिअ, सव्वं बाहिरुवहिं पेहिअ, जाणुवरिं संथारुत्तरपट्टं मेलिअ, जओ पाए तओ भूमिं पमज्जिअ, सणियं संथरइ । तओ वामपाएण संथारं संघट्टिअ, पुत्तिं पेहिअ, निसीही निसीही निसीही नमो खमासमणाणं अणुजाणह जिट्ठज्जत्ति भणंतो संथारए उवविसिअ, नमुक्कारंतरिअं तिन्निवारे सामाइअं कड्ढिअ–

**अणुजाणह परमगुरू, गुरुगुणरयणेहिं भूसिअसरीरा । बहुपडिपुन्ना पोरिसि, राईसंथारए ठामि ॥**

**अणुजाणह संथारं, बाहुवहाणेण वामपासेणं । कुक्कुडिपायपसारण, अंतरंतु पमज्जए भूमिं ॥**

**संकोइय संडासं, उव्वट्टंते अ कायपडिलेहा । दव्वाइउवओगं, ऊसासनिरुंभणालोए ॥**

**जइ मे हुज्ज पमाओ, इमस्स देहस्स इमाइ रयणीए । आहारमुवहिदेहं, सव्वं तिविहेण वोसिरिअं ॥**

चत्तारि मंलमिच्चाइभावणं भाविअ, नमुक्कारं सुमरंतो रओहरणाइणा सरीरगं संथारगमुवरिं पमज्जिअ, वामपासेण बाहुवहाणेण सुअइ । जइ सरीरचिंताए अट्ठो तो संथारयं अन्नेण संघट्टाविअ, आवस्समिअं करिअ, पुव्वपेहिअथंडिले काइअं वोसिरिअ, इरिअं पडिक्कमिअ, गमणागमणमालोइअ, जहन्नेण वि तिन्निगाहाओ सज्झाइअ, नमुक्कारं सुमरंतो तहेव सुअइ । पच्छिमजामे पडिबुद्धो इरिअं पडिक्कमिअ, कुसुमिणदुसुमिणकाउस्सग्गं चिइवंदणं च काउं, आयरिआई वंदिअ, सज्झायं करेइ । जाव पडिक्कमणवेला, तओ पुव्वं व पडिक्कमणाइ जाव मंडलीए सज्झायं करिअ, जइ पोसहं पारिउकामो तो खमासमणेणं इच्छाकारेण संदिसह मुहपत्तिअं पडिलेहेमि । गुरू भणइ, पडिलेह । तो पुत्तिं पेहिअ, खमासमणेण भणइ । इच्छाकारेण संदिसह भगवन् पोसह पारउं ? गुरू भणइ, पुणोवि कायव्वं । बीएण भणइ, पोसहं पारिअं । गुरू भणइ, आयारो न मुत्तव्वो । तओ उद्धट्ठिओ नमुक्कारं भणिअ, जाणुट्ठिओ भूमिट्ठिअसिरो भणइ ।

**सागरचंदो कामो, चंदवडिंसो सुदंसणो धन्नो । जेसिं पोसहपडिमा, अखण्डिआ जीविअंते वि ॥**

**धन्ना सलाहणिज्जा, सुलसाआणंदकामदेवा य । जेसिं पसंसइ भयवं, दढव्वयत्तं महावीरो ॥**

पोसहु विधिइं लिइउं, विधइं पारिउं, विधि करतां जइ कांइ अविधि खंडन विराधन मनि वचनि काइं करी तस्स मिच्छामि दुक्कडं । एवं सामाइयंपि । नवरं–

**सामाइअवयजुत्तो, जाव मणे होइ नियमसंजुत्तो । छिंदइ असुहं कम्मं, सामाइय जत्तिआ वारा ॥**

**छउमत्थो मूढमणो, कित्तिअमित्तं च संभरइ जीवो । जं च न सुमरामि अहं, मिच्छामिदुक्कडं तस्स ॥**

**सामाइअपोसहसंठिअस्स जीवस्स जाइ जो कालो । सो सफलो बोधव्वो, सेसो संसारफलहेऊ ॥**

तओ सामाइक विधिं लिउं इच्चाइ भणइ । एवं दिवसपोसहंपि । नवरं, जाव दिवसं पज्जुवासामित्ति भन्नइ । देवसिआइ पडिक्कमणे कए पारेउं कप्पइ । रत्तिपोसहंपि एवं । नवरं—मज्झण्हाओ परओ जाव दिवसस्स अंतो मुहुत्तो ताव घिप्पइ । तहा दिवससेसं रत्तिं पज्जुवासामित्ति भन्नइ । पोसहपारणए साहुसंभवे निअमा अतिहिसंविभागवयं फासिअ पारेअव्वं । इति पौषधविधिः ॥

एवं पोषधादिना पर्वदिनमाराध्यम् । अत्र ज्ञातमित्थम्-धन्यपुरे धनेश्वरः श्रेष्ठी, धनश्रीः पत्नी, धनसारः सुतः । श्रेष्ठी परमार्हतः सहकुटुम्बः प्रतिपक्षं षट्पर्वीं च, विशेषारम्भवर्जनादि ॥, प्रतिमासं षट्पूर्वी '**चाउद्दसट्ठमुद्दिट्ठपुन्निमासिणीसु पडिपुण्णं पोसहं पालेमाणा**' इति पञ्चमाङ्गे तुङ्गिकानगरीश्राद्धवर्णने प्रोक्तत्वात्,पोषधादिना यथाविधि पालयति । अन्यदाष्टमीपोषधे श्रेष्ठी निशि शून्यगृहे प्रतिमास्थः शक्रेण धर्मदार्ढ्ये प्रशंसितो मिथ्यादृक्सुरेण परीक्षितः । प्रथमं मित्ररूपेण स्वर्णकोटिनिधिग्रहणानुमत्यर्थमत्यर्थं पृष्टस्ततः पत्नीरूपेणालिङ्गनादिनाऽप्यत्यर्थं कदर्थितः । ततो निशीथेऽपि प्रातस्त्यप्रभाकरोद्गमातपादिदर्शनपूर्वं पोषधपारणाद्यर्थं प्रियापुत्रादितत्तदुक्तिश्रावणादिभिरपि स्वाध्यायस्मरणानुसारेण निशीथं जानन्नभ्रान्तः । ततः पिशाचरूपेण कृत्योत्पाटनघातो-च्छालनशिलास्फालनाब्धिमध्यक्षेपादिप्रतिकूलोपसर्गैः प्राणान्तिकैरपि न क्षुब्धः । यतः—

**दिग्गजकूर्मकुलाचलफणिपतिविधृताऽपि चलति वसुधेयम् । प्रतिपन्नममलमनसां, न चलति पुंसां युगान्तेऽपि ॥**

ततस्तुष्टोऽस्मीष्टं याचस्वेति तेनोक्तोऽपि ध्यानान्तरं न दधौ । ततस्तेनातितुष्टेनासङ्ख्यकोटिरै रत्नवृष्ट्यादिमहिमा तद्गृहे चक्रे । तन्महिम्नानेके जनाः पर्वपालने सादरा जज्ञिरे । विशिष्य च राज्ञः प्रसादचित्ता एको रजकस्तैलिकः कौटुंबिकश्च षट्पर्व्यां स्वस्वारंभवर्जिनः, तांश्च श्रेष्ठी नव्यसाधर्मिकत्वेन पारणे सहभोजनपरिधापनयथाविलोक्यमाननिरर्गलद्रविणार्पणादिना भृशं सन्मानयति । यतः-

**न य तं करेइ माया, नेव पिआ नेव बंधुवग्गो अ । जं वच्छलं साहम्मिआण सुस्सावगो कुणइ ॥**

तत्परिचयात् तेऽपि सम्यग्दृशो बभूवुः । यतः—

**सुंदरजणसंसग्गी, सीलदरिद्दंपि कुणइ सीलड्ढं । जह मेरुगिरिविलग्गं, तणंपि कणगत्तणमुवेइ ॥**

अन्येद्युः श्वः कौमुदीमहो भावी इत्यद्यैव धावनीयानीत्युक्त्वा चतुर्दश्यां राज्ञो राज्ञीनां च वासांसि धावकस्य धावनायार्पितानि नृपनरैः । तेनोक्तं पर्वसु मम सकुटुम्बस्य वस्त्रधावनाद्यारम्भे नियमोऽस्ति तैरुक्तं ''नृपाज्ञायां को नियमः ? आज्ञाभङ्गे प्राणान्तिकोऽपि दण्डो भावी ।'' ततः स्वजनैरन्यैश्च भृशं प्रेरितोऽपि श्रेष्ठिनाऽपि नृपदण्डे मा धर्माद्यपभ्राजनाहान्यादि भूदिति '**रायाभिओगेणं**' इत्याकारादियुक्तिज्ञापनेऽपि दार्ढ्यं विना किं धर्मेणेति स धावक ईदृक्सङ्कटेऽपि धावनं नानुमेने ।

नृपनरैर्व्युद्ग्राहितो राजापि रुष्ट आज्ञाभङ्गे प्रातः सकुटुम्बोऽपि स निग्रहिष्यते इति अवग्, दैवान्निशि शूलव्यथया तथा व्यथितो यथा पुरेऽपि हाहाकारो जज्ञे । एवं दिनत्रयं गतम् । धर्मप्रभावान्निर्यूढपर्वनियमः सोऽपि प्रतिपदि धावितानि द्वितीयायां मार्गितात्यर्पितवान् ॥ एवं गाढविलोक्यमानबहुतैलार्थं चतुर्दश्यां घाणीवाहनादेशे तेन पर्वनियमदाढ्योक्तौ नृपकोपे तत्कालं परचक्रगमनससैन्यनृपसन्मुखगमनयुद्धतज्जयादिवैयग्र्येण । हालिकस्य त्वष्टमीमुहूर्ते नृपादिहलखेटनादेशे तथैव नृपकोपे तत्कालनिरन्तरवृष्ट्या सुखं पर्वनियमनिर्वाहोऽभूत् । एवमखण्डपर्वनियमपालनपुण्येन ते त्रयोऽपि क्रमान्मृताः षष्ठे स्वर्गे सुराश्चतुर्दशसागरायुषो बभूवुः । श्रेष्ठी तु द्वादशे, चतुर्णां मैत्री । 'त्वया प्राग्वद्द्वयं प्रतिबोध्या' इति च स्वच्च्यवनसमये त्रिभिःश्रेष्ठिसुरः स्वीकारितः । त्रयोऽपि ततश्च्युताः पृथक् पृथग् नृपकुलेऽवतीर्णा देशाधिपाः प्रौढनृपा धीरवीरहीराख्या जज्ञिरे । तत्र धीरपुरे एकस्य श्रेष्ठिनः पर्वसु सर्वदा सर्वत्र सर्वाङ्गीणो लाभः स्यादन्यदा तु हानिरपि । तेन ज्ञानी पृष्टः प्रोचे, 'त्वया प्राग् भवे दौस्थ्येऽपि नियमबद्धतया यथाशक्ति पर्वदिनाः सम्यक् पालिताः । अन्यदा तु क्षणिकत्वादियोगेऽप्यालस्यादिना प्रमद्वरोऽभूः पुण्यकार्ये । तेनात्र भवे तथा भवेत् । तदुक्तं—

**न तं चोरा विलुंपंति, न तं अग्गी विणासए । न तं जूएवि हारिज्जा, जं धम्मंमि पमत्तओ ॥**

ततः स सकुटुम्बः पुण्यकृत्येषु नित्यमप्रमत्तः सर्वशक्त्या सर्वपर्वाण्याराधयति । व्यवहारशुद्ध्या वाणिज्याद्यपि स्वल्पस्वल्पतरारम्भं द्वितीयादिपर्वस्वेव विधत्ते न त्वन्यदा । ग्राहका अपि सर्वे विश्वस्तास्तस्यैव पार्श्वे व्यवहरन्ति न त्वन्येषाम् ।

एवं स्वल्पादिनैरनेककनककोटीश्वरो जज्ञे ।

**पोषकाः स्वकुलस्यैते, काककायस्थकुर्कुटाः । स्वकुलं घ्नन्ति चत्वारो, वणिग् श्वानो गजा द्विजाः ॥** इति

मात्सर्यादनार्यैरन्यैर्वणिग्भिरनेककनककोटिनिधिर्लब्ध इति पैशुन्ये कृते राज्ञा पृष्टः प्राह—मया स्थूलमृषावादादत्तादानादि गुरुपार्श्वे नियमितम् । ततो धर्मधूर्त्तोऽयमिति वणिग्गिरा राज्ञा स्वं लात्वा सपुत्रोऽप्यसौ स्वसौधे स्थापितो दध्यौ । अद्य पञ्चमीपर्वसद्भावादवश्यं मम कथमपि लाभ एव भावीति । प्रातर्नृपः सर्वं स्वकोशं रिक्तं श्रेष्ठिगृहं च सर्वतोऽपि मणिस्वर्णादिभिर्भृतं दृष्ट्वा विस्मितो विषण्णश्च तं क्षमयति स्म, प्रश्नयति स्म च—'श्रेष्ठिन् ! कथमिदं धनं त्वद्गृहे गतं ?' सोऽप्याह, 'स्वामिन्नहमपि न जाने । परं पर्वणि पुण्यमहिम्ना मे लाभ एव भवतीत्यादि' सम्यक् स्वरूपोक्तौ पर्वमहिमश्रुत्या जातजातिस्मृतिः क्षितिपतिरपि षट्पर्वीपालनं यावज्जीवं स्वीचक्रे । वर्द्धापयाञ्चक्रे च तदैव कोशाध्यक्षेण कोशः सर्वे संप्रत्येव पूर्यन्ते स्म प्रावृषेण्यप्रवाहपूरेणेव पद्माकरा इति । ततोऽतिविस्मितमुदिते क्ष्मादयिते चलत्कुण्डलाद्याभरणभासुरः सुरः स्फुटीभूय भाषते स्म- 'भो भूपते ! उपलक्षयसि मां प्राग्भवमित्रं श्रेष्ठिसुरं ? मया प्राग्वाग्बद्धतया त्वत्प्रतिबोधाय पर्वादिनैष्ठिकप्रष्ठ-श्रेष्ठिसान्निध्याय चैतद् व्यधायि, तस्माद्धर्मे मा क्वापि प्रमादीः, यामि अथो तैलिकहालिकनृपयोर्बोधाय'इत्युक्त्वा गतस्त-योर्युगपत् प्राग्भवं स्वप्नान्तरेऽदर्शयत् । ततस्तावपि जातजातिस्मृती सम्यक् श्राद्धधर्मं विशिष्य च षट्पर्वीमाराधयतः, त्रयोऽपि ते नृपाः श्रेष्ठिसुरगिरा स्वस्वदेशेऽमारिप्रवर्त्तनं, सर्वव्यसननिवर्त्तनं, स्थाने स्थाने नव्यचैत्यार्चायात्रासाधर्मिकवात्सल्यादिनिर्वर्त्तनं,

पर्वणोऽर्वाग् दिने पटहोद्घोषणापूर्वं सर्वपर्वसु सर्वजनेभ्यः सर्वाङ्गीणधर्मकर्मनिर्मापणं च तथा व्यधुर्यथैकच्छत्रीभूत-श्रीजैनधर्ममहिम्ना सततमवहितश्रेष्ठिसुरसान्निध्येन तेषां देशेष्वीतिदुर्भिक्षस्वपरचक्रभीतिव्याध्यशिवदौस्थ्याद्युपद्रवास्तीर्थकरविहार-भूमाविव स्वप्नेऽपि नाभूवन् । धर्ममहिम्ना हि किन्नाम दुस्साधमपि न सुसाधम् ? एवं सुखधर्मैकमयीं राज्यश्रियं सुचिरं परिभुज्य त्रयोऽपि सह प्रव्रज्य प्राज्यतपोभिर्द्रागेव केवलज्ञानमुपार्ज्यं स्थाने स्थाने श्रेष्ठिदैवतवितन्यमाननिःसमानमहिमानः प्रायो निजनिदर्शनोपदेशैरूर्व्यामपि सर्वपर्वसु धर्मसाम्राज्यमुच्चैर्विस्तार्य नानाभव्यजनान् निस्तार्य निर्वृतिमियर्ति स्म । श्रेष्ठिसुरोऽप्यच्युतात् च्युतः प्रौढनृपीभूय भूयः पर्वमहिमश्रुत्या जातिं स्मृत्वा दीक्षां गृहीत्वा तथैव निर्वृतः । इति पर्वतिथौ कथा ॥ इत्येकादशगाथार्थः ।

**॥ इति श्रीतपागच्छधिपश्रीसोमसुन्दरसूरि-श्रीमुनिसुन्दरसूरि-श्रीजयचन्द्रसूरि-**
**श्रीभुवनसुन्दरसूरिशिष्य-श्रीरत्नशेखरसूरि-विरचितायां श्रीविधिकौमुदीनाम्न्यां**
**श्राद्धविधिप्रकरणवृत्तौ पर्वकृत्यप्रकाशकस्तृतीयः प्रकाशः ॥॥**

## चतुर्थः प्रकाशः

उक्तं पर्वकृत्यमथ चतुर्मासीकृत्यं गाथार्द्धेनाह–

**पइचउमासं समुचिअ, नियमगहो पाउसे विसेसेण ।**

येन परिग्रहपरिमाणं प्रतिपन्नं स्यात्तेन तन्नियमाः **प्रतिचतुर्मासकं** सङ्क्षेप्याः । येन तु तन्न प्रतिपन्नं, तेनापि प्रतिचतुर्मासकं चतुर्मास्यां चतुर्मास्यां **समुचिता** योग्या ये **नियमा** अभिग्रहास्तेषां **ग्रहः** स्वीकारः कार्यः । **प्रावृषि** वर्षाचातुर्मास्यां **पुनर्विशेषेण** सविशेषं समुचितनियमा ग्राह्याः । तत्र ये नियमा यदा बहुफला यन्नियमाऽग्रहणे च बहुविराधनाधर्मापभ्राजनादिर्दोषास्ते तदा समुचिताः । यथा वर्षासु शकटखेटननिषेधादि । वार्दलाब्दवृष्ट्यादिना इलिकादिपाते राजादनाऽऽम्रत्यागादि च । देशपुरग्रामजातिकुलवयोऽवस्थाद्यपेक्षया वा समुचितत्वं नियमानां ज्ञेयम् । ते च द्विधा, दुर्निर्वाहाः सुनिर्वाहाश्च। तत्र धनिनां व्यापारिणां चाविरतानां सचित्तरसशाकत्यागसामायिकस्वीकाराद्या दुर्निर्वाहाः । पूजादानाद्याश्च सुनिर्वाहाः। निःस्वानां तु वैपरीत्यं । चित्तैकाग्र्ये च सर्वेषां सर्वे सुनिर्वाहा एव । चक्रिशालिभद्रादीनां दीक्षादिकष्टवत् ।

तद्गदन्ति–

**ता तुंगो मेरुगिरी, मयरहरो ताव होइ दुत्तारो । ता विसमा कज्जगई, जाव न धीरा पवज्जंति ॥**

एवं च दुर्निर्वाहान् नियमान् स्वीकर्त्तुमशक्तोऽपि सुनिर्वाहान् स्वीकुर्यादेव । यथा मुख्यवृत्त्या वर्षासु सर्वदिग्गमननिषेध उचितः । कृष्णकुमारपालादिवत् । तदशक्तौ यदा यासु दिक्षु गमनं विनापि निर्वहते, तदा तद्दिग्गमननिषेधं विधत्ते । एवं सर्वसचित्तादीनि परिहर्त्तुमशक्तौ यानि विनापि यदा निर्वहते तानि तदा परिहरति । तथा यस्य यत्र यदा वा यन्न भवति यथा निःस्वस्य हस्त्यादि, मरुस्थलादौ नागवल्लीदलादि, स्वस्वकालं विनाऽऽम्रफलादि च, स तत्र तदा वा तन्नियमयति । एवमसद्वस्तुत्यागेऽपि विरत्यादिमहाफलम् । श्रूयते हि राजगृहे प्रव्रजितं द्रमकं बह्वनेन त्यक्तमित्यादि जना हसन्ति । तद्धेतुकं गुरुभिर्विहाराय प्रोक्तेऽभयमन्त्रिणा स्वर्णकोटीत्रयं चतुष्पथे राशीकृत्य जनानाकार्योक्तं । 'यः कूपादिजलज्वलनस्त्रीस्पर्शं यावज्जीवं वर्जयति स एव एतद् गृह्णातु' । तैर्विमृश्योक्तम्- 'कोटीत्रयं त्यक्तुं शक्यं न तु जलादित्रयम्' । ततो मन्त्रिणोक्तम्, ''रे जडाः ! तर्हि द्रमकमुनिं किं हसत ? असौ जलादित्रयत्यागात्कोटित्रयाधिकत्यागी ।'' ततो जनैः प्रतिबुद्धैः क्षमितोऽसौ । इत्यसद्वस्तुत्यागे ज्ञातम् । तस्मादसम्भवद्वस्तूनामपि नियमा ग्राह्याः, अन्यथा तु तत्तद्वस्त्वग्रहणेऽपि पशूनामिवाविरतत्वं तत्तन्नियमफलेन च वञ्च्यते । यदाह भर्तृहरिः–

**क्षान्तं न क्षमया गृहोचितसुखं त्यक्तं न सन्तोषतः, सोढा दुस्सहशीतवाततपनक्लेशा न तप्तं तपः ।**
**ध्यातं वित्तमहर्निशं नियमितप्राणैर्न मुक्तेः पदं, तत्तत्कर्म कृतं यदेव मुनिभिस्तैस्तैः फलैर्वञ्चिताः ॥**

न हि सकृद्भोज्यपि प्रत्याख्यानोच्चारं विनैकाशनादिफलं लभते । जनेऽपि न हि बहुद्रव्यस्य बहुसमयं व्यापारेणाऽप्युक्तं विना कलान्तरं स्वल्पमप्याप्यते । असम्भवद्वस्तुनोऽपि नियमग्रहणे च कदाचित् कथञ्चित्तद्योगेऽपि नियमबद्धस्तन्न गृह्णात्येव, अगृह्णात्यपीति व्यक्तं नियमफलम् । यथा गुरुदत्तनियमबद्धेन वङ्कचूलपल्लीपतिना क्षुधार्त्तेनाव्टव्यां किंपाकफलान्यज्ञातनामानि सार्थिकैर्बहु बहु प्रेरितेनापि न जग्धानि । सार्थिकैस्तु जग्धानि । मृताश्च त इति । प्रतिचातुर्मासकमित्युपलक्षणम् । तेन पक्षमेकद्वित्रिमासानेकद्व्यादिवर्षाणि वा यावद्यथाशक्ति नियमाः स्वीकार्याः । यो यावदवधि यथा पालयितुं शक्नोति स तावदवधि तथा समुचितनियमानङ्गीकुर्यान्न त्वनियमित एव क्षणमपि तिष्ठेद्विरतेर्महाफलत्वादविरतेश्च बहुकर्मबन्धादि-महादोषादित्याद्युक्तं प्राक् । अत्र च ये नित्यनियमाः प्रागुक्तास्ते विशिष्य वर्षासु ग्राह्याः । तत्र द्वित्रिर्वा पूजाष्टभेदपूजा, सम्पूर्णदेववन्दनं, चैत्ये सर्वबिम्बानामर्चनं वन्दनं वा, स्नात्रमहमहापूजाप्रभावनादि, गुरोर्वृहद्वन्दनं, सर्वसाधूनां प्रत्येकवन्दनं, चतुर्विंशतिलोगस्सोत्सर्गः, अपूर्वज्ञानपाठादि, विश्रामणा, ब्रह्म, प्रासुकनीरं, सच्चित्तत्यागः, पर्युषित-द्विदल-पूपिका-पर्पट-वटिकादि-शुष्कशाक-तन्दुलीयकादिपत्रशाक-टुप्परक-खारिकि-खर्जूर-द्राक्षाखण्ड-शुण्ठ्यादीना फुल्लिकुन्थ्विलिकादिसंसक्ति-सम्भवात्त्यागः । औषधादिविशेषकार्ये तु सम्यक्शोधनादियतनयैव तेषां ग्रहणम् । यथाशक्ति खट्वा-स्नान-शिरोगुंफन-

दन्तकाष्ठोपानहादित्यागः । भूखनन-वस्त्रादिरञ्जन-शकटादिखेटन-ग्रामान्तरगमनादिनिषेधः । गृहहट्ट-भित्तिस्तंभ-खट्वा-कपाट-पट्ट-पट्टक-पट्टिक-सिक्कक-घृततैलजलादिभाण्डभाजनेन्धन-धान्यादिसर्ववस्तूनां पनकादिसंसक्तिरक्षार्थं चूर्णकरक्षादिखरण्टन-मलापनयनातपमोचनाशीतलस्थानस्थापनादिना जलस्य द्विस्त्रिर्गालनादिना लेहगुडतक्रजलादीनां सम्यक्स्थगनादिनाऽवश्रावण-स्नानजलादीनां पनकाद्यसंसक्तरजोबहुलभूमौ पृथक् पृथक् स्तोकस्तोकत्यागेन चुल्लीदीपादेरनुद्घाटमोचनेन कण्डनपेषणरन्धनवस्त्र-भाजनादिक्षालनादौ सम्यक्प्रत्युपेक्षणेन चैत्यशालादेरपि विलोक्यमानसमारचनेन यथार्हयतना । यथाशक्त्युपधानमासादि-प्रतिमाकषायेन्द्रियजययोगशुद्धिविंशतिस्थानकामृताष्टम्येकादशाङ्गचतुर्दशपूर्वतपोनमस्कारफलचतुर्विंशतिकाऽक्षयनिधिदमयन्ती-भद्रमहाभद्राद्योलीसंसारतारणाष्टाह्निकापक्षक्षपणमासक्षपणादिविशेषतपः । रात्रौ चतुर्विधाहारं त्रिविधाहारं वा प्रत्याख्यानम् । पर्वसु विकृतित्यागपौषधोपवासादि । नित्यं पारणे वा संविभाग इत्यादि । चतुर्मास्यभिग्रहाश्च पूर्वाचार्यैरेवमुक्ताः—

**चाउम्मासिअभिग्गह, नाणे तह दंसणे चरित्ते अ । तव विरिआयारंमि अ, दव्वाइ अणेगहा हुंति ॥**

**परिवाडी सज्झाओ, देसणसवणं च चिंतणी चेव । सत्तीए कायव्वं, सिअपंचमिनाणपूआ य ॥**

**संमज्जणोवलेवणगूंहलियामंडणं च चिइभवणे । चेइअपूआवंदण, निम्मलकरणं च बिंबाणं ॥**

**चारित्तंमि जलोआजुआगंडोलपाडणं चेव । वणकीडखारदाणं, इंधणजलणन्नतसरक्खा ॥**

**वज्जइ अब्भक्खाणं, अक्कोसं तह य रुक्खवयणं च । देवगुरुसवहकरणं पेसुन्नं परपरीवायं ॥**

पिइमाइदिट्ठिवंचण, जयणं निहिसुंकपडिअविसयंमि । दिणिबंभरयणिवेलापरनरसेवाइपरिहारो ॥
धणधन्नाई नवविहइच्छामाणंमि नियमसंखेवो । परपेसणसंदेसयअहगमणाइअ दिसिमाणे ॥
न्हाणंगरायधूवणविलेवणाहरणफुल्लतंबोलं । घणसारागुरुकुंकुमपोहिसमयनाहिपरिमाणं ॥
मंजिट्ठलक्खकोसुंभगुलियरागाण वत्थपरिमाणं । रयणं वज्जे मणिकणगरुप्पमुत्ताइ परिमाणं ॥
जंबीरअंबजंबुअराइणनारिंगबीजपूराणं । कक्कडिअखोडवायमकविट्ठटिंबरुअबिल्लाणं ॥
खज्जूरदक्खदाडिमउत्तत्तियनालिकेरकेलाइं । चिंचिणिअबोरबिल्लुअफलचिब्भडचिब्भडीणं च ॥
कयरकरमंदयाणं भोरडनिंबूअअंबिलीणं च । अत्थाणं अंकूरिअनाणाविहफुल्लपत्ताणं ॥
सच्चित्तं बहुबीअं, अणंतकायं च वज्जए कमसो । विगई विगइगयाणं, दव्वाणं कुणइ परिमाणं ॥
अंसुअधोअणलिंपणक्खत्तक्खणणं च न्हाणदाणं च । जुआकड्ढणमन्नस्स, खित्तकज्जं च बहुभेअं ॥
खंडणपीसणमाईण कूडसक्खाइ कुणइ संखेवं । जलझिल्लणन्नरंधणउव्वट्टणमाइआणं च ॥
देसावग्गासिअवए, पुढवीखणणे जलस्स आणयणे । तह चीरधोअणह्लाणपिअण जलणस्स जालणए ॥
तह दीवबोहणे वायबीअणे हरिअछिंदणे चेव । अणिबद्धजंपणे गुरुजणेण य अदत्तए गहणे ॥

**पुरिसासणसयणीए, तह संभासणपलोवणाईसु । ववहारे परिमाणं, दिसिमाणं भोगपरिभोगे ॥**
**तह सव्वणत्थदंडे, सामाइअपोसहेऽतिहिविभागे । सव्वेसु वि संखेवं, काहं पइदिवसपरिमाणं ॥**
**खंडणपीसणरंधणभुंजणविक्खणणवत्थरयणं च । कत्तणपिंजणलोढणधवलणलिंपण य सोहणए ॥**
**वाहणरोहणलिक्खाइजोअणे वाणहाणपरिभोगे । निंन्नणणलुणणउंछणरंधणदलणाइकम्मे अ ॥**
**संवरणं कायव्वं, दहसंभवमणुदिणं तहा पढमे । जिणभवणदंसणे सुणणगुणण जिणभवणकिच्चे अ ॥**
**अट्ठमिचउद्दसीसुं, कल्लाणतिहीसु तवविसेसेसु । काहामि उज्जममहं, धम्मत्थं वरिसमज्झंमि ॥**
**धम्मत्थं मुहपुत्ती, जलछाणणओसहाइदाणं च । साहम्मिअवच्छल्लं, जहसत्तिगुरूण विणओ अ ॥**
**मासे मासे सामाइयं च वरिसंमि पोसहं तु तहा । काहामि ससत्तीए, अतिहीणं संविभागं च ॥**

इति श्राद्धश्राविकाचतुर्मासीनियमगाथाः ॥

अत्र ज्ञातम् । यथा विजयपुरे विजयसेनो नृपो बहुपुत्रो विजयश्रीपुत्रं राज्ययोग्यं मत्वा मैषोऽन्यैर्मार्यतामिति न सन्मानयति। ततः स दूनो दध्यौ !—

**पादाहतं यदुत्थाय, मूर्द्धानमधिरोहति । स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः ॥** इत्युक्तेः ।

किं ममात्र स्थित्या ? यामि देशान्तरम् । यतः—

**निग्गंतूण गिहाओ, जो न निअइ पुहइमंडलमसेसं । अच्छेरयसयरम्मं, सो पुरिसो कूवमंडुक्को ॥**

**नज्जंति चित्तभासा, तह य विचित्ता उ देसनीईओ । अच्चब्भुआई बहुसो, दीसंति महिं भमंतेहिं ॥**

ततो रहः खड्गहस्तो निशि निर्गतोऽसौ पृथ्व्यां स्वैरभ्रमी कदाचिदरण्ये मध्याह्ने क्षुत्तृडाक्रान्तो यावज्जज्ञे, तावदेकेन सर्वाङ्गालङ्कृतदिव्यनरेण सस्नेहमालाप्य तस्मै रत्नमेकं सर्वोपद्रवचारकं द्वितीयं च सर्वेष्टसाधकं दत्तम् । कोऽसीति कुमारेण पृष्टे तेनोक्तम्,—'स्वपुरे प्राप्ते मुनिगिरा मच्चरित्रं ज्ञास्यसि' । ततः स तद्रत्नमहिम्ना सर्वत्र स्वैरं विलसन् कुसुमपुरेशदेव-शर्मनरेशस्याक्ष्णोर्व्यर्थां तीव्रां पटहोद्घोषाज्ज्ञात्वा रत्नमहिम्नाऽपजह्रे । तुष्टो राजा राज्यं पुण्यश्रियं पुत्रीं च दत्त्वा निष्क्रान्तः । पिताऽप्यथ स्वपट्टे तं न्यस्य निष्क्रान्तः । एवं राज्यद्वयं स भुङ्क्ते । अन्यदा त्रिज्ञानी देवशर्मराजर्षिस्तस्य प्राग्भवं प्राह । क्षेमापुर्यां श्रेष्ठिसुव्रतो गुरुपार्श्वे यथाशक्ति चतुर्मासीनियमान् स्वीचक्रे । तद्भृत्यस्तु रात्र्यशनं मधुमद्यमांसाशनं च प्रतिवर्षं वर्षाचतुर्मास्यां नियमितवान् । स मृत्वा त्वं जातः । सुव्रतस्तु महर्द्धिसुरः । तेन प्राच्यस्नेहात्ते रत्नद्वयं दत्तम् । ततो जातिं स्मृत्वा नानानियमान् प्रपाल्य नृपः स्वः प्राप्तो विदेहेषु च्युत्वा सेत्स्यति । इति चतुर्मासीनियमे कथा ॥ लोकेऽप्युक्तमिदम्—

यथा वशिष्ठ उवाच—

कथं स्वपिति देवेशः ? पद्मोद्भव ! महार्णवे । सुप्ते च कानि वर्ज्यानि ? वर्जितेषु च किं फलम् ? ॥
नायं स्वपिति देवेशो, न देवः प्रतिबुध्यते । उपचारो हरेरेवं, क्रियते जलदागमे ॥
योगस्थे च हृषीकेशे, यद्वर्ज्यं तन्निशामय । प्रवासं नैत्र कुर्वीत, मृत्तिकां नैव खानयेत् ॥
वृन्ताकान् राजमाषांश्च, वल्लकुलत्थांश्च तूवरीम् । कलिङ्गानि त्यजेद्यस्तु, मूलकं तन्दुलीयकम् ॥
एकान्नेन महीपाल ! चातुर्मास्यं निषेवते । चतुर्भुजो नरो भूत्वा, प्रयाति परमं पदम् ॥
नक्तं न भोजयेद्यस्तु, चातुर्मास्ये विशेषतः । सर्वकामानवाप्नोति, इह लोके परत्र च ॥
यस्तु सुप्ते हृषीकेशे, मद्यमांसानि वर्जयेत् । मासे मासेऽश्वमेधेन, स यजेच्च शतं समाः ॥ इत्यादि ।
तथा मार्कण्डेय उवाच–
तैलाभ्यङ्गं नरो यस्तु, न करोति नराधिप ! । बहुपुत्रधनैर्युक्तो, रोगहीनस्तु जायते ॥
पुष्पादिभोगसन्त्यागात् स्वर्गलोके महीयते । कट्वम्लतिक्तमधुरकषायक्षारजान् रसान् ॥
यो वर्जयेत् स वैरूप्यं, दौर्भाग्यं नाप्नुयात्क्वचित् । ताम्बूलवर्जनाद्राजन् ! भोगी लावण्यमाप्नुयात् ॥
फलपत्रादिशाकं च, त्यक्त्वा पुत्रधनान्वितः । मधुस्वरो भवेद्राजन्नरो वै गुडवर्जनात् ॥

लभते सन्ततिं दीर्घां, तापीपक्वस्य वर्जनात् । भूमौ संस्तरशायी च, विष्णोरनुचरो भवेत् ॥
दधिदुग्धपरित्यागाद् गोलोकं लभते नरः । यामद्वयं जलत्यागान्न रोगैः परिभूयते ॥
एकान्तरोपवासी च, ब्रह्मलोके महीयते । धारणान्नख-लोमानां, गङ्गास्नानं दिने दिने ॥
परान्नं वर्जयेद्यस्तु, तस्य पुण्यमनन्तकम् । भुञ्जते केवलं पापं, यो मौनेन न भुञ्जते ॥
उपवासस्य नियमं, सर्वदा मौनभोजनम् । तस्मात् सर्वप्रयत्नेन, चातुर्मास्ये व्रती भवेत् ॥ इत्यादि भविष्योत्तरपुराणे ।

॥ इति श्रीतपागच्छाधिपश्रीसोमसुन्दरसूरि-श्रीमुनिसुन्दरसूरि-श्रीजयचन्द्रसूरि-श्रीभुवनसुन्दरसूरिशिष्य-
श्रीरत्नशेखरसूरिविरचितायां विधिकौमुदीनाम्न्यां श्रीश्राद्धविधिप्रकरणवृत्तौ
चतुर्मासीकृत्यप्रकाशकश्चतुर्थः प्रकाशः ॥

## पञ्चमः प्रकाशः

उक्तं चतुर्मासीकृत्यमथ वर्षकृत्यमुत्तरार्द्धेनोत्तरगाथया चैकादशद्वारैराह–

**पइवरिसं संघच्चण–साहम्मिअभत्ति–जत्ततिगं ॥१२॥**

**जिणगिहिण्हवणं जिणधणवुड्ढी–महपूअ–धम्मजागरिआ ।**
**सुअपूआ उज्जवणं, तह तित्थपभावणा सोही ॥१३॥**

**प्रतिवर्षं** वर्षे वर्षे जघन्यतोऽप्येकैकवारं **सङ्घार्चनं** चतुर्विधश्रीसङ्घपूजा **साधर्मिकभक्तिः** साधर्मिकवात्सल्यं **यात्रात्रिकं** तीर्थयात्रारथयात्राऽष्टाह्निकायात्रारूपं **जिनगृहे स्नपनमहः, जिनधनस्य** देवद्रव्यस्य **वृद्धिर्**मालोद्घट्टनेन्द्रमालादिपरिधानपरिधापनिकाधौतिकादिमोचनद्रव्योत्सर्पणपूर्वकाराऽऽत्रिकविधानादिना, **महापूजा,** रात्रौ **धर्मजागर्या, श्रुत**ज्ञानविशेष**पूजा,** विविधमुद्यापनं, तथा **तीर्थस्य** जिनशासनस्य **प्रभावना, शोधिरा**लोचना चेति विशेषधर्मकृत्यानि यथाशक्ति श्राद्धेन विधेयानीति शेषः ।

(१) तत्र सङ्घपूजायां निजविभवकुलाद्यनुसारेण भृशादरबहुमानाभ्यां साधुसाध्वीयोग्यमाधाकर्मक्रीतादिदोषैरदूषितं वस्त्र–

कम्बलप्रोञ्छनसूत्रोर्णा-पात्रोदङ्ककतुम्बक-दण्डक-दण्डिका-सूचीकण्टक-कर्षण-कागद-कुंपक-लेखनीकलापक-पुस्तादिकं श्रीगुरुभ्यो दत्ते । यद्दिनकृत्यसूत्रम्—

**वत्थं पत्तं च पुत्थं च, कंबलं पायपुंछणं । दंडं संधारयं सिज्जं, अन्नं जं किंचि सुज्झई ॥**

'**पुत्थंति**' पुस्तकं पञ्चविधमप्यापवादिकम् । '**अन्नंति**' अन्यदप्यौघिकौपग्रहिकभेदभिन्नं मुखवस्त्रिकादण्डप्रोञ्छनकादिकं यच्छुध्यति संयमोपकारे वर्त्तते । तदुक्तं—

**जं वट्टइ उवयारे, उवगरणं तंसि होइ उवगरणं । अइरेगं अहिगरणं, अजओ अजयं परिहरंतो ॥**

'**परिहरंतो**' इति आसेवमानः '**परिहारो परिभोगो**' इति वचनात् । ततोऽग्रतश्च यत्परिभुञ्जानो भवतीत्यर्थ इति प्रवचन-सारोद्धारवृत्तौ । एवं च प्रातिहारिकपीठफलकपट्टिकाद्यपि संयमोपकारि सर्वं साधुभ्यः श्रद्धया देयम् । सूच्यादीनामुपकरणत्वं श्रीकल्पेऽप्युक्तं यथा—

**असणाई वत्थाई सूआइ चउक्कगा तिन्नि** । अशनादीनि वस्त्रादीनि सूच्यादीनि चेति त्रीणि चतुष्कानि द्वादश । यथा अशनं पानं स्वादिमं स्वादिमं वस्त्रं पात्रं कंबलं पादप्रोञ्छनं सूची पिप्पलको नखच्छेदनकं कर्णशोधनकं चेति । एवं श्राद्धश्राविकासङ्घमपि यथाशक्ति सभक्ति परिधापनादिना सत्करोति, यथोचितं च देवगुर्वादिगुणगायकान् याचकादीनपि ।

सङ्घार्चा च त्रिधा, उत्कृष्टा मध्यमा जघन्या च । सर्वदर्शनसर्वसङ्घपरिधापने उत्कृष्टा । सूत्रमात्रादिना जघन्या । शेषा मध्यमा। तत्राधिकं व्ययितुमशक्तोऽपि गुरुभ्यः सूत्रमुखवस्त्रिकादिकं द्वित्रिश्राद्धश्राद्धीभ्यः पूगादि च दत्वा प्रतिवर्षं सङ्घार्चाकृत्यं भक्त्या सत्यापयति। निःस्वस्य च तावदपि महाफलम् । यतः—

**संपत्तौ नियमः शक्तौ सहनं यौवने व्रतम् । दारिद्र्ये दानमप्यल्पं, महालाभाय जायते ॥१॥**

मन्त्रिवस्तुपालादीनां तु प्रतिचातुर्मासकं सर्वगच्छसङ्घार्चाविधानादि श्रूयते भूयस्तरवित्तव्ययादि च । ढिल्ल्यां साधुजगसी-सुतसाधुमहणसिंहेन श्रीतपागच्छाधिपपूज्यश्रीदेवसुन्दरसूरिभक्तेनैकस्यामेव सङ्घार्चायां सर्वदर्शनसङ्घपरिधापनादिना चतुरशीति-सहस्रटङ्ककव्ययः कृतः । द्वितीयस्मिन्नेव दिने प्राप्तानां प्राक् तदाकारितश्रीगुरुप्रहितपण्डितदेवमङ्गलगणीनां प्रवेशे सङ्क्षिप्त-सङ्घार्चायां पुनः षट्पञ्चाशट्टङ्ककसहस्री व्ययितेत्यादि श्रूयते । इति सङ्घार्चाविधिः ।

(२) साधर्मिकाणां वात्सल्यमपि सर्वेषां कियतां वा यथाशक्ति कार्यम् । समानधर्माणो हि प्रायेण दुष्प्रापाः । यदवादिष्म—

**सर्वैः सर्वे मिथः सर्वसम्बन्धाः लब्धपूर्विणः । साधर्मिकादिसम्बन्धलब्धारस्तु मिताः क्वचित् ॥**

तेषां च सङ्गमो हि महते पुण्याय किं पुनस्तदनुरूपा प्रतिपत्तिः ? यतः—

**एगत्थ सव्वधम्मा, साहम्मियवच्छलं तु एगत्थ । बुद्धितुलाए तुलिया, दो वि अ तुल्लाइं भणिआइं ॥**

तत्प्रतिपत्तिश्चैवं, स्वपुत्रादिजन्मोत्सवे विवाहेऽन्यस्मिन्नपि प्रकरणे साधर्मिकाणां निमन्त्रणं विशिष्टभोजनताम्बूल-वस्त्राभरणादिदानमापन्निमग्नानाञ्च स्वधनव्ययेनाऽप्यभ्युद्धरणं । अन्तरायदोषाच्च विभवक्षये पुनः पूर्वभूमिकाप्रापणम् । किं हि तस्य प्रौढिम्ना यः समानसाधर्मिकान् समृद्धान् न कुरुते । उक्तमपि–

**न कयं दीणुद्धरणं, न कयं साहम्मिआण वच्छल्लं । हिअयम्मि वीअराओ, न धारिओ हारिओ जम्मो ॥**

धर्मे च विषीदतां तेषां तेन तेन प्रकारेण धर्मे स्थैर्यारोपणम् । प्रमाद्यतां च स्मारणवारणनोदनप्रतिनोदनादिकरणम् । यतः–

**पम्हट्ठे सारणा वुत्ता, अणायारस्स वारणा । चुक्काणं चोअणा भुज्जो, निट्ठुरं पडिचोअणा ॥**

तथा तेषां वाचनाप्रच्छनापरिवर्त्तनानुप्रेक्षाधर्मकथादिषु यथायोगं विनियोजनम् । विशिष्टधर्मानुष्ठानकरणार्थं साधारण-पौषधशालादेः कारणमित्यादि । श्राविकास्वपि वात्सल्यं श्रावकवदन्यूनातिरिक्तमुन्नेतव्यम् । ता अपि ज्ञानदर्शनचारित्रवत्यः शीलसन्तोषप्रधानाः सधवा विधवा वा जिनशासनानुरक्तमनसः साधर्मिकत्वेन मान्याः । ननु स्त्रियो लोके लोकोत्तरे च दोषभाजनत्वेनैव प्रसिद्धाः एताः खल्वभूमिका विषकन्दल्यः, अनभ्रसम्भवा वज्राशनयः, अनौषधा व्याधयः, अकारणो मृत्युः, अनिमित्त उत्पातः, अफणाः सर्पिण्यः, अकन्दरा व्याघ्र्यः, प्रत्यक्षराक्षस्यः, गुरुबन्धुस्नेहविघातहेतवः, असत्यमायादिबहुलाः । यदुक्तं–

**अनृतं साहसं माया, मूर्खत्वमतिलोभता । अशौचं निर्दयत्वं च, स्त्रीणां दोषाः स्वभावजाः ॥**

**अणंतपावरासीओ, जया उदयमागया । तया इत्थीत्तणं पत्तं, सम्मं जाणाहि गोअमा ! ॥**

सर्वशास्त्रेष्वपि प्रायः पदे पदे तासां निन्दा दृश्यते, अतस्ता दूरतः परिहार्याः, तत्कथं तासु दानसन्मानवात्सल्यविधानं युक्तम् ? उच्यते,—

नायमेकान्तो यत् स्त्रिय एव दोषबहुलाः, पुरुषेष्वपि समानमेतत्, तेऽपि क्रूराशया दोषबहुला नास्तिकाः कृतघ्नाः स्वामिद्रोहिणो विश्वस्तघातिनोऽसत्यवादिनोऽन्यधनस्त्रीप्रसक्ता निर्दया देवगुरुवञ्चकाश्च भूयांसोऽपि दृश्यन्ते । न च तद्दर्शनेन महापुरुषाणामवज्ञा कर्त्तुं युज्यते । एवं स्त्रीणामपि । यद्यपि कासाञ्चिद् दोषबहुलत्वमुपलभ्यते, तथापि कासाञ्चिद् गुणबहुलत्वमप्यस्ति । तीर्थकरजनन्यो हि स्त्रीत्वेऽपि तद्गुणगरिमयोगितया सुरेन्द्रैरपि पूज्यन्ते मुनीन्द्रैरपि स्तूयन्ते । लौकिका अप्याहुः—

**निरतिशयं गरिमाणं, तेन युवत्या वदन्ति विद्वांसः । तं कमपि वहति गर्भं, जगतामपि यो गुरुर्भवति ॥**

काश्चन स्वशीलप्रभावादनलं जलमिव, जलं स्थलमिव, व्यालान् शृगालानिव, विषधरं रज्जुमिव, विषममृतमिव कुर्वन्ति । चतुर्वर्णे च सङ्घे चतुर्थभङ्गं श्राविका एव । शास्त्रे च तासां निन्दाभूयस्त्वं तदासक्तिपराणां तन्निवृत्तिपरमेव । सुलसाप्रभृतयो हि श्राविकास्तीर्थकरैरपि प्रशस्यगुणाः, सुरेन्द्रैरपिस्वर्गभूमिषु श्लाघितधर्मदार्ढ्याः, प्रबलमिथ्यात्वैरप्यक्षोभ्यसम्यक्त्वसंपदः, काश्चिच्च-

रमदेहाः, काश्चिद् द्वित्रादिभवान्तरितमोक्षगमनाः, शास्त्रेषु श्रूयन्ते । तदासां जननीनामिव, भगिनीनामिव, स्वपुत्रीणामिव वात्सल्यं युक्तियुक्तमेवेत्यलं प्रसङ्गेन ।

साधर्मिकवात्सल्येनैव च राज्ञामतिथिसंविभागव्रताराधनं, राजपिण्डस्य मुनीनामकल्प्यत्वात् । अत्र च भरतान्वये त्रिखण्डाधिपदण्डवीर्यदृष्टान्तो यथा–तं साधर्मिकभोजनपूर्वमेव सर्वदा भुञ्जानं परीक्षितुमन्यदेन्द्रः सुश्राद्धान् कोटिमितांस्तीर्थागतान् त्रिरत्नीद्वादशव्रतीसूचककाञ्चनसूत्रत्रिकतिलकद्वादशकालङ्कृतान् भरतकृतचतुर्वेदीवावदूकवदनान् दर्शयामास । तांश्च सभक्ति निमन्त्र्य भोजयत एव भूभुजो भास्वानस्तमितः । एवं राज्ञ उपवासाष्टकभवनेऽपि साधर्मिकभक्तिः प्रवर्द्धमानवयस्कशक्ति-रिवाऽधिकाऽधिकैवाऽभवत् । ततस्तुष्टः शक्रस्तस्मै दिव्यधनुः शररथहारकुण्डलयुगलदानपूर्वं शत्रुञ्जययात्रार्थं तीर्थोद्धारार्थं चादि-देश। सोऽपि तथा चक्रे । श्रीसम्भवजिनेन प्राक्तृतीयभवे धातकीखण्ड ऐरावते क्षेत्रे क्षेमापुर्यां विमलवाहननृपत्वे महादुर्भिक्षे सकलसाधर्मिकाणां भोजनादिप्रदानेन जिनकर्म बद्धम् । ततः स प्रव्रज्याऽऽनतकल्पे सुरीभूय सम्भवजिनोऽजनि । तस्य चावतरणे फाल्गुनशुक्लाष्टम्यां जाते महादुर्भिक्षेऽपि तद्दिन एव सर्वतोऽप्यागतसमस्तधान्यानां सम्भवो बभूवेति सम्भवनाम प्रतिष्ठितम् । यद् बृहद्भाष्ये—

**सं सोक्खंति पवुच्चइ, दिट्ठे तं होइ सव्वजीवाणं । तो संभवो जिणेसो, सव्वे विहु संभवा एवं ॥**

**भन्नंति भुवणगुरुणो, नवरं अन्नंपि कारणं अत्थि । सावत्थी नयरीए, कयाइ कालस्स दोसेणं ॥**

**जाए दुब्भिक्खभरे दुत्थीभूए जणे समत्थेवि । अवयरिओ एस जिणो, सेणादेवीइ उअरंमि ॥**

**सयमेवागम्म सुराहिवेणं संपूइआ तओ जणणी । वद्धाविआ य भुवणिक्कभाणुतणयस्स लाभेणं ॥**

**तद्दिअहं चिअ सहसा, समत्थसत्थेहिं धन्नपुन्नेहिं । सव्वत्तो इंतेहिं, सुहं सुभक्खं तहिं जायं ॥**

**संभविआइं जम्हा, समत्तसस्साइं संभवे तस्स । तो संभवोत्ति नामं, पइट्ठिअं जणणिजणएहिं ॥**

देवगिरौ साधुजगसिंहः स्वसमीकृतषष्ठ्यधिकत्रिशतीवणिक्पुत्रपार्श्वात् प्रत्यहं साधर्मिवात्सल्यं द्वासप्तकङ्कतिसहस्रव्ययेनैकैकं व्यधापयत् । एवं प्रतिवर्षं तस्य षष्ठ्यधिकत्रिशतीसाधर्मिकवात्सल्यान्यभूवन् । थिरापद्रे श्रीश्रीमालआभूः सङ्घपतिः षष्ठ्यधिकत्रिशतीसाधर्मिकान् स्वतुल्यांश्चक्रे । यतः–

**किं तेन हेमगिरिणा रजताद्रिणा वा, यावाश्रिता हि तरवस्तरवस्त एव ।**
**मन्यामहे मलयपर्वतमेकमेव, यत्राम्रनिम्बकुटजा अपि चन्दनानि ॥**

साधुसारङ्गः पञ्चपरमेष्ठिमन्त्रपाठिभ्यः प्रवाहेण हैमटङ्ककं प्रत्येकं प्रददे । एकस्य चारणस्य पुनः पुनः पठेत्युक्तेर्नववार-नमस्कारपाठिनो नव सौवर्णान् ददौ । इति साधर्मिकवात्सल्यविधिः ।

(३) तथा प्रतिवर्षं जघन्यतोऽप्येकैका यात्रा कार्या । यात्रा च त्रिधा । यदुक्तम्–

**अष्टाह्निकाभिधामेकां, रथयात्रामथापराम् । तृतीयां तीर्थयात्रां चेत्याहुर्यात्रां त्रिधा बुधाः ॥**

तत्राष्टाह्निकास्वरूपं प्रागुक्तम् । तासु सविस्तरं सर्वचैत्यपरिपाटीकरणाद्यष्टाह्निका यात्रा । इयं चैत्ययात्राऽप्युच्यते । रथयात्रा तु हैमपरिशिष्टपर्वण्येवमुक्ता च—

**सुहस्त्याचार्यपादानामवन्त्यामेव तस्थुषाम् । चैत्ययात्रोत्सवश्चक्रे सङ्घेनान्यत्र वत्सरे ॥**

**मण्डपं चैत्ययात्रायां सुहस्ती भगवानपि । एत्य नित्यमलञ्चक्रे श्रीसङ्घेन समन्वितः ॥**

**सुहस्तिस्वामिनः शिष्यपरमाणुरिवाग्रतः । कृताञ्जलिस्तत्र नित्यं निषसाद च संप्रति ॥**

**यात्रोत्सवान्ते सङ्घेन रथयात्रा प्रचक्रमे । यात्रोत्सवो हि भवति संपूर्णो रथयात्रया ॥**

**रथोऽथ रथशालाया दिवाकररथोपमः । निर्ययौ स्वर्णमाणिक्यद्युतिद्योतितदिङ्मुखः ॥**

**श्रीमदर्हत्प्रतिमाया रथस्थाया महर्द्धिभिः । विधिज्ञैः स्नात्रपूजादि श्रावकैरुपचक्रमे ॥**

**क्रियमाणेऽर्हतः स्नात्रे स्नात्राम्भो न्यपतद्रथात् । जन्मकल्याणके पूर्वं सुमेरुशिखरादिव ॥**

**श्राद्धैः सुगन्धिभिर्द्रव्यैः प्रतिमाया विलेपनम् । स्वामिविज्ञिप्सुभिरिवाकारि वक्त्राहितांशुकैः ॥**

**मालतीशतपत्रादिदाममिः प्रतिमाऽर्हतः । पूजिताऽभात् कलेवेन्दोर्भृता शारदवारिदैः ॥**

**दह्यमानागरूत्थाभिर्धूमलेखाभिरावृता । अशुभत् प्रतिमा नीलवासोभिरिव पूजिता ॥**

**आरात्रिकं जिनार्चायाः कृतं श्राद्धैर्ज्वलच्छिखम् । दीप्यमानौषधिचक्रशैलशृङ्गविडम्बकम् ॥**

**वन्दित्वा श्रीमदर्हन्तमथ तैः परमार्हतैः । रथ्यैरिवाग्रतो भूयः स्वयमाचकृषे रथः ॥**

**नागरीभिरुपक्रान्तसहल्लीसकरासकः । चतुर्विधातोद्यवाद्यसुन्दरप्रेक्षणीयकः ॥**

**परितः श्राविकालोकगीयमानोरुमङ्गलः । प्रतीच्छन् विविधां पूजां प्रत्यहं प्रतिमन्दिरम् ॥**

**बहुलैः कङ्कुमाम्भोभिरभिषिक्ताग्रभूतलः । संप्रतेः सदनद्वारमाससाद शनै रथः ॥** त्रिभिर्विशेषकम् ॥

**राजाऽपि संप्रतिरथ रथपूजार्थमुद्यतः । आगात् पनसफलवत्सर्वाङ्गोद्भिन्नकण्टकः ॥**

**रथाधिरूढां प्रतिमां पूजयाऽष्टप्रकारया । अपूजयन्नवानन्दसरोहंसोऽवनीपतिः ॥**

महापद्मचक्रिणापि मातुर्मनोरथपूर्त्तये रथयात्राऽत्याडंबरैश्चक्रे । कुमारपालरथयात्रा त्वेवमुक्ता—

**चित्तस्स अट्ठमिदिणे चउत्थमिदिणे चउत्थपहरे महाविभूईए । सहरिसमिलंतनायरजणकयमंगल्लजयसद्दो ॥**

**सोवन्नजिणवररहो, नीहरइ चलंतसुरगिरिसमाणो । कणगोरुदंडधयछत्तचमरराईहिं दिप्पंतो ॥**

**ण्हविअविलित्तं कुसुमोहपूइअं तत्थ पासजिणपडिमं । कुमरविहारदुवारे, महायणो ठवइ रिद्धीए ॥**

**तूररववरिअभुवणो, सरभसनच्चंतचारुतरुणिगणो । सामंतमंतिसहिओ, वच्चइ नवमंदिरम्मि रहो ॥**

**रायारहत्थपडिमं, पट्टंसुअकणयभूसणाईहिं । सयमेव अच्चिउं कारवेइ विविहाइं नट्टाइं ॥**

**तत्थ गमिऊण रयणिं, नीहरिउं सीहबारबाहिंमि । ठाइ एवं चिअ धयतंडवम्मि पडमंडवम्मि रहो ॥**

**तत्थ पहाए राया, रहजिणपडिमाइ विरइउं पूअं । चउविहसंघसमक्खं, सयमेवारत्तिअं कुणइ ॥**

**तत्तो नयरंमि रहो, परिसक्कइ कुंजरेहिं जुत्तेहिं । ठाणे ठाणे पडमंडवेसु विउलेसु चिट्ठंतो ॥** इत्यादि ।

अथ तीर्थयात्रास्वरूपम् । तत्र तीर्थानि श्रीशत्रुञ्जयश्रीरैवतादीनि । तथा तीर्थकृज्जन्मदीक्षाज्ञाननिर्वाणविहारभूमयोऽपि प्रभूतभव्यसत्वशुभभावसंपादकत्वेन भवाम्भोनिधितारणात् तीर्थान्युच्यन्ते । तेषु सद्दर्शनविशुद्धिप्रभावनाद्यर्थं विधिवद्यात्रागमनं तीर्थयात्रा । तत्रायं विधिः—

प्रथमं प्रतिपद्यते यात्रावधिकाहारसचित्तपरिहारभूशयनब्रह्मव्रतादिगाढाभिग्रहान् । पर्यङ्किकावर्याऽश्व-पल्यङ्कादिसमग्र-सामग्रीसद्भावेऽपि यात्रिकस्य प्रौढश्रावकस्यापि शक्तौ पदचरणाद्यौचित्यम् । यदवोचाम—

**एकाहारी दर्शनधारी यात्रासु भूशयनकारी । सच्चित्तपरिहारी पदचारी ब्रह्मचारी च ।** लौकिकैरप्युक्तं—

**यानमर्द्धफलं हन्ति तुरीयांसमुपानहौ । तृतीयांशमवपनं सर्वं हन्ति प्रतिग्रहः ॥**

**एकभक्ताशिना भाव्यं तथा स्थण्डिलशायिना । तीर्थानि गच्छता नित्यमप्यृतौ ब्रह्मचारिणा ॥**

तदनु यथार्हदानादिना सन्तोष्याऽनुज्ञापयति क्ष्मापतिम् । प्रगुणीकरोति च यथाशक्ति युक्तिविशिष्टान् यात्रार्थं देवालयान् । आकारयति सविनयबहुमानं स्वजनसाधर्मिकादिवर्गम् । निमन्त्रयते सभक्ति सद्गुरून् । प्रवर्त्तयत्यमारिम् । निर्मापयति चैत्यादौ महापूजादिमहोत्सवम् । ददाति निःशम्बलेभ्यः शम्बलं, निर्वाहनेभ्यो वाहनं, निराधारेभ्यः सद्वचनविभवाद्याधारम्, यथार्ह-सान्निध्यप्रदानविषयोद्घोषणापूर्वं सार्थवाह इव प्रोत्साहयति निरुत्साहमनसोऽपि, कारयति साडम्बरप्रौढतरगुरूदरचतुरक-शरावक-ततपटपटमण्डपप्रौढकटाहि-चलत्कूपसरोवरादीन्, सज्जयति शकट-सेजवालक-रथपर्यङ्किकाप्रौष्ठिककरभतुरगादीन्, आह्वयति श्रीसङ्घरक्षार्थमत्युद्भटाननेकसुभटान्, सन्मानयति कवचाङ्गकाद्युपस्कारार्पणेन तान्, प्रगुणयति गीतनृत्यवाद्यादि-समग्रसामग्रीम् । ततः करोति समुहूर्त्ते शुभशकुनमिनित्ताद्युत्साहितः प्रस्थानमङ्गलम् । तत्र मीलयति सकलसमुदायं, भोजयति विशिष्टविशिष्टतरभोज्यताम्बूलादिभिः, परिधापयति पञ्चाङ्गमडिदुकूलादिभिः । विधापयति सुप्रतिष्ठधर्मिष्ठपूज्यभाग्यवत्तरनरेभ्यः श्रीसङ्घाधिपत्यतिलकम् । विदधाति सङ्घपूजादिमहामहम् । निर्मापयत्येवमन्येभ्योऽपि यथोचितं सङ्घाधिपत्यादितिलकमहम् । स्थापयति महाधराग्रेसरपृष्ठिरक्षसङ्घाध्यक्षप्रमुखान् । प्रख्यापयति श्रीसङ्घचलनोत्तरणादिसर्वसङ्केतव्यवस्थाम् । सम्भालयति मार्गे सर्वान् सार्थिकान् । विश्राणयति तेषां शकटाङ्गभङ्गाद्यन्तराये सर्वशक्त्या सान्निध्यम् । विधत्ते प्रतिग्रामं प्रतिपुरं चैत्येषु च स्नात्रमहाध्वजप्रदानचैत्यपरिपाट्याद्यतुच्छोत्सवं जीर्णचैत्योद्धारणादिचिन्तां च । निर्मिमीते तीर्थदर्शने स्वर्णरत्नमौक्तिकादि-वर्द्धापन-

लपनेप्सितामोदकादि[1]लम्भनसाधर्मिकवात्सल्ययथोचितदानादिविधिम् । प्रौढप्रवेशोत्सवेन तीर्थप्राप्तश्च सर्वशक्त्या स्वयं कुरुते, परैश्च कारयते प्रथमहर्षपूजाढौकनादिप्रतिपत्तिमष्टोपचारादिविधिपूजां, विधिस्नात्रं, मालोद्घट्टनं, घृतधाराप्रदानं, परिधापनिका-मोचनम्, नवाङ्गजिनपूजनं, पुष्पगृहकदलीगृहादिमहापूजां, दुकूलादिमयमहाध्वजप्रदानमवारितदानं, रात्रिजागरणं, नानागीत-नृत्त्याद्युत्सवं, तीर्थोपवासषष्ठादितपः कोटिलक्षाक्षतादिविविधोद्यापनढौकनं, नानावस्तुफलशताष्टोत्तरिका-चतुर्विंशिका-द्वापञ्चाशिका-द्वासप्ततिकादिढौकनं, सर्वभक्ष्यभोज्यभृतस्थालढौकनं, दुकूलादिमयविचित्रचन्द्रोदयपरिधापनिकाङ्गरूक्षण-दीपतैलधौतिकचन्दन-केसरभोग-चङ्गेरी-पिङ्गानिका-कलश-धूपधानकारात्रिकाभरण-प्रदीप-चामर-भृङ्गार-स्थाल-कच्चोलक-घण्टाझल्लरी-पटहादि-विचित्रवाद्यादिप्रदानं, देव-कुलिकादिकारणं, सूत्रधारादिसत्कारं, तीर्थसेवां, विनश्यत्तीर्थाङ्गसमारचनं, तीर्थरक्षकबहुसन्माननं, तीर्थदायप्रवर्त्तनं, साधर्मिकवात्सल्यं, गुरुसङ्घपरिधापनादिभक्ति, जैनमार्गणदीनाद्युचितदानं चेत्यादि-धर्मकृत्यानि । न च मार्गणादीनां दानं कीर्त्तिमात्रहेतुत्वेन निष्फलं, तेषामपि देवगुरुसङ्घगुणोद्घोषितया दीयमानस्य दानस्य बहुफलत्वात् । जिनागमनवक्तुरपि चक्र्यादिभिः सार्द्धद्वादशस्वर्णकोट्यादिदानात् । तदागमः—

**वित्तीइ सुवन्नस्स य, बारस अद्धं च सयसहस्साइं । तावइअं चिअ कोडी, पीईदाणं तु चक्किस्स ॥**

१. स्तम्भन इति को० ह० प्र० पाठः ।

एवं यात्रां कृत्वा तथैव वलमानः प्रौढप्रवेशोत्सवैः स्वगृहमागतो देवाह्वानादिमहं वर्षादि यावत्तीर्थोपवासादि च कुरुते । इति यात्राविधिः ।

श्रीसिद्धसेनदिवाकरप्रबोधितविक्रमादित्यस्य श्रीशत्रुञ्जययात्रासङ्घ एकोनसप्तत्यधिकशतं सौवर्णा देवालयाः, पञ्चशती दन्तचन्दनादिमयाः श्रीसिद्धसेनाद्याः पञ्चसहस्राः सूरयः, चतुर्दश नृपा मुकुटबद्धाः, सप्ततिलक्षाणि श्राद्धकुटुम्बानि, एका कोटिर्दशलक्षाणि नवसहस्री च शकटानि, अष्टादश लक्षाणि तुरङ्गमाः, षट्सप्ततिशतानि गजाः, एवं करभवृषभाद्यपि ज्ञेयम् । श्रीकुमारपालस्य स्वर्णरत्नादिमयाश्चतुःसप्तत्यधिकाऽष्टादशशती देवालयाः । थिरापद्रे पश्चिममण्डलीकेतिख्यातस्य आभूसङ्घपतेस्तु सप्तशतानि, तद्यात्रायां द्वादशकोटिस्वर्णव्ययः । साधुपेथडस्यैकादशरूप्यङ्कलक्षव्ययस्तीर्थदर्शने, सङ्घे देवालया द्वापञ्चाशत्, मनुष्याः सप्त लक्षाः । मन्त्रिवस्तुपालस्य सार्द्धा द्वादश यात्राः प्रसिद्धाः इति यात्रात्रयस्वरूपम् ॥३॥

(४) तथा चैत्ये स्नात्रमहोऽपि मेरुभरणाष्टमङ्गली-नैवेद्यादिढौकन-भूयस्तरजात्यचन्दनकेसरपुष्पभोगाद्यानयन-सकलसमुदाय-मीलन-स्फीतसङ्गीतकाद्याडम्बर-दुकूलादिमहाध्वजप्रदान-प्रभावनादिप्रौढविस्तारेण प्रत्यहं पर्वसु वा कर्त्तुमशक्तेनापि प्रति-वर्षमेकैकः कार्यः । स्नात्रमहे च स्वविभवकुलप्रतिष्ठाद्यनुसारेण सर्वशक्त्या द्रव्यव्ययाद्याडम्बरेण श्रीजिनमतमहोद्योतहेतौ यतनीयं। श्रूयते हि साधुपेथडेन श्रीरैवते स्नात्रमहामहे षट्पञ्चाशद्घटीस्वर्णेनेन्द्रमाला परिदधे । श्रीशत्रुञ्जयरैवतयोश्चैक एव काञ्चनमयो ध्वजः प्रददे । तत्पुत्रेण साधुझांझणेन तु दुकूलमय इति स्नात्रम् ॥४॥

(५) तथा देवद्रव्यवृद्ध्यर्थं प्रतिवर्षं मालोद्घट्टनं कार्यम् । तत्र च ऐन्द्री अन्या वा माला प्रतिवर्षं यथाशक्ति ग्राह्या । श्रीकुमारपालसङ्घे मालोद्घट्टने मन्त्रिवाग्भटादिषु लक्षचतुष्काष्टकादिवादिषु 'महुआ'वासिसौराष्ट्रिकप्राग्वाटहंसराजधारूपुत्रो जगडो मलिनाङ्गवस्त्रः सपादकोटीं चक्रे । विस्मयाद्राज्ञा पृष्टः प्राह,–

'मत्पित्रा नौयात्रार्जितधनैः सपादकोटिमूल्यमाणिक्यपञ्चकं चक्रे । प्रान्ते चोक्तं श्रीशत्रुञ्जयरैवतदेवपत्तनेषु दैवस्यैकैकं दद्याः, द्वे त्वया स्थाप्ये' इति । तत् त्रयं हेमखचितमृषभनेमिचन्द्रप्रभाणां स कण्ठाभरणीचक्रे ।

श्रीरैवते श्वेताम्बरदिगम्बरसङ्घयोः समं प्राप्तयोस्तीर्थविवादे य इन्द्रमालां परिधत्ते तस्येदं तीर्थमिति वृद्धोक्तौ, साधुपेथडेन षट्पञ्चाशद्घटीस्वर्णेनेन्द्रमाला परिदधे । चतुर्घटीस्वर्णं मार्गणेभ्यो ददे । तीर्थं स्वं चक्रे । एवं परिधापनिका-नव्यधौतिक-विचित्रचन्द्रोदया-ऽङ्गरूक्षण-दीपतैलजात्यचन्दनकेसरभोगाद्यपि चैत्योपयोगि प्रतिवर्षं यथाशक्ति मोच्यम् **॥५॥**

(६-७) तथा विशिष्टाङ्गी-पत्रभङ्गी-सर्वाङ्गभरण-पुष्पगृह-कदलीगृह-पुत्रिका-जलयन्त्रादिरचना-नानागीतनृत्ताद्युत्सवैर्महापूजा रात्रिजागरणं च कार्ये । यथैकेन महेभ्येनाऽब्धियात्रां गच्छता लक्षव्ययेन द्वादशवर्ष्या मनोऽभीष्टलाभहृष्टेन तत आगतेन कोटिव्ययेन चैत्ये महापूजादि विदधे **॥६-७॥**

(८) तथा श्रुतज्ञानस्य पुस्तकादिस्थस्य कर्पूरादिना पूजामात्रं सर्वदाऽपि सुकरं, प्रशस्तवस्त्रादिभिर्विशेषपूजा तु प्रतिमासं शुक्लपञ्चम्यां श्रावकस्य कर्त्तुं युज्यते । तथाप्यशक्तौ जघन्यतोऽपि सा प्रतिवर्षमेकैकवारं कार्या । तद्विस्तरस्तु जन्मकृत्यमध्ये

ज्ञानभक्तिद्वारे वक्ष्यते ॥८॥

(९) तथा नमस्काराऽऽवश्यकसूत्रोपदेशमालोत्तराध्ययनादिज्ञानदर्शनविविधतत्तत्तपःसम्बन्धिषूद्यापनेषु जघन्यतोऽप्येकैकमुद्यापनं वर्षे वर्षे यथाविधि कार्यम् । यतः—

**लक्ष्मीः कृतार्था सफलं तपोऽपि, ध्यानं सदोच्चैर्जनबोधिलाभः ।**
**जिनस्य भक्तिर्जिनशासने श्रीर्गुणाः स्युरुद्यापनतो नराणाम् ॥**

**उद्यापनं यत्तपसः समर्थने, तच्चैत्यमौलौ कलशाधिरोपणम् ।**
**फलोपरोपोऽक्षतपात्रमस्तके, ताम्बूलदानं कृतभोजनोपरि ॥**

दृश्यन्ते हि विधिना नमस्कारलक्षकोटिजापपूर्वं चैत्यस्नात्रमह-साधर्मिकवात्सल्य-सङ्घार्चादिप्रौढाडम्बरेण लक्षकोटि-चोक्षाष्टषष्ठिरैरूप्यवर्त्तुलिकापट्टिकालेखनीमणिमुक्ताविद्रुमनाणकनालिकेराद्यनेकफलविविधपक्वान्नधान्यखाद्यस्वाद्यकर्पटकादि-ढौकनादिना नमस्कारस्योपधानोद्वहनादिविधिपूर्वमालारोपणेनाऽऽवश्यकसूत्राणामेवं गाथासङ्ख्यचतुश्चत्वारिंशदधिकपञ्चशत्यादि-मोदकनालिकेरवर्त्तुलिकादिविविधवस्तुढौकनकादिनोपदेशमालादीनां सौवर्णादिगर्भदर्शनमोदकलम्भनादिना दर्शनादीना-मप्युद्यापनानि कुर्वाणाः । मालारोपणं च विशेषधर्मकृत्यं, यतो नमस्कारेर्यापथिक्यादिसूत्राणां यथाशक्तिविधिनोपधानतपो विना भणनगुणनाद्यशुद्धेस्तदाराधनार्थं श्राद्धानामवश्यकृत्यमुपधानतपः, साधूनामिव योगोद्वहनम् । तदुद्यापनं च मालारोपणम् ।

तदवोचाम—

**उपधानतपो विधिवद्, विधाय धन्यो निधाय निजकण्ठे । द्वेधाऽपि सूत्रमालां, द्वेधाऽपि शिवश्रियं श्रयति ॥**

**मुक्तिकनीवरमाला, सुकृतजलाकर्षणे घटीमाला । साक्षादिव गुणमाला, माला परिधीयते धन्यैः ॥**

एवं शुक्लपञ्चम्यादिविविधतपसामपि तत्तदुपवासादिसङ्ख्यनाणकवर्तुलिकानालिकेरमोदकादिनानाविधवस्तुढौकनादिना यथाश्रुतसम्प्रदायमुद्यापनानि विधेयानि ॥९॥

(१०) तथा तीर्थप्रभावनानिमित्तं श्रीगुरुप्रवेशोत्सवप्रभावनादि जघन्यतोऽपि प्रतिवर्षमेकैकवारं कार्यम् । तत्र श्रीगुरुप्रवेशोत्सवः सर्वाङ्गीणप्रौढाडम्बरचतुर्विधश्रीसङ्घसम्मुखगमनश्रीगुर्वादिसङ्घसत्कारादिना यथाशक्ति कार्यः । यतः—

**अभिगमनवंदणनमंसणेण पडिपुच्छणेण साहूणं । चिरसंचिअं पि कम्मं, खणेण विरलत्तणमुवेइ ॥**

साधुपेथडेन तपाश्रीधर्मघोषसूरीणां प्रवेशोत्सवे द्वासप्ततिसहस्त्रटङ्ककव्ययश्चक्रे । न च संविग्नसाधूनां प्रवेशोत्सवोऽनुचित इति वाच्यं, आगम उपेत्य तत्करणस्य प्रतिपादितत्वात् । तथाहि साधोः प्रतिमाऽधिकारे व्यवहारभाष्ये—

**तीरिअ-उब्भामनिओअदरिसणं सन्नि साहुमप्पाहे । दंडिअ भोइअ असई, सावगसंघो व सक्कारं ॥**

तीरितायां=समाप्तायां प्रतिमायाम्, उत्प्राबल्येन भ्रमन्त्युद्भ्रमा भिक्षाचरास्तेषां नियोगो व्यापारो यत्र स उद्भ्रामकनियोगो

ग्रामस्तत्र दर्शनमात्मनः प्रकटनं करोति । ततः संयतं साधुं सङ्गिनं वा श्रावकं '**अप्पाहे त्ति**' सन्देशयति । ततो दण्डिको राजा भोजिको ग्रामाध्यक्षस्तदभावे श्रावकवर्गः सङ्घः साधुसाध्वीवर्गः सत्कारं करोति । अयं भावः-प्रतिमायां समाप्तायां यस्मिन् प्रत्यासन्नग्रामे बहवो भिक्षाचराः साधवश्च समागच्छन्ति, तत्राऽऽगत्यात्मानं दर्शयति, दर्शयंश्च यं साधुं श्रावकं वा पश्यति, तस्य सन्देशं कथयति, यथा समापिता मया प्रतिमा ततोऽहमागत इति, तत्राचार्या राज्ञो निवेदयन्ति, यथामुको महातपस्वी समाप्त-तपःकर्मातिमहता सत्कारेण गच्छे प्रवेशनीय इति । ततः स राजा तदभावेऽधिकृतग्रामस्य नायकस्तदभावे समृद्धः श्रावकवर्गस्तदभावे साधुसाध्वीप्रभृतिकः सङ्घो यथाशक्ति सत्कारं करोति । सत्कारो नामोपरि चन्द्रोदयधारण-नान्दीतूर्यास्फालन-सुगन्धवासप्रक्षेपादिकः । एवं सत्कार इमे गुणाः—

**उब्भावणा पवयणे, सद्धाजणणं तहेव बहुमाणो । उहावणा कुतित्थे, जीअं तह तित्थवुड्ढी अ ॥**

प्रवेशसत्कारेण प्रवचनस्योद्भ्राजनं प्राबल्येन प्रकाशनं भवति । तथाऽन्येषां साधूनां श्रद्धाजननं वयमप्येवं कुर्मो येन महती शासनस्य प्रभावना भवति । तथा श्रावकश्राविकाणामन्येषां च शासनस्योपरि बहुमानो जायते, यथा अहो ! महाप्रतापि पारमेश्वरं शासनं यत्रेदृशा महातपस्विन इति । तथा कुतीर्थानामपभ्राजना हीलना भवति, तत्रेदृशां महासत्त्वानामभावात् । तथा जीतमेतत् कल्प एष यत्समाप्तप्रतिमानुष्ठानः सत्करणीयः । तथा तीर्थवृद्धिश्च प्रवचनस्य ह्यतिशयं वीक्ष्य बहवः संसाराद्विरज्य प्रव्रज्यां प्रतिपद्यन्ते, ततो भवति तीर्थवृद्धिरिति तद्वृत्तिः ॥

तथा यथाशक्ति श्रीसङ्घस्य सबहुमानकारण-तिलककरण-चन्दनजवादि-कर्पूरकस्तूर्यादिविलेपन-सुरभिकुसुमार्पणादिभक्त्या नालिकेरादिविविधताम्बूलप्रदानादिरूपा प्रभावना कार्या । शासनोन्नतेस्तीर्थकृत्त्वादिफलत्वात् । उक्तं च—

**अपुव्वनाणगहणे, सुअभत्तीपवयणे पभावणया । एएहिं कारणेहिं, तित्थयरत्तं लहइ जीवो ॥**

**भावना मोक्षदा स्वस्य, स्वान्ययोस्तु प्रभावना । प्रकारेणाधिका युक्तं, भावनातः प्रभावना ॥**

(११) तथा गुरुयोगे जघन्यतोऽपि प्रतिवर्षमालोचना गुरुभ्यो दातव्या । यतः—

**प्रतिसंवत्सरं ग्राह्यं, प्रायश्चित्तं गुरोः पुरः । शोध्यमानो भवेदात्मा, येनादर्श इवोज्ज्वलः ॥**

आगमे तु श्रीआवश्यकनिर्युक्तावेवमुक्तम्—

**चाऊम्मासिअ वरिसे, आलोअणनिअमआ उ दायव्वा । गहणं अभिग्गहाण य पुव्वगहिए निवेएउं ॥**

श्राद्धजीतकल्पादौ तद्विधिरेवम्—

**पक्खिअ चाउम्मासे, वरिसे उक्कोसओ अ बारसहिं । निअमा आलोइज्जा, गीआइगुणस्स भणियं च ॥**

**सल्लुद्धरणनिमित्तं, खित्तम्मी सत्तजोअणसयाइं । काले बारसवरिसा, गीअत्थगवेसणं कुज्जा ॥**

**गीअत्थो कडजोगी, चारित्ति तह य गाहणाकुसलो । खेअन्नो अविसाई, भणिओ आलोयणायरिओ ॥**

गीतार्थोऽधिगतनिशीथादिश्रुतसूत्रार्थः । कृतोऽभ्यस्तो योगो मनोवाक्कायव्यापारः शुभो विविधतपो वा स यस्याऽस्ति स कृतयोगी, विविधशुभध्यानतपोविशेषैः परिकर्मिताऽऽत्मशरीर इत्यर्थः । चारित्री निरतिचारचारित्रवान् । ग्राहणा बहुयुक्तिभि-रालोचनादायकानां विविधप्रायश्चित्तादितपोविधेरङ्गीकारणं तत्र कुशलः । खेदः सम्यक्प्रायश्चित्तविधेः परिश्रमोऽभ्यास इत्यर्थः । तं जानातीति खेदज्ञः । अविषादी महत्यप्यालोचकस्य दोषे श्रुते न विषादवान् । प्रत्युताऽऽलोचनादायकस्य तत्तन्निदर्शनगर्भवैराग्य-वचनैरुत्साहक इत्यर्थः ।

**आयारवमाहारवं ववहारुव्वीलए पकुव्वी य । अपरिस्सावी निज्जव अवयदंसी गुरू भणिओ ॥**

आचारवान् ज्ञानादिपञ्चप्रकाराचारयुक्, आधारवान् आलोचितापराधानामसामस्त्येन धारणमाधारस्तद्वान्, व्यवहार आगमादिः पञ्चधा । तत्रागमव्यवहारः केवलिमनःपर्यायावधिज्ञानिचतुर्दशदशनवपूर्विषु, श्रुतव्यवहारोऽष्टाद्येकार्द्धावसानपूर्वधरैकादशाङ्गि-निशीथाद्यशेषश्रुतज्ञेषु, आज्ञाव्यवहारो दूरस्थगीतार्थाचार्ययोर्मिथःसङ्गन्तुमक्षमयोर्गूढपदैरालोचनाप्रायश्चित्तयोः प्रदानं, धारणाव्यवहारो गुरुणाऽपराधे यद्यथा प्रायश्चित्तं दत्तं तत्तथैवान्योऽपि दत्त इत्यादि, जीतं श्रुतोक्तापत्तितो हीनमधिकं वा परम्परयाऽऽचीर्णं तेन व्यवहारो जीतव्यवहारः पञ्चमः सम्प्रति मुख्यः । एवं पञ्चविधं व्यवहारं ज्ञात्वा प्रायश्चित्तप्रदाने यः सम्यग् व्यवहरति स व्यवहारवान् । अपव्रीडयति लज्जां मोचयतीत्यपव्रीडकः, आलोचकं लज्जयाऽनालोचयन्तं तथा तथा वैराग्यगर्भं वक्ति, यथा स लज्जां मुक्त्वा सम्यगालोचयतीत्यर्थः । कुर्वेत्यागमप्रसिद्धो धातुर्यस्य विकुर्वणेति प्रयोगः, प्रकुर्वतीत्येवंशीलः प्रकुर्वी,

आलोचक्रस्य सम्यग् विशुद्धिकारक इत्यर्थः । आलोचितं योऽन्यस्मै न वक्ति सोऽपरिस्रावी । निर्यापयति निर्वाहयतीति निर्यापः, यो यथा समर्थस्तस्य तथा प्रायश्चित्तं दत्त इत्यर्थः । सम्यगनालोचकस्य सम्यक् प्रायश्चित्ताऽकर्त्तुश्च भवद्वयेऽप्यपायदर्शी । एतेऽष्टौ गुरोर्गुणाः ।

**आलोयणापरिणओ, सम्मं संपट्ठिओ गुरुसगासे । जइ अंतरावि कालं, करिज्ज आराहओ तहवि ॥**

**आयरिआइ सगच्छे, संभोइअइअरगीअपासत्थे । सारूवीपच्छाकहदेवयपडिमा अरिहंसिद्धे ॥**

साधुना श्राद्धेन वा नियमतः प्रथमं स्वगच्छे आचार्यस्य, तदयोगे उपाध्यायस्य, एवं प्रवर्त्तिनः स्थविरस्य गणावच्छेदिनो वाऽलोचनीयम् । स्वगच्छे पञ्चानामप्यभावे सांभोगिके एकसामाचारिके गच्छान्तरे आचार्यादिक्रमेणालोच्यम् । तेषामप्यभाव इतरस्मिन्नसांभोगिके संविग्ने गच्छे स एव क्रमः । तेषामप्यभावे गीतार्थपार्श्वस्थस्य । तस्याप्यभावे गीतार्थसारूपिकस्य । तस्याप्यभावे गीतार्थपश्चात्कृतस्यालोचयितव्यम् । सारूपिकः शुक्लाम्बरो मुण्डोऽबद्धकच्छो रजोहरणरहितो ब्रह्मचर्योऽभार्यो भिक्षाग्राही । सिद्धपुत्रस्तु सशिखः सभार्यश्च । पश्चात्कृतः त्यक्तचारित्रवेषो गृहस्थः । पार्श्वस्थादेरपि गुरुवद्वन्दकप्रदानादिविधिः कार्यो विनयमूलत्वाद्धर्मस्य । यदि तु पार्श्वस्थादिः स्वं गुणहीनं पश्यन् वन्दनकं न कारयति, तदा तस्य निषद्यामारचय्य प्रणाम-मात्रं कृत्वाऽऽलोचनीयम् । पश्चात्कृतस्य चेत्वरसामायिकारोपणं लिङ्गप्रदानं च कृत्वा यथाविध्यालोच्यम् । पार्श्वस्थादीनामप्यभावे यत्र राजगृहे गुणशिलादावर्हद्गणधराद्यैर्बहुशः प्रायश्चित्तप्रदानं यथा देवतया दृष्टं तत्र तस्याः सम्यग्दृष्टेरष्टमाद्याराधनेन प्रत्यक्षाया

आलोच्यम् । जातु सा च्युताऽन्योत्पन्ना तदा सा महाविदेहेऽर्हन्तं पृष्ट्वा प्रायश्चित्तं दत्ते । तदयोगेऽर्हत्प्रतिमानं पुर आलोच्य स्वयं प्रायश्चित्तं प्रतिपद्यते। तासामप्ययोगे पूर्वोत्तरामुखोऽर्हत्सिद्धसमक्षमप्यालोचयेद्, न त्वनालोचित एव तिष्ठेत्, सशल्यस्या-नाराधकत्वात् ।

**अग्गीओ नवि जाणइ, सोहिं चरणस्स देइ उणहिअं । तो अप्पाणं आलोअगं च पाडेइ संसारे ॥**

**जह बालो जंपंतो, कज्जमकज्जं च उज्जुअं भणइ । तं तह आलोइज्जा, मायामयविप्पमुक्को अ ॥**

**मायाइदोसरहिओ, पइसमयं वड्ढमाणसंवेगो । आलोइज्ज अकज्जं, न पुणो काहिंति निच्छयओ ॥**

**लज्जाइगारवेणं, बहुस्सुअमएण वावि दुच्चरिअं । जो न कहेइ गुरूणं, न हु सो आराहओ भणिओ ॥**

**गारवेणं** ति रसादिगारवप्रतिबद्धत्वेन तपोऽचिकीर्षुतयेत्यर्थः । अपिशब्दादपमानप्रायश्चित्तगुरुत्वादिना वा ।

**संवेगपरं चित्तं, काऊणं तेहिं तेहिं सुत्तेहिं । सल्लाणुद्धरणविवागदंसगाईहिं आलोए ॥**

आलोचकस्य दश दोषानाह—

**आकंपइत्ता अणुमाणइत्ता जं दिट्ठं बायरं व सुहुमं वा । छन्नं सद्दाउलयं, बहुजणअवत्ततस्सेवी ॥**

आकम्प्य वैयावृत्त्यादिना गुरुमावर्ज्यालोचयति, यथा स्तोकं प्रायश्चित्तं दत्त इत्यभिप्राये प्रथमो दोषः । एवमेष गुरुर्मृदुदण्डप्रद

इत्याद्यनुमान्याऽनुमानं कृत्वा । यत्परैर्दृष्टं तदालोचयति न त्वदृष्टम् । बादरमालोचयति न तु सूक्ष्मं, तत्रावज्ञापरत्वात् । सूक्ष्मं तृणग्रहणादिरूपमालोचयति, न तु बादरं सूक्ष्मालोचको हि कथं बादरं नालोचयेदिति ज्ञापनार्थम् । छन्नमव्यक्तस्वरम् । तथा शब्दाकुलं यथा गुरुः सम्यग् नावगच्छति, यद्वाऽन्येऽपि यथा शृण्वन्ति तथा शब्दाकुलम् । आलोच्यं बहुजनान् श्रावयति । अव्यक्तस्थानवगतच्छेदग्रन्थरहस्यस्य गुरोरालोचयति । स्वकृतापराधसदृशसेविगुरोः खरंटनादिभियाऽऽलोचयति । एते दश दोषा आलोचकेन वर्जनीयाः । सम्यगालोचने गुणानाह–

**लहुआ ल्हाईजणणं, अप्पपरनिवत्ति अज्जवं सोही । दुक्करकरणं आणा निस्सल्लत्तं च सोहिगुणा ॥**

यथा भारवाहिनो भारेऽपहृते लघुता तथा शल्योद्धार आलोचकस्यापि । ल्हादिजननं प्रमोदोत्पादः । आत्मपरयोर्दोषेभ्यो निवृत्तिरालोचनादाने हि स्वयं दोषनिवृत्तिः प्रतीता, तं दृष्ट्वाऽन्येऽप्यालोचनाभिमुखाः स्युरित्यन्येषामपि दोषेभ्यो निवृत्तिः । आर्जवं निर्मायता सम्यगालोचनात् । शोधिः शुद्धताऽतिचारमलापगमात् । दुष्करकरणं दुष्करकारिता यतो यत्प्रतिसेवनं तन्न दुष्करमनादिभवाभ्यस्तत्वात्, यत्पुनरालोचयति तद्दुष्करं प्रबलमोक्षानुयायिवीर्योल्लासविशेषेणैव तस्य कर्तुं शक्यत्वात् । निशीथचूर्णावप्यूचे–

**तन्न दुक्करं जं पडिसेविज्जइ तं दुक्करं जं सम्मं आलोइज्जइत्ति** । अत एवाभ्यन्तरतपोभेदरूपं सम्यगालोचनं, मासक्षपणादिभ्योऽपि दुष्करं लक्षणार्यादीनां तथा श्रवणात् । तथाहि–

इतोऽशीतितमचतुर्विंशतौ नृपस्य बहुपुत्रस्योपयाचितशतैर्जाता बहुमान्या पुत्री स्वयंवरमंडपे वृतवरा दुर्दैवाच्चतुरिकान्तर्मृत भर्तृका सुशीला सतीषु प्राप्तरेखा सुश्राद्धधर्मनिष्ठाऽन्यदाऽन्त्यार्हता दीक्षिता लक्षणार्या कदाचिच्चटकयुग्मरतं दृष्ट्वा दध्यौ– 'अर्हता किमेतन्नानुमतम्, अवेदोऽसौ वा न वेत्ति सवेददुःखमित्यादि', क्षणान्तरे जातपश्चात्तापा कथमालोचयिष्यामीति प्रोद्भूत-त्रपाऽपि सशल्यत्वे सर्वथा न शुद्धिरित्यालोचयितुं स्वं प्रोत्साह्य यावद्याति, तावदचिन्तिते कण्टके भग्नेऽपशकुनेन क्षुब्धा, य ईदृग् दुर्ध्यायति तस्य किं प्रायश्चित्तमिति परव्यपदेशेनाऽऽलोचितवती, न तु साक्षाल्लज्जामहत्वहान्याद्याशङ्कयैव । ततस्तत्-प्रायश्चित्तपदे पञ्चाशद्वर्षी तीव्रं तपस्तेपे । उक्तं च–

**छट्ठट्ठमदसमदुवावलसेहिं निव्विगइएहिं दसवरिसे । तह वणपएहिं दुन्निय, दो चेव य भुज्जिएहिं च ॥**

**मासखमणेहिं सोलस, वीसं वासाइं अंबिलेहिं च । लक्खण अज्जा एवं, कुणइ तवं वरिसपन्नासं ॥**

**आवस्सयमाईअं, किरिअकलावं अमुच्चमाणीए । अद्दीणमाणसाए, एस तवो तीइ अणुचिन्नो ॥**

एवं दुस्तपस्तपस्तपनेऽपि सा न शुद्धा, प्रत्युताऽऽर्त्तध्यानान्मृता दास्याद्यसङ्ख्यभवेष्वनुभूततत्तत्तीव्रतरदुःखा श्रीपद्मनाभ-तीर्थकृत्तीर्थे सेत्स्यति । तदुक्तं–

**ससल्लो जइवि कट्ठुगं घोरं वीरं तवं चरे । दिव्वं वाससहस्सं तु, तओ तं तस्स निप्फलं ॥**

**जह सुकुसलो वि विज्जो, अन्नस्स कहेइ अप्पणो वाहिं । एवं जाणंतस्स वि, सल्लुद्धरणं परसगासे ॥**

तथाज्ञा तीर्थकृतामाराधिता स्यात् । निःशल्यत्वं स्पष्टम् । उक्तं चैकोनत्रिंशदुत्तराध्ययने—**आलोअणयाएणं भंते ! जीवे किं जणयइ ? गोयमा ! आलोअणयाएणं मायानिआणमिच्छादंसणसल्लाणं अणंतसंसारवद्धणाणं उद्धरणं करेइ, उज्जुभावं च णं जणयइ । उज्जुभावं पडिवन्ने अ णं जीवे अमाई इत्थीवेअं नपुंसगवेअं च न बंधइ, पुव्वबद्धं च णं निज्जरेइ त्ति ।** एते शोधेरालोचनाया गुणाः **॥११॥**

इति श्राद्धजितकल्पात्तद्वृत्तेश्च किञ्चिदुद्धृत आलोचनाविधिः । तीव्रतराध्यवसायकृतं बृहत्तरमपि निकाचितमपि बाल-स्त्रीयतिहत्यादेवादिद्रव्यभक्षणराजपत्नीगमनादिकं महापापं सम्यग् विधिवदालोच्य गुरुदत्तं प्रायश्चित्तं विधत्ते, तदा तद्भवेऽपि शुध्यति । कथमन्यथा दृढप्रहारिप्रभृतीनां तद्भवेऽपि सिद्धिरित्यालोचना प्रतिवर्षं प्रतिचातुर्मासकं वा ग्राह्यैव । इति वर्षकृत्य-गाथोत्तरार्धार्थः ॥

**॥ इति श्रीतपागच्छाधिपश्रीसोमसुन्दरसूरि-श्रीमुनिसुन्दरसूरि-श्रीजयचन्द्रसूरि-श्रीभुवनसुन्दरसूरिशिष्य-श्रीरत्नशेखरसूरिविरचितायां श्रीश्राद्धविधिप्रकरणवृत्तौ वर्षकृत्यप्रकाशकः पञ्चमः प्रकाशः ॥**

## षष्ठः प्रकाशः

उक्तं वर्षकृत्यम्, अथ जन्मकृत्यं गाथात्रयेणाऽष्टादशभिर्द्वारैराह—

**जम्मंमि वासठाणं, तिवग्गसिद्धीइ कारणं उचिअं ।**
**उचिअं विज्जागहणं पाणिग्गहणं च मित्ताई ॥१२॥**

**जन्मनि** जन्मचारकमध्ये पूर्व**मुचितं** योग्यं **वासस्थानं** ग्राह्यम् । किं तदुचितमिति विशेषणद्वारेण हेतुमाह—**त्रिवर्गस्य** धर्मार्थकामलक्षणस्य **सिद्धि**र्निष्पत्तिस्तस्याः कारणं हेतुः । एवं च यत्र धर्मार्थकामानां त्रयाणामपि सिद्धिः स्यात्तत्र श्रावकेण वस्तव्यं नान्यत्र भवद्वयभ्रंशापत्तेः । तदुक्तम्—

**न भिल्लपल्लीषु न चोरसंश्रये, न पार्वतीयेषु जनेषु संवसेत् ।**
**न हिंस्रदुष्टाश्रयलोकसन्निधौ, कुसङ्गतिः साधुजनस्य गर्हिता ॥**
**तत्र धाम्नि निवसेद् गृहमेधी, संपतन्ति खलु यत्र मुनीन्द्राः ।**
**यत्र चैत्यगृहमस्ति जिनानां, श्रावकाः परिवसन्ति च यत्र ॥**

**विद्वत्प्रायो यत्र लोको निसर्गाच्छीलं यस्मिन् जीवितादप्यभीष्टम् ।**
**नित्यं यस्मिन् धर्मशीलाः प्रजाः स्युस्तिष्ठेत्तस्मिन् साधुसङ्गो हि भूत्यै ॥**

**जत्थ पुरे जिणभवणं, समयविऊ साहुसावया जत्थ । तत्थ सया वसिअव्वं, पउरजलं इंधणं जत्थ ॥**

त्रिशतीजैनप्रासादसुश्राद्धाद्यलङ्कृते सुशीलविज्ञलोकेऽजयमेर्वासन्ने हर्षपुरे सुस्थाने वसन्तोऽष्टादशसहस्रविप्रास्तद्भक्ताः षट्त्रिंशन्महेभ्याश्च श्रीप्रियग्रन्थसूरीन्द्रागमे प्रबुद्धाः । सुस्थानवासे हि धनवतां गुणवतां धर्मवतां च सङ्गत्या धनित्वं विवेकविनयविचाराचारौदार्यगाम्भीर्यधैर्यप्रतिष्ठादयो गुणाः सर्वाङ्गीणधर्मकृत्यकौशलं च प्रायः सुप्रापाणि संप्रत्यपि प्रतीयन्ते । अतः प्रान्तग्रामादौ धनार्जनादिना सुखनिर्वाहेऽपि न वसनीयम् । उक्तं च–

**जत्थ न दीसंति जिणा, न य भवणं नेव संघमुहकमलं । न य सुच्चइ जिणवयणं, किं ताए अत्थभूईए ॥**

**यदि वाञ्छसि मूर्खत्वं, ग्रामे वस दिनत्रयम् । अपूर्वस्यागमो नास्ति, पूर्वाधीतं च नश्यति ॥**

श्रूयते च कश्चिन्नगरनिवासी स्वल्पवणिग्ग्रामे धनलाभार्थमुषितः । कृषिविविधवाणिज्यव्यापारादिना यावता धनमुपार्जयेत्तावद् गृहं तार्णं जज्वाल । एवं पुनः पुनः धनार्जनेऽपि स्तैन्यमारीदुर्भिक्षनृपदण्डाद्यजनि । अन्यदा तद्ग्राम्यैः स्तेनैः क्वचित्पुरे धाटीप्रदाने तत्पुरनृपेण ग्रामो हतः । श्रेष्ठी पुत्रादिधृतौ युध्यमानस्तद्भटैर्मारितश्चेति कुग्रामावासे दृष्टान्तः । उचितमपि च वासस्थानं

स्वचक्रपरचक्रविरोधदुर्भिक्षमारीतिप्रजाविरोधवास्तुक्षयादिनाऽस्वस्थीभूतं द्रुतमेव त्याज्यम्, अन्यथा त्रिवर्गहान्याद्यापत्तेः । यथा मुद्गलैर्भङ्गे भयोत्पत्तौ यैर्ढिल्ली त्यक्ता, ते गुर्जरत्रादावागतास्त्रिवर्गपुष्ट्या भवद्वयं साफल्यमकार्षुः । यैस्तु न त्यक्ता ते बन्दपतनादिना भवद्वयमप्यहार्षुः । वास्तुक्षीणत्वादिना स्थानत्यागे तु क्षितिप्रतिष्ठित-वनकपुर-ऋषभपुरादिदृष्टान्तः । तथा चार्षम्—

**खिइवणउसभकुसग्गं रायगिहं चंपपाडलीपुत्तं** । इति ।

वासस्थानं च गृहमप्युच्यते । तच्च सुप्रातिवेश्मिकेऽनतिप्रकटेऽनतिगुप्ते च सुस्थाने विधिनिष्पन्नमितद्वारत्वादिगुणं त्रिवर्ग-सिद्धिहेतुतया योग्यम् । दुष्प्रातिवेश्मिकाश्चैवमागमादौ निषिद्धाः—

**खरीआतिरिक्खजोणीतालायरसमणमाहणसुसाणा । वग्गुरिअवाहगुम्मिअहलिएसपुलिंदमच्छंधा ॥**

खरिआत्ति द्व्यक्षरिका वेश्या, श्रमणाः शाक्याद्याः, स्मशानं, गुल्मिका गुप्तिपालाः, मत्स्यबन्धा मात्सिकाः ।

**जूआरचोरनडनट्टभट्टवेसा कुकम्मकारीणं । संवासं वज्जिज्जा, घरहट्टाणं च मित्तीअ ॥** तथा

**दुःखं देवकुलासन्ने, गृहे हानिश्चतुष्पथे । धूर्त्तामात्यगृहाभ्यासे, स्यातां सुतधनक्षयौ ॥**

**मूर्खाऽधार्मिकपाखण्डिपतितस्तेनरोगिणाम् । क्रोधनान्त्यजदृप्तानां, गुरुतल्पगवैरिणाम् ॥**

**स्वामिवञ्चकलुब्धानामृषिस्त्रीबालघातिनाम् । इच्छन्नात्महितं धीमान् प्रातिवेश्मिकतां त्यजेत् ॥**

कुशीलादिप्रातिवेश्मिकत्वे हि तदालापश्रवणतच्चेष्टादर्शनादिवशात् स्वतः सगुणस्यापि गुणहानिः स्यात् । सुप्रातिवेश्मिकत्वे प्रातिवेश्मिकीसंपादितपरमान्नः सङ्गमः शालिभद्रजीवः, दुष्प्रातिवेश्मिकत्वे पर्वदिने प्राङ्मुनये दत्ताग्रपिण्डा प्रातिवेश्मिकी व्युद्ग्राहितश्वस्र्वादिः सोमभट्टभार्या ज्ञातम् । अतिप्रकटे हि स्थाने गृहमसन्निहितगृहान्तरतया परिपार्श्वतो निरावरणतया चौरादयोऽभिभवेयुः । अतिगुप्ते च सर्वतो गृहान्तरैर्निरुद्धत्वान्न स्वशोभां लभते । प्रदीपनकाद्युपद्रवे च दुःखनिर्गमप्रवेशं गृहं भवति । सुस्थानं पुनः शल्यभस्मक्षात्रादिदोषैर्निषिद्धाऽऽयाऽऽदिना च रहितं बहलदूर्वाप्रवालकुशस्त[१]म्बप्रशस्तवर्णगन्धमृत्तिका-सुस्वादुजलोद्गमनिधानादिमच्च । यदुक्तम्–

**शीतस्पर्शोष्णकाले याऽत्युष्णस्पर्शा हिमागमे । वर्षासु चोभयस्पर्शा सा शुभा सर्वदेहिनाम् ॥**

**हस्तमात्रं खनित्वाऽऽदौ पूरितात्तेन पांसुना । श्रेष्ठा समधिके पांसौ हीने हीना समे समा ॥**

**पदगतिशतं यावच्चाम्भःपूर्णा न शुष्यति । सोत्तमैकाङ्गुलहीना मध्यमा तत्पराऽधमा ॥**

**अथवा तत्र पुष्पेषु खाते सत्युषितेषु तु । समार्द्धसमशुष्केषु भुवस्त्रैविध्यमादिशेत् ॥**

**त्रिपञ्चसप्तदिवसैरुप्तव्रीह्यादिरोहणात् । उत्तमा मध्यमा हीना विज्ञेया त्रिविधा मही ॥**

१. स्तव इति को० ह० प्र० पाठः ।

**व्याधिं वल्मीकिनां नैःस्व्यं शुषिरा स्फुटिता मृतिम् । दत्ते भूः शल्ययुग् दुःखं शल्यं ज्ञेयं तु यत्नतः ॥**

नृशल्यं नृहान्यै, स्वरशल्ये नृपादिभीः, शुनोऽस्थि डिम्भमृत्यै, शिशुशल्यं गृहस्वामिप्रवासाय, गोशल्यं गोधनहान्यै, नृकेशकपालभस्मादि मृत्यै इत्यादि ।

**प्रथमाऽन्त्यमवर्जं, द्वित्रिप्रहरसंभवा । छाया वृक्षध्वजादीनां, सदा दुःखप्रदायिनी ॥**

**वर्जयेदर्हतः पृष्टं, पार्श्वं ब्रह्ममधुद्विषोः । चण्डिकासूर्ययोर्दृष्टिं, सर्वमेव च शूलिनः ॥**

**वामाङ्गं वासुदेवस्य, दक्षिणं ब्रह्मणः पुनः । निर्माल्यं स्नानपानीयं, ध्वजच्छायाविलेपनम् ॥**

**( वर्जनीयं सदा शंभोरात्मश्रेयोऽर्थिभिर्जनैः ) प्रशस्ता शिखरच्छाया, दृष्टिश्चापि तथाऽर्हतः ॥** युग्मम् ।

तथा–

**वज्जिज्जइ जिणपुट्ठी, रविईसरदिट्ठि विण्हुवासो अ। सव्वत्थ असुहचंडी, तम्हा पुण सव्वहा चयह ॥**

**अरिहंतदिट्ठिदाहिणहरपुट्ठीवामएसु कल्लाणं । विवरीए बहुदुक्खं, परं न मग्गंतरे दोसो ॥**

**ईसाणाईकोणे, नयरे गामे न कीरए गेहं । संतलोआण असुहं, अंतिमजाईणरिद्धिकरं ॥**

स्थानगुणदोषपरिज्ञानं च शकुनस्वप्नोपश्रुतिप्रभृतिनिमित्तादिबलेन कार्यम् । सुस्थानमप्युचितमूल्यार्पणप्रातिवेश्मिकानु-

मत्यादिन्यायेनैव ग्राह्यं, न तु पराभिभवादिना, तथा सति त्रिवर्गहान्याद्यापत्तेः । एवमिष्टिकाकाष्ठपाषाणादिदलमपि निर्दोषं दृढसारत्वादिगुणसुचितमूल्यादिना ग्राह्यमानाय्यञ्च । तदपि विक्रायकैः स्वयं निष्पादितं, न तु तत्पार्श्वात् स्वकृते कारितं, महारम्भादिदोषापत्तेः । प्रासादादिसक्तं च तन्न ग्राह्यं बहुहान्याद्यापत्तेः । श्रूयते हि–

द्वौ वणिजौ प्रातिवेश्मिकौ । एकः समृद्धोऽन्यं निःस्वं पदे पदेऽभिभवति । निःस्वोऽन्यथा प्रतिकर्तुमशक्तः समृद्धस्य निष्पद्यमानसौधभित्तिमध्ये जिनचैत्यात् पतितमेकमिष्टिकाखण्डं रहश्चिक्षेप । निष्पन्ने च सौधे तेन सम्यक् तत्स्वरूपे प्रोक्तेऽपीयन्मात्रस्य को दोष ? इत्यवज्ञया समृद्धस्य स्तोकैरेव दिनैर्वज्राग्नयादिना सर्वस्वं विनष्टम् । उक्तमपि–

**पासायकूववावीमसाणमढरायमंदिराणं च । पाहाणइट्टकट्ठा, सरिसवमित्तावि वज्जिज्जा ॥**

**पाहाणमयं थंभं, पीढं पट्टं च बारउत्ताइं । एए गेहि विरुद्धा, सुहवहा धम्मठाणेसु ॥**

**पाहाणमए कट्ठं, कट्ठमए पाहणस्स थंभाई । पासाए अ गिहे वा, वज्जेअव्वा पयत्तेणं ॥**

**हलघाणयसगडाई, अरहट्टजंताणि कंटई तह य । पंचुंबरि खीरतरु एआणं कट्ठ वज्जिज्जा ॥**

**विज्जउरिकेलिदाडिमजंबीरीदोहलिद्दअंबिलिआ । बब्बूलिबोरिमाई कणयमया तहवि वज्जिज्जा ॥**

**एआणं जइ अ जडा पाडवसाओ पविस्सई अहवा । छाया वा जम्मि गिहे, कुलनासो हवइ तत्थेव ॥**

पुव्वुन्नय अत्थहरं, जमुन्नयं मंदिरं धणसमिद्धं । अवरुन्नय विद्धिकरं, उतरुन्नय होइ उव्वसिअं ॥
वलयागारं कूणेहिं, संकुलं अहव एगदुतिकूणं । दाहिणवामयदीहं, न वासियव्वेरिसं गेहं ॥
सयमेव जे किवाडा, पिहिअंति अ उग्घडंति ते असुहा । चित्तकलसाइसोहा, सविसेसा मूलवारिसुहा ॥
जोईणि नट्टारंभं भारहरामायणं च निवजुद्धं । रिसिचरिअदेवचरिअं, इअचित्तं गेहि न हु जुत्तं ॥
फलिहतरुकुसुमवल्ली सरस्सई नवनिहाणजुअलच्छी । कलसं वद्धावयणं, सुमिणावलिआइ सुहचित्तं ॥
खर्जूरी दाडिमी रम्भा कर्कन्धूर्बीजपूरिका । उत्पद्यते गृहे यत्र, तन्निकृन्तति मूलतः ॥
लक्ष्मीनाशकरः क्षीरी, कण्टकी शत्रुभीप्रदः । अपत्यघ्नः फली तस्मादेषां काष्ठमपि त्यजेत् ॥
कश्चिदूचे पुरो भागे, वटः श्लाघ्य उदुम्बरः । दक्षिणे पश्चिमेऽश्वत्थो, भागे प्लक्षस्तथोत्तरे ॥
पूर्वस्यां श्रीगृहं कार्यमाग्नेय्यां च महानसम् । शयनं दक्षिणस्यां तु, नैर्ऋत्यामायुधादिकम् ॥
भुजिक्रिया पश्चिमायां, वायव्यां धान्यसङ्ग्रहः । उत्तरस्यां जलस्थानमैशान्यां देवतागृहम् ॥
गृहस्य दक्षिणे वह्नितोयगोऽनिलदीपभूः । वामा प्रत्यग्दिशोर्भुक्तिधान्यार्थारोहदेवभूः ॥
पूर्वादिदिग्विनिर्देशो, गृहद्वारव्यपेक्षया । भास्करोदयदिक्पूर्वा, न विज्ञेया यथा क्षुते ॥ इत्यादि ।

तथा गृहनिष्पादसूत्रधारकर्मकरादयः प्रोक्तसम्यग्मूल्याद्यधिकोचितार्पणेन प्राणनीया न तु क्वचिद्वञ्चनीयाः । यावता च कुटुम्बादेः सुखनिर्वाहो जने च शोभादि स्यात्, तावानेव विस्तारो गृहे क्रियते । असंतुष्टतयाऽधिकाधिकविस्तारकरणे मुधा धनव्ययारम्भादि । ईदृगपि गृहं मितद्वारमेवार्हम् । बहुद्वारत्वे ह्यज्ञातनिर्गमप्रवेशानां दुष्टलोकानामापाते स्त्रीद्रविणादिविप्लवोऽपि स्यात् । मितद्वारमपि दृढकपाटोल्लालकशृङ्खलिकाऽर्गलादिना सुरक्षितम्, अन्यथाऽनन्तरोक्ताद्यनेकदोषापत्तेः । कपाटाद्यपि सुख-प्रदानोद्घाटं यथाविलोक्यमानस्थितिकं च गुणाय, अन्यथाधिकाधिकविराधनाविलोक्यमानशीघ्रनिर्गमागमादिकार्यहान्यादि च स्यात् । अर्गला च भित्तिमध्यस्थायिनी सर्वथा न युक्ता पञ्चेन्द्रियादिनामपि विराधनापत्तेः । ईदृक् कपाटप्रदानाद्यपि प्रत्यु-पेक्षणादियतनयैव कुर्यात् । एवं प्रणालखालादावपि यथाशक्ति यतनीयम् । मितद्वारत्वादि शास्त्रेऽप्युक्तम्-

**न दोषो यत्र वेधादिर्नवं यत्राखिलं दलम् । बहुद्वाराणि नो यत्र, यत्र धान्यस्य सङ्ग्रहः ॥**

**पूज्यते देवता यत्र, यत्राभ्युक्षणमादरात् । रक्ता जवनिका यत्र, यत्र सम्मार्जनादिकम् ॥**

**यत्र ज्येष्ठकनिष्ठादिव्यवस्था सुप्रतिष्ठिता । भानवीया विशन्त्यन्तर्भानवो नैव यत्र च ॥**

**दीप्यते दीपको यत्र, पालनं यत्र रोगिणाम् । श्रान्तसंवाहना यत्र, तत्र स्यात्कमला गृहे ॥**

एवं देशकालस्वविभवजात्याद्यौचित्येन निर्मापितं गृहं विधिस्नात्रसाधर्मिकवात्सल्यसङ्घपूजादिपूर्वं व्यापारयेत् । सुमुहूर्तश-कुनादिबलं च गृहनिष्पत्तिप्रवेशादौ प्रतिपदमन्वेष्यम् । एवं विधिनिष्पन्ने गृहे श्रीवृद्ध्यादि न दुर्लभम् । श्रूयते चोज्जयिन्यां

द्वादशाब्द्या श्रेष्ठिदाताकेनाऽष्टादशकोटिस्वर्णव्ययेन सप्तभूमे वास्तुशास्त्राद्युक्तविधिना विधापिते सौधे रात्रौ **'पतामि पतामि'** इत्युक्तिश्रुत्या भीतेन तावद्धनं लात्वा विक्रमार्कस्याऽर्पिते स्वर्णपुरुषतनादि । विधिनिष्पन्नविधिप्रतिष्ठितश्रीमुनिसुव्रतस्तूपमहिम्ना प्रबलसैन्योऽपि कूणिको वैशालीं नगरीं ग्रहीतुं द्वादशाब्द्यापि न शशाक । भ्रष्टकूलवालकोक्त्या स्तूपपातने तु तदैव जगृहे । एवं गृहवद् हट्टमपि सुप्रातिवेश्मिकेऽनतिप्रकटेऽनतिगुप्ते च सुस्थाने विधिनिष्पन्नं मितद्वारत्वादिगुणं त्रिवर्गसिद्धिहेतुतयोचितं मन्तव्यम् । द्वारम् १।

तथा त्रिवर्गसिद्धेः कारणमित्युत्तरत्राऽप्यनुवर्त्तनात् त्रिवर्गसिद्धिकारितया **यदुचितं तद्विद्यानां** लिखितपठितवाणिज्य-धर्मादिकलानां **ग्रहण**मध्ययनं कार्यं सम्यक् । अशिक्षितानभ्यस्तकलो हि मूर्खत्वहास्यत्वादिना पदे पदे पराभूयते, यथा कालिदासकविः प्राग्गोपो भूपसमे स्वस्तिस्थाने 'उशरट' इत्युक्तौ ग्रन्थशोधनचित्रसभादर्शनादौ च । कलावांश्च विदेशेऽपि मान्यते वसुदेवादिवत् । वदन्त्यपि—

**विद्वत्त्वं च नृपत्वं च, नैव तुल्यं कदाचन । स्वदेशे पूज्यते राजा, विद्वान् सर्वत्र पूज्यते ॥**

कलाश्च सर्वाः शिक्षणीयाः । क्षेत्रकालादिविशेषेण सर्वासामपि विशेषोपयोगसम्भवाद्, अन्यथा जातु सीदत्यपि । तदाह—

**अट्टमट्टंपि सिक्खिज्जा, सिक्खिअं न निरत्थअं । अट्टमट्टपसाएण, खज्जए गुलतुंबयं ॥**

शिक्षितसकलकलस्य हि प्रागुक्तसप्तविधाजीविकोपायानामन्यतरेणाप्युपायेन सुखनिर्वाहसमृद्धत्वादि स्यात् । सर्वाः कलाः शिक्षितुमशक्तस्त्वत्र सुखनिर्वाहादेः प्रेत्य सद्गतेश्च हेतुं कलां शिक्षेतैव । यतः—

**सुअसायरो अपारो, आउं थोवं जिआ य दुम्मेहा । तं किंपि सिक्खिअव्वं, जं कज्जकरं च थोवं च ॥**

**जाएण जीवलोए, दो चेव नरेण सिक्खिअव्वाइं । कम्मेण जेण जीवइ, जेण मओ सग्गइं जाइ ॥**

निन्द्यपापमयकर्मणा निर्वाहकरणं तु सूत्रे 'उचिअं' इत्युक्तेरनौचित्यादेव निषिद्धम् । द्वारम् २।

तथा **पाणिग्रहणं** विवाहः तदपि त्रिवर्गसिद्धिहेतुतयोचितमेव युक्तम् । तच्चान्यगोत्रजैः समानकुलसदाचारादिशीलरूपवयो-विद्याविभववेषभाषाप्रतिष्ठादिगुणैरेव सार्द्धम् । कुलशीलादिवैषम्ये हि मिथोऽवहीलनाकुटुम्बकलहकलङ्काद्यापत्तिः । यथा पोतनपुरे श्रीमत्याः श्राद्धसुतायाः सादरं मिथ्यादृशोढायाः सुधर्मदृढायाः वैधर्म्याद्विरक्तभर्त्रा गृहान्तर्घटेऽहिं क्षिप्त्वा पुष्पमालां घटादान-येत्यादेशो ददे । नमस्कारस्मृतिमहिम्ना च तस्याः पुष्पमालैव जज्ञे । ततः पत्यादयोऽपि श्राद्धीबभूवुः । कुलशीलादिसाम्ये तु साधुपेथडप्रथमिणिदेव्यादीनामिव सर्वाङ्गीणसुखधर्ममहत्त्वादयो गुणाः । सामुद्रिकशास्त्राद्युक्तवपुर्लक्षणजन्मपत्रिकान्वेषणादिना च कन्यावरयोः परीक्षा । तदुक्तं-

**कुलं च शीलं च सनाथता च, विद्या च वित्तं च वपुर्वयश्च ।**
**वरे गुणाः सप्त विलोकनीयास्ततः परं भाग्यवशा हि कन्या ॥**

**मूर्खनिर्धनदूरस्थशूरमोक्षाभिलाषिणाम् । त्रिगुणाधिकवर्षाणां, न देया कन्यका बुधैः ॥**

**अत्यद्भुतधनाढ्यानामतिशीतातिरोषिणाम् । विकलाङ्गसरोगाणां, चापि देया न कन्यका ॥**

**कुलजातिविहीनानां पितृमातृवियोगिनाम् । गेहिनीपुत्रयुक्तानां, न देया कन्यका बुधैः ॥**

**बहुवैरापवादानां, सदैवोत्पन्नभक्षिणाम् । आलस्याऽऽहतचित्तानां, न देया कन्यका बुधैः ॥**

**गोत्रिणां द्यूतचौर्यादिव्यसनोपहतात्मनाम् । वैदेशिनामपि प्रायो, न देया कन्यका बुधैः ॥**

**निर्व्याजा दयितादौ, भक्ता श्वश्रूषु वत्सला स्वजने । स्निग्धा च बन्धुवर्गे, विकसितवदना कुलवधूटी ॥**

**यस्य पुत्रा वशे भक्ता, भार्या छन्दानुवर्त्तिनी । विभवेष्वपि सन्तोषस्तस्य स्वर्ग इहैव हि ॥**

अग्निदेवादिसाक्षिकं पाणिग्रहणं विवाहः । स च लोकेऽष्टविधः । तत्रालङ्कृत्य कन्यादानं ब्राह्म्यो विवाहः ।१। विभवविनियोगेन कन्यादानं प्राजापत्यः २। गोमिथुनदानपूर्वकमार्षः ३। यत्र यज्ञार्थमृत्विजः कन्याप्रदानमेव दक्षिणा स दैवः ४। एते धर्म्या विवाहाश्चत्वारः । मातुः पितुर्बन्धूनां चाप्रामाण्यात्परस्परानुरागेण मिथः समवायाद् गान्धर्वः ५। पणबन्धेन कन्याप्रदानमासुरः ६। प्रसह्य कन्याग्रहणाद्राक्षसः ७। सुप्तप्रमत्तकन्याग्रहणात् पैशाचः ८। एते चत्वारोऽप्यधर्म्याः यदि वधूवरयोः परस्परं रुचिरस्ति तदा अधर्म्या अपि धर्म्याः । शुद्धकलत्रलाभफलो विवाहः, तत्फलं च वधूरक्षणमाचरतः सृजातसुतसन्त-

तिरनुपहतचित्तनिर्वृतिर्गृहकृत्यसुविहितत्वमाभिजात्याचारविशुद्धत्वं देवातिथिबान्धवसत्कारानवद्यत्वं चेति । वधूरक्षणोपायास्त्वेते, गृहकर्मविनियोगः, परिमितोऽर्थसंयोगोऽस्वातन्त्र्यं, सदा च मातृतुल्यस्त्रीलोकावरोधनमित्यादि । एतच्च पत्नीविषयौचित्ये प्राग् विवृतम् । विवाहादौ च व्ययोत्सवादि स्वकुलविभवलोकाद्यौचित्येन यावत्कृतं विलोक्यते, तावदेव कुर्यान् न त्वधिकाधिकं, अधिकव्ययादेः पुण्यकार्येष्वेवोचितत्वात् । एवमन्यत्रापि ज्ञेयम् । विवाहव्ययाद्यनुसारेण च सादरं स्नात्रमहमहापूजारसवतीढौकन-चतुर्विधसङ्घसत्काराद्यपि सत्यापयेद् भवहेतुविवाहादेरप्येवं पुण्यैः सफलीभवनात् । द्वारम् ।३।

तथा **मित्रं** सर्वत्र विश्वास्यतया साहाय्यादिकृत् । **आदि**शब्दाद्वणिक्पुत्रसहायकर्मकराद्यपि त्रिवर्गहेतुतयोचितमेव विधेयम् । तच्चोत्तमप्रकृतिसाधर्मिकत्वधैर्यगाम्भीर्यचातुर्यसद्बुद्ध्यादिगुणम् । एतद् दृष्टान्तादि तु व्यवहारशुद्धौ प्रागुक्तं द्वारम् ४। इति चतुर्दशगाथार्थः ।

**चेइअ-पडिम-पइट्ठा, सुआइपव्वावणा य पयठवणा ।**
**पुत्थयलेहणवायण, पोसहसालाइकारवणं ॥१५॥**

तथा **चैत्य**मुच्चैस्तोरणशिखरमण्डपादिमण्डितं भरतचक्र्यादिवन्मणिस्वर्णादिमयं विशिष्टपाषाणादिमयं वा प्रासादं विशिष्ट-काष्ठेष्टिकादिमयं देवालयं वा, तदशक्तौ तृणकुट्याद्यपि न्यायार्जितवित्तेन विधिना विधापयेत् । यतः—

**न्यायार्जितवित्तेशो, मतिमान् स्फीताशयः सदाचारः । गुर्वादिमतो जिनभवनकारणस्याधिकारीति ॥**

**पाएणऽणंतदेउलजिणपडिमा कारिआ उ जीवेण । असमंजसवित्तीए, न हु सिद्धो दंसणलवो वि ॥**

**भवणं जिणस्स न कयं, न य बिंबं नेव पूइआ साहू । दुद्धरवयं न धरियं, जम्मो परिहारिओ तेहिं ॥**

**यस्तृणमयीमपि कुटीं, कुर्याद्दद्यात्तथैकपुष्पमपि । भक्त्या परमगुरुभ्यः, पुण्योन्मानं कुतस्तस्य ॥**

**किं पुनरुपचितदृढघनशिलासमुद्घातघटितजिनभवनम् । ये कारयन्ति शुभमतिविमानिनस्ते महाधन्याः ॥**

चैत्यविधापनविधिश्च शुद्धभूमिदलभृतकाद्यवञ्चनसूत्रधारसन्माननादिः प्रागुक्तो गृहवत्सर्वोऽपि यथोचितं सविशेषो ज्ञेयः । यतः—

**धम्मत्थमुज्जएणं, कस्स वि अप्पत्तियं न कायव्वं । इअ संजमोवि सेओ, एत्थ य भयवं उदाहरणं ॥**

**सो तावसासमाओ, तेसिं अप्पत्तिअं मुणेऊणं । परं अबोहिबीअं तओ गओ हंत कालेवि ॥**

**कट्ठाई विदलं इह, सुद्धं जं देवया दुववणाओ । णो अविहिणोवणीअं, सयं च काराविअं जं नो ॥**

**कम्मकरा य वराया, अहिगेण दढं उवेंति परिओसं । तुट्ठा य तत्थ कम्मं, तत्तो अहिगं पकुव्वंति ॥**

चैत्यार्चादिविधापने च भावशुद्ध्यै गुरुसङ्घसमक्षमेवं वाच्यम् । यदत्राऽविधिना किञ्चित्परवित्तमागतं तत्पुण्यं तस्य भूयात् ।

यदुक्तं षोडशके—

**यद्यस्य सत्कमनुचितमिह वित्तं तस्य तज्जमिह पुण्यम् । भवतु शुभाशयकरणादित्येतद् भावशुद्धं स्यात् ॥**

न च भूखनन-पूरण-दलपाटकानयन-शिलादिघटन-चयनादिमहारम्भदोषश्चैत्यादिकरणे आशङ्क्यो, यतनाप्रवृत्तत्वेन निर्दोषत्वान्नानाप्रतिमास्थापन-पूजनसङ्घसमागम-धर्मदेशनाकरण-दर्शनव्रतादिप्रतिपत्ति-शासनप्रभावनानुमोदनाद्यनन्तपुण्यहेतुत्वेन शुभोदर्कत्वाच्च । यदाहुः—

**जा जयमाणस्स भवे, विराहणा सुत्तविहिसमग्गस्स । सा होइ निज्जरफला, अज्झत्थविसोहिजुत्तस्स ॥**

द्रव्यस्तवे कूपदृष्टान्तादि प्रागुक्तम् । जीर्णोद्धारे त्वेवं विशिष्योपक्रम्यम् । यतः—

**नवीनजिनगेहस्य, विधाने यत्फलं भवेत् । तस्मादष्टगुणं पुण्यं, जीर्णोद्धारेण जायते ॥**

**जीर्णे समुद्धृते यावत्तावत्पुण्यं न नूतने । उपमर्दो महांस्तत्र, स्वचैत्यख्यातिधीरपि ॥**

तथा—**राया अमच्चसिट्ठी, कोटुंबीए वि देसणं काउं । जिण्णे पुव्वाययणे, जिणकप्पियावि कारवइ ॥**

**जिणभवणाइं जं उद्धरंति भत्तीइ सडिअपडिआइं । ते उद्धरंति अप्पं, भीमाओ भवसमुद्दाओ ॥**

यथा-पित्रा साभिग्रहं चिन्तिते शत्रुञ्जयोद्धारे मन्त्रिवाग्भटेन प्रारम्भिते महेभ्यैः स्वद्रव्यक्षेपे टिप्पमाने टीमाणीयकुतुपि-

कषड्द्रम्मनीविकभीमेन घृतं विक्रीय सर्वस्वदाने सर्वोपरि तन्नामलेखनस्वर्णनिधिलाभादि प्रसिद्धम् । अथ काष्ठचैत्यपदे शैलचैत्यं द्विबर्ष्या निष्पन्नं, वर्द्धापनिकादातुर्द्वात्रिंशत् स्वर्णजिह्वा मन्त्रिणा दत्ताः । प्रासादो विद्युता विदीर्ण इत्यन्येनोक्तौ च द्विगुणा वर्द्धापनिका 'अहं जीवन् द्वितीयोद्धारेऽपि शक्तोऽस्मि' इति तथा चक्रे । लक्षत्रयोनं द्रव्यकोटीत्रयं लग्नम् । पूजार्थं चतुर्विंशति-ग्रामाश्चतुर्विंशतिरारामाश्च दत्ताः । तद्भ्रात्रा आबंडमन्त्रिणा भृगुपुरे दुष्टव्यन्तर्युपद्रवनिवारकश्रीहेमसूरिसान्निध्यादष्टादश-हस्तोच्चशकुनिकाविहारोद्धारः कारितः । मल्लिकार्जुननृपकोशीयो द्वात्रिंशत् स्वर्णघटीमितः कलशस्तत्र न्यस्तो हैमदण्डध्वजादि च। मङ्गल्यदीपावसरे च द्वात्रिंशल्लक्षद्रम्मा अर्थिभ्यो दत्ताः । जीर्णचैत्योद्धारकारणपूर्वकमेव नव्यचैत्यकारापणमुचितम् । तत एव संप्रतिनृपतिनैकोननवतिसहस्रा जीर्णोद्धाराः कारिताः । नव्यचैत्यानि तु षट्त्रिंशत्सहस्राः । एवं कुमारपालवस्तुपालाद्यैरपि नव्यचैत्येभ्यो जीर्णोद्धारा बहव एव व्यधाप्यन्त । तत्सङ्ख्याद्यपि प्रागुक्तम् । चैत्ये च निष्पन्ने शीघ्रमेव प्रतिमां स्थापयेत् । यदाह श्रीहरिभद्रसूरिः—

**जिनभवने जिनबिम्बं, कारयितव्यं द्रुतं तु बुद्धिमता । साधिष्ठानं ह्येवं तद् भवनं वृद्धिमद्भवति ॥**

चैत्ये च कुण्डिकाकलशौरसप्रदीपादिसर्वाङ्गीणोपस्करकारणं, यथाशक्ति कोशदेवदायवाटिकादियुक्तिकरणं च । राजादेस्तु विधापयितुः प्रचुरतरकोशग्रामगोकुलादिप्रदानम् । यथा—श्रीरैवते मालवीयजाकुड्यामात्येन पूर्वं काष्ठचैत्यस्थाने पाषाणबद्धः प्रासादः प्रारम्भितः । स च दुर्दैवतः स्वर्गतः, ततः पञ्चत्रिंशदधिकशतवर्षातिक्रमे सिद्धजयसिंहनृपस्य दण्डेशेन सज्जनेन

त्रिवर्षीसुराष्ट्रोद्ग्राहितेन सप्तविंशतिलक्षद्रम्मैर्निर्मापितः । राज्ञा तद्द्रव्यमार्गणे रैवतोपरि निधीकृतोऽस्तीत्यूचे । नृपस्तत्र प्राप्तो नव्यं भव्यं चैत्यं दृष्ट्वा हृष्टः प्रोचे– 'केनेदं कारितं ?' तेन देवेनेत्युक्ते विस्मितः । ततस्तेन सम्यगुक्त्वा सुजनैरिभ्यैः संभूय दत्तं वित्तम् । स्वामी गृह्णातु पुण्यं वा । विवेकिना राज्ञा पुण्यमेव स्वीकृतम्। तस्मिन् श्रीनेमिचैत्ये पूजार्थं द्वादश ग्रामाश्च दत्ताः ।

तथा जीवन्तस्वामिदेवाधिदेवप्रतिमायाश्चैत्यं प्रभावतीराज्ञ्या कारितम् । क्रमात् चण्डप्रद्योतनृपस्तस्याः पूजार्थं द्वादशग्रामसहस्त्रीं ददौ । तद्वृत्तमेवम्—चम्पायां स्त्रीलोलः कुमारनन्दी स्वर्णकारः स्वर्णपञ्चशत्या स्वर्णपञ्चशत्या सुरूपकन्योद्वाही । एवं पत्नीपञ्चशत्या एकस्तम्भे सौधे ईर्ष्यालुर्ललति स्म । अन्यदा पञ्चशैलद्वीपस्थहासाप्रहासाव्यन्तर्यौ स्वपतिविद्युन्मालिच्यवने निजरूपं दर्शयित्वा व्यामोहितं प्रार्थयमानं पञ्चशैले समागच्छेरित्युक्त्वा गते तेन राज्ञः स्वर्णं दत्वा 'यो मां पञ्चशैले नेता तस्मै द्रव्यकोटिं ददामि' इति पटहोद्घोषे एको निर्यामकः स्थविरो धनं पुत्रेभ्यो दत्वा पोते तमारोप्याऽब्धौ सुदूरे गतः प्रोचे । अयं वटोऽब्धिकूले शैलपादजः, अस्मादधः पोतगमने वटशाखायां त्वं विलगेः । पञ्चशैलाद् भारुंडास्त्रिपदा अत्रागत्य स्वपन्ति । तदङ्घ्रौ मध्यमे पटेन स्वं दृढं बद्ध्वा तिष्ठेः । प्रातस्तैरुड्डीनैः पञ्चशैले प्राप्स्यसि । पोतस्तु महावर्त्ते पतिष्यति । ततः स्वर्णकृत् तथा कृत्वा तत्र प्राप्तः । ताभ्यां प्रोक्तोऽनेनाङ्गेनावां न भोग्ये, अतोऽग्निप्रवेशादि कुरु । ततस्ताभ्यां पाणिपुटे नीत्वा चंपोद्याने मुक्तो, मित्रनागिलश्राद्धेन वार्यमाणोऽपि निदानेनाऽग्निमरणं कृत्वा पञ्चशैलेशो जज्ञे । नागिलस्तद्वैराग्यात् प्रव्रज्याऽच्युते देवो जातः । अन्यदा नन्दीश्वरगच्छत्सुराणामाज्ञया हासाप्रहासाभ्यां पटहं गृहाणेत्युक्तौ तस्याहङ्कारहुङ्कारकारिणो गले पटहो विलग्नः कथमपि न

दूरीस्यात्। तदाऽवधेर्ज्ञात्वा नागिलसुरे तत्रागते तत्तेजसा घूकवद्भानोर्नश्यंस्तेन तेजः संहृत्य उपलक्षयसीत्युक्त इन्द्रादीन् को नोपलक्षयेद्, इतिवादी श्राद्धरूपेण प्राग्भवोक्त्या बोधितः स प्राह, 'अथ किं कुर्वे ?' तेनोक्तं, गार्हस्थ्ये कायोत्सर्गस्थस्य भावयतेः श्रीवीरस्य प्रतिमां कारय, यथा परत्र बोधिं लभेथाः । ततः स प्रतिमास्थश्रीवीरं विलोक्य नत्वा च तद्रूपां श्रीवीरप्रतिमां महाहिमवद्गिर्यानीतगोशीर्षचन्दनेन कृत्वा प्रतिष्ठाप्य सर्वाङ्गीणाभरणपुष्पादिभिरभ्यर्च्य जात्यचन्दनसमुद्गे तां क्षिप्त्वाऽब्धौ एकस्य पोतस्य षण्मास्युत्पातं संहृत्य सांयात्रिकं प्रोचे, इमं प्रतिमागर्भं समुद्गे नीत्वा सिन्धुसौवीरदेशे वीतभयपत्तने चतुष्पथे देवाधिदेवप्रतिमा गृह्यतामिति घोषयेः । तेनापि तथा कृते तापसभक्त उदायननृपोऽन्येऽपि दर्शनिनः स्वं स्वं देवं स्मृत्वा तं संपुटं जघ्नुः कुठारैः । कुठाराणां भङ्गे सर्वेषूद्विग्नेषु मध्याह्ने जाते प्रभावतीराज्ञ्या भोजनार्थं नृपाकारणाय चेटी प्रहिता । कौतुकदर्शनाय राज्ञा प्रभावती तत्राऽऽकारिता प्राह, देवाधिदेवोऽर्हन्नेव, नान्ये पश्यन्तु कौतुकम्, इत्युक्त्वा यक्षकर्दमेनाभिषिच्य पुष्पाञ्जलिं क्षिप्त्वा देवाधिदेवो मम दर्शनं देयात् इति वदन्त्यामेव तस्यां स संपुटः प्रातः कमलकोशवत् स्वयं विदलितः । अम्लानमाल्यप्रतिमा स्फुटीभूता जिनमतोन्नतिश्चोच्चैः । तत सा सांयात्रिकं सत्कृत्य तां सोत्सवमन्तःपुरान्तर्नीत्वा नव्यकारितचैत्ये न्यस्य त्रिसन्ध्यमानर्च। अन्यदा राज्ञ्युपरोधाद्राज्ञि वीणां वादयति तस्यास्तत्पुरो नृत्यन्त्या राज्ञा शीर्षं न दृष्टं तत्क्षोभाद्राज्ञः करात् कम्बिकापाते नृत्यरसभङ्गे राज्ञ्याः कोपे नृपः सम्यगूचे । तयाऽन्यदा दास्यानीतं श्वेतमपि धौतिकं रक्तं दृष्ट्वा क्रुधा दर्पणेन दासी हता मृता । ततस्तत् श्वेतमेव दृष्टम् । तेन दुर्निमित्तेन नृत्यशीर्षाऽदर्शनदुर्निमित्तेन च स्वायुः स्वल्पं ज्ञात्वा स्त्रीहत्यया-

ऽऽद्यव्रतभङ्गाद्विरक्ता नृपमनुज्ञाप्य देवत्वे त्वयाऽहं सम्यग्धर्मे प्रवर्त्त्य इति राज्ञोक्ता तत्प्रतिमाशुश्रूषणार्थं देवदत्ताख्यां कुब्जां नियोज्य सोत्सवं प्रव्रज्याऽनशनेन सौधर्मदेवोऽभूत् । तेन बोधनेऽपि नृपस्तापसभक्तिं न जहाति । अहो दृष्टिरागस्य दुरुच्छेदता ! ततस्तापसरूपेण दिव्यामृतफलं दत्वा तदास्वादलुब्धो नृपः स्वशक्त्यैकाक्येवाऽऽश्रमे नीतो मायातापसैस्ताड्यमानो नष्टोऽग्रे साधूनां शरणं प्रविष्टः । तैर्मा भैषीरित्युक्तस्तदुक्तं धर्मं प्रपेदे । ततः सुरः स्वर्द्धिं दर्शयित्वा नृपमर्हद्धर्मे दृढीकृत्य विषमे मां स्मरेरित्युक्त्वा तिरोदधे । इतो गान्धारश्राद्धः सर्वतश्चैत्यवन्दको वैताढ्ये बहुक्षपणतुष्टदेव्या देवान् वन्दापितो दत्तकाम-प्रदाऽष्टोत्तरशतगुटिकः, तामेकां मुखे क्षिप्त्वा वीतभये यामीति ध्यायी तत्र प्राप्तः । कुब्जया तामर्चामवन्दाप्यत । तत्र मान्द्याक्रान्तस्तया शुश्रूषितः स्वायुः स्वल्पं जानंस्ता गुटिकास्तस्यै दत्वा प्रवव्राज । सा एकया गुटिकया जग्धयाऽतिसुरूपा सुवर्णगुलिकेति ख्याता । एकया च चतुर्दशकिरीटिनृपसेव्यं चण्डप्रद्योतं पतिमवाञ्छद्, उदायनस्य पितृतुल्यत्वाच्छेपनृपाणां च तत्सेवकत्वात् । देवतोक्त्या प्रद्योतेन दूतप्रेषणे तयाऽऽकारितोऽनिलवेगगजारूढः प्रद्योत आगतस्तामाह्वयत् । तयोक्तमेतां प्रतिमां विना नागमिष्यामि । तेनैतत्प्रतिकृतिं कारयित्वा अत्र मुञ्च यथैषा सह नीयते, ततः प्रद्योतोऽवन्त्यां गत्वा तत्प्रतिकृतिं कारयित्वा केवलिकपिलब्रह्मर्षिणा प्रतिष्ठाप्य हस्त्यारूढो वीतभये आगत्य तत्स्थाने तां मुक्त्वा मुख्यार्चां दासीं च गृहीत्वा रात्रौ रहो गतः । ताभ्यां विषयासक्ताभ्यां सार्चा पूजनार्थं विदिशापुर्यां भायलस्वामिवणिजोऽर्पिता । अन्यदा कम्बलशम्बलनागकुमारौ तत्प्रतिमापूजनार्थमागतौ । पातालेऽर्चां निनंसुं भायलमौत्सुक्याददृढरचितपूजं हृदयवर्त्मना निन्याते । तत्र जिनभक्त्या तुष्टं धरणेन्द्रं

भायलः प्राह, यथा मन्नामख्यातिः स्यात्तथा कुरु । तेनोक्तं तथा भावि । चण्डप्रद्योतेन विदिशापूस्त्वन्नाम्ना देवकीयं पुरं करिष्यते। परं कृतार्द्धपूजत्वदागत्या आगच्छत्काले सार्चा गुप्तैव मिथ्यादृग्भिः पूजयिष्यते । तत्प्रतिकृतिरादित्यो भायलस्वाम्ययमित्युक्त्वा बहिः स्थापयिष्यते । मा विषीद दुष्षमावशादेवं भावि । भायलस्तथैव पश्चाद्गतः । अथ प्रातरर्चां म्लानमाल्यां दास्यभावं करिमदनाशं च दृष्ट्वा प्रद्योतमागतं निर्णीय षोडशदेशत्रिषष्ठित्रिशतीपुराधिप उदायननृपोऽभ्यषेण-यन्महासेनादिदशकिरीटिनृपान्वितः । मार्गे ग्रीष्मे जलाभावे स्मृतप्रभावतीसुरेण त्रिपुष्कराण्यम्भसाऽपूर्यन्त । क्रमाद्युद्धे प्रद्योतं रथारोहसङ्केतेऽप्यनिलवेगगजारूढं भ्रष्टसङ्गमङ्घ्रितलविद्धद्वीपपाते बद्ध्वा भाले मद्दासीपतिरित्यङ्कं व्यधात् । ततस्तामर्चामानेतुं विदिशां गतः । परं बहूपक्रमेऽप्यचलन्ती अर्चा प्रोचे, वीतभये पांसुवृष्टिर्भवित्रीति नैमि । ततः स पश्चान्निवृत्तोऽन्तरा प्रावृषि सैन्यं न्यस्य स्थितः । वार्षिकपर्वणि उदायननृपे उपोषिते रसवत्यर्थं सूपकारेण प्रद्योतः पृष्टो विषप्रक्षेपभीतः प्रोचे, साधु स्मारितं, ममाऽप्युपवासोऽस्ति । पित्रोः श्राद्धत्वात्तद् ज्ञात्वा न्यगादीदुदायनो ज्ञातमस्य श्राद्धत्वं, परं स यद्येवं वक्ति तदा नाम्नाऽपि साधर्मिकेऽस्मिन् बद्धे पर्वप्रतिक्रान्तिः कथं शुध्यति ? इति तं मुक्त्वा क्षमयित्वा भाले पट्टबन्धं दत्वाऽवन्तिदेशं ददौ । अहो धर्मिष्ठतासन्तोषनिष्ठतादि नृपप्रष्ठस्य । वर्षाप्रान्ते च वीतभयं ययौ । सैन्यस्थाने आगतवणिग्भिः स्थितैर्दशपुरं पुरं जातम् । तत् प्रद्योतेन जीवतस्वाम्यर्चायै शासने दत्तम् । तथा भायलस्वामिनामन्यासपूर्वं विदिशापूर्द्वादशग्रामसहस्राश्चान्ये दत्ताः । अथ प्रभावतीसुरोक्त्योदायननृपः कपिलर्षिप्रतिष्ठितार्चामर्चन्नन्यदा पाक्षिकपौषधे रात्रिजागरे जातप्रव्रज्याध्यवसायस्तदर्चायै भूरिग्रामा-

करपुरादिपूजार्थं दत्वा 'राज्यं नरकान्तं प्रभावतीसुतायाभीचये कथं ददामि ?' इतिधीः केशिनामधेयं जामेयं राज्ये न्यस्य तत्कृतोत्सवः श्रीवीरपार्श्वे प्रवव्राज । स चरमराजर्षिः कदाचिदकालापथ्याहारैर्महाव्याध्युत्पत्तौ 'शरीरमाद्यं खलु धर्मसाधनम्' इति वैद्योक्तदधिकृते गोष्ठेषु तिष्ठन् वीतभये प्राप्तः, व्रतभग्नो राज्यार्थ्ययं मार्य एवेत्यमात्यैर्व्युद्ग्राहितः केशी भक्तोऽपि सविषं दध्यदापयत् । सुरेण विषं हृत्वा दधिग्रहणं निषिद्धं पुनर्व्याधिवृद्धौ दधिग्रहणे त्रिः सुरेण विषं हृतं । जातु सुरप्रमादे सविषदधिभोगे मासमनशनेनोत्पन्नकेवलः सिद्धः । सुरस्तु क्रुद्धो वीतभये पांसुवृष्टिं चक्रे । कुम्भकारं राजर्षिशय्यातरं सिनपल्लयां नीत्वा कुम्भकारकृतमिति तन्नाम न्यस्तवान् । उदायननृपसुतोऽभीचिर्योग्यत्वेऽपि पित्रा राज्याप्रदानाद् दूनो मातृष्वस्रेयकूणिक-नृपोपान्ते गत्वा सुखं स्थितः । सुश्राद्धधर्ममाराधयन्नप्यत्यक्तपितृपराभववैरस्तदनालोच्य पाक्षिकानशनेन मृतोऽसुरवरोऽभूत् एकपल्यायुः । ततो विदेहे सेत्स्यति । पांसुवृष्टौ भूगता कपिलर्षिप्रतिष्ठिता प्रतिमा श्रीगुरुमुखात् ज्ञाता कुमारपालनृपेण । पांसुस्थलखानने उदायननृपदत्तशासनपत्रान्विता सद्यः स्फुटीभूता । यथावत् प्रपूज्य प्राज्योत्सवैरणहिल्लपत्तने नीता । नव्यकारितगरीयस्तरस्फाटिकप्रासादे न्यस्ता । पत्रलिखितमुदायननृपदत्तं ग्रामाकरादिशासनं सर्वं प्रमाणीकृत्य चिरमर्चिता च । तत्प्रतिमास्थापनेन सर्वाङ्गीसमृद्ध्या ववृधे । **इति देवाधिदेवप्रतिमोदायननृपादिसम्बन्धः ।**

एवं देवदायकरणे हि विशिष्टपूजाद्यविच्छित्तियथाविलोक्यमानचैत्यादिसमारचनदक्षादिसुयुक्तिः । तदुक्तम्-

**जो जिणवराण भवणं, कुणइ जहासत्ति विहवसंजुत्तं । सो पावइ परमसुहं, सुरगणअभिनंदिओ सुइरं ॥** द्वारं ५।

तथैवं **प्रतिमा** अर्हद्बिम्बानि मणिस्वर्णादिधातुचन्दनादिदारुदन्तशिलामृदादिमय्यो धनुःपञ्चशत्यादिमाना यावदङ्गुष्ठमाना यथाशक्ति विधाप्याः । यतः—

**सन्मृत्तिकामलशिलातलदन्तरौप्यसौवर्णरत्नमणिचन्दनचारुबिम्बम् ।**
**कुर्वन्ति जैनमिह ये स्वधनानुरूपं, ते प्राप्नुवन्ति नृसुरेषु महासुखानि ॥**

**दारिद्दं दोहग्गं, कुजाइकुसरीरकुगईकुमईओ । अवमाणरोगसोगा, न हुंति जिणबिंबकारीणं ॥**

प्रतिमाश्च वास्तुशास्त्रोक्तविधिनिष्पन्नाः सुलक्षणाश्चात्राप्यभ्युदयादिगुणहेतुः । यतः—

**अन्यायद्रव्यनिष्पन्ना, परवास्तुदलोद्भवा । हीनाधिकाङ्गी प्रतिमा, स्वपरोन्नतिनाशिनी ॥**

**मुहनक्कनयणनाही, कडिभंगे मूलनायगं चयह । आहरणवत्थपरिगरचिधाउह भंगिपूइज्जा ॥**

**वरिससयायो उड्ढं, जं बिंबं उत्तमेहिं संठविअं । विअलंगुवि पूइज्जइ, तं बिंबं निष्फलं न जओ ॥**

**बिंबपरिवारमज्झे, सेलस्स य वन्नसंकरं न सुहं । समअंगुलप्पमाणं, न सुंदरं होइ कइआवि ॥**

**इक्कंगुलाइपडिमा, इक्कारस जाव गेहि पूइज्जा । उड्ढं पासाइ पुणो, इअ भणियं पुव्वसूरीहिं ॥**

**निरयावलिसुत्ताओ, लेवोवलकट्ठदंतलोहाणं । परिवारमाणरहिअं, घरम्मि नो पूअए बिंबं ॥**

**गिहपडिमाणं पुरओ, बलिवित्थारो न चेव कायव्वो । निच्चं ण्हवणं तिअसंझमच्चणं भावओ कुज्जा ॥**

प्रतिमा मुख्यवृत्त्या सपरिकराः सतिलकाद्याभरणाश्च कारयितव्या विशिष्य च मूलनायकस्य । तथैव विशेषशोभातज्जनित-विशेषपुण्यानुबन्धादिसम्भवात् । उक्तं च—

**पासाईआ पडिमा लक्खणजुत्ता समत्तलंकरणा । जह पल्हाएइ मणं, तह निज्जरमो विआणाहि ॥**

चैत्यार्चादिविधापनं च निस्तुलफलम् । यतस्तद्यावत्तिष्ठति तावदसङ्ख्यकालमपि तज्जं पुण्यम् । यथा भरतचक्रिकारित-मष्टापदचैत्यं रैवतान्तर्ब्रह्मेन्द्रकृतं काञ्चनबलानकादिचैत्यं च, तयोः प्रतिमा भरतचक्रिमुद्रिकागतकुल्यपाकतीर्थस्थमाणिक्य-स्वामिप्रतिमा-स्तम्भनकादिप्रतिमाश्चाद्यापि पूज्यन्ते । तदवोचाम—

**जल-शीताशन-भोजन,-मासिक-वसनाब्द-जीविकादानम् । सामायिक-पौरुष्याद्युपवासाभिग्रहव्रताद्यथवा ॥**

**क्षण-याम-दिवस-मासाऽयन-हायन-जीविताद्यवधिविविधम् । पण्यं चैत्यार्चादौ, त्वनवधि तद्दर्शनादिभवम् ॥** युग्मम् ।

अत एवास्यां चतुर्विंशतिकायां पूर्वं भरतचक्री शत्रुञ्जये रत्नमयं चतुर्मुखं चतुरशीतिमण्डपान्वितं क्रोशोच्चं गव्यूतत्रयायामं प्रासादं पञ्चकोटीवृतश्रीपुंडरीकज्ञाननिर्वाणपदेऽचीकरत् । एवं बाहुबलिमरुदेव्यादिशृङ्गेषु रैवतेऽर्बुदे वैभारगिरौ सम्मेताद्र्यष्टापदादौ च तेन प्रासादाः प्रतिमाश्च पञ्चधनुःशतादिमाना हैम्याद्याः कारिताः । दण्डवीर्यनृपसगरचक्र्यादिभिस्तु तेषामुद्धाराः । हरिषेणचक्री

पृथ्वीं जिनप्रासादैरमण्डयत् । संप्रतिनृपः सपादलक्षं प्रासादांस्तेषु शतवर्षायुर्दिनशुद्धयै षट्त्रिंशत्सहस्रीं नव्यान् शेषांश्च जीर्णोद्धारान् सपादकोटिं च सौवर्णादीनि बिंबान्यकारयदिति श्रुतिः । आमनृपेण गोपालगिरौ श्रीवीरप्रासाद एकोत्तरशतहस्तोच्चोऽध्युष्टकोटीनिष्पन्नसप्तहस्तस्वर्णबिम्बालङ्कृतोऽकार्यत । तत्र मूलमण्डपे सपादलक्षस्वर्णं प्रेक्षामण्डपे त्वेकविंशतिर्लक्षा व्ययिताः । कुमारपालेन चतुश्चत्वारिंशदधिकाः चतुर्दशशती नव्या जीर्णोद्धाराश्च षोडशशती । तत्र पितृनाम्ना त्रिभुवनविहारे षण्णवतिकोटिद्रव्यव्ययनिष्पन्ने मुख्यार्चा पञ्चविंशशताङ्गुलारिष्टरत्नमयी द्वासप्ततिदेवकुलिकासु चतुर्विंशतिप्रतिमा रात्यो हैम्यो राजत्यश्च चतुर्दश चतुर्दश भारमिताः । मन्त्रिवस्तुपालेन त्रयोदशोत्तरा त्रयोदशशती नव्याः । द्वाविंशतिशती जीर्णोद्धाराः, सपादलक्षं बिंबानि । साधुपेथडेन चतुरशीतिः प्रासादाः । तत्र सुरगिरौ जैनचैत्यं नास्तीति तदर्थं नृपवीरमदेप्रधानविप्रहेमादेनाम्ना मान्धातापुरे ओङ्कारपुरे च त्रिवर्षी सत्रागारे कारिते तुष्टो हेमादेः साधुपेथडाय सप्तसौधभुवं ददौ । पादखनने मिष्टजलोद्गमे केनापि वाप्यर्थं नृपस्य पैशुन्ये कृते रात्रौ द्वादशसहस्रटङ्कलवणक्षेपः । चैत्यार्थं द्वात्रिंशत्करभ्यः कनकभृताः प्रहिताः । चतुरशीतिसहस्रटण्काः पद्याबन्धे लग्नाः । चैत्ये पूर्णे वर्द्धापयितुस्त्रिलक्षीटङ्कदानम् । एवं पेथडविहार इत्यादि तथा तेनैव शत्रुञ्जये श्रीऋषभचैत्यमेकविंशतिघटीस्वर्णेन सर्वतो मठयित्वा स्वर्णादिशृङ्गमिव स्वर्णमयीचक्रे । श्रीरैवते काञ्चनबलानकप्रबन्धस्त्वयं गतचतुर्विंशतिकायां तृतीयः सागरजिन उज्जयिन्यां नरवाहननृपेण केवलिपर्षदं दृष्ट्वा पृष्टोऽहं कदा केवली भावी ? जिनेनोक्तम्-आगामिचतुर्विंशतिकायां द्वाविंशश्रीनेमिनाथजिनतीर्थे । ततः स प्रव्रज्य ब्रह्मेन्द्रीभूय वज्रमृन्मयं श्रीनेमिबिम्बं कृत्वा दशसागरोपमान्यानर्च ।

स्वायुःप्रान्ते रैवतान्तश्चैत्यगर्भगृहत्रयं रत्नमणिस्वर्णमयबिम्बयुतं कृत्वा तदग्रे काञ्चनबलानकं चक्रे । तत्र तद्बिम्बं स्थापितं । क्रमाद्रैवते सङ्घपतिरत्नः स प्रौढसङ्घो यात्रार्थमाययौ । हर्षोत्कर्षात् स्नात्रे कृते लेप्यमयबिम्बं जगाल । ततः सङ्घपतिरत्नोऽतिदूनः षष्ठिक्षपणतुष्टाऽम्बागिरा काञ्चनबलानकाद्वज्रमयं श्रीनेमिबिम्बमामतन्तुवेष्टितमानिन्ये । चैत्यद्वारागमने पश्चाद्विलोकने तत्तत्रैव तस्थौ । ततश्चैत्यद्वारं परावर्तितमद्यापि तथैवास्ति । केचिदाहुः, काञ्चनबलानके द्वासप्ततिर्महत्यः प्रतिमा आसन् । तत्राष्टादशाष्टादश हैम्यो रात्यो राजत्य आश्मन्यश्चेति द्वासप्ततिरिति रेवते श्रीनेमिप्रबन्धः । द्वारम् ।६।

तथा प्रतिमानां **प्रतिष्ठा** शीघ्रं विधाप्या । यदुक्तं षोडशके—

**निष्पन्नस्यैवं खलु, जिनबिम्बस्योदिता प्रतिष्ठाशु । दशदिवसाभ्यन्तरतः, सा च त्रिविधा समासेन ॥**

**व्यक्त्याख्या खल्वेका, क्षेत्राख्या चापरा महाख्या च । यस्तीर्थकृद्यदा किल, तस्य तदाद्येति समयविदः ॥**

**ऋषभाद्यानां तु तथा, सर्वेषामेव मध्यमा ज्ञेया । सप्तत्यधिकशतस्य तु, चरमेह महाप्रतिष्ठेति ॥**

बृहद्भाष्येऽपि—

**वत्तिपइट्ठा एगा, खेत्तपइट्ठा महापइट्ठा य । एगचउवीससत्तरससयाण सा होइ अणुकमसो ॥**

प्रतिष्ठाविधिश्च सर्वाङ्गीणतदुपकरणमीलन-नानास्थानश्रीसङ्घगुर्वाकारणप्रौढप्रवेशमहादिततत्स्वागतकरण-भोजनवसनप्रदानादि-

सर्वाङ्गीणसत्कारणबन्दिमोक्षकारण-मारिनिवारणावारितसत्रवितरण-सूत्रधारसत्कारण-स्फीतसङ्गीताद्यभिनवोद्भुतोत्सवावतारणादि-रष्टादशस्नात्रकरणादिश्च प्रतिष्ठाकल्पादेर्ज्ञेयः । प्रतिष्ठायां स्नात्रैर्जन्मावस्थां, फलनैवेद्यपुष्पविलेपनसङ्गीताद्युपचारैः कौमाराद्युत्त-रोत्तरावस्थां, छाद्मस्थ्यसूचकाच्छादनाच्छादितकायत्वाद्यधिवासनया शुद्धचारित्रावस्थां, नेत्रोन्मीलनेन केवलोत्पत्त्यवस्थां, सर्वाङ्गीणपूजोपचारैश्च समवसृत्यवस्थां चिन्तयेदिति श्राद्धसमाचारीवृत्तौ । प्रतिष्ठानन्तरं च द्वादशमासान् विशिष्य च प्रतिष्ठादिने स्नात्रादि कृत्वा सम्पूर्णे वर्षेऽष्टाह्निकादिविशेषपूजापूर्वमायुर्ग्रन्थिर्बन्धनीयः, उत्तरोत्तरविशेषपूजा च कार्या । तद्दिने च साधर्मिक-वात्सल्यसङ्घार्चादि यथाशक्ति विधेयम् । प्रतिष्ठाषोडशके त्वेवमुक्तम्—

**अष्टौ दिवसान् यावत्, पूजाऽविच्छेदतोऽस्य कर्त्तव्या । दानं च यथाविभवं, दातव्यं सर्वसत्त्वेभ्यः ॥** द्वारम् ७।

तथैव प्रौढोत्सवैः **सुतादीनां** पुत्रादीनाम् आदिशब्दात् पुत्रीभ्रातृभ्रातृव्यस्वजनसुहृत्परिजनादीनां **प्रव्राजना** च दीक्षादापनमुप-लक्षणत्वादुपस्थापनाकारणं च विधेयम् । यतः—

**पंच य पुत्तसयाइं, भरहस्स य सत्त नत्तुअ सयाइं । सयराहं पव्वइया, तम्मि कुमारा समोसरणे ॥**

कृष्णचेटकनृपयोस्तु स्वापत्यविवाहनेऽपि नियमवतोः स्वपुत्र्यादीनामन्येषां च थावच्चापुत्रादीनां प्रौढोत्सवैः प्रव्राजना प्रतीता। इयं च महाफला । यतः—

**ते धन्ना कयपुन्ना, जणओ जणणी अ सयणवग्गो अ । जेसिं कुलम्मि जायइ, चारित्तधरो महापुत्तो ॥**

लोकेऽपि–**तावद् भ्रमन्ति संसारे, पितरः पिण्डकाङ्क्षिणः । यावत्कुले विशुद्धात्मा, यतिः पुत्रो न जायते ॥** द्वारम् ८।

तथा **पदस्थापना** गणिवाचनाचार्यवाचकाचार्यादिपदप्रतिष्ठापनं दीक्षितस्वपुत्रादीनामन्येषां वा पदार्हाणां शासनौन्नत्यादि-निमित्तप्रौढोत्सवैर्विधाप्या । श्रूयते हि-प्रथमेऽर्हतः समवसरणे शक्रेण गणधरपदस्थापनाकारणं मन्त्रिवस्तुपालेनाप्येकविंशतिसूरीणां पदस्थापना कारिता । द्वारम् ९।

तथा **पुस्तकानां** श्रीकल्पाद्यागमजिनचरित्रादिसत्कानां न्यायार्जितवित्तेन विशिष्टपत्रविशिष्टविशुद्धाक्षरादियुक्त्या **लेखनं** तथा **वाचनं,** संविग्नगीतार्थेभ्यः प्रोढप्रारम्भाद्युत्सवैः प्रत्यहं पूजादिबहुमानपूर्वकं व्याख्यापनं अनेकभव्यप्रतिबोधहेतुर्विधेयम् । उपलक्षणत्वात्तद्वाचनभणनादिकृतां वस्त्रादिभिरुपष्टम्भप्रदानं च । यतः–

**ये लेखयन्ति जिनशासनपुस्तकानि, व्याख्यानयन्ति च पठन्ति च पाठयन्ति ।**
**शृण्वन्ति रक्षणविधौ च समाद्रियन्ते, ते मर्त्यदेवशिवशर्म नरा लभन्ते ॥**

**पठति पाठयते पठतामम्ुं, वसनभोजनपुस्तकवस्तुभिः । प्रतिदिनं कुरुते य उपग्रहं, स इह सर्वविदेव भवेन्नरः ॥**

जिनागमस्य च केवलज्ञानादप्यतिशायिता दृश्यते । यदाहुः–

**ओहो सुओवउत्तो, सुअनाणी जइ हु गिण्हइ असुद्धं । तं केवली वि भुंजइ, अपमाणसुअं भवे इहरा ॥**

श्रुतं हि दुषमाकालवशाद् द्वादशवर्षी दुर्भिक्षादिभिरुच्छिन्नप्रायं मत्वा भगवद्भिर्नागार्जुनस्कन्दिलाचार्यप्रभृतिभिः पुस्तकेषु न्यस्तम् । ततः श्रुतबहुमानिना तत्पुस्तकेषु लेखनीयं दुकूलादिभिरभ्यर्चनीयं च । श्रूयते च साधुपेथडेन सप्त मन्त्रिवस्तुपालेन चाष्टादशकोटिद्रव्यैस्त्रयो ज्ञानकोशा लेखिताः । थिरापद्रीयसङ्घपति-आभूनाम्ना तु त्रिकोटिटङ्कैः सर्वागमप्रतिरेका सौवर्णाक्षरै-र्द्वितीया सर्वग्रन्थप्रतिश्च मष्यक्षरैः । द्वारं १०।

तथा **पौषधशालायाः** श्राद्धादीनां पौषधग्रहणार्थं साधारणस्थानस्य प्रागुक्तगृहविधिना **कारणं** विधापनं विधेयम् । सा च साधर्मिकार्थं कारिता प्रगुणिता च निरवद्यार्हस्थानत्वेन यथावसरं साधूनामप्युपाश्रयत्वेन प्रदेयेति तस्याः महाफलत्वम् । यतः–

**जो देउवस्सयं जइवराण तवनियमजोगजुत्ताणं । तेणं दिन्नावत्थन्नपाणसयणासणविगप्पा ॥**

श्रीवस्तुपालेन नवशती चतुरशीत्यधिका पौषधशालाः कारिताः । सिद्धराजजयसिंहप्रधानमन्त्रि 'सांतू' नाम्ना नव्य-भव्यस्वावासं वादिदेवसूरीणां दर्शयित्वोक्तं, कीदृगयं ? शिष्यमाणिक्येनोक्तं, पौषधशाला स्यात्तदा वर्ण्यते, मन्त्रिणोक्तं, 'एष सैव भवतु' तस्यां बाह्यपट्टशालायां द्वयोः पार्श्वयोरादर्शाः पुरुषप्रमाणा आसन्, श्राद्धानां धर्मध्यानादनु वक्त्रवीक्षार्थम् । द्वारं ११ । इति पञ्चदशगाथार्थः ॥

**आजम्मं सम्मत्तं, जहसत्ति वयाइं दिक्खगह अहवा ।**
**आरंभचाउ बंभं पडिमाई अंतिआरहणा ॥१६॥**

**आजन्म** बाल्यात्प्रभृति यावज्जीवं **सम्यक्त्वं** सम्यग्दर्शनं **यथाशक्ति व्रतानि** चाणुव्रतादीनि पाल्यानि । एतत्स्वरूपाद्यर्थ-दीपिकायामुक्तत्वादत्र नोच्यते । द्वारद्वयं १२-१३।

तथा **दीक्षाग्रहो**ऽवसरे प्रव्रज्यास्वीकारः कार्यः । अयमर्थः-श्राद्धो हि बाल्ये दीक्षाग्रहणासम्भवेन स्वं वञ्चितमिव नित्यं मन्यते। यतः—

**धन्ना हु बालमुणिणो कुमारवासम्मि जे उ पव्वइआ । निज्जिणिऊण अणंगं, दुहावहं सव्वलोआणं ॥**

स्वदैववशजातं गृहस्थभावं चाहर्निशं सर्वविरतिप्रतिपत्त्येकाग्रचित्ततयाऽम्बुघटद्वयवाहिवनितासत्यादिन्यायेन पालयति । आह हि—

**कुर्वन्ननेककर्माणि कर्मदोषैर्न लिप्यते । तल्लयेन स्थितो योगी, यथा स्त्री नीरवाहिनी ॥**

**परपुंसि रता नारी, भर्त्तारमनुवर्त्तते । तथा तत्त्वरतो योगी, संसारमनुवर्त्तते ॥**

**जह नाम सुद्धवेसा, सुअंगपरिकम्मणं निसंसा । अज्जं कल्लं व चएमि, एअंमि अ भावओ कुणइ ॥**

जह वा पउत्थवईआ कुलबहुआ निवसिणेहरंगगया । देहट्ठिइमाईअं, सरमाणा पइगुणे कुणइ ॥
एमेव सव्वविरइं, मणे कुणंतो सुसावओ निच्चं । पालेज्ज गिहत्थत्तं, अप्पमहन्नं व मन्नंतो ॥
ते धन्ना सप्पुरिसा, पवित्तिअं तेहिं धरणिवलयमिणं । निम्महिअमोहपसरा, जिणदिक्खं जे पवज्जंति ॥

भावश्रावकस्य लक्षणान्यप्येवमाहुः—

इत्थिदिअऽत्थसंसारविसयआरंभगेह दंसणओ । गड्डरिआइपवाहे पुरस्सरं आगमपवित्ती ॥
दाणाइ जहासत्ती पवत्तणं विहिरऽरत्तदुट्ठे अ । मज्झत्थ असंबद्धे परत्थकामोवभोगी अ ॥
वेसा इव गिहवासं, पालइ सत्तरसपयनिबद्धं तु । भावगयभावसावगलक्खणमेअं समासेणं ॥
इत्थि अणत्थभवणं, चलचित्तं नरयवत्तणीभूअं । जाणंतो हिअकामी, वसवत्ती होइ न हू तीसे ॥
इंदिअ चवलतुरंगे, दुग्गइमग्गाणुधाविरे निच्चं । भाविअभवस्सरूवो, रुंभइ सन्नाणरस्सीहिं ॥
सयलाणत्थनिमित्तं, आयासकिलेसकारणमसारं । नाऊण धणं धीमं, न हु लुब्भइ तंमि तणुअंपि ॥
दुहरूवं दुक्खफलं, दुहाणुबंधि विडंबणारूवं । संसारमसारं जाणिऊण न रइं तहिं कुणइ ॥
खणमित्तसुहे विसए, विसोवमाणे सयावि मन्नंतो । तेसु न करेइ गिद्धिं, भवभीरू मुणिअतत्तत्थो ॥

वज्जइ तिव्वारंभं, कुणइ अकामो अनिव्वहंतो अ । थुणइ निरारंभजणं, दयालुओ सव्वजीवेसु ॥
गिहवासं पासं पिव भावंतो वसइ दुक्खिओ तम्मि । चारित्तमोहणिज्जं, णिज्जिणिउं उज्जमं कुणइ ॥
अत्थिक्कभावकलिओ, पभावणावन्नवायमाईहिं । गुरुभत्तिजुओ धिइमं, धरेइ सद्दंसणं विमलं ॥
गड्डुरिगपवाहेणं, गयाणुगइयं जणं विआणंतो । परिहरइ लोगसन्नं, सुसमिक्खिअकारओ धीरो ॥
नत्थि परलोगमग्गे, पमाणमन्नं जिणागमं मुत्तुं । आगमपुरस्सरं चिअ, करेइ तो सव्वकिरियाओ ॥
अणिगूहंतो सत्तिं, आयावाहाइ जह बहुं कुणइ । आयरइ तहा सुमई, दाणाइचउव्विहं धम्मं ॥
हिअमणवज्जं किरिअं, चिंतामणिरयणदुल्लहं लहिउं । सम्मं समायरंतो, न हु लज्जइ मुद्धहसिओवि ॥
देहट्ठिईनिबंधणधणसयणाहारगेहमाईसु । निवसइ अरत्तदुट्ठो, संसारगएसु भावेसु ॥
उवसमसारविआरो, वाहिज्जइ नेव रागदोसेहिं । मज्झत्थो हिअकामी, असग्गहं सव्वहा चयइ ॥
भावंतो अणवरयं, खणभंगुरयं समत्थवत्थूणं । संबद्धोवि धणाइसु वज्जइ पडिबंधसंबंधं ॥
संसारविरत्तमणो, भोगुवभोगा न तित्तिहेउ त्ति । नाउं पराणुरोहा, पवत्तए कामभोगेसु ॥
वेसव्व निरासंसो, अज्जं कल्लं च यामि चिंतंतो । परकीअं पिव पालइ, गेहावासं सिढिलभावो ॥

**इय सतरसगुणजुत्तो, जिणागमे भावसावगो भणिओ । एस पुण कुसलजोगा, लहइ लहुं भावसाहुत्तं ॥**

इति धर्मरत्नशास्त्रे । एवं शुभभावनाभावितः, प्रागुक्तदिनादिकृत्यरतः, **'इणमेव निग्गंथे पावयणे अट्ठे परमट्ठे सेसे अणट्ठे त्ति'** सिद्धान्तोक्तरीत्या वर्त्तमानः, सर्वव्यापारेषु सर्वप्रयत्नेन यतनयैव प्रवर्त्तमानः, सर्वत्राप्यप्रतिबद्धचित्तः, क्रमान्मोहजयनिष्ठः, पुत्रभ्रातृव्यादीनां गृहभारक्षमत्वावधि अन्यथापि वा कियन्तं समयमतिवाह्योचितसमये आत्मानं तोलयित्वाऽर्हच्चैत्येष्वष्टाह्निकामहं, चतुर्विधसङ्घपूजां, दीनाऽनाथादीनां यथाशक्तिदानं सुहृत्स्वजनपरिचितजनक्षमणादि च विरचय्य विधिना सर्वविरतिं प्रतिपद्यते, सुदर्शनश्रेष्ठ्यादिवत् । यतः—

**सव्वरयणामएहिं, विभूसिअं जिणहरेहिं महिवलयं । जो कारिज्ज समग्गं, तओ वि चरणं महिड्ढीअं ॥**

**नो दुष्कर्मप्रयासो न कुयुवतिसुतस्वामिदुर्वाक्यदुःखं, राजादौ न प्रणामोऽशनवसनधनस्थानचिन्ता न चैव ।**
**ज्ञानाप्तिर्लोकपूजा प्रशमसुखरतिः प्रेत्य मोक्षाद्यवाप्तिः श्रामण्येऽमी गुणाः स्युस्तदिह सुमतयस्तत्र यत्नं कुरुध्वम् ॥** द्वारं १४।

जातु किञ्चिदालम्बनेन तादृक् शक्त्यभावादिना वा दीक्षामादातुं न शक्नोति, तदा आरम्भवर्जनादि कुर्यादित्याह- **अथवा आरम्भस्य त्यागः** परिहारः कार्यः । तत्र पुत्रादेश्चिन्ताकर्तुः सद्भावे सर्वं तदभावे तु यथानिर्वाहं सर्वसचित्ताहारादिकं कियन्तमारम्भं वर्जयेत्, सम्भवे स्वार्थमन्नपाकाद्यपि । यतः—

**जस्स कए आहारो, तस्सट्ठा चेव होइ आरंभो । आरंभे पाणिवहो, पाणिवहे दुग्गई चेव ॥** द्वारं १५।

तथा **ब्रह्म** शीलं यावज्जीवं स्वीकार्यम् । यथा साधुपेथडेन द्वात्रिंशे वर्षे ब्रह्मोदचारि सौवर्णिकभीममड्यागमने । ब्रह्मफलमर्थदीपिकायामुक्तम् । द्वारम् १६।

तथा **प्रतिमादि**स्तपोविशेषः कार्यः । आदिशब्दात् संसारतारणादिदुस्तपतपोविशेषग्रहः । तत्र प्रतिमा मासिकाद्याः । ताश्चैवमूचुः—

**दंसण वय सामाइअ पोसह पडिमा अबंभ सच्चित्ते । आरंभ पेस उद्दिट्ठवज्जए समणभूए अ ॥**

तत्र राजाभियोगादिषडाकाररहितं, चतुःश्रद्धानादिगुणोपेतं, सम्यग्दर्शनं, भयलोभलज्जादिभिरप्यनतिचरंस्त्रिकालदेवपूजादिपरो मासमात्रं सम्यक्त्वमनुपालयति इत्येषा प्रथमा प्रतिमा । द्वौ मासौ यावदखण्डितान्यविराधितानि च पूर्वप्रतिमानुष्ठानसहिता-न्यणुव्रतानि पालयतीति द्वितीया । त्रीन् मासान् उभयकालमप्रमत्तः पूर्वोक्तप्रतिमानुष्ठानसहितः सामायिकमनुपालयतीति तृतीया । चतुरो मासांश्चतुष्पर्व्यां पूर्वप्रतिमानुष्ठानसहितोऽखण्डितं परिपूर्णं पौषधं पालयतीति चतुर्थी । पञ्चमासांस्त्यक्तस्नानो रात्रौ चतुर्विधाहारवर्जी दिवा ब्रह्मचार्येवाऽबद्धपरिधानकच्छश्चतुष्पर्व्यां गृहे तद् द्वारे चतुष्पथे वा परीषहोपसर्गादिनिष्कम्पकायोत्सर्गं पूर्वोक्तप्रतिमानुष्ठानं पालयन् सकलां रात्रिमास्ते इति पञ्चमी । एवं वक्ष्यमाणास्वपि प्रतिमासु पूर्वप्रतिमानुष्ठाननिष्ठाऽवसेया । नवरं, षण्मासान् ब्रह्मचारी भवतीति षष्ठी । सप्तमासान् सचित्ताहारान् परिहरतीति सप्तमी । अष्टौ मासान् स्वयमारम्भं न

करोतीत्यष्टमी। नव मासान् प्रेष्यैरप्यारम्भं न कारयतीति नवमी । दश मासान् क्षुरमुण्डी शिखाधारी वा निधानीकृतार्थजातस्य स्वजनैः प्रश्ने परिज्ञाने दर्शयन्नन्यथा न जानामीति ब्रुवाणः शेषं गृहकृत्यं सर्वं वर्जयन्नात्मार्थं निष्पन्नमाहारमपि न भुङ्क्ते इति दशमी । एकादशमासांस्त्यक्तगृहादिसङ्गः कृतलोचः क्षुरमुण्डो वा रजोहरणपतद्ग्रहादिमुनिवेशधारी स्वायत्तेषु गोकुलादिषु वसन् प्रतिमाप्रतिपन्नाय श्रमणोपासकाय भिक्षां दत्तेति वदन् धर्मलाभशब्दोच्चारणरहितं सुसाधुवत्समाचरतीत्येकादशी । इति श्राद्धप्रतिमास्वरूपम् । द्वारं १७।

तथा **अन्ते** आयुषः प्रान्ते **आराधना** वक्ष्यमाणस्वरूपा संलेखनादिविधिना कार्या । अयमर्थः—

**सोऽथाऽऽवश्यकयोगानां, भङ्गे मृत्योरथागमे । कृत्वा संलेखनामादौ, प्रतिपद्य च संयमम् ॥**

इत्युक्तः श्रावकोऽवश्यकर्त्तव्यानां पूजाप्रतिक्रमणादीनां कर्तुमशक्तौ मृत्योरासत्तौ वा द्रव्यभावाभ्यां द्विविधां संलेखनां करोति। तत्र द्रव्यसंलेखना क्रमेणाऽऽहारत्यागः, भावसंलेखना तु क्रोधादिकषायत्यागः । यतः—

**देहंमि अ संलिहिए, सहसा धाऊहिं खिज्जमाणेहिं । जायइ अट्टज्झाणं, सरीरिणो चरमकालम्मि ॥**

**न ते एयं पसंसामि, किसं साहुसरीरयं । कीसते अंगुलीभग्गा, भावसंलिहमाचर ॥**

मृत्योरासत्तिश्च स्वप्नोपश्रुतिदेवतादेशादिना निर्धार्या । आह हि—

**दुःस्वप्नैः प्रकृतित्यागैर्दुर्निमित्तैश्च दुर्ग्रहैः । हंसचारान्यथात्वैश्च ज्ञेयो मृत्युः समीपगः ॥**

एवं संलेखनां कृत्वा सकलश्रावकधर्मस्योद्यापनार्थमिवान्तेऽपि संयमं प्रतिपद्यते । यतः—

**एगदिवसंपि जीवो, पव्वज्जमुवागओ अणन्नमणो । जइवि न पावइ मुक्खं, अवस्स वेमाणिओ होइ ॥**

नलनृपभ्रातृकूबेरपुत्रो नवोढः पञ्चदिनायुर्ज्ञान्युक्तं श्रुत्वा प्रव्रजितः सिद्धः । हरिवाहननृपो नवप्रहरायुर्ज्ञान्युक्त्या प्रव्रज्य सर्वार्थसिद्धिं गतः । संस्तारकदीक्षावसरे च प्रभावनाद्यर्थं यथाशक्ति धर्मव्ययः कार्यः । यथा तदवसरे सप्तक्षेत्र्यां सप्तकोटिद्रव्यव्ययं थिरापद्रीयः सङ्घपति-आभूश्चक्रे । यस्य तु न संयमयोगः स संलेखनां कृत्वा शत्रुञ्जयतीर्थादिसुस्थाने निर्दोषस्थण्डिले विधिना चतुर्विधाहारप्रत्याख्यानरूपमनशनमानन्दादिवत्प्रतिपद्यते । यतः—

**तवनिअमेण य मुक्खो, दाणेण य हुंति उत्तमा भोगा । देवच्चणेण रज्जं, अणसणमरणेण इंदत्तं ॥**

लोकेऽपि—**समाः सहस्राणि च सप्त वै जले, दशैव चाग्नौ पवने च षोडश ।**
**महाहवे षष्टिरशीतिगोग्रहे, अनाशने भारत ! चाक्षया गतिः ॥**

ततः सर्वातिचारपरिहारचतुःशरणादिरूपामाराधनां कुर्यात् । दशद्वारात्मिका त्वाराधनैवं प्रोक्ता—

**आलोअसु अइआरे, वयाइं उच्चरसु खमसु जीवेसु । वोसिरसु भाविअप्पा, अट्ठारस पावठाणाइं ॥**

**चउसरणं दुक्कडगरिहणं च सुकडाणुमोअणं कुणसु । सुहभावणं अणसणं, पंचनमुक्कारसरणं च ॥**

एवमाराधनया यदि तद्भवे न सिध्यति तदापि सुदेवसुमनुष्यभवाष्टकान्तः सिद्ध्यत्येव, '**सत्तट्ठभवग्गहणाइं नाइक्कमेइ**' इत्यागमात् । द्वारं १८। इति षोडशगाथार्थः ॥

उपसंहरन् दिनकृत्यादिफलमाह—

**एअं गिहिधम्मविहिं, पइदिअहं निव्वहंति जे गिहिणो ।**
**इहभवि परभवि निव्वुइसुहं लहुं ते लहंति धुवं ॥१७॥**

**एव**मनन्तरोदिनं **गृहिणः** श्राद्धस्य **धर्मविधिं** दिनकृत्यादिद्वारषट्कात्मकं **प्रतिदिवसं** निरन्तरं **निर्वहन्ति** सम्यक् पालयन्ति, **ये गृहिणः** श्राद्धा, **त इहा**स्मिन् वर्त्तमाने **भवे परस्मिन्ना**गामिन्यनन्तरे भवाष्टकान्तः परंपरे वा भवे **निर्वृतिः** सौस्थ्यं तया हेतु-भूतया **सुखं** पुनरावृत्तिव्याख्यया निर्वृतिर्मोक्षः तत्सुखं च **लघु** शीघ्रं **ध्रुव**मवश्यं ते **लभन्ते** प्राप्नुवन्ति । इति सप्तदशगाथार्थः ॥

**इति श्रीतपागच्छाधिपश्रीसोमसुन्दरसूरि-श्रीमुनिसुन्दरसूरि-श्रीजयचन्द्रसूरि-**
**श्रीभुवनसुन्दरसूरिशिष्य-श्रीरत्नशेखरसूरिविरचितायां श्रीविधिकौमुदीनाम्न्यां**
**श्राद्धविधिप्रकरणवृत्तौ जन्मकृत्यप्रकाशकः षष्ठः प्रकाशः ॥६॥**
**॥ समाप्तं श्रीश्राद्धविधिप्रकरणम् ॥**

# अथ प्रशस्तिः

विख्याततपेस्याख्या, जगति जगच्चन्द्रसूरयोऽभूवन् । श्रीदेवसुन्दरगुरूत्तमाश्च तदनुक्रमाद्विदिताः ॥१॥

पञ्च च तेषां शिष्यास्तेष्वाद्या ज्ञानसागरा गुरवः । विविधावचूर्णिलहरिप्रकटनतः सान्वयाह्वानाः ॥२॥

श्रुतमतविविधालापकसमुद्धृताः समभवंश्च सूरीन्द्राः । कुलमण्डना द्वितीयाः, श्रीगुणरत्नास्तृतीयाश्च ॥३॥

षट्दर्शनवृत्तिक्रियारत्नसमुच्चयविचारनिचयसृजः । श्रीभुवनसुन्दरादिषु भेजुर्विद्यागुरुत्वं ये ॥४॥

श्रीसोमसुन्दरगुरुप्रवरास्तुर्या अहार्यमहिमानः । येभ्यः सन्ततिरुच्चैर्भवति द्वेधा सुधर्मभ्यः ॥५॥

यतिजीतकल्पविवृतश्च पञ्चमाः साधुरत्नसूरिवराः । यैर्मादृशोऽप्यकृष्यत करप्रयोगेण भवकूपात् ॥६॥

श्रीदेवसुन्दरगुरोः, पट्टे श्रीसोमसुन्दरगणेन्द्राः । युगवरपदवीं प्राप्तास्तेषां शिष्याश्च पञ्चैते ॥७॥

मारीत्यवमनिराकृतिसहस्त्रनामस्मृतिप्रभृतिकृत्यैः । श्रीमुनिसुन्दरगुरवश्चिरन्तनाचार्यमहिमभृतः ॥८॥

श्रीजयचन्द्रगणेन्द्रा, निस्तन्द्राः सङ्घगच्छकार्येषु । श्रीभुवनसुन्दरवराः, दूरविहारैर्गणोपकृतः ॥९॥

विषममहाविद्यातद्विडम्बनाब्धौ तरीव वृत्तिर्यैः । विदधे यज्ज्ञाननिधिं, मदादिशिष्या उपाजीवन् ॥१०॥

एकाङ्गा अप्येकादशाङ्गिनश्च जिनसुन्दराचार्याः । निर्ग्रन्था ग्रन्थकृतः, श्रीमज्जिनकीर्तिगुरवश्च ॥११॥

एषां श्रीसुगुरूणां, प्रसादतः षट्खतिथिमिते ( १५०६ ) वर्षे ।
श्राद्धविधिसूत्रवृत्तिं, व्यधित श्रीरत्नशेखरः सूरिः ॥१२॥

अत्र गुणसत्रविज्ञावतंसजिनहंसगणिवरप्रमुखैः । शोधनलिखनादिविधौ व्यधायि सान्निध्यमुद्युक्तैः ॥१३॥

विधिवैविध्याच्छ्रुतगतनैयत्याऽदर्शनाच्च यत् किञ्चित् । अत्रोत्सूत्रमसूत्र्यत, तन्मिथ्यादुष्कृतं मेऽस्तु ॥१४॥

विधिकौमुदीति नाम्न्यां, वृत्तावस्यां विलोकितैर्वर्णैः ।
श्लोकाः सहस्रषट्कं, सप्तशती चैकषष्ट्यधिका ( ६७६१ ) ॥१५॥

श्राद्धहितार्थं विहिता, श्राद्धविधिप्रकरणस्य सूत्रयुता । वृत्तिरियं चिरसमयं, जयताज्जयदायिनी कृतिनाम् ॥१६॥

॥ इति प्रशस्तिः ॥

॥ इति तपागच्छनायकश्रीरत्नशेखरसूरिकृता विधिकौमुदीनाम्नी श्राद्धविधिप्रकरणवृत्तिः समाप्ता ॥

( सर्वग्रन्थश्लोकमानं ६७६१ )

॥ समाप्तमिदं स्वोपज्ञवृत्तियुतं श्राद्धविधिप्रकरणम् ॥

श्री विजयदान-प्रेम-रामचन्द्रसूरि ग्रंथमाला - ३





प्रवचन प्रकाशन